अङ्कः-12, 2023-24
ISSN: 2249-538X

# वाक्यार्थभारती

A UGC Carelisted and Peer-reviewed research journal

प्रधानसम्पादकः

आचार्यः हंसधरझाः

कार्यकारी सम्पादकः

डा. एस्. वेङ्कटेशताताचार्यः

केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A++ श्रेण्या प्रत्यायितः
श्रीराजीवगान्धीपरिसरः
मेणसे, शृङ्गेरी - ५७७१३९, (कर्णाटकराज्यम्)

Vol-12, 2023-24
ISSN: 2249-538X

# Vākyārthabhāratī

Chief Editor
Prof. Hansdhar Jha

Executive Editor
Dr. S. Venkatesha Tatacharya

Central Sanskrit University
Established by an Act of Parliament
Accredited with A++ grade by NAAC
Shri Rajiv Gandhi Campus
Menase, Sringeri - 577139

Title : Vākyārthabhāratī

Publisher : The Director
Central Sanskrit University
Shri Rajiv Gandhi Campus
Sringeri – 577 139 (Karnataka)

E-mail : director-sringeri@csu.co.in

Phone : 08265-250258

Chief Editor : Prof. Hansdhar Jha

Editorial Board : Dr. Suryanarayan Bhat
Dr. S. Venkatesha Tatacharya
Dr. Pramod Bhat
Vidwan Niranjan Bhat
Dr. Raghavendra P. Arolli

Year : 2024

ISSN : 2249-538X

Design : Dr. Raghavendra P. Arolli, Dr. Raveesha N

© All the rights are reserved for Publisher. Provided that contributors are responsible for their respective articles.

**प्रो. श्रीनिवास वरखेड़ी**
कुलपति
**केन्द्रीय संस्कृत विश्वविद्यालय**
संसद के अधिनियम द्वारा स्थापित
(पूर्व मे राष्ट्रिय संस्कृत संस्थान,
शिक्षा मन्त्रालय, भारत सरकार के अधीन)

**Prof. Shrinivasa Varkhedi**
Vice-Chancellor
**Central Sanskrit University**
Established by an Act of Parliament
(Formerly Rashtriya Sanskrit Sansthan,
Under Ministry of Education, Govt. of India)

श्रावण शुक्ल दशमी, वि. सं. २०८१
दिनाङ्कः - १५-०८-२०२४



# शुभाशंसनम्

अखिले भारते व्याप्तस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य शृङ्गगिरिस्थः श्रीराजीवगान्धीपरिसरः छात्राणां शास्त्रग्रन्थनिगूढतत्त्वबोधने बद्धकङ्कणो विराजते । तत्र च निखिलशास्त्रपारदृश्वनां दक्षिणाम्नायश्रीशारदापीठाधीश्वराणामुभयेषां जगद्गुरूणां कृपाकटाक्षः परमं कारणम् । शास्त्रार्थचिन्तने यथा सभायां वाक्यार्थनिरूपणं महत्त्वपूर्णं, तथैव शास्त्रीयग्रन्थानां नानाव्याख्यानादिपरिशीलनपूर्वकं वाक्यार्थनिबन्धनमपि अत्यन्तं महत्त्वपूर्णम् । तत्राद्यं वाक्यार्थपरिषद्द्वारा निर्वहति परिसरः । द्वितीयं च वाक्यार्थभारतीति प्रतिष्ठितां पत्रिकां प्रकाश्येति नितरां हृष्यति मे हृदयम् । अत्र परिसरीयाणां बाह्यानां च विदुषां चिताः उत्तमाः शोधलेखाः सङ्गृह्यन्त इति अवश्यमेव विषयगाम्भीर्येण शोधपत्रिकेयमभिनन्दनीया । संस्कृतोत्सवावसरे श्रीमज्जगद्गुरुचरणाः स्वयमिमां पत्रिकामाविष्कुर्वन्तीति धन्योऽयं परिसरो विश्वविद्यालयश्च । एतत्प्रकाशनकर्मणि कृतसङ्कल्पान् कृतश्रमांश्च परिसरनिदेशकम् आचार्यहंसधरझामहोदयं, शोधपत्रिकासम्पादनसमितिसदस्यान् मूल्याङ्कनसमितिसदस्यांश्च हृदयेनाभिनन्दामि । शास्त्रं सुचिन्तितमपि पुनः परिचिन्तनीयमित्युक्तिमनुसरन्तो विद्वांसः शास्त्रार्थनिबन्धनमिषेण स्वीयं शास्त्रार्थज्ञानं रक्षित्वा वर्धयित्वा च छात्रेष्वपि शास्त्रार्थलेखनपाटवमादधत्विति आशासानः श्रीशारदाम्बायाः श्रीमज्जगद्गुरुचरणानां च पादपद्मेषु प्रणतिततीः समर्पयन् विरमामि ।

(प्रो. श्रीनिवास वरखेड़ी)
कुलपतिः

56-57, संस्थानिक क्षेत्र, जनकपुरी, नई दिल्ली - 110058
56-57, Institutional Area, Janakapuri, New Delhi -110058 (INDIA)
Ph.: (O) 011-28523949, EPABX: 28524993, 28521994, 28524995
EMAIL : vicechancellorcsu@gmail.com/ vc@csu.co.in, WEBSITE : www.sanskrit.nic.in

**प्रो. रा. गा. मुरली कृष्ण**
कुलसचिव (प्र.)
**केन्द्रीय संस्कृत विश्वविद्यालय**
संसद के अधिनियम द्वारा स्थापित
(पूर्व मे राष्ट्रिय संस्कृत संस्थान,
शिक्षा मन्त्रालय, भारत सरकार के अधीन)

**Prof. R. G. Murali Krishna**
Registrar (I/c)
**Central Sanskrit University**
Established by an Act of Parliament
(Formerly Rashtriya Sanskrit Sansthan,
Under Ministry of Education, Govt. of India)



## शुभसन्देशः

विद्याधिष्ठात्र्याः श्रीशारदाम्बायाः पुण्यस्थाने श्रीशङ्करभगवत्पादानां च तपोमहिमप्रसिद्धे शृङ्गगिरौ केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीराजीवगान्धीपरिसरः शास्त्रविद्यायाः प्रसारको भूत्वा वरीवर्ति इति महान् मोदावहो विषयः । भारतीयविद्यासु निःश्रेयससाधनभूतत्वात् प्रधानं शास्त्रविद्या इति तु सुविदितमेव समेषाम् । तस्मात् शास्त्रविद्यायाः संरक्षणाय, तस्याः प्रचाराय प्रसाराय च सर्वैः भारतभूमिसञ्जातैः बद्धादरैः भाव्यम् । संस्कृतवाङ्मयान्तर्गतविद्यानां संरक्षणप्रसारप्रचारादिकार्यार्थमेव विविधानि कार्याणि केन्द्रीयसंस्कृतविश्वविद्यालयेन आयोज्यन्ते । तदनुसृत्य विश्वविद्यालयस्य अङ्गभूतोऽयं श्रीराजीवगान्धीपरिसरोऽपि विश्वविद्यालयस्य यशः सर्वासु दिक्षु वर्धयन् राराज्यते । परिसरेऽस्मिन् शास्त्रार्थपरम्परां वर्धयितुं वाक्यार्थपरिषद् इति विशिष्टा काचित् परिषद् घटिता अस्ति इत्यपि परिसरस्यास्य वैशिष्ट्यम् । तया च परिषदा समग्रभारतात् अनेकेषां विदुषां संस्कृतवाङ्मयसम्बद्धानि लेखनानि सङ्गृह्य 'वाक्यार्थभारती' इत्यभिधा वार्षिकी पत्रिका सम्पाद्यते इति महदिदं प्रमोदस्थानम् अस्माकम् । संस्कृतोत्सवस्य सुसन्दर्भे एव अस्याः लोकार्पणं भवतीत्यपि पत्रिकायाः अस्याः वैशिष्ट्यम् । अनेन च सर्वे लोकाः नूनमेव उपकृताः भवन्तीति दृढं विश्वसिमि । श्रीजगद्गुरूणां श्रीशारदाम्बायाश्च परमानुग्रहविशेषेण परिसरोऽयम् इतोऽपि शास्त्रार्थज्ञानवर्धनकर्मणि समेधताम् इति आशासे ।

इत्थं
विदुषां विधेयः

**प्रो. रा. गा. मुरली कृष्ण**
**कुलसचिव (प्र.)**

56-57, संस्थानिक क्षेत्र, जनकपुरी, नई दिल्ली - 110058
56-57, Institutional Area, Janakapuri, New Delhi -110058 (INDIA)
Ph.: (O) 011-28523949, EPABX: 28524993, 28521994, 28524995
EMAIL : registrar@csu.co.in/ ps2registrar@csu.co.in, WEBSITE : www.sanskrit.nic.in

आचार्यः हंसधरझाः
निदेशकः
केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीराजीवगान्धीपरिसरः, मेणसे, शृङ्गेरी

Prof. Hansdhar Jha
Director
Central Sanskrit University
Shri Rajiv Gandhi Campus, Sringeri - 577 139



# पुरोवाक्

नाविदितं सुरसरस्वतीसमुपासकानां विपश्चितां यद्भारतवर्षे प्राचीनकालादेव प्रवर्तते वेदवेदाङ्गादिसंस्कृताध्ययनपरम्परेति । तामेव संस्कृताध्ययनपरम्परां सारयितुं नवीकर्तुम्पुनःप्रतिष्ठापयितुञ्च भारतशासनं सप्तत्युत्तरोनविंशतिशततमे (1970) ख्रीष्टाब्दे देशस्य राजधान्यान्देहल्यां राष्ट्रियसंस्कृतसंस्थानं स्थापयामास । सम्प्रति केन्द्रीयसंस्कृतविश्वविद्यालयत्वेन परिणतस्यास्य विद्यासंस्थानस्य नैके परिसरा राराज्यन्ते देशस्य विभिन्नप्रान्तेषु, यत्र सर्वत्रैव प्राच्यभारतीयविद्यानामध्ययनं, प्रशिक्षणमनुसन्धानञ्च जायमानमस्त्यनवच्छिन्नरूपेण । तस्मिन्नेव क्रमे जगन्मङ्गलकारि-शारदाम्बाङ्कगतस्साक्षाच्छिवावतार-जगद्गुरुशङ्कराचार्यकृपा-कवच-परिरक्षितश्शृङ्गगिरिपरिसरः प्रारम्भत एवानवरतं संस्कृतविद्यायाः प्रचारप्रसारयोर्बद्धपरिकरोऽस्ति । क्रमेऽस्मिञ्छात्राणां विदुषाञ्च लेखनकौशलं संवर्धयितुम्पद्यसर्जनपाटवं प्रकटयितुमभ्यर्जितञ्ज्ञानञ्च लेखनीमाध्यमेनोद्भासयितुम्परिसरेणानेन नैकविधपत्रिकाणाङ्ग्रन्थानाञ्च क्रियते प्रकाशनम् । तत्र हि च्छात्राणां शोधाध्येतॄणाञ्चोत्साहवर्धनाय समुत्कर्षाय च तेषाङ्गद्यपद्यरचना भवन्त्येव प्रकाशिताः, स्व-स्वशास्त्रधुरीणानां विदुषां सरसास्सारगर्भिता ज्ञानविज्ञानमयाश्शोधनिबन्धा अपि भवन्ति प्रकाशिताः।

तदस्मिन्नेव क्रमे वाक्यार्थपरिषदि वाक्यार्थविधातृभिर्विद्वद्भिस्तदितरैः परिसरीयविद्वद्भिर्देशस्य प्रख्यातैरन्यैर्विपश्चिद्भिः समर्पितैर्विविधैर्ज्ञानविज्ञानमयैश्शोधनिबन्धैर्गुम्फिता द्वादशाङ्करूपेण वाक्यार्थभारती-तिनाम्नी शोधपत्रिका प्रतिवर्षमिव ऐषमोऽपि प्राकाश्यमेतीति हर्षप्रकर्षविषयः।

एवं हि शास्त्रेषु बद्धादरैर्यैर्विपश्चिद्भिः परिसरीयेतरैः परिसरीयैर्वा शोधपत्रिकायामत्र प्रदत्तानि ज्ञानविज्ञानमयानि शोधपत्राणि तेषां समेषाङ्कृते हृदयेन सकार्तज्ञ्यं धन्यतामाविष्करोमि। सन्दर्भेऽस्मिन्नाविष्करोमि साभिवादनं कार्तज्ञ्यं स्वनामधन्यानां विश्वविश्रुतानां कर्मयोगिनामस्मत्कुलपतीनामाचार्य- श्रीनिवासवरखेडिमहोदयानामपि, येषामनुग्रहेणैवंविधानि सारस्वतकार्याणि अनवच्छिन्नतया निर्बाधरूपेण प्रवर्तमानानि सन्ति। क्रमेऽस्मिन्नेव सादरं स्मरणीयाः सन्ति अस्मद्युवकुलसचिवा आचार्या आर-जी-मुरलीकृष्णमहोदया अपि, येषां सकारात्मकसहयोगेनैवंविधानि कार्याण्यस्माभिर्निर्बाधरूपेण सम्पाद्यन्ते। एवमेव क्रमेऽस्मिन्नभिनन्दनीयाः सन्ति अस्माकं विद्वांसः सम्पादकसमितिसदस्याः प्रो.सूर्यनारायणभट्ट-डा. वेंकटेशताताचार्य-डा.प्रमोदभट्ट-डा.निरञ्जनभट्ट-डा.राघवेन्द्रआरोल्लिमहोदयाः, ये खलु रात्रिन्दिवं परिश्रम्य पत्रिकाया अस्या विहितवन्तः सम्पादनम्। एवञ्चैतत्पत्रिकासम्पादनकर्मणि ये केचन सन्ति कृतश्रमाश्शिष्टास्तेभ्यः, वाक्यार्थपरिषदः कार्यदर्शिप्रमुखेभ्यः, मूल्याङ्कनसमितिसदस्येभ्यश्च विद्वद्भ्यो धन्यवादान् आविष्करोमि ।

शुभावसरेऽस्मिन् श्रीशारदाम्बायाश्चरणारविन्दयोः प्रणिपत्य अस्मत्परिसरस्य सर्वविधहितचिन्तकानां ज्ञानतपोमूर्तीनाङ्करुणावरुणालयानामनन्तश्रीविभूषितानां श्रीश्रीभारतीतीर्थमहास्वामिनां, तत्करकमलसञ्जातानां श्रीश्रीविधुशेखरभारतीमहास्वामिनाञ्चानुग्रहाशीर्भिः परिसरीयाणां सर्वेषां श्रेयांसि भूयासुरित्याशास्महे ।

वाक्यार्थभारतीनामा शास्त्रीयज्ञानगुम्फिता ।
भासतां पत्रिका लोके कोविदैरनुमोदिता ॥

विद्वज्जनविधेयः

(आचार्यः हंसधरझाः)
निदेशकः

श्रावणीपूर्णिमा
19.08.2024

# सम्पादकीयम्

अयि मान्याः सुरभारतीसमुद्धासमानशास्त्रग्रन्थोक्ततत्त्वविदः तद्विविदिषवश्च गीर्वाणवाण्यभिमानिनः ! भवद्भ्यः संस्कृतभाषानिबद्धनानाशास्त्रवाक्यार्थनिरूपणनिपुणनिबन्धनिकरशोभिताम् ऐषमः वाक्यार्थभारतीनाम्नीं शोधपत्रिकां समुपहरन्तो नितरां मोदामहे । पत्रिकेयं केन्द्रीयसंस्कृतविश्वविद्यालयस्य शृङ्गगिरिस्थे श्रीराजीवगान्धीपरिसरे अध्यापयद्भिर्विद्वद्भिः छात्रप्रेरणाय विद्याविनोदाय च अध्यापकवाक्यार्थपरिषदि ये वाक्यार्था उपस्थापितास्तेषां निबन्धानां सङ्ग्रहरूपेण प्रकाशयितुमारब्धा । ततो गच्छता कालेन स्वविषयगाम्भीर्येण प्रसिद्धिं प्राप्तेयं पत्रिका विश्वविद्यालयानुदानायोगस्य विशिष्टपत्रिकासूच्यां (CARE list) स्वीकृता । तदनु न केवलमस्मत्परिसरीयाणामपि तु बाह्यानामपि विदुषां शोधनिबन्धा अत्र प्रकाश्यन्ते । एवं देशस्य नानाप्रदेशस्थैर्विद्वद्भिः प्रेषतैः शोधलेखैरेव इयं पत्रिका शोभत इत्यतः वाक्यार्थनिबन्धॄन् विदुषः प्रति हृदयेन कार्तज्ञ्यं बिभृमः । एतादृक्षस्य शोधलेखप्रकाशनकर्मणः अत्यावश्यकत्वं बोधयद्भ्यः विश्वविद्यालयस्य सर्वविधशैक्षिककार्यप्रेरणास्रोतोभ्यः दार्शनिकप्रवरेभ्यः अस्मत्कुलपतिवर्येभ्यः आचार्यश्रीनिवासवरखेडीमहोदयेभ्यः प्रणामपूर्वकं धन्यवादान् समर्पयामः । एवं विश्वविद्यालयस्य सर्वविधकार्येषु सहकुर्वद्भ्यः कुलसचिवेभ्यः प्रो. गायत्रीमुरलीकृष्णवर्येभ्योऽपि धन्यवादानाविष्कुर्मः । विश्वविद्यालयस्य शैक्षिकपरियोजनासंयुक्तनिदेशकेभ्यः विशिष्य एतादृशपत्रिकाप्रकाशनकार्ये अधिकृतेभ्यः डा. गणेश ति. पण्डितवर्येभ्यश्च धन्यवादान् समर्पयामो यैरेतत्सम्पादनरीतिं बोधयित्वा तत्रावश्यकं सौकर्यं च कल्पयित्वा अत्यन्तमुपकारो विहितः । शोधनिबन्धानां पत्रिकायामस्यां प्रकाशनार्हतां परीक्ष्य तत्र न्यूनतानिवारणोपायांश्च बोधयित्वा एतत्प्रकाशने कारणीभूतेभ्यः मूल्याङ्कनसमितिसदस्येभ्यो विद्वद्भ्यः प्रणामाञ्जलीन् समर्पयामः । अस्मत्परिसरस्य निदेशकेभ्यः कुशलप्रशासकेभ्यः दैवज्ञधुरीणेभ्यः आचार्येभ्यः हंसधरझामहोदयेभ्योऽपि सप्रणामं धन्यवादान् समर्पयामः ये खलु पत्रिकायाः अस्याः प्रधानसम्पादकाः । एतस्याः पत्रिकायाः आवरणस्वरूपादि प्रकल्प्य कृतसाहाय्याय परिसरीयसङ्गणकाध्यापकाय श्रीरवीशभट्टमहोदयायापि कृतज्ञतां निवेदयामः ।

अन्ते च यस्याः कृपया परिसरोऽयम् अनितरसाधारणतया विद्यया विद्योतते तस्याः क्षेत्राधिष्ठात्र्याः श्रीशारदाम्बायाः, येषां च कृपाकटाक्षाभिषेकेण परिसरः सर्वतोभावेन विकासमेति तेषां विद्यातपोमूर्तीनां दक्षिणाम्नायशृङ्गेरीशारदापीठाधीश्वराणां श्रीभारतीतीर्थमहास्वामिनां तत्करकमलसञ्जातानां श्रीविधुशेखरभारतीमहास्वामिनाञ्च सन्निधानेषु प्रणामपूर्वकं शोधपत्रिकामिमां भक्त्या समर्पयन्तो विरमामः ।

विद्वद्विधेयाः सम्पादनसमितिसदस्याः

डा.सूर्यनारायणभट्टः
डा.एस्. वेङ्कटेशताताचार्यः
डा.प्रमोदभट्टः
विद्वान् निरञ्जनभट्टः
डा.राघवेन्द्रः पी आरोल्ली

# विषयानुक्रमणिका


१. **ज्योतिष्टोमे दक्षिणानिर्णयः** – आचार्यः सूर्यनारायणभट्टः . . . . . . . . . . . . . . . . . . . . . . . . . . १

२. **काव्यशास्त्रदृष्ट्या लक्षणावृत्तिविचारः** – आचार्यः राघवेन्द्रभट्टः . . . . . . . . . . . . . . . . . . . . . . . . . . ५

३. **"तस्य निमित्तपतरीष्टिरि"त्यादिसूत्रत्रयस्य भाष्यवृत्तिकारमतानुसारेण व्याख्याद्वयम्** – डा. एस्. वेङ्कटेशताताचार्यः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . १२

४. **अरुणावाक्यार्थमीमांसा** – डा. श्रीरामः ए. एस्. . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . १८

५. **भूषणसारानुसारेण आख्यातार्थविचार :** – डा. प्रमोद भट्टः . . . . . . . . . . . . . . . . . . . . . . . . . . . . २३

६. **शब्दार्थयोः साहित्यविवेचनम्** – डा. कोम्पेल्लि विनयकुमारः . . . . . . . . . . . . . . . . . . . . . . . . . . २८

७. **व्याकरणदर्शने कालशक्तिः** – डा. प्रियव्रतमिश्रः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ३५

८. **न्यायव्याकरणदृष्ट्या शब्दार्थसम्बन्धविमर्शः** – डा. नारायणः बी. राय्कर् . . . . . . . . . . . . . . . . . . . . ४१

९. **वेदार्थनिर्णये ब्राह्मणग्रन्थानां योगदानम्** – डा. दुर्गाशरणरथः . . . . . . . . . . . . . . . . . . . . . . . . . ५०

१०. **भारतीय-आलयनिर्माणपद्धतिविवेचनम्** – डा. रमानन्द भट्टः एन् . . . . . . . . . . . . . . . . . . . . . . . . ६३

११. **उगितश्चसूत्रस्य गणकयन्त्रदृष्ट्या विमर्शः** – डा. काटूरि शिवकुमारी . . . . . . . . . . . . . . . . . . . . . . . ६६

१२. **भाट्टदीपिकोक्तः जातिशक्तिवादः** – डा. गोविन्दगोपालकृष्णहेगडे . . . . . . . . . . . . . . . . . . . . . . . . ७१

१३. **द्वे शते इत्यादौ वाक्यार्थः** – डा. राघवेन्द्रः पी आरोळ्ळी . . . . . . . . . . . . . . . . . . . . . . . . . . . . ७४

१४. **रथकाराधिकरणन्यायविमर्शः** – श्री. आदर्शविनायकभट्टः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ७७

१५. **कोऽयं नित्यसमासः ?** – डा. अरुण भट्टः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ८१

१६. **ऋ-ऌवर्णयोः मिथः सावर्ण्यं वाच्यमिति वार्त्तिकविमर्शः** – डा. पि. आर्. अर्चनाकारन्त् . . . . . . . . ८४

१७. **गुहाम्प्रविष्टाधिकरणम्** – श्री निरञ्जन भट्टः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ९२

१८. **न्यायवैशेषिकदर्शनयोः सृष्टिनिरूपणम्** – श्री शशांक शिवराम भट्टः . . . . . . . . . . . . . . . . . . . . . . . ९६

१९. **नाटकरचनावैचक्षण्यविचारः** – डा. एम्. श्रीनिवास मूर्ति . . . . . . . . . . . . . . . . . . . . . . . . . . . . . १०१

२०. **द्वारस्थापनदिक्कालविचारः** – डा. सुधांशुकुमारनन्दः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . १०५

२१. **रसवदाद्यलङ्कारसमालोचनम्** – डा. माचर्ल उमामहेश्वर रावु . . . . . . . . . . . . . . . . . . . . . . . . . ११०

२२. **समायोजनम्** – आचार्यः रामचन्द्रुलबालाजी . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . १११६
२३. **पारिवारिकमूल्यानां संरक्षणे गृहस्थाश्रमस्य काव्यानां च योगदानम्** – डा. श्रीकरः वि. . . . . . . . . १२०
२४. **पर्यावरणशिक्षायाः वैज्ञानिकं महत्त्वम्** – डा. वेङ्कटरमणभट्टः . . . . . . . . . . . . . . . . . . . . . . . १२५
२५. **योगदर्शनानुसारं न्यायाभिमतेश्वरस्य अनुशीलनम्** – डा. रविकुमारः शास्त्री . . . . . . . . . . . . . . . १३०
२६. **शिक्षायाम् अवधानम् आवधानिकप्रक्रियाश्च** – डा. रामजियावन प्रजापतिः . . . . . . . . . . . . . . . १३८
२७. **संस्कारसम्पादने कालस्य महत्त्वम्** – डा. विनोदकुमारशर्मा . . . . . . . . . . . . . . . . . . . . . . . . . १५१
२८. **रघुनाथशिरोमणिदिशा तत्त्वचिन्तामणिस्थतर्कप्रकरणविमर्शः** – डा. सुव्रतगायेनः . . . . . . . . . . . १५६
२९. **रघुनाथशिरोमणिदिशा आख्यातार्थविषये मण्डन-प्रभाकरमतविमर्शः** – डा. सन्तुसिंहः . . . . . . . . १६४
३०. **तत्त्वचिन्तामणेर्व्याप्तिपञ्चकस्य चतुर्थलक्षणे जगदीशमतविमर्शः** – डा. रिया पाल . . . . . . . . . . १७०
३१. **शिक्षायां शोधस्य आधारः** – डा. दयानिधिशर्मा . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . १७९
३२. **पुराणदृष्ट्या नियमयोगाङ्गविमर्शः** – डा. अरविन्दकुमारपाण्डेयः . . . . . . . . . . . . . . . . . . . . . . . . १८४
३३. **अद्वैतसिद्धौ तृतीयमिथ्यात्वविमर्शः** – श्री मञ्जेशः एम् . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . १९०
३४. **दण्डिवामनयोः रीतिमीमांसा** – श्रेयान् ब्यानार्जी . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . १९४
३५. **श्रीमद्भगवद्गीतायां परमपदप्राप्तौ अधिकारित्वनिरूपणम्** – देवज्योतिकुण्डुः . . . . . . . . . . . . . . . . २०३
३६. **उच्चस्तरे/उच्चशिक्षायाम् सरलमानकसंस्कृतस्य उपादेयता** – विनय कुमार शुक्लः . . . . . . . . . . २१०
३७. **आध्यात्मिकबुद्धौ सहसम्बन्धात्मकाध्ययनानि** – श्रीश समीर के. एस्. . . . . . . . . . . . . . . . . . . . . . २१६
३८. **शब्दार्थरत्ने साध्वसाधुशब्दविमर्शः** – डा. अभिजित् घोषः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . २२४
३९. **ज्योतिश्शास्त्रदृष्ट्या अध्यापनवृत्तिचिन्तनं तथा विशिष्टतया अध्यापनवृत्तेः विमर्शः** – कृष्णमूर्तिः एन् . . २३१
४०. **भागवतपुराणे पृथ्वीसङ्कल्पः** – आतिरा. सि . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . २३५
४१. **ब्राह्मणग्रन्थेषु ऋत्विग्वर्गविवेचनम्** – सर्वेश ओझा . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . २४१
४२. **सिद्धान्तज्यौतिषशास्त्रे ज्योत्पत्तिः** – गिरीशभट्टः बि . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . २५०
४३. **अद्वैतवेदान्तशास्त्रदृष्ट्या शङ्कराचार्यकृतस्य आत्मबोधस्य प्रकरणत्वसमीक्षणम्** – चन्दनः मुखार्जी . . . २६२



#2

# ज्योतिष्टोमे दक्षिणानिर्णयः

आचार्यः सूर्यनारायणभट्टः*

**शोधसारः –**

भगवता जैमिनिमहर्षिणा प्रणीते पूर्वतन्त्रे दशमाध्यायस्य तृतीये पादे ज्योतिष्टोमप्रकरणगतं **गौश्च अश्वश्च अश्वतरश्च गर्दभश्च अजाश्च अवयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणा** इति वेदवाक्यमाश्रित्य दक्षिणाविचारोऽयं प्रवृत्तः । तत्र द्वादशशतसंख्या कुत्र निविशते इति विचिन्त्य निर्णयो विहितः । **द्रव्यविधिसन्निधौ संख्या तेषां गुणत्वात्स्यात्** इति सूत्रेण प्रथमपूर्वपक्षमुद्भाव्य ऋत्विग्भ्यो दक्षिणां ददातीति विहितं दक्षिणादानमनूद्य तस्य द्वादशशतमित्यनेन प्रतिपादिता द्वादशशतं दक्षिणा कुत्र निविशत इति पूर्व-पूर्वमतानि निरस्य युक्त्या अन्ये केचन पूर्वपक्षा उपस्थापिताः । तान् सर्वानपि पूर्वपक्षान् प्रत्याख्याय **भागित्वाद्वा गवां स्यात्, प्रत्ययात्, लिङ्गदर्शनाच्चेति** त्रिभिः सूत्रैः ऋत्विजः प्रतिग्रहीतुः गव्येन आज्य-क्षीरादिना अग्निहोत्रदर्शपूर्णमासादिसिद्धेः, तासां माहात्म्यं दधिपयःप्रभृतिभिः दानपूजादिभिश्च उपकारभूयस्त्वं भवतीति प्रत्ययात्, त्रिरात्रे अहीने विकृतिसोमक्रतौ सहस्रदक्षिणा इति विधिवाक्यशेषः **"यावदस्य सहस्रस्य गौ"**रिति लिङ्गदर्शनाच्च अनिषिद्धगवादिविषयत्वेन उपपत्तेः गोः एव महोपकारकमुख्यविषयत्वमेवेति गवामेव द्वादशशतमिति यः सिद्धान्तः सः प्रस्तूयते ।

**प्रमुखशब्दाः – ऋत्विजः** = पुरोहिताः याजका वा, **ज्योतिष्टोमः** = ज्योतींषि स्तोमा यस्य सोऽयं ज्योतिष्टोमः, एष वाव प्रथमो यज्ञानामिति सर्वसोमप्रकृतिः यागविशेषः, **दक्षिणा** = ऋत्विजां परिक्रयणाय दीयमानं निर्दिष्टं शास्त्रीयं द्रव्यम् । आनतिकरत्वं दक्षिणाशब्दार्थः, **सत्रम्** = आसीरन् , उपेयुः इत्यादिचोदनाचोदितः बहुभिर्यजमानैरनुष्ठीयमानः बहुदिनसाध्यः ऋत्विगभिन्नयजमानकः अदक्षिणाकः यज्ञविशेषः, **अश्वतरः** = गर्दभेनाश्वायामुत्पन्नः अश्वविशेषः, **अविः** = मेषः छागो वा, **अहीनम्** = द्विरात्रप्रभृतय एकादशरात्रान्ता अहर्गणाः, **भागवती** = महाभागा, **आढकः** = अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ तु पुष्कलम् । पुष्कलानि च चत्वारि आढकः परिकीर्तितः, **प्रस्थः** = आढकचतुर्थांशरूपः परिमाणविशेषः ।

इष्टिपशुसोमयज्ञेषु प्रकृतिविकृतिभूतेषु सर्वेषु कर्मसु सत्रं वर्जयित्वा ऋत्विग्भ्यो दक्षिणां ददातीति शास्त्रमनुसृत्य दक्षिणा दीयते । आसीरन् , उपेयुः इत्यादि चोदनाचोदितं बहुभिर्यजमानैरनुष्ठीयमानं बहुदिनसाध्यं ऋत्विगभिन्नयजमानकं कर्मविशेषं सत्रमित्याहुः । तत्र ये यजमानास्त एव ऋत्विज इति यजमानातिरिक्ता हि ऋत्विजो न भवन्तीति दक्षिणाप्रसक्तिरेव न भवति । अत एव अदक्षिणाकानि सत्राणि, अदक्षिणाको हि यज्ञः सत्रमित्यामनन्ति । अतः सत्रं वर्जयित्वा इष्टिपशुसोमयज्ञेषु प्रकृतिविकृतिभूतेषु सर्वेषु कर्मसु शास्त्रेणैव **गौः दक्षिणा, वासो दक्षिणा, हिरण्यं**

*केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

**दक्षिणा, सर्वस्वं दक्षिणा**[१] इति तेषु तेषु कर्मसु निर्दिष्टा दक्षिणा विहिते काले दीयते ।

दक्षिणया परिक्रीता ऋत्विजः सोत्साहं यजमानस्य कार्यं कुर्युरिति सा भृतिरित्युच्यते । इयं दक्षिणा आनतिसाधनीभूतं द्रव्यम् । तदनु नैकदिनसाध्ये ज्योतिष्टोमे अपि दक्षिणा श्रूयते सा च माध्यन्दिनसवने दीयते । तत्र च **"गौश्च अश्वश्च अश्वतरश्च गर्दभश्च अजाश्च अवयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च । तस्य द्वादशशतं दक्षिणा"**[२] इति दक्षिणायाः संख्या श्रूयते । तत्र द्वादशाधिकं शतं द्वादशशतम् इत्यर्थः । अनेन **ऋत्विग्भ्यो दक्षिणां ददाति** इति वाक्येन प्राप्तदक्षिणोद्देशेन गवादिद्रव्यविधानमिति स्थितिः । सम्प्रति नैकविधाः संशयाः अत्र जायन्ते । यथा - किम् एकैकस्य गवादेः द्रव्यस्य द्वादशशतम् उत एकस्य द्रव्यस्य, यदा एकस्य तदा अनियमः यस्य कस्यचित् अथवा माषाणाम् । अथवा यस्य कस्यचित् एकजातीयस्य । यदा एकजातीयस्य तदा अनियमः यस्य कस्यचिदेकस्य उत पशूनाम् – यदा पशूनां तदा अनियमः यस्य कस्यचित् उत गवामेव वा इति । एवम् एतेषु पक्षेषु उपस्थितेषु प्रथमः पक्षः इत्थं – **"द्रव्यविधिसन्निधौ संख्या तेषां गुणत्वात् स्यात्"**[३] इति । गवादिद्रव्यविधिसन्निधौ श्रूयमाणा संख्या द्वादशशतमिति तेषां गवादीनां प्रत्येकं स्यात् गुणत्वात् । तत्र हि गवादिद्रव्याणि प्रधानानि, संख्या तद्गतो गुणः । प्रतिप्रधानं च गुणवृत्तिस्तु न्याय्या – अतः प्रत्येकं द्रव्येषु प्रत्येकमियं संख्या इति प्रथमः पक्षः । **समत्वात्तु गुणानामेकस्य श्रुतिसंयोगात्**[४] इति सूत्रेण यदि हि तस्येति गवादिद्रव्याणि प्रधानत्वेनोद्दिश्य द्वादशशतमिति विधीयेत तर्हि दक्षिणाशब्दो नान्वयं लभेत । दक्षिणात्वस्यापि विधाने वाक्यभेदप्रसङ्गात् नायं समीचीनः । । अतः मिलितानामेव इयं संख्या इति मिलितानामेव द्वादशशतमिति संख्याविकल्पः अभ्युपेयः । तदा एव समुच्चयवाचिनः चशब्दाः अनुगृह्यन्ते इति द्वितीयः पक्षः । नायमपि पक्षः स्वीकार्यः गुणानां च परार्थत्वादिति न्यायेन परस्परसम्बन्धो न भवतीति । किञ्च **तस्य** इति पदं विधेयां संख्यां विशिनष्टि । अत एकत्वं विवक्षितम् । तत्र च एकस्मिन्नेव द्रव्ये निविष्टामेव संख्यामादाय तद्विशिष्टादक्षिणा दत्ता भवति । तस्मात् गवादिष्वेकस्यैव द्रव्यस्य द्वादशशतसंख्या । अतः तस्य द्वादशशतं दक्षिणा इति श्रवणेन न सर्वेषां द्रव्याणाम् इयं संख्या कस्यचिदेकस्य इति प्रतीयते इति अपरः पक्षः ।

यदि एकस्य प्रतीयते तर्हि कस्येति जिज्ञासायां यस्य वा **सन्निधाने स्याद्वाक्यतो ह्यभिसम्बन्धः**[५] इति सूत्रेण सन्निधिना माषाणामेव ग्रहणम् उचितम् इत्युच्यते । यस्य माषपदस्य सन्निधौ तस्य द्वादशशतमिति श्रुतम् – तेनैव माषपदेन तस्य इत्येतदन्वेति सन्निधिरेव तद्विनिगमकः ।

[१]जैमिनीयन्यायमालाविस्तरः

[२]ताण्ड्यमहाब्राह्मणम् - १६.१.१०.११

[३]जैमिनिसूत्रम् - १०.३.३८

[४]जैमिनिसूत्रम्- १०-३-३९

[५]जैमिनिसूत्रम्- १०-३-४०

ननु दक्षिणाविधिप्रकरणे श्रुतेषु गवादिद्रव्येषु सन्निधिना यदि माषाः गृह्यन्ते तदपेक्षया प्रकरणस्य प्राबल्यात् यस्य कस्यचिद् ग्रहणमिति चेत् – वाक्यतो हि अभिसम्बन्धः – वाक्यप्रमाणतः अनुग्रहो भवति सहोच्चारणरूपं वाक्यं प्रकरणापेक्षया प्रबलमिति अव्यवहितसहोच्चारणं गवादीनां नास्ति माषाणामेव वर्त्तते इति माषा एव ग्राह्याः । तेषु एव द्वादशशतमिति संख्या निविशत इति अपरः कश्चन पक्षः ।

अयमपि पक्षः न उचितः । तस्य द्वादशशतं दक्षिणा इति द्वादशशतसंख्या केवलैः माषैः सह संयुक्ता न भवति । यतो हि माषाः चकारश्रुत्या विधीयन्ते तथैव इतराभिः चकारश्रुतिभिः गवादिद्रव्याणि विधीयन्ते । प्रतिद्रव्यं चकारनिर्देशबलेन तस्य इति माषाणां परामर्शः भवितुं नार्हति । किञ्च गवादिद्रव्याणां तु संख्यानिर्देशः लोके यथा दृश्यते तथा व्रीहिप्रभृतिद्रव्याणां निर्देशः न क्रियते । व्रीहियवादिधान्यद्रव्याणि आढकः प्रस्थ इति परिमाणविशेषैः गृह्यन्ते न तु एकः व्रीहिः, द्वौ व्रीही, विंशतिः यवाः, शतं तिलाः इत्यादि । किञ्च दक्षिणात्वेन द्वादशशतं तिलाः यदि दीयन्ते तावता भृतित्वं नूनं न सिध्यत्येव । पशुरूपद्रव्यस्यैव तच्छब्दपरामर्शात् तत्रापि मौल्याधिक्यात् अश्वेष्वेव संख्या निविशते इति कश्चन पक्षः । अयं पक्षः स्वीकर्तुं न शक्यः । **न केसरिणो ददातीति**[1] अनारभ्याधीतवचनेन सामान्यविहितस्य निषेधावगतेः अनिषिद्धगवादिविषयत्वेन नेतुं शक्यत्वात् गोद्रव्ये एव संख्यानिवेशः इति सिद्धान्त्यते । **भागित्वाद्वा गवां स्यादि**[2]ति सूत्रेण – **अत्र भाष्यमित्थम् – गवामेव द्वादशशतं स्यात् । कुतः भागित्वात् । भागवत्यो हि गावः महाभागाः । महत्युपकारे वर्तते । एवं च सति ऋत्विजाम् उपकारः कर्तव्यः । महत्तमे हि ते उपकारे वर्त्तन्ते । उपकुर्वतां हि उपकारः कर्त्तव्यः इति सदाचारः । एवं च सदाचारः अनुगृहीतो भविष्यति । यदि महाभागानां भूयसी संख्या दीयते । गावश्च महाभागाः तस्मात्तासां द्वादशशतम् ।** [3]

तासां माहात्म्यं दधिपयःप्रभृतिभिः दानपूजादिभिश्च उपकारभूयस्त्वं भवतीति प्रत्ययः । **"लिङ्गदर्शनाच्चे"**ति[4] सूत्रेण गवामेव द्वादशशतम् इत्यत्र प्रमाणम् उपलभ्यते । त्रिरात्रे अहीने विकृतिसोमक्रतौ सहस्रदक्षिणा इति विधिवाक्यशेषः **यावदस्य सहस्रस्य गौ**[5]रिति गोः अनुवादो दृश्यते । अतः गवामेव द्वादशशतम् । अतः तस्य द्वादशशतं दक्षिणा इत्यत्र नैकेषु द्रव्येषु श्रूयमाणेषु अनिषिद्धगवादिविषयत्वेन उपपत्तेः गोः एव महोपकारकमुख्यविषयत्वमेवेति गवामेव द्वादशशतमिति निर्णयः । अजादयस्तु कपिञ्जलाधिकरणन्यायेन त्रयः । माषादीनां तु परिमाणं प्रमाणान्तरात् स्वेच्छया व अवधेयम् । अतः सर्वथा गवामेव द्वादश शतमिति शम् ।

[1]भाट्टदीपिका -१०-०३-११
[2]जैमिनिसूत्रम् - १०.३.४६
[3]शाबरभाष्यम् - १०.३.४६
[4]जैमिनिसूत्रम् - १०.३.४८
[5]भाट्टदीपिका -१०-०३-११

**अनुशीलितग्रन्थाः -**

1. जैमिनीयन्यायमालाविस्तरः
2. भाट्टदीपिका
3. अध्वरमीमांसाकुतूहलवृत्तिः
4. शाबरभाष्यम्
5. श्रौतयज्ञप्रक्रिया-पदर्थानुक्रमकोशः

# काव्यशास्त्रदृष्ट्या लक्षणावृत्तिविचारः

आचार्यः राघवेन्द्रभट्टः*

**शोधसारः –**

शब्दार्थौ अन्वितावेव वर्तेते । अन्यथा शब्दार्थयोर्नैयत्यं न स्यात् । तत्र शब्दार्थयोरसावन्वयः कः स किंस्वरूपक इति गवेषणं विहितं व्याकरणमीमांसान्यायसाहित्यशास्त्रेषु । वैयाकरणादिभिः वृत्तिशब्देन च स अन्वयो निरूपितः । वर्तनार्थकाद् वृतुधातोः क्तिन्प्रत्यये निष्पन्नस्य वृत्तिशब्दस्य अर्थः क इत्यत्र शास्त्रज्ञा नैकाकारेणोत्तरन्ति । तत्र सङ्केतः शक्तिः इति वदन्तो नैयायिकाः इच्छासम्बन्धयोरन्यतरस्य पदार्थस्य वृत्तित्वमभ्युपगच्छन्ति । तथापि अस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छारूपा शक्तिरिति वदन्तस्ते इच्छायाः सम्बन्धरूपतामङ्गीकुर्वन्ति इत्यतः सम्बन्धस्यैव वृत्तित्वमिति सिद्ध्यति । अतः वृत्तिश्च शक्तिलक्षणान्यतरसम्बन्ध इति तैरुक्तम् । काव्यविद्भिस्तु सम्बन्धोत्तरभावी शब्दस्यार्थप्रतिपादकः व्यापारः वृत्तिरित्युच्यते । तैः अभिधा लक्षणा व्यञ्जना चेति त्रयः व्यापाराः अङ्गीकृताः ।

**प्रमुखशब्दाः** – शब्दः, अर्थः, सङ्केतः, सम्बन्धः, वृत्तिः, व्यापारः अभिदा, लक्षणा ।

सर्वो लोकव्यवहारः शब्दार्थमूलको वर्तते । वक्तुरभिप्रायः श्रोत्रा तदुक्तशब्दश्रवणाद्भवति । शब्दः वक्तुरभिप्रायं श्रोतरि प्रकाशयतीति वक्तुं शक्नुमः । लोकः शब्दमाश्रयते कञ्चनार्थमवगमयितुम् । श्रुताच्छब्दात् अर्थमवगत्य लोकस्तत्र प्रवर्तते । स शब्दस्तमर्थं प्रतिपादयतीति, तमेवार्थं प्रतिपादयतीति किञ्चन नैयत्यं शब्दार्थयोः परिलक्ष्यते । अतः शाब्दो व्यवहारो जगत्प्रवर्तयत इत्युच्यते । अत्र भाषा इति शब्द एव शब्दस्य रहस्यमुद्घाटयति । व्यक्तायां वाचीत्यर्थकाद् भाषधातोः निष्पन्नस्य भाषाशब्दस्य व्यक्ता वागित्यर्थः । सा भाषा शब्दार्थात्मिका भवति । शब्दः शब्दनार्थकशब्दधातोर्निष्पन्नः । तस्य शब्दनं वचनं वार्थः । सोऽर्थप्रत्यायकः । शब्देन प्रत्याय्यश्चार्थः । सकलापि सृष्टिरियं वाग्विवृतिरिति सर्वोऽपि प्रपञ्चोऽर्थरूपः शब्दात्मना ज्योतिषा प्रकाशत इति च शब्दविवर्तवादिनो वदन्ति ।

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥[१]
न सोऽस्ति प्रत्ययो लोके यश्शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥[२]

शब्दनिष्ठा शक्तिरेव जगन्नियामिका । तदसाधारणशक्तिमत्ता तु विनापि वस्तुसत्तां तद्वस्तु ज्ञापयति । तदुक्तं

*केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

[१]वा.प. १.१

[२]वा.प.१.१२३

वाक्यपदीये ' अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि' इति । जगतो वागर्थरूपता शिवपुराणे प्रतिपादिता । तत्र शब्दस्य त्रिस्रो विभूतयो निरूपिताः स्थूला सूक्ष्मा परा चेति । विभूतित्रयेण शब्दः अर्थजातं व्याप्य वर्तत इति, तदेव सर्वस्यापि प्रपञ्चस्य वागर्थात्म्यम् इति तत्र निरूपितम् । अतः सर्वोऽपि शब्दः सार्थकः । सर्वश्च पुनः सर्वार्थबोधकः । शिवपुराणानुसारं भुवनाध्वा, तत्त्वाध्वा, कलाध्वा चेति त्रयोऽध्वानोऽर्थस्य । मन्त्राध्वा, पदाध्वा, वाक्याध्वा चेति त्रयः शब्दस्य अध्वभिरेतैः प्रवर्तमानं जगत् वागर्थरूपतां धत्ते ।

निवेदयामि जगतो वागर्थात्म्यं कृतं यथा ।
षडध्ववेदनं सम्यक् समासान्न तु विस्तरात् ॥
भुवनाध्वा च तत्त्वाध्वा कलाध्वा चार्थतः क्रमात् ।
अत्रान्योन्यञ्च सर्वेषां व्याप्यव्यापकतोच्यते ॥[1]

लौकिकः सर्वोऽपि व्यवहारः शब्दाधीनो वर्तते यतः शब्दात् पदार्थज्ञानं भवति । शब्दः अर्थं प्रकाशयति स्वयञ्च प्रकाशते । यदभावे जगदेवान्धकाराविष्टं स्यात् । सर्वोऽपि जनः बुभुत्सितम् अनधिगतार्थं श्रोतारं बोधयितुमिच्छन् वाक्यमुच्चारयति । पदार्थं जिज्ञासुः शब्दं शृणोति । एवं लोकयात्रां निर्वाहयति शब्दः । काव्यादर्शे आचार्यो दण्डी -

इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥[2]

वायुपुराणे

शब्दजातमशेषं तु धत्ते शर्वस्य वल्लभा ।
अर्थरूपं यदखिलं धत्ते मुग्धेन्दुशेखरः ॥[3]

अशेषशब्दजातस्य धारयित्री भगवती उमा समस्तार्थजातस्य च धारकः शिव इति प्रतिपादितम् । विष्णुपुराणेऽपि सकलवाङ्मयप्रलापशब्दराशियुतस्य भगवतो विष्णोरंशतया शब्द उपपादितः ।

काव्यालापांश्च ये केचिद्गीतकान्यखिलानि च ।
शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः ॥[4] इति

[1] शिवपुराणम्, वायवीयसंहिता,अध्यायः २९
[2] काव्या. १.४
[3] वायु१२, १०
[4] सा.द.प्र.प. ७

एवं शब्दस्य अर्थप्रतिपादकत्वेन महिमा कीर्तितो वर्तते ।

काव्यशास्त्रे शब्दवृत्तिरिति कश्चन मुख्यो विषयः । ध्वनिरूपार्थः काव्यजीवातुभूतः । स च वृत्तिवेद्य इत्यतः शास्त्रेऽस्मिन् वृत्तिर्मुख्यतया निरूप्यमाणतामञ्चति । यद्यपि शब्दार्थसम्बन्धरूपा अर्थप्रतिपादकव्यापाररूपा वा वृत्तिः अभिधा लक्षणा वा शास्त्रान्तरे निरूपितो विषयः । ध्वन्यर्थस्य प्रतिपादकतया अङ्गीकृता व्यञ्जना तु काव्यशास्त्रस्यैव विषयः । तथापि काव्यार्थस्य ध्वनेर्व्यञ्जनाय व्यञ्जनाया एव क्षमत्वात् तत्प्रतिपाद्यार्थयोर्व्यञ्जकत्वेनोपकारकत्वाच्च आद्ये वृत्त्यपि अत्र शास्त्रे उपपादनीयतां भजेते ।

काव्यविदोऽपि पण्डितराजजगन्नाथादयः शब्दार्थयोः सम्बन्धं वृत्तिमभ्युपगच्छन्ति । वृत्तिरर्थप्रतिपत्तौ निमित्तम् । अतः तत्सम्बन्धसत्वे शब्दस्यार्थप्रतिपादनं भवति । यद्यपि व्यापार इत्यर्थान्तरं विद्यते । तथापि प्रतिपादकत्वापरपर्यायस्य तस्य ज्ञानमात्रेण अर्थप्रतिपत्तेरसम्भवात् व्यापारस्य वृत्तित्वकथनापेक्षया सम्बन्धस्यैव कथनं साधु । अत एव सिद्धे शब्दार्थसम्बन्धे इति, औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः इत्येव आचक्षाणाः शास्त्रविदः सम्बन्धं वृत्तिं मन्वते । वैयाकरणेन नागेशभट्टेनापि पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः वाच्यवाचकभावापरपर्याया इत्युक्त्वा शक्तेर्लक्षणं सम्बन्धपरमभ्युपगतम् ।

अन्ये आनन्दवर्धनमम्मटभट्टादयस्तु शब्दस्यार्थगतो व्यापारः वृत्तिरित्यामनन्ति । शब्दार्थयोः सम्बन्धसत्वात् सर्वेषां शब्दानां तत्तदर्थे प्रवृत्तिः । इयं प्रविक्तिः शब्दस्य अर्थप्रतिपादकतारूपो व्यापारविशेष एव । स व्यापारविशेषः शब्दार्थसम्बन्धमूलक एव भवति । अतः व्यापारं प्रति सम्बन्धस्य कारणत्वम् । एवं सति सम्बन्धव्यापारयोः वृत्तित्वं व्यापारस्यैव इति अमीषामाशयः ।

तर्हि वृत्तिर्नाम का ? इति जिज्ञासायाम् इदमुच्यते -

**शब्दार्थादिनिष्ठम् अर्थप्रतिपादकत्वं वृत्तिः ।**

यद्यपि सामान्यलक्षणं न केनाप्यालङ्कारिकेण अभिहितं तथापि तत्प्रतिपादितप्रभेदानां लक्षणं पर्यालोच्य एवमुच्यते । अर्थप्रतिपादकत्वं नाम अर्थप्रतीत्यनुकूलो व्यापारः । अर्थस्य प्रतिपादनमिति यावत् । यद्यपि शब्दोऽचेतन इति हेतोः चेतननिष्ठं प्रतिपादनं न युज्यते तथापि तच्छब्दस्य स्मारकत्वम् (स्मारणम्) इत्यर्थ इति न दोषः । शब्दो हि अर्थं स्मारयति ।

तत्र सङ्केतेन शब्दगतम् अर्थप्रतिपादकत्वम् अभिधा । शक्तिरिति नामान्तरम् । लक्षणा नाम मुख्यार्थबाधादिनिमित्तेन शब्दस्य अर्थप्रतिपादकत्वम् । इयम् अभिधा लक्षणा च शब्दगता । व्यञ्जनेति तृतीयः कश्चित् प्रकारो वर्तते । सा पुनः न केवलं शब्दे किन्तु अर्थादावपि वर्तते इति विशेषः । ता इमास्तिस्रो वृत्तयः । व्यञ्जना च


ISSN : 2249-538X

उच्चरद्भूरिकीलाल इत्यादौ शब्दे वर्तते, परिवृत्त्यसहत्वात् । अत्र वाहिनीपतिः वाहिनीपतिरिव इत्यौपम्यं व्यङ्ग्यम् । समानशब्दोपात्तत्वात् वाहिनीपतिः वाहिनीपतिरेवेति रूपकमिति जगन्नाथः । 'बलोऽवलोकयामास मातङ्गमिव केसरी' इत्यादौ अर्थे, शब्दानाम् परिवृत्तिसहत्वात् । अत्र हि शब्दाः परिवृत्तिं सहन्ते । तेष्वर्थेषु तदर्थकानाम् अन्येषामपि शब्दनां प्रयोगेऽपि व्यङ्ग्यस्य प्रत्ययात् । आदिशब्देन चेष्टाया ग्रहणम् । विशेषतश्चेयं रूपके । तत्र हि कटाक्षविक्षेपादिना अनुरागादेरर्थस्य व्यञ्जनं भवतीति सर्वेषाम् अनुभवसिद्धम् ।

वृत्तिः सम्बन्धरूपा उत व्यापाररूपा इत्यत्र मतभेदो वर्तते । नैयायिकाः वैयाकरणाः मीमांसकाश्च वृत्तिं सम्बन्धरूपां स्वीकुर्वन्ति । आलङ्कारिकाः प्राचीनवैयाकरणाश्च तां व्यापाररूपाम् अङ्गीकुर्वन्ति । यथा आचार्यः मम्मटः–

सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा ।
स मुख्योऽर्थस्तत्र व्यापारोऽस्याभिदोच्यते ॥
लक्षणारोपिता क्रिया ॥

'व्यापारः', 'क्रिया' इति पदं प्रयुङ्क्ते । अप्पयदीक्षिताः अपि - शक्त्या प्रतिपादकत्वम् अभिधा इत्याहुः । जगन्नाथस्तु शक्त्याख्य्ऽर्थस्य शब्दगतः शब्दस्यार्थगतो वा सम्बन्धविशेषोऽभिधा इति वृत्तिं सम्बन्धरूपां मनुते ।

सम्बन्धस्य वृत्तित्वं व्यापारस्य वा इत्यत्र विचार्यते । शब्दात् अर्थप्रतीतिर्यत्र भवति तत्र सर्वत्र इच्छा सम्बन्धः व्यापारश्चेति अंशत्रयमपेक्ष्यते । तत्र इच्छा स्वाभाविकमुख्यार्थप्रतिपत्तौ अस्माच्छाब्दादयमर्थो बोद्धव्यः इत्याकारेश्वरस्य कृत्रिममुख्यार्थप्रतिपत्तौ प्रयोक्तुः सा इति ज्ञातव्यम् । सा इच्छा एव सङ्केत इत्युच्यते । लक्ष्यार्थप्रतिपत्तौ गङ्गायां घोषः इत्यादौ व्यङ्ग्यार्थप्रतिपत्तौ च प्रयोक्तुः एव इच्छा । गङ्गाशब्दात् तीरार्थं बोधयामि इति गतोस्तमर्कः इत्यत्र अभिसरणाद्यर्थं बोधयामीति ।

इयम् इच्छा ईश्वरादेः वर्तते । ततः एव तत्तच्छब्दस्य तत्तदर्थेन सम्बन्धः ततः एव तत्तच्छब्दस्य तत्तदर्थे प्रवृत्तिः इति क्रमः । प्रवृत्तिश्च इयं व्यापारविशेषः । स च ज्ञापकत्वरूपः । सोऽपि श्रोतुः अगृहीतशक्तिकत्वे प्रमापकरूपः गृहीतशक्तिकत्वे तु स्मारकरूपः । एवं गतोस्तमर्कः इति व्यञ्ग्यार्थप्रतिपत्तिस्थलेऽपि सन्ध्यावन्दनसमयादिज्ञातचरस्यैव अर्थस्य ज्ञानविषयीकरणात् स्मारकरूपः अत्ता एत्थ णिमज्जइ इत्यादौ प्रमापकत्वरूपः इति विशेषः ।

**व्यापारः** सम्बन्धजन्यः इत्युक्तम् । सम्बन्धश्च मुख्यार्थप्रतिपत्तिस्थले शब्दार्थयोः वाच्यवाचकभावः, लक्ष्यार्थप्रतिपत्तिस्थले लक्ष्यलक्षकभावः यश्च सादृश्यसमवायादिमुख्यार्थसम्बन्धद्वारकः , व्यङ्ग्यार्थप्रतिपत्तिस्थले



#8

व्यङ्ग्यव्यञ्जकभावः यश्च सादृश्यकार्यकारणभावादिसम्बन्धद्वारकः । एकः कृती इत्यादौ सादृश्यसम्बन्धः, शकुन्तसादृश्येन मानधनस्य कस्यचित् याचकस्य वृत्तान्तः प्रतीयते । विधाय वैरं सामर्षे नरोऽरौ य उपासते । प्रक्षिप्योदर्चिषं कक्ष्ये शेरते तेऽभिमारुतम् ॥ अत्र सामर्षे वैरिणि निष्क्रियस्य कस्यचित् पुरुषस्य सामान्यरूपात् वृत्तान्तात् क्रुद्धे शिशुपाले ताटस्थ्यं न युक्तम् इतिविशेषरूपो वृत्तान्तः प्रतीयते । हृतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा । कृतमध्यबिलं विलोक्यते धृतगम्भीरखनीखनीलिम । इत्यत्र दमयन्तीवदननिर्माणार्थं सारांशहरणेन कारणेन तद्वदने लोकोत्तरसौन्दर्यम् इति तत्कार्यं प्रतीयते इति कार्यकारणभावः । एवञ्च अर्थप्रतीतौ इच्छासम्बन्धव्यापाराणां पौर्वापर्यक्रमः एवं भवति ।

१. मुख्यार्थप्रतीतिस्थले इच्छा- शब्दार्थयोः सम्बन्धः- शब्दस्यार्थे प्रवृत्तिः (व्यापारः) ततः अर्थप्रतीतिः
२. आदौ मुख्यार्थबाधादिकम् - ततः वक्त्रिच्छा- ततः शब्दार्थयोः सम्बन्धः- ततः शब्दस्यार्थे प्रवृत्तिः (व्यापारः) ततः अर्थप्रतीतिः
३. वक्तृवैशिष्ट्यादिकम् ततः वक्त्रिच्छा- ततः शब्दार्थयोः सम्बन्धः- ततः शब्दस्यार्थे प्रवृत्तिः (व्यापारः) ततः अर्थप्रतीतिः

एवं वृत्तिः अभिधा लक्षणा व्यञ्जना चेति तिस्र इत्यालङ्कारिकाः । शक्तिः, भक्तिः. व्यक्तिश्चेति अमूनां नामान्तराणि । तत्र सङ्केतेन अर्थप्रतिपादकत्वम् अभिधा । सङ्केतश्च 'अस्माच्छब्दयमर्थो बोद्धव्यः' इत्याकारा ईश्वरेच्छा ।

**लक्षणाया लक्षणम्** काव्यप्रकाशे इत्थं निगदितम् -

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् ।
अन्यार्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया ॥

लक्ष दर्शनाङ्कनयोः इति चौरादिकात् धातोः 'ण्यासश्रन्थो युच्' इत्यनेन भावे युचि, स्त्रीत्वे टापि च सति शब्दस्यास्य निष्पत्तिः, प्रकाशनमित्यर्थः ।

मुख्यार्थबाधे तद्योगे च सति, रूढिप्रयोजनयोः अन्यतरस्य सद्भावे यदर्थान्तरस्य प्रकाशनं सा लक्षणा । क्रियारूपेयं लक्षणा अभिधावत् न परमेश्वरेच्छावशात् भवति किन्तु प्रयोक्त्रिच्छावशात् । अत एवेयं वृत्तिः शब्दे आरोपिता, अत एव चानित्येति अस्यार्थः ।

ननु लक्षणायाम् आरोपितत्वं कथम्? - यदि वृत्तिः परमेश्वरेण निश्चीयते तर्हि सा नित्या स्वाभाविकी च भवति । अथ वक्त्रा स्वेच्छावशात् कल्प्यते तर्हि अनित्या आरोपिता च । प्रकृते तु तीरादिकं प्रतिपादयामीति इच्छया


ISSN : 2249-538X

वक्रा कल्प्यते इति लक्षणायाः शब्दे आरोपितात्वम् । नहि लक्षणा अभिधावत् सर्वत्रापि वर्तते, गङ्गायां घोष इत्यत्र सद्भावेऽपि गङ्गायां स्नान्तीत्यादौ असद्भावात् । लक्षणेयं क्रियारूपा, अत एव लक्षणारोपिता क्रियेत्युक्तम् । क्रिया च प्रतिपादनमन्तरेण नान्या काचित् सम्भवति । तस्मात् प्रतिपादनरूपेति निर्णीयते ।

अत्र मुख्यार्थबाधादेः लक्षणां प्रति निमित्तत्वं दण्डचक्रन्यायेन, रूढिप्रयोजनयोस्तु तृणारणिमणिन्यायेन । कारणत्वेन अभिमतानां सर्वेषां सद्भावे एव कार्यस्य निष्पत्तौ दण्डचक्रन्यायेन कारणत्वम्, यथा - घटं प्रति दण्डः, कुलालः, चक्रमित्यादिषु कारणत्वेन अभिमतेषु सत्स्वेव घटरूपस्य कार्यस्य निष्पत्तिः भवति । तदत्र मुख्यार्थबाधादीनां त्रयाणां दण्डचक्रन्यायेन कारणत्वमिति स्पष्टम् । अभिमतेषु कारणेषु एकस्य सद्भावेऽपि कार्यस्य निष्पत्तौ तृणारणिमणिन्यायेन कारणत्वम्, यथा - अग्निं प्रति तृणम्, अरणिः, मणिश्च कारणम् । तत्र एकस्य कारणस्य सद्भावेऽपि अग्निरूपस्य कार्यस्य निष्पत्तिः भवति । इह तु रूढिप्रयोजनयोः तृणारणिमणिन्यायेन कारणत्वम् ।

मुख्यार्थबाधश्च सर्वत्र तात्पर्यानुपपत्त्या । अन्वयानुपपत्त्येति आग्रहे 'काकेभ्यो दधि रक्ष्यताम्' इत्यत्र लक्षणा न स्यात् । नहि काकेभ्यो दध्नो रक्षणमित्यत्र अन्वये काप्यनुपपत्तिः वर्तते । यदि स्यात् तर्हि मुख्यार्थबाधे अन्वयानुपपत्तिरेव कारणमिति निर्णीयेत । अन्वयानुपपत्तिश्चेयं सर्वत्रापि तात्पर्यानुपपत्त्या नियमेन व्याप्यते इति क्वचित् अन्वयानुपपत्त्या मुख्यार्थबाधस्य निर्णयेऽपि न दोषः । सम्बन्धश्च क्वचित् सादृश्यम्, क्वचिच्च तद्भिन्नः । रूढिः अनादिः वृद्धव्यवहारः, प्रयोजनं च फलम् । एतत्त्रितयवशात् वक्रा शब्दे आरोपितो व्यापारो लक्षणा, तदुक्तम् - मुख्येनामुख्यो लक्ष्यते यत्स आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठो लक्षणा ॥ अन्तरेण मुख्यार्थरूपेण व्यवधानेन सहितो योऽर्थः तद्विषयको व्यापार इत्यर्थः ।

केचित्तु मुख्यार्थरूपेण व्यवधानेन सहितो योऽर्थः तन्निष्ठो व्यापार इति विवृण्वन्तो लक्षणाया अर्थवृत्तित्वं भावयन्ति - तदसत्, आरोपितः शब्दव्यापार इत्यस्य, स्याद्वाचको लाक्षणिक इत्यनेन शब्दत्रैविध्यवचनस्य च तेन वक्ष्यमाणस्य अनुपपत्तेः ।

**मुख्यार्थबाधः मुख्यार्थस्य लक्ष्यार्थेन सम्बन्धः, रूढिप्रयोजनयोरन्यतरत् च लक्षणायां निमित्तम् ।** मुख्यार्थबाधाभावे उच्चरद्भूरिकीलाल भद्रात्मनो इत्यादिशाब्दव्यञ्जनायामतिप्रसङ्गः स्यात् । असम्बन्धे गङ्गातीरस्येव यमुनातीरस्यापि उपस्थितिः स्यात् । रूढिप्रयोजनयोरन्यतरत् हेतुत्वेन स्यात् । अन्यथा शक्यसम्बन्धमात्रेण अशक्यस्यार्थस्य उपस्थापनेऽपि लक्षणा स्यात् । यथा

शरत्कालसमुल्लासिपूर्णिमाशर्वरीप्रियम् ।
करोति ते मुखं तन्वि चपेटापातनातिथिम् ॥

अत्र तन्व्या मुखं चन्द्रं चपेटापातनातिथिं करोति इत्यनेन, सौन्दर्येण मुखं चन्द्रं पराजयतीत्यभिप्रेतम् । चपेटापातनातिथिपदेन तच्च निर्जितत्वं लक्ष्यते । किन्तु रूढिः प्रयोजनं वा नास्तीत्यतः नात्र लक्षणा अपि तु नेयार्थता इति काव्यदोषः ।

लक्षणेयं रूढिवशात् प्रयोजनवशाच्च भवतीति प्रागुक्तम् । 'कर्मणि कुशलः' इति निरूढाया उदाहरणम् । अत्र कुशान् लातीति व्युत्पत्त्या सिद्धस्य कुशाधानकर्तृरूपस्य मुख्यार्थस्य आलेख्यादिकर्मणि अन्वयस्यासम्भवात् मुख्यार्थस्य बाधः । तस्मात् विवेचकत्वादिप्रयुक्तेन सादृश्येन दक्षरूपस्यार्थस्य प्रतीतिः, कर्मणि प्रवीण इत्यर्थः । प्रयोजनाभावादत्र रूढिः । 'गङ्गायां घोषः' इति तु प्रयोजनवत्याः । अत्र गङ्गायां घोषं प्रति आधारत्वस्य असम्भवात् मुख्यार्थस्य बाधः । तस्मात् सामीप्येन संयोगेन वा सम्बन्धेन गङ्गाशब्दात् तत्तीरस्य अर्थस्य प्रतीतिः । प्रयोजनं च गङ्गातीरे शीतत्वपावनत्वादेः धर्मस्य सम्प्रत्ययः । गङ्गातीरे घोष इत्यर्थः ।

लक्षणा आदौ द्विविधा शुद्धा गौणी च । शुद्धा पुनः द्विविधा उपादानलक्षणा लक्षणलक्षणा चेति । उपादानलक्षणा लक्षणलक्षणा च पुनः सारोपा साध्यवसाना चेति प्रत्येकं द्विविधा । एवमाहत्य शुद्धा लक्षणा चतुर्विधा । गौणी सारोपा साध्यवसाना चेति द्विविधा । आहत्य लक्षणा षड्विधा । तद्यथा-

१. शुद्धा उपादानलक्षणा सारोपा- कुन्ताः पुरुषाः प्रविशन्ति ।
२. शुद्धा उपादानलक्षणा साध्यवसाना- कुन्ताः प्रविशन्ति ।
३. शुद्धा लक्षणलक्षणा सारोपा- आयुर्घृतम् ।
४. शुद्धा लक्षणलक्षणा साध्यवसाना- आयुरेवेदम् । गङ्गायां घोषः ।
५. गौणी सारोपा- गौर्वाहीकः ।
६. गौणी साध्यवसाना- गौरयम् ।

रूढिप्रयोजनयोः हेतुत्वेन उपन्यासः न तु विभाजकत्वेन इत्यतः तन्मूलकः भेदः न भवतीति मन्तव्यम् ।
एवं काव्यशास्त्रे लक्षणाव्यापारः निरूपितः ।

****

**सहायकग्रन्थसूची**

१. साहित्यदर्पणः २. रसगङ्गाधरः ३. वृत्तिवार्तिकम्
४. काव्यादर्शः ५. काव्यप्रकाशः ६. वाक्यपदीयम्

 ISSN : 2249-538X

#11

# “तस्य निमित्तपतरीष्टिरि”त्यादिसूत्रत्रयस्य भाष्यवृत्तिकारमतानुसारेण व्याख्याद्वयम्

डा. एस्. वेङ्कटेशताताचार्यः*

**शोधसारः –**

पूर्वमीमांसादर्शने प्रथमाध्यायस्य प्रथमपादे धर्मे चोदनैव प्रमाणमिति निरूपितम् । अयमर्थः [१]“चोदनालक्षणोऽर्थो धर्म” इति सूत्रेण प्रतिज्ञातः, [२]तस्य निमित्तपरीष्टिः, [३]सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात्, [४]औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वादि”ति सूत्रत्रयेण उपपादितश्च । शबरस्वामिरचिते भाष्ये एतेषां त्रयाणां सूत्राणामेकेन प्रकारेण व्याख्यानं कृत्वा [५]“वृत्तिकारस्त्वन्यथेमं ग्रन्थं वर्णयाञ्चकारे”त्यादिना व्याख्यानान्तरमपि विस्तरेण निरूपितम् । एतस्मिन् द्वितीयव्याख्याने निरालम्बनवादात् आत्मवादान्ताः विषया अपि अन्तर्गता ये च श्लोकवार्तिके अत्यन्तं विस्तृततया विवेचिताः । इमे च विषयाः सूत्रव्याख्याने कथं प्रसक्ताः, निमित्तसूत्रात् औत्पत्तिकसूत्रपर्यन्तयोः भाष्यश्लोकवार्तिकग्रन्थयोश्च सारांशः कः इति अस्मिन् शोधनिबन्धे प्रतिपाद्यते । अनेन निमित्तसूत्रव्याख्यानादारभ्य आत्मवादान्तयोः भाष्यवार्तिकग्रन्थयोः सुखेनावगमो भविष्यति ।

**मुख्यशब्दाः** – निमित्तम्, सत्संप्रयोगः, औत्पत्तिकः, निरालम्बनत्वम्, शून्यत्वम्, स्फोटः, आकृतिः, अपोहः, चोदना, आत्मा ।

**उपोद्घातः** – अलौकिकं श्रेयस्साधनं हि धर्मः । स च श्रद्धेयार्थ इति [६]श्लोकवार्तिके व्यपदिष्टः । श्रद्धेयार्थपदं च धर्मपर्यायत्वेन बौद्धादिदार्शनिकैरपि प्रयोक्तुं शक्यते । वैदिकमते तावत् यागादिः श्रद्धेयार्थः । बौद्धादिमते चैत्यवन्दनादिस्तादृशः । श्रद्धा विश्वासः प्रामाण्यबुद्धिरिति यावत् । लौकिकप्रमाणान्तराभावेऽपि (संवादाभावेऽपि) यद्वाक्ये प्रामाण्यबुद्धिर्जायते तत् श्रद्धेयम् । वैदिकमते वेदवाक्यं तादृशं, बौद्धादिमते तु बुद्धादिवाक्यम् । तद्बोध्यत्वात् स्वर्गादिसाधनत्वविशिष्टयागादिः तादृशफलसाधनत्वविशिष्टचैत्यवन्दनादिश्च श्रद्धेयोऽर्थ इति उच्यते । तादृशे चार्थे चोदनैव प्रमाणमिति “चोदनालक्षणोऽर्थो धर्म” इति सूत्रेणावधार्यते । सर्वं वाक्यं सावधारणं भवतीति न्यायात् । तेन बुद्धादिवाक्यानां श्रद्धेयार्थे प्रामाण्यं व्युदस्यते । तथा च चैत्यवन्दनादेर्यदिष्टसाधनत्वं तैर्वाक्यैर्बोधितं तदपि न वास्तविकमिति सिध्यति । कथं बुद्धादिवचनं धर्मे प्रमाणं न भवतीति शङ्कित्वा पौरुषेयवचनानां प्रमाणान्तरमूलकत्वात् प्रमाणान्तरस्य च कस्यापि एतादृशे (चैत्यवन्दनादेरिष्टसाधनत्वरूपे) अलौकिकेऽर्थे अप्रवृत्तेः बुद्धादिवचनं प्रमाणं न भवति । चोदना तु अपौरुषेयत्वेन प्रमाणान्तरानपेक्षत्वेन पुरुषानुप्रवेशकृतदोषाभावेन च प्रमाणं भवत्येवेति भाष्ये निरूपितम् । ततः, चोदनैव धर्मे प्रमाणमिति कथमुच्यते, यतः प्रत्यक्षादीन्यपि धर्मे प्रामाणानि स्युः इत्याशङ्क्य चोदनैव धर्मे प्रमाणमिति प्रतिज्ञायाः सिद्ध्यर्थं धर्मस्य प्रमाणानां परीक्षा कर्तव्या इति प्रतिज्ञाबोधकं सूत्रं प्रणीतं “तस्य

---

*सहाचार्यः, मीमांसाविद्याशाखा,केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

निमित्तिपरीष्टिः" इति । इत आरभ्य त्रीणि सूत्राणि भाष्यवृत्तिकारमतभेदेन व्याख्यायन्ते । व्याख्येयानि सूत्राणि सन्ति –

- तस्य निमित्तपरीष्टिः ।
- सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात्
- औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यान-पेक्षत्वात्" इति ।

**भाष्यकारमतेन निमित्तसूत्रादिसूत्रत्रयस्य व्याख्या** – तत्र भाष्यकारमतानुसारेण व्याख्यानमादौ प्रस्तूयते - तस्य = धर्मस्य निमित्तपरीष्टिः = निमित्तस्य = प्रमाणस्य, परीष्टिः = परीक्षा, कर्तव्येति शेषः । पूर्वसूत्रे हि चोदनैव धर्मे प्रमाणमित्युक्तम् । तत्सिद्धये प्रत्यक्षादीनि धर्मे न प्रमाणानि, चोदना च प्रमाणं भवतीति द्वयं विचार्य साधनीयम् । एतादृशविचाररूपा धर्मप्रमाणपरीक्षा कर्तव्येति सूत्रार्थः । एवं प्रमाणपरीक्षायाः कर्तव्यत्वेन प्रतिज्ञाबोधकमिदं सूत्रम् । अग्रिमसूत्राभ्यामत्र प्रतिज्ञाता प्रमाणपरीक्षा क्रियते ।

तत्र प्रत्यक्षसूत्रेण कण्ठतः प्रत्यक्षस्य धर्मे अप्रामाण्यमुच्यते । तथाच सूत्रार्थः – सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षम् – सता वर्तमानेन (अर्थेन) संप्रयोगः = सन्निकर्षः सत्संप्रयोगः । जायते इति जन्म, बुद्धिश्च तज्जन्म च बुद्धिजन्म, जायमाना बुद्धिरिति यावत् । जायमानैव बुद्धिः अर्थं प्रकाशयति । नास्या अर्थप्रकाशने व्यापारान्तरापेक्षेति बोधयितुं जायमानार्थकं जन्मपदं सूत्रे प्रयुक्तम् । अत्र यत्पदमध्याहृत्य इन्द्रियाणां सत्संप्रयोगे पुरुषस्य यद् बुद्धिजन्म तत्प्रत्यक्षमित्यन्वयः सूत्रस्य प्रथमखण्डस्य बोध्यः । अत्र यद्यपि "पुरुषस्य या बुद्धिर्जायते तत्प्रत्यक्षम्" इति भाष्यवाक्यपरामर्शेन इत्थमेव अन्वयः लभ्यते । परन्तु एवं सति यत्तत्पदमहिम्ना वर्तमानार्थेन्द्रियसंप्रयोगजन्यपुरुषबुद्धिमुद्दिश्य प्रत्यक्षत्वं विधीयत इति लभ्यते । तथा सति औत्सर्गिकस्य विधेये उद्देश्यतावच्छेदकव्यापकत्वस्य प्रकृते त्यागः कार्यः । शुक्तिरजतचाक्षुषे सत्संप्रयोगजत्वेऽपि प्रत्यक्षाभासत्वस्यैव सत्त्वात् प्रत्यक्षत्वाभावात् । अतः [७]"प्रत्यक्षं यज्जने सिद्धम्" इत्यादिवार्तिकानुरोधेन "यत् प्रत्यक्षं तत् इन्द्रियाणां सत्संप्रयोगे पुरुषस्य बुद्धिजन्म" इति अन्वयं स्वीकुर्मः । तथा च यत् प्रत्यक्षज्ञानं तत् वर्तमानार्थसन्निकर्षजन्यमित्युक्तं भवति । एतादृशवचनव्यक्तौ विधेये उद्देश्यतावच्छेदकव्यापकत्वभङ्गोऽपि न भवति । प्रत्यक्षस्य एवंलक्षणकत्वे (एवंधर्मकत्वे) सूत्रतात्पर्यं, न तु प्रत्यक्षलक्षणकथने इति भाष्यवार्तिकभावोऽपि उपपद्यते ।

अनिमित्तं विद्यमानोपलम्भनत्वादिति सूत्रस्य द्वितीयः खण्डः । "प्रत्यक्षं धर्मे" इति पदद्वयमध्याहृत्य प्रत्यक्षं धर्मे अनिमित्तं, विद्यमानोपलम्भनत्वात् इत्यन्वयो बोध्यः । यतः पूर्वोक्तरीत्या प्रत्यक्षं सत्संप्रयोगजन्यमतः

 ISSN : 2249-538X

विद्यमानोपलम्भनम् (वर्तमानार्थग्राहकम्), यतः विद्यमानोपलम्भमतः धर्मे न प्रमाणं धर्मस्य वर्तमानत्वाभावादिति भावः । [८]"भविष्यंश्चैषोऽर्थो न ज्ञानकालेऽस्ती"ति भाष्येण धर्मस्य ज्ञानकाले अवर्तमानत्वं भविष्यत्त्वं च उच्यते ।

"अग्निहोत्रं जुहुयात् स्वर्गकाम" इत्यादिवाक्येभ्यः स्वर्गादिसाधनत्वविशिष्टहोमादिविषयं ज्ञानं जायते । तत्काले तु होमादेरनुष्ठीयमानत्वाभावेन न वर्तमानत्वं, किन्तु भविष्यति काले अनुष्ठास्यमानत्वेन भविष्यत्त्वमेव । अतः विद्यमानोपलम्भनरूपप्रत्यक्षाविषयत्वम् । यद्यपि अनुष्ठितो यागादिः वर्तमानः, परन्तु न यागादेः स्वरूपेण धर्मता किन्तु स्वर्गादिफलसाधनत्वेन रूपेणैव । फलसाधनत्वस्य अनुष्ठानकाले अवर्तमानत्वात् न फलसाधनत्वविशिष्टयागादिरूपे धर्मे वर्तमानता । यद्यपि फलसाधनत्वशक्तिविशिष्टयागादेर्धर्मत्वं, तस्य च अनुष्ठानकाले वर्तमानत्वमिति वक्तुं शक्यते, परन्तु शक्तेर्वर्तमानत्वेऽपि अतीन्द्रियत्वेन न प्रत्यक्षविषयत्वम् । अयं च विषयः [९]"प्रत्यक्षः प्रागनुष्ठानाद्" इति श्लोकवार्तिककारिकायां तद्व्याख्यायां न्यायरत्नाकरे च स्पष्टः ।

इत्थं धर्मस्य प्रत्यक्षाविषयत्वं कथयता सूत्रेण तस्य अनुमानाद्यविषयत्वमपि सूच्यते । कदापि प्रत्यक्षेण अगृहीते व्यापकत्वग्रहणाद्यसंभवेन अनुमानादीनामपि तत्र अप्रवृत्तेः । इदानीं चोदनायाः प्रामाण्यं निरूप्यते औत्पत्तिकसूत्रेण । औत्पत्तिकशब्दस्य लक्षणया नित्य इत्यर्थः । तथाच भाष्यम् – [१०]"औत्पत्तिक इति नित्यं ब्रूमः । उत्पत्तिर्हि भाव उच्यते लक्षणया" इति । शब्दस्यार्थेन संबन्धः औत्पत्तिकः = नित्यः इति प्रथमखण्डार्थः । अनेन शब्दार्थसंबन्धस्य पौरुषेयत्वे पुरुषानुप्रवेशप्रयुक्तदोषसंभवेन वेदस्य अप्रामाण्यं स्यादिति शङ्का दूरीकृता । तस्य ज्ञानमुपदेशः इति द्वितीयः खण्डः । अत्र ज्ञानशब्दः ज्ञायते अनेनेति ज्ञानमिति व्युत्पत्त्या ज्ञानसाधनपरः । उपदेशः = विधिवाक्यं तस्य धर्मस्य ज्ञानसाधनं भवतीति तदर्थः । अनेन अबोधकत्वेन चोदनायाः प्रामाण्यं न स्यादिति शङ्का निवारिता । अव्यतिरेकश्चेत्यस्य अबाधश्चेत्यर्थः । चोदनाजन्यस्य ज्ञानस्य बाधाभावेन अप्रामाण्यशंका नावतरेत् । अर्थस्य प्रमाणान्तरेण गृहीतत्वे चोदनायाः अनुवादत्वमेव स्यात् न तु प्रामाण्यमित्यतः उच्यते – अर्थेऽनुपलब्धे तत् प्रमाणमिति । जातेऽपि अज्ञातार्थविषयकज्ञाने यदि अर्थनिश्चयः प्रमाणान्तराधीनः तर्हि स्वतः प्रामाण्यभङ्गः । अतः अर्थनिश्चये प्रमाणान्तरापेक्षाभावेन स्वतः प्रामाण्यं भवतीति अनपेक्षत्वादिति भागेन उच्यते । बादरायणग्रहणं बादरायणस्यापि ऋषेरिदं संमतमिति स्वमतं द्रढयितुम् ।

**वृत्तिकारव्याख्या** – एवमर्थमुपवर्ण्य भाष्ये वृत्तिकारस्य आचार्यस्य उपवर्षस्यापि व्याख्यानप्रकारः उक्तः । स चेत्थम् – तस्य निमित्तपरीष्टिरित्यत्र नञमध्याहृत्य तस्य = धर्मस्य निमित्तस्य = चोदनारूपप्रमाणस्य परीक्षा न कर्तव्येति निमित्तसूत्रार्थो वक्तव्यः। एवं नञध्याहारपूर्वकं व्याख्यानं [११]"नञध्याह्रियते सूत्रे" इति वार्तिकश्लोकादवगम्यते । कथं वाक्यस्य सर्वथा विरुद्धे अर्थे तात्पर्यं गृहीतं येन नञोऽध्याहारेण विरुद्धार्थे सूत्रं

व्याख्यातमिति शङ्का जायते । तत्र काक्वा विपरीतार्थे तात्पर्यं ग्राह्यते, अतश्च नञध्याह्रियते इति समाधानं भाति । आलङ्कारिकाणां तु मते व्यञ्जनायाः सत्त्वात् काक्वा विरुद्धोऽर्थः नञं विनैव अभिव्यज्यते ।

प्रमाणानामर्थव्यभिचारो दृश्यते । यथा असत्यपि रजते शुक्तिकायामेव रजतप्रत्यक्षं भवति । अतः चोदनाया अपि व्यभिचारसंभवेन निमित्तपरीक्षा कार्येति प्राप्ते आभासासंकीर्णप्रत्यक्षलक्षणकथनाय सूत्रमवतरति – सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमिति । अत्र तत्सत्पदयोर्व्यत्यासेन इदं सूत्रं प्रत्यक्षलक्षणपरतया व्याख्यायते । तत्संप्रयोगे इन्द्रियाणां पुरुषस्य बुद्धिजन्म सत्प्रत्यक्षमित्यन्वयः । तच्छब्दः यदाभासं ज्ञानं तत्परः । सत्पदं समीचीनपरं , सत्प्रत्यक्षं = प्रमाणात्मकं प्रत्यक्षं न तु प्रत्यक्षाभासोऽपीत्यर्थः । शुक्तिकारजतज्ञानं तु रजताभासं ज्ञानम् । परन्तु न तत् रजतेन्द्रियसंप्रयोगजन्यं किन्तु शुक्तिकेन्द्रियसंप्रयोगजन्यमिति न तत्र सूत्रोक्तलक्षणातिप्रसक्तिः । एवमाभासासंकीर्णप्रत्यक्षलक्षणकथनेन प्रत्यक्षप्रमाणस्य अर्थाव्यभिचारः सूचितः । इदञ्चोपलक्षणम् अन्येषामपि प्रमाणानामर्थाव्यभिचारस्य । शब्दोऽपि प्रमाणान्तर्गतः, अतस्सोऽपि न व्यभिचरतीति न परीक्षणीयं चोदनात्मकं धर्मप्रमाणमिति सूत्रतात्पर्यम् ।

अत्र आभासासंकीर्णप्रत्यक्षलक्षणं कथमुच्यते ? यतः ज्ञानातिरिक्तबाह्यवस्तुनोऽभावेन किमपि ज्ञानं तत्संप्रयोगजं नास्ति, कुतो वा तदतत्संप्रयोगजन्यत्वेन ज्ञानानां विभागः, सर्वं स्तम्भादिबाह्यार्थविषयं ज्ञानं मिथ्यैवेति योगाचारबौद्धस्य शङ्का भाष्ये उपस्थापिता । तेन स्वप्नदृष्टान्तेन सर्वस्यापि जाग्रज्ज्ञानस्य निरालम्बनत्वं (ज्ञानातिरिक्तविषयशून्यत्वं) प्रत्ययत्वेन हेतुना साध्यते । एतस्य चानुमानस्य स्तम्भाद्यर्थं गृह्णता प्रत्यक्षेण बाधमुक्त्वा बाह्यार्थः साधितः निरालम्बनवादे भाष्यवार्तिकयोः ।

ततः प्रत्यक्षस्य बाह्यार्थविषयकत्वे सिद्धे खलु तेन बाह्यार्थाभावसाधकमनुमानं बाध्येत, प्रत्यक्षं तु स्वांशग्राहित्वान्न बाह्यार्थविषयकमिति तस्यैव बौद्धस्य पूर्वपक्षमुपन्यस्य ज्ञानानां स्वांशग्राहित्वासंभवमुपपाद्य बाह्यार्थविषयकत्वं साधितम् शून्यवादे ।

ततः अन्येषामपि प्रमाणानां लक्षणकथनपूर्वकं तेषामर्थाव्यभिचारित्वमुपपादयितुम् अनुमानशब्दोपमाना-र्थापत्त्यभावपरिच्छेदाः रचिताः । एवमर्थाव्यभिचारिणां प्रसिद्धानां प्रमाणानामन्यतमस्य शब्दस्य (शाब्दज्ञानस्य वा) अवश्यमर्थाव्यभिचारित्वात् धर्मप्रमाणभूता चोदना न परीक्षणीयेति निमित्तसूत्रोक्तमपरीक्ष्यत्वमुपसंहृतम् ।

अथ [१२]"अनिमित्तं विद्यमानोपलम्भनत्वादि"ति सूत्रेण प्रत्यक्षादीनां प्रमाणत्वेऽपि शब्दस्य प्रामाण्यं ना-स्तीति पूर्वपक्षः क्रियते । अत्र शब्दः इति पदमध्याहृत्य शब्दः अनिमित्तं = प्रमानिमित्तं न = प्रमाणं नेति प्रतिज्ञा वक्तव्या । विद्यमानोपलम्भनत्वादिति हेतुः । इदं हेतुदलं भाष्यादौ अवयवशो व्याख्यातं न दृश्यते । तथापि त-


ISSN : 2249-538X

त्रोक्तं भावार्थं मनसि निधाय अवयवशो व्याख्यातुं प्रयत्यते । विद्यमानपदं प्रत्यक्षयोग्यपरम् । उपलम्भनम् = उपलब्धिसाधनम् । प्रत्यक्षयोग्यस्य उपलम्भकः शब्दः, तथापि शब्दबोधिते प्रत्यक्षं न जायते । प्रत्यक्षयोग्यत्वेऽपि प्रत्यक्षानुत्पत्तौ विषयस्य अभाव एव निश्चीयते । तथाच शब्दस्य अनुपलब्धिबाधितत्वादप्रामाण्यमित्यर्थः । चित्रादिचोदना [१३](चित्रया यजेत पशुकाम) इत्यादिवाक्यं न प्रमाणम्, प्रत्यक्षयोग्यप्रत्यक्षाविषयार्थबोधकत्वादित्यनुमानं सूत्रकाराभिप्रेतम् । चित्रादिवाक्यं हि पश्वादिफलं चित्रादियागजन्यतया बोधयति । न च चित्राद्यनन्तरं पश्वादिफलमुपलभ्यते । अतः चित्रादिवाक्यं योग्यानुपलब्धिबाधितार्थकत्वादप्रमाणम् । एवमन्यदपि वाक्यमुदाहृत्य पूर्वपक्षः कृतः । अयं पूर्वपक्षः उदाहरणानुसारेण चित्राक्षेपवाद इति उच्यते ।

एतत्समाधानपरतया वृत्तिकारमते अग्रिमसूत्रं वर्णितम् । औत्पत्तिकशब्दः पूर्ववदेव नित्यत्वं बोधयति । इदं सूत्रं भाष्यकारमतवदेव वृत्तिकारमतेऽपि व्याख्येयम् । तथाच शब्दे अर्थे च नित्ये सति तयोः संबन्धस्य च अपौरुषेयत्वेन वेदवाक्यस्यापि अपौरुषेयत्वस्य अष्टमाधिकरणे निरूपयिष्यमाणत्वेन अप्रामाण्यहेतुभूतदोषस्य च शब्दे पुरुषाधीनत्वेन अपौरुषेये वेदे तादृशदोषासंभवेन चोदनायाः प्रामाण्यं सिद्धमिति भावः ।

एवं चित्राक्षेपवादोक्तपूर्वपक्षस्य साक्षादुत्तरमदत्त्वा चोदनाया अप्रामाण्यकारणाभावेन प्रामाण्यमेवेत्युक्त्वा शब्दार्थयोर्यः अपौरुषेयः संबन्ध उक्तः, स आक्षिप्तः भाष्यवार्तिकयोः संबन्धाक्षेपवादे । नैव शब्दार्थयोः संबन्धः संभवति, संभवति चेदपि स कृतक एव स्यात् इति । ततः संबन्धनिर्धारणाय शब्दार्थरूपसंबन्धिस्वरूपं निर्धारणीयमिति स्फोटवादे वैयाकरणाभिमतस्फोटाख्यवर्णभिन्नशब्दं निराकृत्य वर्णात्मकशब्दस्यैव वाचकत्वं साधितम् । तस्य च नित्यत्वं शब्दनित्यत्वाधिकरणे षष्ठे साधयिष्यते । एवं वाच्यमर्थस्वरूपं निरूपयितुमाकृतिवाद आरब्धः यत्र व्यक्त्यतिरिक्ताकृतिसद्भावः साधितः । तस्या वाच्यत्वं च तृतीयपादे आकृत्यधिकरणे साधयिष्यते । ततः अपोहरूपं सामान्यं निराकृत्य जातिरूपं (वस्तुरूपं) सामान्यं पुनः प्रतिष्ठापितमपोहवादे ।

ततः यथा असत्यपि वृक्षातिरिक्ते एकस्मिन्नर्थे वनमिति बुद्धिर्जायते, तथा असत्यपि व्यक्त्यतिरिक्तसामान्ये सामान्यबुद्धिर्जायेतेति आशङ्क्य न कस्यचिज्ज्ञानस्य मिथ्यात्वेन अन्यस्य तथात्वं शङ्कितुं युक्तम् । बाधेनैव मिथ्यात्वं वक्तुं शक्यम् । न चात्र आकृतिसद्भावे किञ्चिद्बाधकमिति वनवादे प्रतिपादितम् । शब्दार्थस्वरूपविचारं समाप्य पुनः संबन्धविचारः अनुवर्तितः । संबन्धाक्षेपपरिहारवादे वार्तिके विस्तरेण विभिन्नमतानुसारेण सृष्टिप्रलयप्रक्रियाः शब्दार्थसंबन्धकृतकत्वपक्षाश्च उपन्यस्य खण्डिताः, शब्दार्थसंबन्धस्य अपौरुषेयत्वं च दृढीकृतम् ।

ततः चित्राक्षेपवादे चित्रेष्ट्यनन्तरं पशुफलानुपलब्धेः चित्रावाक्यस्य यदप्रामाण्यमाशङ्कितं तस्य साक्षात्परिहारं वक्तुं चित्राक्षेपपरिहारवाद आरब्धः । तत्र चोदनया यागस्य अनन्तरमेव पशुफलं भवतीति नैवोक्तम् । चित्रया

ISSN : 2249-538X

पशुफलं भवतीत्येतावदेवोक्तम् । अनन्तरं पश्वनुपलब्धिस्तु नात्र बाधिकेति परिहार उक्तः । चित्राक्षेपवादे एव “स एष यज्ञायुधी यजमानः अञ्जसा स्वर्गं लोकं यातीति” वाक्यमपि बाधितार्थकमिति कथितमासीत् । यज्ञायुधिनः यजमानशरीरस्य दह्यमानतया स्वर्गगन्तृत्वासंभवात् । तस्य वाक्यस्य प्रामाण्यसिद्ध्यर्थं नित्यः स्वर्गगमनयोग्यः आत्मा साधनीय इति आत्मवादे तादृश आत्मा साधितः । एवं रूपेण निरालम्बनवादादात्मवादान्तो ग्रन्थः वृत्तिकारव्याख्याया एव परिकर इति प्रतीयते ।

**सन्दर्भसूची / टिप्पणी –**

१ जैमिनिसूत्रम् – १/१/२

२ जैमिनिसूत्रम् – १/१/३

३ जैमिनिसूत्रम् – १/१/४

४ जैमिनिसूत्रम् – १/१/५

५ शाबरभाष्यम् – १/१/५

६ “अश्रद्धेयार्थसत्यत्वं श्रद्धेये चाप्यसत्यता” (श्लोकवार्तिकम् – चोदनासूत्रे १२५ तमः श्लोकः) इत्यादौ तथा व्यपदेशः दृश्यते ।

७ श्लोकवार्तिकम् – प्रत्यक्षसूत्रे १८ श्लोकः

८ शाबरभाष्यम् – १/१/४

९ श्लोकवार्तिकम् – प्रत्यक्षसूत्रे ३४ श्लोकः

१० शाबरभाष्यम् – १/१/५

११ श्लोकवार्तिकम् – वृत्तिकारग्रन्थः – १ श्लोकः

१२ वृत्तिकारव्याख्यायामिदं पृथक् सूत्रम् ।

१३ तत्तिरीयसंहिता – २/४/६


ISSN : 2249-538X

# 17

# अरुणावाक्यार्थमीमांसा

डा. श्रीरामः ए. एस्.*

**शोधसारः –**

धर्माधर्मयोः निरूपणार्थं प्रवृत्तं दर्शनं मीमांसा नाम । स च धर्मो यागादिरूपः । तादृशधर्मे प्रमाणानि विध्यादीनि अष्टौ भवन्ति । विधिः अज्ञातार्थज्ञापकः वेदभागः । तस्य च विधेः चातुर्विध्यं भवति । उत्पत्तिविधिः, विनियोगविधिः, प्रयोगविधिः, अधिकारविधिः इति । विनियोगविधेः सहकारार्थम् अर्थात् अङ्गत्वबोधनार्थं श्रुतिः, लिङ्गम्, वाक्यम्, प्रकरणम्, स्थानम्, समाख्या इति षट् प्रमाणानि वर्तन्ते । तत्र च श्रुतिः नाम अङ्गत्वघटकीभूत-उद्देश्यत्व-कृतिकारकत्वयोः अन्यतरस्य प्राधान्येन वाचकः शब्दः । सा श्रुतिः द्वितीयाश्रुतिः, तृतीयाश्रुतिः, समानाभिधानश्रुतिः इत्यादिना गौणमुख्यसाधारण्येन अनेकधा भिद्यते । तत्र तृतीयाश्रुतेः दृष्टान्तो भवति "अरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणाति" इति । ज्योतिष्टोमे पठितमेतद्वाक्यमाश्रित्य विचारः अस्मिन् पत्रे क्रियते । आरुण्यं यत् अनेन वाक्येन विधीयते तस्य निवेशः कुत्र भवतीति चिन्तनार्थमयं प्रयासः ।

**मुख्यशब्दाः** – अरुणा इति गुणवाचकः । पिङ्गे अक्षिणी यस्याः सा पिङ्गाक्षी । एकं हायनं यस्याः सा एकहायनी । सोमः लताविशेषः, यागीयं हविः । क्रयः मूल्येन द्रव्यग्रहणम्, द्रव्यविनिमयरूपो वा ।

द्वादशलक्ष्यण्यां तृतीयाध्याये प्रथमे पादे षष्ठमधिकरणम् अरुणाधिकरणम् । **तत्र इदं सूत्रम्** - "अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमस्स्यात्" इति ।

**विषयः** - "अरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणाति" इति ज्योतिष्टोमप्रकरणगतं वाक्यम् ।

**संशयः** - आरुण्यस्य प्रकृतापूर्वसाधनीभूतक्रयसाधनद्रव्यसामान्यमुद्दिश्य विधानम्, प्रकृतापूर्वसाधन- द्रव्यविशेष-मुद्दिश्य विधानं वा इति । अर्थात् आरुण्यस्य स्ववाक्योपात्ताम् एकहायनीमुद्दिश्यविधानम् उत वाक्यात् विच्छिद्य वासआदि द्रव्यमुद्दिश्य विधानमिति । उद्देश्यतावच्छेदकं किमिति यावत् ।

आदौ अरुणाशब्दः गुणं वक्ति वा जातिं वदति उत द्रव्यं वदति इति विचारः क्रियते । सकलारुणिमद्रव्येषु विद्यमानारुणरूपमेकमिति पक्षे अरुणशब्दः अरुणरूपस्य वाचकः । प्रतिद्रव्येषु विद्यमानम् अरुणरूपं भिन्नं भिन्नमिति पक्षे अरुणत्वजातिविशेषः अरुणशब्दस्य अर्थः । न तु अरुणशब्दः अरुणगुणविशिष्टद्रव्यं वदति ।

तदुपरि शङ्का – 'अरुणया' इत्यत्र तृतीयाश्रुतिः करणत्वं वदति, तच्च करणत्वं द्रव्यस्यैव सम्भवति इति हेतोः द्रव्ये लक्षणा स्वीकार्या स्यात् इति । तन्न, प्रकृत्यर्थस्य अरुणगुणस्य वा अरुणत्वजातेः वा करणत्वं सम्भवति । अतः करणत्वान्यथानुपपत्या अरुणशब्दे द्रव्ये न लक्षणा ।

तदुपरि पुनश्शङ्का – करणत्वस्य अन्वयसम्भवेऽपि, अरुणया इति स्त्रीत्ववाचकटाप्रत्ययस्य श्रवणात्

*सहायकाचार्यः, धर्मशास्त्रमीमांसाविभागः, काशीहिन्दूविश्वविद्यालयः, वाराणसी

स्त्रीत्वस्य गुणे जातौ वा अनुपपत्त्या द्रव्ये लक्षणा स्यात् इति । तदपि न, यतः प्रत्ययार्थः स्त्रीत्वं सामानाधिकरण्यसम्बन्धेन अरुणगुणे अन्वेति, न तु आश्रयत्वसम्बन्धेन । यदि प्रत्ययार्थस्त्रीत्वस्य प्रकृत्यर्थव्यक्तौ अन्वयः क्रियते आश्रयत्वसम्बन्धेन, तदा व्युत्पत्यन्तरं कल्पनीयमापतति । वस्तुतः प्रत्ययार्थः स्त्रीत्वमपि प्रत्ययार्थे कारके एव सामानाधिकरण्यसम्बन्धेन अन्वेति । पार्ष्ठिकान्वयवेलायां प्रकृत्यर्थेन साकम् अन्वये व्युत्पत्यन्तरानपेक्षा । यथा - प्रकृत्यर्थस्य प्रत्ययार्थे कारके अन्वयः तथैव प्रत्ययार्थलिङ्गसंख्ययोः कारके एव अन्वये सति एककार्यकारणभावः सम्भवति । इतरथा प्रत्ययार्थलिङ्गसंख्ययोः प्रकृत्यर्थे, प्रकृत्यर्थस्य प्रत्ययार्थे कारके अन्वये सति सुबर्थलिङ्गसंख्यानिष्ठ- प्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रति प्रातिपदिकजन्योपस्थितिः कारणम्, एवं प्रातिपदि- कार्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रति सुब्-जन्यकारकोपस्थिः कारणम् इति कार्यकारणभावान्तरं कल्पनीयं स्यात् ।

तदुपरि शङ्का - अरुणशब्दस्य गुणवाचकत्वे गुणवचनो यः सः गुणिवचनो भवति इति, आश्रये बोधनीये गुणवाचकशब्दात् मतुप्प्रत्ययो भवति लोपश्च भवति इत्यर्थकस्य "गुणवचनानाम् आश्रयतो लिङ्गवचनानि भवन्ति", "गुणवचनेभ्यो मतुपो लुगिष्टः" इत्याद्यनुशासनस्य विरोधः स्यात् इति । तन्न, गुणे शक्तानां शब्दानां विशेष्यवाचकपदान्तरसमभिव्याहारे सति विशेष्यानुसारेण लिङ्गवचनानि भवन्ति इति सूत्रस्यार्थवर्णनेन न काप्यनुपपत्तिः । एकहायनी इति पदसमभिव्यारात् अरुणया इति स्त्रीलिङ्गत्वं सम्भवति । एवं च सूत्रविरोधानुसारेण गुणवाचकस्य शब्दस्य द्रव्यबोधकतया लक्षणा न स्वीकार्या ।

एकहायनी इत्यत्र तु अन्यपदार्थे विशेष्ये बहुव्रीहिसमासात्, 'सर्वत्र यौगिकैः शब्दैः द्रव्यमेवाभिधीयते' इति वार्तिकस्वारस्याच्च अवयवार्थविशिष्टे अन्यपदार्थे द्रव्ये एव शक्तिः इति प्राञ्चः । अवयवार्थवाचकस्य पदद्वयस्य अन्यपदार्थे लक्षणा इति केचन ।

तदुपरि शङ्का, एकहायनी इति वा पिङ्गाक्षी इति वा अन्यपदार्थबोधकयोः पदयोः अर्थस्तु एकः एव इति एकहायनीपदविहितस्य पदार्थस्य पिङ्गाक्षीपदेन विधानानुपपत्तिः स्यात् इति । पदान्यतरस्य वैयर्थ्यं च स्यात् इति । पदद्वयस्य युगपत्प्रवृत्तेः खलेकपोतन्यायेन भावनान्वयात् विहितविधानं न सम्भवति । एकहायनीपदसमर्पितगुणापेक्षया गुणान्तरस्यैव समर्पणं पिङ्गाक्षीपदेन क्रियत इति सार्थक्यं पदान्तरस्य भवति ।

वस्तुतस्तु अरुणापदवत् एकहायनी, पिङ्गाक्षी इत्यत्रापि एकवर्षस्य पिङ्गलवर्णस्य च करणत्वसम्भवात् न द्रव्ये लक्षणा इत्यपि वक्तुं शक्यम् । तदुपरि शङ्का अन्यपदार्थे लक्षणायाः अभावे "अनेकमन्यपदार्थे" इति अनुशासनविरोधः स्यादिति । तन्न, "गुणवचनेभ्यो मतुबो लुगिष्टः" इति गुणवाचकपदोत्तरं मतुप्-कृत्वा लोपस्य


ISSN : 2249-538X

करणे निरूढलक्षणायां तात्पर्यं गृह्यते । अन्वयाभावे सत्येव लक्षणा स्वीक्रियते । प्रकृते लक्षणां विना शक्यार्थस्य गुणस्य अन्वयसम्भवात् न लक्षणा ।

तदुपरि प्रश्नः, एकहायनी, पिङ्गाक्षी इति पदयोः द्रव्ये लक्षणायाः अनङ्गीकारे स्ववाक्यघटकपदप्रतिपाद्यद्रव्ये एव आरुण्यस्यान्वयः इति सिद्धान्तभङ्गापत्तिः इति, तन्न, प्रकरणादिप्रमाणान्तरप्रमितद्रव्यमादाय अरुणगुणसम्बन्धः कल्पनीयः इति न कश्चित् विरोधः इति प्रकृताधिकरणपीठिका ।

**पूर्वपक्षः** - अरुणापदबोधितस्य अरुणरूपगुणस्य एकहायनीपदोपात्ते वाक्यीयद्रव्ये अन्वययोग्यतास्ति चेदपि कारकत्वात् द्रव्यान्वयव्युत्पत्तिः नास्ति । क्रये अन्वयस्य व्युत्पन्नत्वेऽपि गुणस्य योग्यता न सम्भवति । द्रव्यविनिमयरूपक्रयसाधनत्वम् अमूर्तस्य न सम्भवति हि । अतः वाक्यात् अरुणया इति पदं विच्छिद्य प्रकरणानुसारेण प्रकृतापूर्वसाधनीभूतद्रव्यपरिच्छेदं भावयेत् इति अध्याहृत्य वाक्ययोजना कार्या । एवं च आरुण्यस्य प्राकरणिकसर्वद्रव्याङ्गत्वं सम्भवति इति क्रयसाधनीभूतानि यानि वासआदीनि द्रव्याणि तत्र सर्वत्र आरुण्यस्य निवेशः इति ।

**राद्धान्तः** - योग्यताज्ञानं न शाब्दबोधं प्रति कारणम् । अपि तु अयोग्यतानिश्चयस्य प्रतिबन्धकत्वमिति कल्प्यते । शाब्दबोधोत्तरम् आरुण्यं क्रयसाधनं न इति अयोग्यतानिश्चये सति शाब्दबोधस्य अप्रामाण्यमिति स्वीकारः स्यात् । आरुण्यं क्रयसाधनं न इति प्रतिबन्धकाभावे सति आरुण्यस्यापि क्रयरूपक्रियान्वयबोधः उपपद्यते । शाब्दबोधोत्तरं योग्यतागवेषणायाम् आरुण्यस्य क्रयसाधनीभूतद्रव्यमाश्रित्य क्रयसाधनत्वं सम्भवति । आरुण्यविशिष्टद्रव्यस्य क्रयसाधनत्वे आरुण्यस्यापि क्रयसाधनत्वं विशिष्टविधौ विशेषणविधिरार्थिकः इति न्यायेन सम्भवति इति न वाक्यात् विच्छेदो कार्यः ।

आरुण्यस्य पार्ष्ठिकः द्रव्यसम्बन्धः इत्थं ज्ञायते –

1. आरुण्यकरणिका, एकहायनीकरणिका, पिङ्गाक्षीकरणिका, क्रयकरणिका, सोमसाध्यिका शब्दभावनाविशिष्टा आख्यातोपात्ता अर्थभावना इति प्रथमशाब्दबोधः ।

   क्रयस्य करणत्वं नाम भावनाभाव्यसोमनिर्वर्तकत्वमिति सोमसाधनत्वं क्रये ज्ञेयम् । तदर्थमपरः शाब्दबोधः । यथा -

2. आरुण्यविशिष्ट-एकहायनीविशिष्ट-पिङ्गाक्षीविशिष्टक्रयेण सोमं भावयेत् इति पार्ष्ठिकः बोधः ।

   तदुत्तरम् आरुण्यादेः क्रयेन साकं सम्बन्धः ज्ञेयः । तदर्थमयं शाब्दबोधः -

3. अरुणया क्रयं भावयेत्, एकहायन्या क्रयं भावयेत्, पिङ्गाक्ष्या क्रयं भावयेत् इति । अनेन आरुण्यादीनां

क्रयाङ्गत्वं ज्ञायते ।

क्रयस्य द्रव्यविनिमयरूपत्वात् आरुण्यस्य अमूर्तस्य पदार्थस्य क्रयसाधनत्वस्योपपत्यर्थं परिच्छेद्यद्रव्याकाङ्क्षायां स्ववाक्योपात्तद्रव्येण साकमन्वयः ।

4. या अरुणा सा एकहायनी, या एकहायनी सा पिङ्गाक्षी, तया पिङ्गाक्ष्या सोमक्रयं भावयेत् इति शाब्दबोधः । तथा च आरुण्यस्य क्रयसाधनीभूतैकहायन्यामेव निवेशः । न तु क्रयद्रव्यान्तरेषु वासः-प्रभृतिषु प्राकरणिकसर्वद्रव्येषु निवेशः ।

तदुपरि शङ्का - यवादिषु यथा व्रीह्युद्देशेन विहितस्यावहननस्य प्राप्तिः भवति, तथैव वासआदिष्वपि सोमप्राप्तिसाधनक्रयद्रव्यत्वाविशेषात् आरुण्यस्य प्राप्तिः स्यादिति । तन्न, एतद्वाक्यविहितक्रयापेक्षया वाक्यान्तरविहितक्रयस्य भेदात् एतद्वाक्यविहितक्रयसाधनत्वोद्देशेन आरुण्यस्य विधानमिति स्वीक्रियते । गुणात् क्रयकर्मणः भेदात् आरुण्यादिविशिष्टसोमक्रयः वासआदिविशिष्टसोमक्रयापेक्षया भिन्नः इति स्वीक्रियते । पूर्वस्मिन् कर्मणि अनिविशमानः गुणः कर्मभेदापादकः । "वाससा क्रीणाति" इति वाक्यविहितक्रयः वासोरूपगुणावरुद्धः इति एकहायनीरूपद्रव्यनिवेशासम्भवः इति वक्तुं न शक्यम् । यतः वाससा क्रयासम्भवे एकहायन्यादीनामपि क्रये प्रवेशः स्यात् इति उत्पत्तिशिष्टावरुद्धे कर्मणि द्रव्यान्तरस्य निवेशः सम्भवति इति । तन्न, एकद्रव्येण आनतिः सम्भवति इति एकद्रव्यविक्रेतुः सम्पादनं कार्यम् । पृथक् द्रव्यस्य प्रदेयत्वे दक्षिणादीनां प्रसङ्गबाधानापत्तिः स्यात् । प्रसङ्गः नाम अन्यतः उपकारलाभप्रयुक्ताङ्गाननुष्ठानम् । यथा पशुयागेषु अङ्गत्वेन "यद्देवत्यः पशुः तद्देवत्यः पुरोडाशः" इति वचनानुसारं पुरोडाशयागः अनुष्ठीयते । पशुयागं प्रति एवं पुरोडाशयागं प्रति च प्रयाजाद्यङ्गानामनुष्ठानापेक्षा भवति इतिकर्तव्यताकाङ्क्षायाः पूरणार्थम् । परं पशुयागार्थमनुष्ठितप्रयाजैः उपकारः पशुयागीयपुरोडाशं प्रति सम्भवतीति पुरोडाशयागार्थं पृथक् प्रयाजानामनुष्ठानं न क्रियते । तथैव ज्योतिष्टोमस्य अङ्गं भवति अग्नीषेमीयपशुयागादि । प्रधानभूतज्योतिष्टोमस्य दक्षिणा, "गौश्च अश्वश्च अश्वतरश्च गर्दभाश्च अजाश्च अवयश्च व्रीहयश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणा" इति वाक्येन विहिता । परम् अङ्गार्थं पृथक् दक्षिणा न विहिता । यतः प्रधानार्थमनुष्ठितदक्षिणया अङ्गानामपि प्रसङ्गात् उपकारः सम्भवति । एवं विकृतौ "धेनुर्दक्षिणा" इति दक्षिणात्वेन धेन्वाः विधानात् प्रकृतिप्राप्तद्वादशशतदक्षिणायाः बाधः क्रियते । दक्षिणावत् एकेन द्रव्येण सोमक्रयः सम्पादनीयः न तु सर्वैः द्रव्यैः ।

तदुपरि शङ्का – "दशभिः क्रीणाति" इति पृथक् वाक्यस्य सत्त्वात् एकहायनी, वासः इत्यादिदशद्रव्याणाम् एकक्रयसाधनत्वमवगतमिति उत्पत्तिशिष्टगुणावरोधाभावात् न कर्मभेदः इति । तन्न, यतः "कलया क्रीणाति, शफेन क्रीणाति, गवा क्रीणाति, अजया क्रीणाति, हिरण्येन क्रीणाति, धेन्वा क्रीणाति, वृषभेण क्रीणाति, अनडुहा क्रीणाति,


ISSN : 2249-538X

मिथुनाभ्यां क्रीणाति, वाससा क्रीणाति" इति क्रयसाधनीभूतदशद्रव्याणि श्रुतानि । "वाससा क्रीणाति" इत्यादिभिः दशभिः वाक्यैः विहितस्य क्रयस्य अनुवादं "दशभिः क्रीणाति" इति वचनं करोति इति हेतोः क्रयसमुच्चयबोधकत्वमेव अस्य वचनस्य ।

तदुपरि प्रश्नः - गुणात् क्रयः भिन्नः इति अङ्गीकारेऽपि क्रयात् प्राप्यमानस्य सोमरूपस्य एकत्वात् सोम-प्राप्तिसाधनक्रयसाधनत्वस्य उद्देश्यतावच्छेदकत्वात् क्रयान्तरद्रव्येषु सर्वेषु आरुण्यस्य निवेशः स्यात् इति । तन्न, उद्देश्यतावच्छेदकत्वं सोमप्राप्तिसाधनक्रयसाधनत्वमिति न स्वीकार्यम् । अपि तु विजातीयक्रयजन्यानतिविशेषसा-धनक्रयसाधनद्रव्यत्वम् विजातीयक्रयसाधनद्रव्यत्वं वा उद्देश्यतावच्छेदकम् इति स्वीकार्यम् ।

साद्यस्क्रे "त्रिवत्सः साण्डः सोमक्रयणः" इति वचनेन त्रिवस्तः साण्डः सोमक्रयोद्देशेन विहितः । इदं च द्रव्यं प्रकृतिगतदशविधक्रयसाधनद्रव्यस्थानापन्नम् । तत्रापि आरुण्यस्य निवेशः सम्भवति । एवं च आरुण्यं केवलम् एकहाहन्या सम्बध्यते न तु वासआदिसर्वद्रव्यैः साकमिति राद्धान्तः ।

**आकरसूची**

- अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमस्स्यात् इति - मीमांसासूत्रम् - 3 - 1 - 12
- अरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणाति - तैत्तिरीयसंहिता, 6.1.6
- गुणवचनानाम् आश्रयतो लिङ्गवचनानि भवन्ति - वार्तिकम्
- गुणवचनेभ्यो मतुपो लुगिष्टः – वार्तिकम् - 3185
- वाससा क्रीणाति – तैत्तिरीयसंहिता - 6.1.10, दशभिः क्रीणाति – तैत्तिरीयसंहिता - 6.1.10
- गौश्च अश्वश्च अश्वतरश्च गर्दभाश्च अजाश्च अवयश्च व्रीहयश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणा - ताण्ड्यब्राह्मणम् - 16.1.10
- धेनुर्दक्षिणा - तैत्तिरीयब्राह्मणम् - 1.6.1.5.
- त्रिवत्सः साण्डः सोमक्रयणः – भाट्टदीपिका - 3.1.6 , अनेकमन्यपदार्थे – अष्टाध्यायी - 2.2.24
- "कलया क्रीणाति, शफेन क्रीणाति, गवा क्रीणाति, अजया क्रीणाति, हिरण्येन क्रीणाति, धेन्वा क्रीणाति, वृषभेण क्रीणाति, अनडुहा क्रीणाति, मिथुनाभ्यां क्रीणाति, वाससा क्रीणाति" – तै.सं.6.1.10

**सहायकग्रन्थसूची**

1 भाट्टदीपिका – खण्डदेवः – सद्गुरुप्रकाशनम्-देहली-1987

2 जैमिनीयन्यायमाला – माधवाचार्यः – चौखम्बा संस्कृत संस्थान-वाराणसी-1991

# भूषणसारानुसारेण आख्यातार्थविचार :

डा. प्रमोद भट्टः*

**शोधसारः –**

वैयाकरणानां मते आख्यातार्थ: क: ? धात्वर्थश्च क: ? इति प्रधानतया अत्र प्रबन्धे वर्णित: वर्तते । आदौ वैयाकरणभूषणसारे ग्रन्थकर्त्रा प्रतिज्ञातां कारिकाम् उल्लिख्य तस्यार्थ: वर्णित: । तदनु प्रमाणत्त्वेन व्यापारविषे लौकिकै: व्यापारशब्देन य: व्यापार: आश्रियते स: अत्र शास्त्रे नैव स्वीक्रियते इति विचार्य भत्रहरिसम्मतव्यापारलक्षणमपि प्रदर्शितम् । तदनु व्यापारलक्षणं फललक्षणं च प्रदर्शितम् ।

**फलव्यापारयोः धातुराश्रये तु तिङः स्मृताः ।**

**फले प्रधानं व्यापारः तिङर्थस्तु विशेषणम् ॥** (भूषणसारः) इति ॥

फलं च व्यापारश्च फलव्यापारौ, तयोः फलव्यापारयोः इति **"चार्थे द्वन्द्वः"** (पा. सू. ०२.०२.२९) इति सूत्रेण इतरेतरयोगद्वन्द्वसमासः सप्तमीद्विवचनम् । वाचकत्वेन इति पदस्य अध्याहारः कर्तव्यः । स्मृताः इति बहुवचनस्य एकवचनान्ततया विपरिणामः कर्त्तव्यः । एवं च फलव्यापारयोः धातुः वाचकत्वेन स्मृतः इत्यर्थः फलति । आश्रये तु इत्यस्य फलाश्रये व्यापाराश्रये च इत्यर्थः । फलाश्रये व्यापाराश्रये च तिङः स्मृताः इत्यर्थः, फले इत्यत्र सप्तम्याः निरूपितत्त्वमर्थः । तस्य प्रधानपदार्थे एकदेशे प्राधान्येऽन्वयः । एवं च फलनिरूपितप्रधानवान् व्यापारः इत्यर्थः फलति । तिङर्थस्तु विशेषणम् इत्यत्र तु शब्दः एवार्थक: वर्तते । स च विशेषणमित्यनन्तरं योजनीय: । एवञ्च तिङर्थः विशेषणमेव इत्यर्थः ।

**फलस्वरूपविमर्शः :-** लोके यदुद्देशेन श्रुतेर्लोकतः वा प्रवृत्तिः अवगता तत्त्वं फलत्त्वम् इति उच्यते । तथा च हरि: -

**यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः ।**

**तत्प्रधानं फलं तेषां न लाभादिप्रयोजनम् ॥** इति ॥ (वाक्यपदीयम्)

**"स्वरितञितः कर्त्रभिप्राये क्रियाफले"** (पा. सू०१-०३-७२) इति सूत्रे फलपदेन लौकिकमेव फलं स्वीक्रियते । यथा – पच्धातोः फलं तृप्तिः, यज्धातोः स्वर्गः । फलाश्रयः कर्म भवति । एवं च पच्धातोः फलं तृप्तिः तदाश्रयस्य कर्तुः चैत्रस्य, यज्धातोः फलं स्वर्गः, तदाश्रयस्य यजमानस्य च कर्मसंज्ञा स्यात् । विक्लित्ते: फलत्वाभावात् तदाश्रयस्य तण्डुलस्य कर्मसंज्ञा न स्यात् । अपि च लौकिकलक्षणस्वीकारे सकर्मत्वाकर्मकत्वविभागोऽपि न सिद्ध्येत् । अतः फलमित्यनेन लौकिकं फलं न स्वीक्रियते किन्तु शास्त्रीयं पारिभाषिकमेव फललक्षणं स्वीकर्तव्यम् । तच्च फलं पचादेः विक्लित्त्यादि एव । तथा च फललक्षणं शास्त्रीयमित्थम् - कर्मकृत्प्रत्ययासमभिव्याहारे तद्धात्वर्थविशेषणत्वे सति

*सहायकाचार्यः, व्याकरणविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

तद्धात्वर्थम् इति । चैत्र: तण्डुलं पचतीत्यत्र लक्षणसमन्वयः - तद्धातुः पच्धातुः तदर्थः विक्लित्त्यनुकूलव्यापारः, तत्र विक्लित्तिः विशेषणम्, सा च विक्लित्तिः पच्धात्वर्थोऽपि । विक्लित्त्याश्रयः तण्डुलः अतः तस्य कर्मसंज्ञायां द्वितीया । तद्धात्वर्थविशेषणत्वं च तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वम् । एवं च निष्कृष्टं फललक्षणम् इत्थं फलति - कर्मकृत्प्रत्ययासमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वे सति तद्धात्वर्थत्वमिति । पचति चैत्रः इत्यादौ पच्यर्थव्यापारे अतिप्रसङ्गवारणाय तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वे इति । तथा हि – सत्यन्तपदाभावे पचति चैत्रः इत्यत्र दोष: । कर्मकृत्प्रत्ययासमभिव्याहारे तद्धात्वर्थम् इति लक्षणं फलति । पचति चैत्रः इत्यत्र कर्मकृत्प्रत्ययासमभिव्याहारः वर्तते । तद्धातुः पच्धातुः, तदर्थः विक्लित्त्यनुकूलव्यापारः, व्यापारस्यापि फलसंज्ञायां तदाश्रयस्य कर्तुः फलाश्रयत्त्वात् कर्मसंज्ञापत्तिः । लक्षणे उभयत्रापि तत्पदाभावे लक्षणस्वरूपम् इत्थं भवति - कर्मकृत्प्रत्ययासमभिव्याहारे धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकातावत्त्वे सति धात्वर्थत्त्वमिति ।

एवं लक्षणस्वीकारे पश्य मृगो धावति इत्यत्र दोषः । अत्र मृगकर्तृकं धावनकर्मकं दर्शनमिति बोध: । अत्र दर्शननिष्ठविशेष्यतानिरूपिता प्रकारता धाव्धात्वर्थनिष्ठा । अत: धाव्धात्वर्थ: फलं भवति । तदाश्रयत्वेन मृगस्य कर्मत्वात् द्वितीया स्यात् । अत: लक्षणे तदिति निविष्टम् । अत्र अन्यधात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतास्ति । अत: धाव्धात्वर्थ: फलं न भवति ।

धावनस्य दर्शने अन्वयात् प्रागेव अन्तरङ्गत्वात् मृगस्य धावनरूपक्रियाश्रयत्वेन कर्तृत्त्वात् कर्तृसंज्ञैव भवतीति चेत् तदा मृगस्य संज्ञाद्वयसम्भवे कर्मसंज्ञापेक्षया कर्तृसंज्ञा परा, अत: परया कर्तृसंज्ञया कर्मसंज्ञाया: बाधात् लक्षणे तत्पदाभावेऽपि न दोषः इति चेत् **“अन्तरङ्गादपि प्रधानकार्यं बलवत्”** इति **“हेतुमति च”** (पा. सू. ०३.०१.२६) सूत्रे भाष्ये सिद्धान्तितम् । तथा हि - पक्त्वा ओदनः मया भुज्यते इति वाक्ये भुज्यते इति तिङा कर्म उक्तम् । अतः ओदन इत्यत्र प्रातिपदिकार्थे प्रथमा, मया इत्यत्र अनुक्ते कर्तरि तृतीया इति । पक्त्वा इत्यत्र पच्धातोः **“समानकर्तृकयो: पूर्वकाले”** (पा. सू. ०३.०४.२१) इत्यनेन कर्तरि क्त्वा प्रत्ययः । अतः ओदनशब्दात् अनुक्ते कर्मणि द्वितीया प्राप्ता । अत्र वाक्ये भुज्यते इति तिङन्तपदेन ओदननिरूपितकर्म उक्तम् । पक्त्वा इत्यत्र नोक्तं चेदपि प्रधानतिङन्तपदेन कर्मण: उक्तत्वात् अप्रधानपच्धातुनिरूपितकर्मापि उक्तप्रायमेव । अत एव **“गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ”** (पा. सू. ०१.०४.५२)सूत्रं नियमार्थमिति भाष्यकारैः सिद्धान्तितं सङ्गच्छते । तथा हि **“गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ”** (पा. सू. ०१.०४.५२)अण्यन्तावस्थायां कर्तुः ण्यन्तावस्थायां कर्मसंज्ञा भवतीति सूत्रार्थः । चैत्रः ग्रामं गच्छति इति वाक्ये गम्धातोः अर्थः उत्तरदेशसंयोगानुकूलव्यापारः । तत्र संयोगः फलम् । तदाश्रयस्य ग्रामस्य कर्मसंज्ञायां

**"कर्मणि द्वितीया"** (पा. सू. ०२.०२.०२) इत्यनेन द्वितीया । मैत्रः चैत्रं ग्रामं गमयति इति णिजन्ते प्रयोगे अण्यन्तावस्थायां कर्तुः चैत्रस्य ण्यन्तावस्थायां कर्मसंज्ञा भवति । उत्तरदेशसंयोगानुकूलव्यापारानुकूलव्यापारः णिजन्तधातोः अर्थः । उत्तरदेशसंयोगानुकूलव्यापारानुकूलव्यापारे उत्तरदेशसंयोगानुकूलव्यापारेऽपि वर्तते सोऽपि फलं भवति । अतः **"कर्तुरीप्सिततमं कर्म"** (पा. सू. ०१.०४.४८) इति सूत्रेणैव संयोगाश्रयस्य ग्रामस्य, एवम् उत्तरदेशसंयोगानुकूलव्यापाराश्रयस्य प्रयोज्यस्य कर्मसंज्ञासिद्धौ **"गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ"** (पा. सू. ०१.०४.५२) सूत्रं नियमार्थं भवति । नियमाकारस्तु अण्यन्तावस्थायां कर्तुः ण्यन्तावस्थायां यदि कर्मसंज्ञा तर्हि गत्याद्यर्थकधातूनां योगे एव इति । तेन पाचयत्यादिधातूनां योगे प्रयोज्यस्य कर्मसंज्ञा न । तत्र प्रयोज्यस्य कर्तृसंज्ञैव, पाचयति चैत्रः ओदनं देवदत्तेन इति । उत्तरदेशसंयोगानुकूलव्यापारानुकूलव्यापारे उत्तरदेशसंयोगानुकूलव्यापारोऽपि वर्तते । अतः अन्तरङ्गत्वात् उत्तरदेशसंयोगानुकूलव्यापाराश्रयत्वे प्रयोज्यस्य कर्तृसंज्ञायां प्राप्तायां **"गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ"** (पा. सू. ०१.०४.५२) सूत्रं विध्यर्थं स्यात् । किन्तु **"गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ"** (पा. सू. ०१.०४.५२) इति सूत्रं नियमार्थमिति सिद्धान्तितम् । अनेन ज्ञायते "अन्तरङ्गादपि प्रधानकार्यं बलवत्" इति । तेन प्रधानम् = तदनुकलव्यापार :, तत्र संयोगानुकलव्यापारस्य फलत्वेन तदाश्रयत्वत् प्रयोज्यस्य कर्मसंज्ञायां सिद्धायां गतिबुद्दीत्यस्य नियमार्थता भाष्योक्ता सङ्गच्छते । अत्र अन्तरङ्गत्वात्प्रयोज्यस्य कर्तृसंज्ञा वक्तुं न शक्यते प्रधानकार्यस्य सत्त्वात्प्रयोजकस्यैव कर्तृसंज्ञा वक्तव्या ।

फललक्षणे कर्मकृत्प्रत्ययासमभिव्याहारे इत्यभावे पक्वः तण्डुलः इत्यत्र दोषः । तथा हि कर्मकृदन्तस्थले फलस्य प्राधान्यात् फलविशेष्यकबोधः इष्टः । चैत्रकर्तृकव्यापारप्रयोज्यविक्लित्त्याश्रयाभिन्नः तण्डुलः इति शाब्दबोधः । तद्धातुः = पच्धातुः, तदर्थ: व्यापारजन्या विक्लित्ति :, तन्निष्ठा विशेष्यता = विक्लित्तिनिष्ठा विशेष्यता, तन्निरूपितप्रकारता व्यापारनिष्ठा प्रकारता, सा तद्धात्वर्थोऽपि पच्धात्वर्थोऽपि । एवं व्यापारे फललक्षणस्य अतिप्रसङ्गः । कर्मकृत्प्रत्ययासमभिव्याहारे इत्यस्य स्थाने कर्तृप्रत्ययसमभिव्याहारे इति भवतु इति चेत् दीक्षितस्य मते कर्मकृत्प्रत्ययभिन्ने सर्वत्रापि व्यापारमुख्यविशेष्यकः एव बोधः भवति, अतः कर्तृप्रत्ययसमभिव्याहारे इति वक्तुं नैव शक्यते । पच्यते ओदनः इत्यत्र एकाश्रयिका या विक्लित्ति: तदनुकूला भावना इति शाब्दबोधः ।

फलप्रयोजकक्रियावत्त्वं व्यापारत्वम् इति व्यापारलक्षणम् इति वक्तुं न शक्यम्, क्रियाघटितत्त्वेन आत्माश्रयदोषात् । चैत्रः दण्डेन पचति इत्यादौ दण्डे व्यापारः वर्तते इति कृत्वा दण्डगतव्यापारस्यापि धात्वर्थतापत्तिः । यद्यपि पाकरूपक्रियानिष्पत्तौ दण्डः करणम् । धातूपात्तव्यापाराश्रयत्त्वात् दण्डस्य कर्तृत्त्वेन


ISSN : 2249-538X

तत्संज्ञया करणसंज्ञायाः बाधः स्यात् । संज्ञाद्वयं वक्तुं नैव शक्यम्, "आकडारादेका संज्ञा" इत्यनेन परत्वात् करणस्यापि कर्तृसंज्ञैव स्यात् । अतः फलप्रयोजकक्रियात्वं व्यापारत्वमिति वक्तुं न शक्यते । यदि क्रिया व्यापारः इति व्यापारलक्षणम् । क्रिया नाम परिस्पन्दरूपा उच्यते । क्रिया व्यापारश्चेद्भवति, तिष्ठति, पुत्रीयति, व्याकरणं सूत्रयति इत्यादौ क्रिया अभावात् धातुत्वं न स्यात् । अतः एतेषां धातुत्वसम्पादनाय साध्यत्वेनाभिधीयमाना क्रिया व्यापारः इति वक्तव्यम् । तदा धात्वर्थफले विक्लित्यादौ अतिव्याप्तिः । धात्वर्थफलस्य साध्यत्वेन भानात् क्रियात्त्वाच्च । अपि च क्रियते असौ इति व्युत्पत्त्या 'कृञः श च' इति सूत्रेण कर्मणि शप्रत्यये क्रिया इति निष्पद्यते । क्रिया इत्यनेन इदानीं फलमुच्यते । अनेन व्यापारस्यापि फलसंज्ञायां व्यापाराश्रयस्य फलत्वात् कर्मसंज्ञा स्यात्, अतः निर्दिष्टं व्यापारलक्षणं भावनाभिधा साध्यत्वेनाभीधीयमानाक्रिया व्यापारः इति वक्तव्यम् । भावना नाम भवितुः भवनानुकूलः फूत्कारादिरेव भावनाशब्देन उच्यते । अतः फले नातिव्याप्तिः । एवं च भावनाऽपरनामिका साध्यत्वेन रूपेण भासमाना क्रिया व्यापारः इति सिद्धम् । वाक्यपदीये हरिरप्याह -

**यावत्सिद्धमसिद्धं वा सध्यत्वेनाभिधीयते ।**
**आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते** ॥ इति ॥ वाक्यपदीयम् ॥

शास्त्रीयक्रियायाः लक्षणमिदम् । लोके क्रियापदेन परिस्पन्दरूपः एवार्थः गृह्यते । शास्त्रे तु यः कश्चिदपि पदार्थः साध्यत्वेन विवक्ष्यते चेत् सः शास्त्रकारैः क्रिया इति अभिधीयते । कारिकायां सिद्धम् अपाक्षीत् इत्यादौ ।असिद्धं पचति, पक्ष्यतीत्यादौ । नामार्थस्यापि यदि साध्यत्वेन विवक्षा क्रियते, सापि कारकान्वययोग्यक्रियारूपा भवति । अत एव व्याकरणं सूत्रयति इत्यादौ व्याकरणस्य सूत्रयत्यर्थनिरूपितकर्मत्वसिद्धिः । आश्रितक्रमरूपत्वात् इत्यस्य आश्रितं क्रमरूपं यस्याः इति विग्रहः । पचतीत्यादौ क्रमेणोत्पन्नानां फूत्कारादीनां क्रमिकं रूपं समुदाये आरोप्यते । फूत्कारादीनां घटयति, सूत्रयति, पुत्रीयति इत्यादौ घटादीनां च कालगतपौर्वापर्येण क्रियात्वं निर्वाह्यम् । पचति-पाकः, करोति-कृतिः इत्यादौ धात्वर्थावगमाविशेषेऽपि साध्यत्वेन अभिधाने प्रमाणं किमिति चेत् क्रियान्तराकाङ्क्षा-अनाकाङ्क्षावेव तत्र मानम् । तथा च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपं साध्यक्रियाया : लक्षणम् ।

असत्त्वभूतो भावश्च तिङ्पदैरभिधीयते इत्याह हरिः वाक्यपदीये । अत्र पद्यते अनेन अर्थः इति व्युत्पत्त्या पदशब्दः प्रत्ययपरः । तिङः = पदानि प्रत्ययाः येभ्यः इति अतद्गुणसंविज्ञानबहुव्रीहिणा तिङ्पदशब्दः धातुपरः । तथा च तिङ्पदैः धातुभिः असत्वभूतः एव भावः अभिधीयते इत्यर्थः । पचतीत्यादौ तत्तत्प्रकारकबोधस्य अनुभवसिद्धत्वात् अयं च व्यापारः फूत्कारत्वाधस्सन्तापनत्वयत्नत्वादितत्तद्रूपेण वाच्यः ।

फलाश्रये व्यापाराश्रये च तिङः स्मृताः इत्यस्य फलाश्रयः कर्म । व्यापाराश्रयः कर्ता । तत्र फलव्यापारयोः

धातुलभ्यत्वात् न तिङः फलांशे व्यापारांशे च शक्तिः । आख्यातः इति शब्दविषये आख्यायते सर्वप्रधानीभूतः अर्थः अनेन इति व्युत्पत्त्या धातुः आख्यातपदेन उच्यते इति भट्टोजिदीक्षितः कौण्डभट्टश्च ।

**उपसंहारः** - इत्थं भूषणसारोक्तदिशा फललक्षणं व्यापारलक्षणं च उपवर्ण्य उदाहरणेषु फललक्षणस्य व्यापारलक्षणस्य समन्वयः प्रदर्शितः । "गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ" (पा. सू. ०१.०४.५२) इति सूत्रस्य नियामकत्त्वे भाष्यकारसम्मतिः च प्रदर्शितः ।

**उपयुक्तग्रन्थसूची**


- वैयाकरणसिद्धान्तकौमुदी
- पाणिनीयाष्टाध्यायी
- वैयाकरणसिद्धान्तभूषणम्
- वैयाकरणसिद्धान्तभूषणसारः
- वाक्यपदीयम्
- लघुशब्देन्दुशेखरः
- प्रौढमनोरमा
- प्रौढमनोरमाशब्दरत्नम्
- पाणिनीयधातुपाठः



ISSN : 2249-538X

# शब्दार्थयोः साहित्यविवेचनम्

डा. कोम्पेल्लि विनयकुमारः*

**शोधसारः –**

शब्दार्थयोः साहित्यं नाम न केवलं शब्दस्य अर्थेन सह वाच्यवाचकभावलक्षणसम्बन्ध एव विवक्षितः कुन्तकमतानुसारम् । अपि तु शब्दस्य शब्दान्तरेण, अर्थस्य अर्थान्तरेण सह विशिष्टसम्बन्धः विवक्षितः । स च काव्यशोभाऽतिशयसम्पादने अन्यूनानतिरिक्तभावेन अवस्थानात्मकः परस्परस्पर्धार्थित्वलक्षणः इति । काव्यस्य शोभाशालित्वं सम्पादयितुम् एतयोः शब्दार्थयोः न्यूनतायाः आधिक्यस्य अभावेन च महती परस्परस्पर्धया रमणीया कापि अपूर्वा स्थितिरेव साहित्यम् इति अभिधीयते ।

अर्थात् शब्दार्थयोरुभयोः एकस्यापि न्यूनत्वम् अपकर्षो वा न विद्यते, अथवा आधिक्यम् उत्कर्षो वा न वर्तते, तत्र स्थिता अवस्थितिः साहित्यम् इति कथ्यते । तत्र शब्दस्य शब्दान्तरेण सह, अर्थस्य अर्थान्तरेण सह परस्परस्पर्धित्वलक्षणं साहित्यम् अभीष्टं कुन्तकाचार्येण । अन्यथा तद्विदाह्लादकारित्वहानिः प्रसज्येत ।

एवंप्रकारेण यत्र तादृशं समानत्वं द्वयोः सहितयोः शब्दार्थयोः भवति, तत्र साहित्यं सन्तिष्ठते इति कुन्तकाचार्यः जगाद ।

**प्रमुखशब्दाः –** शोधसारः, शब्दार्थयोः उपक्रमः, कुन्तकाचार्यस्य काव्यलक्षणम्, शब्दार्थयोः निर्वचनम्, शब्दार्थयोः विशिष्टं साहित्यम्, शब्दार्थयोः साहित्यविवेचनम्, शब्दार्थयोः साहित्यलक्षणम् ।

**शब्दार्थयोः उपक्रमः**

**न स शब्दो न तद्वाच्यं न सा विद्या न सा कला ।**
**जायते यन्न काव्याङ्गमहो ! भारो महान् कवेः**[१] ॥

इत्थं कविकर्मणि काव्ये सर्वा विद्याः परिसमाप्यन्ते इति उदितं भामहकाव्यालङ्कारे ।

महाकविः नीलकण्ठोऽपि **शिवलीलार्णवे** महाकाव्ये कथयामास यत् - जीवने येषां शब्दानां प्रयोगः क्रियते, येषाम् अर्थानां चर्चा विधीयते, ते शब्दाः अर्थाश्च एव कविकौशलेन विशिष्टं विन्यासम् आसाद्य लोकानां मनोहारकाः सम्पद्यन्ते इति । यथा -

**यानेव शब्दान् वयमालपामः यानेव चार्थान् वयमुल्लिखामः ।**
**तैरेव विन्यासविशेषभव्यैः सम्मोहयन्ते कवयो जगन्ति**[२] ॥ इति ॥

इदमेव काव्यशास्त्रं क्रमशः स्वरूपानुसारेण साहित्यशब्देन व्याहृतम् । हितेन सह सहितम्, सहितस्य भावः

*सहायकाचार्यः, साहित्यविद्याशाखा, राजीवगान्धीपरिसरः, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रृङ्गेरी

[१] भा.काव्या. – 5 - 4

[२] शि.लीला.

साहित्यम् । **गुणवचनब्राह्मणादिभ्यः**[१] इति ष्यञ् । सहभावश्च अष्टादशविद्याभिः चतुष्षष्टिकलाभिश्च । हितं द्विविधम् - लौकिकं पारलौकिकं च । अथवा इष्टापत्तिः अनिष्टनिवारणं च । अनयोः सोपपत्तिविवेचनं यत्र तत् साहित्यम् इति फलितोऽर्थः । साहित्यशब्दस्य काव्यार्थतां ध्वनयन् भणति बिल्हणः विक्रमाङ्कदेवचरिते । यथा -

**साहित्यपाथोनिधिमन्थनोत्थं काव्यामृतं रक्षत हे कवीन्द्राः ।**
**यदस्य दैत्या इव लुण्ठनाय काव्यार्थचौराः प्रगुणीभवन्ति**[२] ॥ इति ॥

काव्यं साहित्यं वा कवेः चिन्तनप्रासादं भवति । यावत् काव्यं भुवि वर्तते तावत् कवेः सारस्वतयज्ञः परिपूर्णः ।

प्रस्तुतोऽयं विषयः आचार्यस्य श्रीमद्राजानककुन्तकस्य वक्रोक्तिजीविते प्रथमोन्मेषे काव्यलक्षणप्रसङ्गे शब्दार्थयोः साहित्यविचारः कृतः वर्तते ।

**कुन्तकाचार्यस्य काव्यलक्षणम् -**

**शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि ।**
**बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि**[३] ॥ इति ॥

अर्थात् वक्रशास्त्रादिप्रसिद्धशब्दार्थोपनिबन्धनेन भिन्नौ, काव्यव्यापारशोभिते सहृदयानन्दकारिणि काव्ये विशिष्टरूपेण व्यवस्थितौ सहभावेन युक्तौ (सहितौ) शब्दार्थौ काव्यम् इति ।

वाच्यवाचकौ शब्दार्थौ द्वौ सम्मिलितौ एव काव्यम् । केषाञ्चित् मते कविकौशलकल्पितकमनीयतातिशयः शब्दः एव केवलं काव्यमिति, केषाञ्चित् मते वाच्यमेव रचनावैचित्र्यचमत्कारकारि काव्यमिति पक्षद्वयमपि निरस्तं कुन्तकाचार्येण । तस्मात् द्वयोः शब्दार्थयोः प्रतितिलमिव तैलं तद्विदाह्लादकारित्वं वर्तते, न पुनः एकस्मिन् इति ।

**शब्दार्थयोः निर्वचनम् -**

कुन्तकाचार्यः काव्यलक्षणे शब्दार्थौ इत्थं व्याख्याति यत् -

**वाच्योऽर्थो वाचकः शब्दः प्रसिद्धमिति यद्यपि ।**
**तथापि काव्यमार्गेऽस्मिन् परमार्थोऽयमेतयोः**[४] ॥ इति ॥

**शब्दार्थयोः अपूर्वं तत्त्वम् -**

यद्यपि वाच्यः अर्थः, वाचकः शब्दः इति प्रसिद्धम् । तथापि अस्मिन् काव्यमार्गे शब्दार्थयोः परमार्थः कः

[१] अष्टा.5-2-224
[२] वि.दे – 1- 11
[३] व.जी – 1- 7
[४] व.जी – 1- 8


ISSN : 2249-538X

#29

अपूर्वं तत्त्वं किम् इति कुन्तकाचार्यः कथयति यत् –

**शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि ।**

**अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः**[1] ॥ इति ॥

बहुषु पर्यायेषु तद्वाचकेषु शब्देषु सत्सु यः समुचितसम्पूर्णसामग्रीकः विवक्षितस्य अर्थस्य यः वाचकः शब्दः भवति, स एव शब्दः इति । अर्थात् एकमर्थं बोधयितुं बहवः शब्दाः सन्ति चदेपि कवेः अभीष्टं विषयं बोधयितुम् अपेक्षिता शक्तिः केवलम् एकस्य शब्दस्यैव भवति । अतः काव्ये तादृशः शब्दः एव शब्दः । सहृदयानाम् आनन्ददायकः यः (आत्मनः स्वभावेन कमनीयः) स्वस्पन्दसुन्दरः अर्थः भवति, स एव अर्थः इति ।

सामान्यरूपेण अभीष्टम् अर्थं वक्तुं विशेषवाचकः शब्दः सम्यक् बोधयितुं न शक्नोति । यथा -

**कल्लोलवेल्लितदृषत्परुषप्रहारैरत्नान्यमूनि मकराकर माऽवमंस्थाः ।**

**किं कौस्तुभेन भवतो विहितो न नाम याञ्चा प्रसारितकरः पुरुषोत्तमोऽपि**[2] ॥ इति ॥

हे समुद्र ! चपलितानां नूतनपाषाणानां कठोराघातैः तरङ्गैः अमूनि रत्नानि मा अवमानय । कौस्तुभमणिना पुरुषोत्तमः भगवान् विष्णुरपि भिक्षायै भवतः निकटे प्रसारितकरः नाभूत् किम् ?

अत्र साधारणरत्नस्य उत्कर्षकथनं प्रारब्धम् । कौस्तुभमणिना इति विशेषरत्नवाचकः शब्दः रत्नविशेषस्य उत्कर्षकथनम् उपसंहरति इति उप्रक्रमोपसंहारवैषम्यम् अत्यधिकशोभां न आवहति । विशेषे यत् गुणसमुदायगौरवं भवति, तत्सर्वमपि सामान्येऽपि सम्भाव्यमेव खलु इति वक्तुं न शक्यते । यतः –

**वाजिवारणलोहानां काष्ठपाषाणवाससाम् ।**

**नारीपुरुषतोयानाम् अन्तरं महदन्तरम्**[3] ॥ इति ॥

अर्थात् अश्वानां गजानां लोहानां काष्ठानां पाषाणानां रत्नानां वस्त्राणां स्त्रीणां पुरुषाणाम् उदकानां स्वस्वजातीयैः सह महान् भेदः महदन्तरं भवति खलु !

अतः एतादृशविषयेषु सामान्यवाचकः शब्दः एव सहृदयहृदयहारी भवति इति कुन्तकाचार्यः प्रकृते श्लोके पाठान्तरं सुलभमेव खलु ! इति कथयति यत् - **"एकेन किं न विहितो भवतः स नाम"** इति । (एकेन रत्नेन कृतं खलु)

विशेषरूपेण अभीष्टं वस्तु प्रतिपादयितुं विशेषवाचकं शब्दमेव निबध्नन्ति कवयः । यथा -

**द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः ।**

[1]व.जी – 1- 9
[2]भ.श – 62
[3]व.जी. सं. का – 1- 26

**कला च सा कान्तिमती कलावतः त्वमस्य लोकस्य च नेत्रकौमुदी**[१] ॥ इति ॥

अर्थात् पूर्वं चन्द्रकला, अधुना समस्तलोकस्य नेत्रकौमुदी भवती पार्वती च कपालिनः शिवस्य समागमप्रार्थनया भवत्यौ द्वे अपि शोचनीयत्वं प्राप्ते ।

अत्र श्लोके शिवपर्यायिसहस्रशब्दसञ्जाते अपि **'कपालिनः'** इति बीभत्सरूपस्य आलम्बनविभावपर्यायवाची शब्दः जुगुप्सास्पदत्वेन प्रयुज्यमानः कामपि विचित्रां वाचकवक्रतां विदधाति । अपि च **'सम्प्रति'** **'द्वयम्'** इति पदद्वयम् अतीव रमणीयम् । यतः पूर्वम् एका चन्द्रकाला एव कलाहीनत्वेन शोचनीया सती दीनावस्थायम् आसीत् । इदानीं पुनः त्वमपि पार्वती तच्चन्द्रकलावत् कपाल्याश्रयरूपदुष्टनिश्चये पतिता इति उपहस्यते । **प्रार्थना**शब्दोऽपि अत्यन्तं रमणीयः । यस्मात् तस्याः चन्द्रकलायाः इव पूर्वोक्तदुःखदोत्साहसहायकम् इव प्रारब्धम् इति त्वमपि उपहस्यते । यतः काकतालीयत्वयोगेन कपालिना सह समागमः भवति चेत् निन्दार्हः न भवेत् । **प्रार्थना** तावत् अपवादकलङ्कस्य कारणभूता । अत्र द्वयोः चन्द्रकलापार्वत्योः परस्परस्पर्धया लावण्यातिशयम् इति अर्थं प्रतिपादयितुं **'सा च त्वं च'** इति पदप्रयोगः कृतः । **'कलावतः'** **'कान्तिमती'** इत्यत्र मतुप् प्रत्यययोजनेन द्वे चन्द्रकलापार्वत्यौ अपि प्रशंसनीये इत्यर्थः प्रतीयते । यथा -

**भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायिने । संसर्गेऽस्ति विवक्षायां भवन्ति मतुबादयः ॥**

इति वार्तिकानुसारं मतुबादिप्रत्ययानां बाहुल्य-निन्दा-प्रशंसा-नित्यसम्बन्ध-अतिशय-संसर्गार्थाः वर्तन्ते । 'कलावतः' 'कान्तिमती' इत्यत्र प्रशंसार्थकमतुप् प्रत्ययः वर्तते ।

एवम् अस्मिन् श्लोके स्थितः एकैकः शब्दः यं यम् अर्थं बोधयति, तथा अन्यः कोऽपि इतरशब्दः बोधयितुं न शक्नोति ।

**शब्दार्थयोः विशिष्टं साहित्यम् -**

वाच्यवाचकसम्बन्धस्य विद्यमानत्वात् शब्दार्थयोः येन केनापि प्रकारेण साहित्यविरहः नैव भवेत् । अतः एतयोः शब्दार्थयोः विशिष्टमेव साहित्यम् अभिप्रेतम् । कीदृशं साहित्यम् ? वक्रताविचित्रगुणालङ्कारसम्पदां परस्परस्पर्धाधिरोहम् इति । उच्यते यत् –

**समसर्वगुणौ सन्तौ सुहृदाविव सङ्गतौ ।**
**परस्परस्य शोभायै शब्दार्थौ भवतो यथा**[२] ॥ इति ॥

---

[१]कु.सं – 5 - 71
[२]व.जी. सं. का – 1- 18


ISSN : 2249-538X

#31

अर्थात् यत्र समानौ सर्वगुणौ मित्रवत् सम्मिलितौ शब्दार्थौ सन्तौ अहमहमिकया परस्परस्पर्धां कुरुतः तत्र साहित्यं सन्तिष्ठते । यथा -

**लीलया कुवलयं कुवलयमिव शीर्षे समुद्वहता ।**

**शेषेण शेषपुरुषाणां पुरुषकारः समुपहसितः**[१] ॥

कुवलयमिव (कोः वलयं कुवलयम् = भूमण्डलं लीलया शिरसि धारयता शेषनागेन अन्येषां समस्तनागानां पौरुषम् उपहासतां नीतम् ।

अस्मिन् श्लोके अप्रस्तुतप्रशंसा-उपमारूपकार्थालङ्काराणां वैचित्र्येन विहिता, लीलया विरचिता यमकानुप्रासमनोरमा सरलार्था कापि अनिर्वचनीया काव्यशोभा सहृदयहृदयम् आह्लादयति । अत्र अप्रस्तुतशेषवर्णनद्वारा प्रस्तुतराजवर्णनं कृतम् इत्यतः अप्रस्तुतप्रशंसालङ्कारः । कुवलयं कुवलयमिव इत्यत्र उपमायमाकालङ्कारौ स्पष्टवेद्यौ ।

अत्र शब्दस्य शब्दान्तरेण वाच्यस्य वाच्यन्तरेण च साहित्यं परस्परस्पर्धित्वलक्षणं विवक्षतम् अस्त्येव । अन्यथा तद्विदाह्लादकारित्वहानिः प्रसज्येत । यथा -

**असारं संसारं परिमुषितरत्नं त्रिभुवनं निरालोकं लोकं मरणशरणं बान्धवजनम् ।**

**अदर्पं कन्दर्पं जननयननिर्माणमफलं जगज्जीर्णारण्यं कथमसि विधातुं व्यवसितः**[२] ॥ इति ॥

मालतीमाधवनाटके स्थिते अस्मिन् श्लोके नायकेन माधवेन कश्चित् कापालिकः नायिकां मालतीं हन्तुम् उद्युक्तः सन् इत्थं कथ्यते यत् - इयं मालती नास्ति चेत् -

विश्वं सारहीनम्, त्रिभुवनम् अपहृतरत्नम्, लोकं प्रकाशरहितम्, बन्धुजनं मृत्युशीलम्, मन्मथं गर्वरहितम्, लोकनेत्रोत्पादनं व्यर्थं (निष्फलम्) जगत् शीर्णवनं कर्तुं कथं त्वं कापालिकः एवंविधम् अकरणीयं कार्यं कर्तुम् उद्युक्तोऽसि इति ।

अस्मिन् श्लोके महावाक्यकल्पे वाक्यान्तराणि अन्यवाक्यसदृशानि मालत्याः नायिकायाः समस्तजनलोभनीयलावण्यसम्पत्प्रतिपादनपराणि परस्परस्पर्द्धीनि अतिमनोरमाणि उपनिबद्धानि सन्ति कमपि काव्यशोभातिशयं पुष्णन्ति । परन्तु **'मरणशरणं बान्धवजनम्'** इति अवान्तरवाक्यं वाक्यान्तरैस्सह अंशमात्रम् ईषदपि स्पर्धितुम् नार्हति । परन्तु अत्र वस्त्वन्तरं सुलभमेव । यथा - **"विधिमपि विपन्नाद्भुतविधिम्"** । इति । ( ब्रह्माणमपि विनाशाद्भुतविधिम्) इति ।

[१] व.जी उ.श्लो.सं 1 - 20
[२] मा.मा. – 5- 30

यद्यपि कवेः प्रतिभायाः प्रौढिः द्वयोः शब्दार्थयोः साहित्यप्रधानतया वाक्यरचनायामेव अवतिष्ठते । अतः शब्दार्थयोः साहित्यविवेचनं कुरुते कुन्तकाचार्यः ।

**शब्दार्थयोः साहित्यविवेचनम् -**

**शब्दार्थौ सहितावेव प्रतीतौ स्फुरतः सदा ।**
**सहिताविति तावेव किमपूर्वं विधीयते**[१] ॥ इति ॥

शब्दार्थौ वाच्यवाचकलक्षणं साहित्यं परित्यज्य न वर्तेते । सर्वावपि शब्दार्थौ सहितावेव । अतः अत्र किमपि अपूर्वम् अद्भुतं वा न निष्पाद्यते, सिद्धमेव साध्यते । एवं शब्दार्थयोः निसर्गसिद्धं साहित्यम् । अतः काव्यलक्षणे **सहितौ शब्दार्थौ** इति कथनेन निष्प्रयोजनम् ।

किन्तु वाच्यवाचकरूपनिरन्तरसम्बन्धकारणं वस्तुतः साहित्यम् इति नोच्यते । यतः कठिनया कल्पनया विरचितानि असम्बद्धानि क्रमरहितानि गाङ्गुटादिवाक्यानि शाकटिकादिवाक्यानि गड्डलिकावाहकवाक्यानि च सर्वाणि यदि साहित्यशब्देन कथ्येरन्, तेन व्याकरण-मीमांसा-न्यायातिरिक्तं भिन्नं किमपि पृथक् साहित्यतत्त्वम् इति विभागः एव न स्यात् ।

तर्हि व्याकरण-मीमांसा-न्यायादिभिन्नं साहित्यसंज्ञकं सुप्रसिद्धमेव खलु, पुनः साहित्याभिधानेन पुनरुक्तिदोषः पिष्टपेषणं वा कथं न स्यात् । एवं पूर्वोक्तम् उच्यमानं वा यत् साहित्यम् इति यदस्ति, तत् एतावति असीमिते कालवर्त्मनि केवलं साहित्यशब्दमात्रेनैव प्रसिद्धम् । अद्यापि (एतावत्पर्यन्तम्) कोऽपि विपश्चित् अस्य कविकर्मकाष्ठाधिरूढिरमणीयस्य अस्य साहित्यस्य परमार्थः अयम् इति स्तोकमात्रमपि व्याख्यातुं नावतीर्णः ।

तस्मात् अधुना सरस्वतीहृदयारविन्दमकरन्दबिन्दुसन्दोहसुन्दराणां सत्कविवचसाम् आन्तरिकानन्दमनो-हरत्वेन परिस्फुरत् एतत् साहित्यतत्त्वं सहृदयभ्रमरगोचरत्वं प्रापयामि इति कथयन् कुन्तकाचार्यः इत्थं साहित्यलक्षणं सम्भणति ।

**शब्दार्थयोः साहित्यलक्षणम् -**

**साहित्यमनयोः शोभाशालितां प्रति काप्यसौ ।**
**अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः**[२] ॥ इति ॥

शब्दार्थयोः साहित्यं नाम न केवलं शब्दस्य अर्थेन सह वाच्यवाचकभावलक्षणसम्बन्ध एव विवक्षितः । अपि

[१]व.जी – 1- 16
[२]व.जी – 1- 17


ISSN : 2249-538X

तु शब्दस्य शब्दान्तरेण, अर्थस्य अर्थान्तरेण सह विशिष्टसम्बन्धः विवक्षितः । स च काव्यशोभाऽतिशयसम्पादने अन्यूनानतिरिक्तभावेन अवस्थानात्मकः परस्परस्पर्धार्थित्वलक्षणः इति । अर्थात् काव्यस्य शोभाशालित्वं सम्पादयितुम् शब्दार्थयोः महती परस्परस्पर्धया रमणीया कापि अपूर्वा स्थितिरेव साहित्यम् इति अभिधीयते । अन्यथा केवलवाच्यवाचकभावसम्बन्धस्य गाङ्कटादिसूत्रस्थशब्दार्थयोरपि सत्त्वेन तत्रापि काव्यलक्षणस्य अतिप्रसङ्गः स्यात् । अतः शोभातिशयसम्पादने शब्दार्थयोः परस्परस्पर्धित्वलक्षणः सम्बन्ध एव विवक्षितः ।

शब्दार्थयोरुभयोः एकस्यापि न्यूनत्वम् अपकर्षो वा न विद्यते, अथवा आधिक्यम् उत्कर्षो वा न वर्तते तत्र स्थिता सा अवस्थितिः साहित्यम् इति कथ्यते । तत्र शब्दस्य शब्दान्तरेण सह, अर्थस्य अर्थान्तरेण सह साहित्यम् अभीष्टम् ।

तर्हि शब्दस्य अर्थान्तरेण अर्थस्य शब्दान्तरेण सह कथं साहित्यं न स्यात् इति चेत् तथा भवितुं नार्हति । यतः क्रमपरिवर्तने प्रयोजनाभावात् असमन्वयाच्च इति । यथानुरूपं निजशोभासामग्रीसमूहः सहृदयाह्लादकारी न्यूनाधिक्यरहितपरस्परसाम्यस्पर्धया परिस्फुरति, सा कापि वाक्यविन्याससम्पत्तिः साहित्यनामभाक् भवति ।

**मार्गानुगुण्यसुभगो माधुर्यादिगुणोदयः । अलङ्करणविन्यासो वक्रतातिशयान्वितः**[1] ॥

**वृत्त्यौचित्यमनोहारि रसानां परिपोषणम् । स्पर्धया विद्यते यत्र यथास्वमुभयोरपि**[2] ॥

**सा काप्यवस्थितिस्तद्विदानन्दस्पन्दसुन्दरा । पदादिवाक्परिस्पन्दसारः साहित्यमुच्यते**[3] ॥ इति ॥

अर्थात् मार्गानुरूपरमणीया माधुर्यादिगुणैर्युक्ता अतिशयवक्रतासंयुक्ता अलङ्कारविन्यासा शृङ्गारादिनवरसा कैशिक्यादिवृत्त्यौचित्यमनोहारिणी परिपुष्टिः ययोः शब्दार्थयोः यथानुरूपं न्यूनाधिक्यरहितपरस्परसाम्यस्पर्धया यत्र वर्तते, तत्र सा रचना साहित्यमिति कथ्यते ।

**सहायकग्रन्थसूची –**

1. भामहकाव्यालङ्कारः, 2. शिवलीलार्णवम्, 3. अष्टाध्यायी, 4. विक्रमाङ्कदेवचरितम्, 5. कुमारसम्भवम्, 6. भल्लटशतकम्, 7. मालतीमाधवम्, 8. वक्रोक्तिजीवितम्

[1] व.जी – 1- 34
[2] व.जी – 1- 35
[3] व.जी – 1- 36

# व्याकरणदर्शने कालशक्तिः

डा. प्रियव्रतमिश्रः*

**शोधसारः –**

व्याकरणशास्त्रस्य प्रक्रियादर्शनभेदेन द्वैविध्यम् । प्रक्रियाक्रमे यत्र साध्वसाधुशब्दविचारः प्रवर्त्तते दर्शनक्रमे तत्र शब्दस्य ब्रह्मस्वरूपं प्रतिपाद्य तत्प्राप्त्युपाय उपदिश्यते । तत्र सन्दर्भक्रमेण स्फोटादिविचारं भर्तृहरिनागेशप्रभृतय आचार्या विदधिरे । भर्तृहरिकृतवाक्यपदीयग्रन्थे ब्रह्मणः अध्याहितकलाभेदाः कालशक्त्या विभिन्नरूपेण परिदृश्यन्ते । जायते, अस्ति, विपरिणमते, वर्धते, ह्रसति, नश्यति इति षड्भावविकारा अत्र विशेषरूपेण समालोच्यविषयाः । कथमनेन क्रमेण सृष्टिप्रक्रिया प्रवर्त्तत इति शोधपत्रस्यास्य विमृश्यविषयः ।

**प्रमुखशब्दाः** – कालशक्तिः, कर्तृत्वशक्तिः, आवरणम्, विक्षेपः, अविद्या

साध्वसाधुविचारणाय प्रवर्त्तितमिदं व्याकरणशास्त्रं न केवलमैहिकप्रयोजनार्थमृषिभिः समुपादिशि प्रत्युत तद्वारैव पारलौकिकमपि तत्त्वमुदघाटि । ततः शास्त्रस्यास्य प्रस्थानद्वयं प्रक्रियाप्रस्थानं दर्शनप्रस्थानञ्चेति । तत्र प्रक्रियाप्रस्थाने तावत् प्रकृतिप्रत्ययात्मकमन्वाख्यानं प्रावर्त्तिष्ट दर्शनप्रस्थाने च शब्द एव ब्रह्म तदेवाक्षरं तत एव जगतः प्रक्रिया विवर्त्तरूपेण प्रवर्त्तत इति प्रतिज्ञातं वैयाकरणशिरोमणिना भगवता भर्त्तृहरिणा वाक्यपदीये । तत्र प्रसङ्गवशात् कालशक्तिविषये विवृतमाचार्येणेत्थम् –

**अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः ।**
**जन्मादयो विकाराः षड् भावभेदस्य योनयः ॥१॥**

यद्यपि सर्वेऽपि भावविकाराः =कार्याणि स्वस्वकारणाधीनोत्पत्तयः, तथाप्यस्ति तेषां सर्वेषामप्युत्पत्तौ कालशक्तिः सहकारिकारणम् । कालशक्तिश्चैकत्वान्नित्यत्वाच्च सर्वासु तत्तत्कारणशक्तिषु जन्मवतीषु समनुगतेति तत्तत्कारणशक्तिकृतावच्छेदेन क्रमवानिव कालशक्तेरवभासोपगमो लक्ष्यते । तत्तत्कारणशक्तिपरिच्छिन्ना च क्रमवती कालशक्तिः काञ्चित् कारणशक्तिं प्रतिबध्नाति, काञ्चिच्छक्तिं चाभ्यनुजानाति । ततश्च प्रतिभावं क्रमेण वैश्वरूप्यम्= नानारूपत्वमनुभूयते । यथैकस्मिन् वृक्षे किसलयादिवैचित्र्यम्; एकस्मिन् वा किसलये रक्तत्वमाद्रवादिविशेषाः । कालशक्तिकृते तत्तत्कारणशक्तिप्रतिबन्धाभ्यनुज्ञे च यथा । यथैकस्मिन् वृक्षे प्रथमं किसलयस्याभ्यनुज्ञा पल्लवस्य प्रतिबन्धः, ततः किसलयस्य प्रतिबन्धः पल्लवस्याभ्यनुज्ञा,अत एवेदं पदार्थानां वैश्वरूप्यम् । तत्तत्कार्याणां तत्तदुपादानकारणशक्तयश्च परतन्त्रा अदृष्टादिरूपजन्मवत्कारणान्तराधीनवृत्तय इति कालशक्तेर्नित्यत्वात् सदा सन्निधानेऽपि न सदा सर्वकार्यप्रसवः कारणान्तराणां सदाऽसन्निधानात् । इयं च कालशक्तिर्भवतः स्वातन्त्र्याख्या कर्त्तृत्वशक्तिः पदार्थानां निष्पादनीयसंहारयोग्यतारूपा । पदार्थानां निष्पादनं च स्वोपादाने कारणात्मनाऽवस्थितानामाविर्भावनम्

*सहाचार्यो विभागाध्यक्षश्च स्नातकोत्तरव्याकरणविभागे श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी

उत्पत्त्यभ्यनुज्ञारूपम्, उपसंहारश्च तत्रैवोपादाने तिरोभावनरूपः स्थित्युत्पत्त्योर्द्वयोरपि प्रतिबन्धेनेति । सा च भगवतः कालाख्या कर्त्तृत्वशक्तिरभिन्नापि क्रमवद्भिर्मात्रारूपैः= तत्तत्कारणशक्तिरूपैः मीयन्ते निर्मीयन्ते पदार्था आभिरिति मात्राः शक्तयः प्रविभज्यमाना विकारमात्रगतं भेदरूपं संसर्गात् स्वस्मिन्नध्यारोपितं स्वाधिष्ठाने भगवत्यध्यारोपयति । यथा दण्डलेखा उन्मानेन, यः सूत्रद्वारा दण्डलेखासंयोगिनी द्रव्यान्तरस्य परिमेयद्रव्यस्य गुरुत्वप्रतिबन्धः= अधोनयनानुकूलगुरुत्वशक्तिप्रतिबन्धः तत्काले परिमेयद्रव्यगतं परिच्छेदं तत्संयोगेन स्वस्मिन्नध्यारोपितं तुलासूत्रस्थानेऽध्यारोपयति । एवञ्च कालशक्तेरेकत्वेऽपि नानात्वं स्वसंसृष्टतत्तत्कारणशक्तिनानात्वप्रयुक्तं तत्राध्यारोपितेन च नानात्वेन ब्रह्मणो नानात्वमध्यारोपितमित्यायातम् । सर्वाश्च कारणशक्तयो भगवतः स्वातन्त्र्याख्यां कर्त्तृत्वशक्तिकालाख्यां नातिवर्त्तन्ते,किन्तु तद्वृत्तिमनुपतन्त्येवेति नियतकाले प्रतिबन्धजन्माभ्यनुज्ञे सर्वेषां भावानामिति । एतच्च सर्वं हर्युपज्ञटीकावृषभदेवकृततट्टीकादर्शनमूलकम् ।

एवं कालभेदे सति स्वरूपतोऽपूर्वापरस्यापि भावस्याभूदित्यतीतकालरूपेण नाभूदिति भविष्यद्वर्त्तमानकालरूपेण पौर्वापर्यव्यवस्थाविकल्पे सति कालकृताः सर्वेषामपि भावानां जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, विनश्यतीति षड्विकाराः=परिणामा भावभेदस्य क्रियाविशेषस्य पच्यादिरूपस्य ब्रह्मरूपसत्ता विकारविशेषस्य योनयोऽतीतभविष्यद्वर्त्तमानरूपैः अपाक्षीत्-पक्ष्यति-पचतीत्यादिरूपैर्ज्ञापककारणानि उपप्लवन्ते= सम्पद्यन्ते । तत्रापक्षयविनाशाभ्यां पूर्वक्रियाया अतीतत्वमपरस्याश्च भविष्यत्वं ज्ञाप्यते । जन्मस्थितिविपरिणामविवृद्धिभिस्तु वर्त्तमानत्वमित्यूह्यम् । एते च षड्भावविकारा जातिसमुद्देशे सत्ताविभागे कात्स्न्र्येन वक्ष्यन्ते । समासार्थस्तु यस्य ब्रह्मणोऽध्याहितकलां स्वसंसर्गिततदुपादानशक्तिभेदेनाध्यारोपितभेदां कालशक्तिमुपाश्रिताः तत्तदुपादानशक्तीनां कारणान्तराधीनवृत्तिकानां सहकारिण्या कालशक्त्याऽभ्यनुज्ञाताः पच्यादिक्रियाणां जन्मादयः षड्भावविकाराः परिणामाः, भावभेदस्य क्रियाविशेषस्य पच्यादिरूपस्य ब्रह्मरूपसत्तासामान्यविकारस्य, योनयः अतीतभविष्यद्वर्त्तमानत्वादिरूपैः= अपाक्षीत्-पक्ष्यति-पचतीत्यादिरूपैः ज्ञाने हेतवो भवन्तीति । महावैयाकरणो हरिवृषभस्तु सतां भावविकाराणां योनय उपप्लवन्त इति व्याचचक्षे । ननु "सत्ताविकाराणां योनय उपप्लवन्ते" इति हर्युपज्ञटीकाया वृषभदेवकृतेन क्रियाविशेषाणां पचादीनामिति व्याख्यानेन विरुध्यते । किञ्च कारिकायां "भावभेदस्य" इत्यस्मिन् पदे भेदग्रहणं भावविशेषार्थकं क्रियाविशेषाग्रहणे भावसामान्यग्रहणे च नोपपद्यत इत्यवधेयम् । हरिवृषभस्तु "अव्याहताः कला यस्य" इति पाठमाश्रित्य अव्याहतास्तत्स्वरूपत्वेन नित्या अपि यस्य कलाः शक्तयः कालशक्तिमाश्रिता भावभेदस्य योनयो भवन्तीत्यन्वय इति वदन् ब्रह्मणि कलाख्या स्वातन्त्र्यशक्तिर्जन्माद्यनुकूलाश्च शक्तयो नित्याः सन्ति, जन्मादयश्च षड्विकारास्तासां परिणामाः । ते च क्रमवन्तः जन्मादिशक्तीनां नित्यत्वेऽपि कारणान्तराणामपि का-

लातिरिक्तानामपक्षेपणात्,कारणान्तराणाञ्चानित्यत्वेन सदाऽसन्निधानात् । कालशक्तिश्च सहकारिकारणं जन्मादिशक्तीनाम् । विकारगतं भेदं च कालशक्तावारोप्य कालभेदः । एवं स्वरूपतः पौर्वापर्यरहितस्यापि भावस्य कालशक्त्या पौर्वापर्यव्यवस्थायां कल्पितायां जन्मादयः षड्विकाराः कारणात्मना सतामेव भावानां जातत्वादिव्यवहारे योनयो भवन्तीत्यर्थमभिप्रैति । हर्युपज्ञटीकायां तु भगवतः कालाख्या शक्तिर्नित्या, सर्वेषां भावानां स्वस्वोपादानादिकारणगताः शक्तयस्त्वनित्याः,आश्रयनित्यत्वात् । तासां सहकारिकारणं कालः । उपादानादिशक्तयश्च कालशक्तिश्च कारणान्तराधीनवृत्तय इति न सदा जन्मादयः कारणान्तराणां सदाऽसन्निधानात् । जन्मादयश्चोपादानादिशक्तीनां परिणामाः क्रमवन्तः । अत एव परिणामिन्यः शक्तयोऽपि क्रमवत्यः । तासां क्रमरूपैः कालशक्तेरपि तत्संसृष्टायाः क्रमवानिवावभासोपगमो लक्ष्यते ।

एवं क्रमवद्भिः शक्तिरूपैः कालस्य कर्तृशक्तिः प्रविभज्यमाना स्वस्मिन्नध्यारोपितं विकारगतं भेदं स्वाधिष्ठाने ब्रह्मण्यध्यारोपयतीति रीत्या एकस्यापि ब्रह्मणो नानात्वमिति स्थितम् । एवं सर्वतो भेदप्रतिषेधम्= स्वगतसजातीयविजातीयभेदप्रतिषेधं ब्रह्मण्यभिधायाऽभिन्नस्यापि तस्य सर्वतः सर्वत्र भेदव्यवहारहेतुतामाह- एकस्येति ।

एकस्यापि सर्वबीजस्य । चोप्यर्थे यस्य ब्रह्मण इयमनुभूयमाना भोक्तृभोक्तव्यरूपेण भोगरूपेण चानेकधा स्थितिविवर्त्तरूपा व्यवहारव्यवस्था इति योजना । ननूक्तं प्राक् "प्रक्रिया जगतो यतः" इति । ततो गतार्थेयं कारिकेति चेन्न, यतस्तत्र ब्रह्मणि सर्वोत्पत्तिहेतुता प्रदर्शिता, न तु स्थितिकाले सर्वभेदव्यवहारहेतुता । सा त्वत्र भोक्तृभोक्तव्यभोगव्यवहाररूपनिदर्शनोपन्यासमुखेन प्रदर्श्यते ।

अयं भावः- ब्रह्म यद्यपि एकमेवाम्नातं तथा तत्र भेदाभेदाभ्यां सत्त्वासत्त्वाभ्याञ्चानिर्वाच्या विरुद्धकार्यप्रसवानुमितविरोधा अप्येकस्मिन् ब्रह्मण्यधिष्ठाने यौगपद्येन वृत्तेरविरोधिन्यः शक्तयः सन्ति, "परास्य शक्तिर्विविधैव श्रूयते" "इन्द्रो मायाभिः पुरुषरूप ईयते" इत्यादिश्रुतिशतेभ्यः । ताभिश्च शक्तिभिर्ब्रह्मणोऽसत्यो रूपप्रविभागः प्रकल्प्यते । तेषु च प्रविभक्तेषु रूपेषु जीवपदाभिधेयेषु भोक्तृभोक्तव्यभोगग्रन्थयोऽनादिभवसञ्चितानुभवजनितवासनाः स्वप्नविज्ञानपुरुषवदबर्हिस्तत्वाः । यथा स्वप्ने दृश्यमाना विज्ञानमयाः पुरुषाः प्रकृतेर्विज्ञानस्यैकत्वात् तदभिन्नाभिन्नस्य तदभिन्नत्वनियम इति न्यायेनैकत्वमजहतोऽपि मिथो भेदेन दृश्यन्ते व्यपदिश्यन्ते च तद्वत् परस्परविलक्षणा अदृष्टवशाद् भोक्त्रादिरूपैर्विवर्त्तन्ते । सोऽयं ब्रह्मणो विवर्त्तः तदुपाधिभूतानां तत्तद्वासनानुविद्धानां शक्तीनां तु परिणाम एव । तस्य च ब्रह्मणो ग्रन्थ्यन्तररूपसमतिक्रमेण स्थितानां ग्रन्थीनां वासनानां विवर्त्ते सतीयमनेकधा भोक्त्रादिरूपेण लोके व्यवहारव्यवस्था प्रकल्पत इति । इदं हर्युपज्ञटीकामनुसृत्य व्याख्यातम् । ननु प्राग् ब्रह्मणः परिवृत्ता अर्था

 ISSN : 2249-538X

इत्युक्तम्, अत्र तु अविद्याया इति कथमुच्यत इति चेत् श्रूयताम्- ब्रह्मणो नित्यकूटस्थत्वेनाविकारितया न ब्रह्मणो वस्तुतः परिवृत्ता अर्थाः किन्तु ब्रह्मणि अध्यस्ताया अविद्याया इति परिवर्त्तमानाविद्यासन्निधानेन ब्रह्मणः परिवृत्ता इत्युक्तम् । याऽविद्या लब्धसंस्कारा लब्धप्रबोधा जीवने कृतसाक्षात्कारा स्वात्मनि स्वस्वरूपे नावतिष्ठते । यदाऽविद्यायाः शक्तयो ज्ञानवैराग्यनिरोधसंस्कारादयो लब्धपरिपाका भवन्ति तदानेन परिकल्पितेनात्मना जीवने मिथ्यात्वेन भासनात् स्वरूपप्रच्युतिरिव तस्याः जीवन्मुक्तौ तस्याः प्रारब्धभोगार्थं संस्काररूपेण सत्त्वाभ्युपगमेऽप्यसत्यरूपेणेन्द्रजालवदवस्थानादिति ।

**यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः ।**
**संकीर्णमिव मात्राभिश्चित्राभिरभिमन्यते ॥**
**तथेदममृतं ब्रह्म निर्विकारमविद्यया ।**
**कलुषत्वमिवापन्नं भेदरूपं विवर्त्तते ॥**

यथा तिमिरदोषदूषितलोचनः पुरुषो विशुद्धमप्याकाशं चित्राभिर्मात्राभिर्विषयैः संकीर्णमिवाभिमन्यते । मीयन्ते= चक्षुरादिभिः प्रमीयन्ते इति मात्रा रूपादयो विषयाः तथेदममृतं नित्यं ब्रह्म निर्विकारमप्यविद्यया कलुषत्वमापन्नमिव भेदरूपं भिन्नं विवर्त्तते प्रतीयते ।

**अज्ञानस्यावरणविक्षेपशक्तिमत्त्वम्** – तत्राज्ञाने आवरणविक्षेपाख्ये द्वे शक्ती वर्तेते । आवरणशक्तिर्ब्रह्मस्वरूपमावृणोति विक्षेपशक्तिश्चाखिलमिदं जगत् तत्र कल्पयति । तदुक्तं शङ्करभगवत्पादैः –

**शक्तिद्वयं हि मायाया विक्षेपाऽऽवृत्तिरूपकम् ।**
**विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तं जगत् सृजेत् ॥**
**अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोः ।**
**आवृणोत्यपरा शक्तिः सा संसारस्य कारणम् ॥२ ॥**

ननु परिच्छिन्नेनाज्ञानेन कथं ब्रह्मण आवरणसम्भव इति चेत्, सत्यम् । नह्यज्ञानस्य वस्तुतो ब्रह्मावरकत्वम्, अथापि यथा मेघोऽवलोकयितृनयनपिधायकतयाऽनेकयोजनायतमादित्यमण्डलमाच्छादयन्निव प्रतिभाति, तथाऽज्ञानं परिच्छिन्नमप्यात्मानमपरिच्छिन्नमसंसारिणमवलोकयितृबुद्धिपिधायकतयाऽऽच्छादयन्निव प्रतीयते । तथा चोदाहृता हस्तामलकोक्तिः श्रीमता सदानन्दयतिना –

**घनच्छन्नदृष्टिर्घनच्छन्नमर्को यथा मन्यते निष्प्रभं चातिमूढः ।**
**तथा बद्धवद् भाति यो मूढदृष्टेः स नित्योपलब्धिस्वरूपोऽहमात्मा ॥३ ॥**

**अज्ञानस्याश्रयत्वविचारः** – अद्वैतसिद्धान्तेऽज्ञानस्याश्रयत्वविषयत्वविषये परस्परवैमत्यं दृश्यते । तत्र सर्वज्ञात्ममुनिः –

**आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला ।**
**पूर्वसिद्धतमसो हि पश्चिमो नाऽऽश्रयो भवति नापि गोचरः ॥४ ॥**

इत्यज्ञानस्याश्रयो विषयश्च शुद्धचैतन्यमेवेति पक्षमुपस्थापयति । अज्ञानसिद्ध्युत्तरकाले हि जीवसिद्धिः । अत उत्तरकालिके जीवे न प्राक्तनाज्ञानस्याश्रयत्वं विषयत्वं वा सम्भवतीति मुनेस्तात्पर्यम् । एतन्मतानुसारेण "अहमज्ञः" इति जीवे प्रतीयमानस्याज्ञानस्य नाऽहङ्कारविशिष्टं चैतन्यमाश्रयः किन्त्वहङ्कारोपहितं शुद्धचैतन्यमेवेति विज्ञेयम् । एवं शुद्धचैतन्याश्रितमप्यज्ञानं स्वकृतसंसारबन्धनं जीव एव समुत्पादयति, उपाधेः प्रतिबिम्बपक्षपातित्वात् । तदुक्तं मुनिना –

**सुकृतदुष्कृतकर्मणि कर्तृतां मतिगतात्मचितिप्रतिबिम्बकम् ।**
**व्रजति तद्वददः परमात्मनो जगति याति तमः प्रतिबिम्बकम् ॥५ ॥**

श्रीवाचस्पतिमिश्राः – "नाविद्या ब्रह्माश्रया किन्तु जीवे । सा त्वनिर्वचनीया[६] विद्यास्वभावे ब्रह्मणि तदनुपपत्तेः"[७] इत्यादिस्थलेष्वज्ञानस्य जीवाश्रितत्वं च प्रतिपादयामासुः । अत्राऽऽध्यासिकसम्बन्धेन ब्रह्मणि विद्यमानमप्यज्ञानमाच्छाद्यतासम्बन्धेन जीव एव वर्त्तते न तु ब्रह्मणि । "नास्ति ब्रह्म न भाति ब्रह्म" इत्यसत्त्वाऽऽपादकाऽभानाऽऽपादकयोरावरणयोर्जीव एव सम्भवाज्जीवाश्रया ब्रह्मपदा ह्यविद्या इति कथयतां श्रीमिश्रमहाभागानामाशयः ।

**अज्ञानस्य माया-अविद्याभेदेन द्वैविध्यम्** – इदं चाज्ञानं "माया चाविद्या च स्वयमेव भवति"[८] इति श्रुत्या माया अविद्या चेति द्विविधं भवति । तत्र रजस्तमोभ्यामनभिभूतशुद्धसत्त्वगुणप्रधानतया "माया" इति रजस्तमोभ्यामभिभूताऽशुद्धसत्त्वगुणप्रधानतया च "अविद्या" इति कथ्यते । इमे एव मायाऽविद्ये समष्ट्यज्ञानं व्यष्ट्यज्ञानमिति च व्यवह्रियते । तत्र समष्टिज्ञानरूपा माया विक्षेपांशप्रधाना व्यष्टिज्ञानरूपाविद्या चावरणांशप्रधानेति प्रतिपाद्यते । एतादृशशुद्धसत्त्वप्रधानमायोपाधिना च पूर्वोक्तब्रह्मचैतन्यमेव "ईश्वरः" इति मलिनसत्त्वप्रधानाविद्योपाधिना "जीवः" इत्याख्यायते । तत्र मायोपाधेः शुद्धत्वादीश्वरः सर्वज्ञत्वादिगुणयुक्तः अविद्योपाधेरशुद्धत्वाच्च जीवोऽल्पज्ञत्वादिगुणयुक्तः । तदुक्तं सदानन्दयतिना- "इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना । एतदुपहितं चैतन्यं सर्वज्ञत्व-सर्वेश्वरत्व-सर्वनियन्तृत्वादिगुणकमव्यक्तमन्तर्यामी जगत्कारणमीश्वर इति च व्यपदिश्यते, सकलाज्ञानावभासकत्वात्....इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्त्वप्रधाना । एतदुपहितं चैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ[९]

इत्युच्यते एकाज्ञानावभासकत्वात्[१०] इति ।

**सन्दर्भाः –**

१. वा.ब्र.३

२. वा.सु.श्लो.१३,१५

३. वे.सा.पृ.१४

४. सं.शा.१.३१९

५. सं.शा. १.३२१

६. ब्र.सू.भा.१.१.४

७. ब्र.सू.भा.१.४.३

८. नृसिंहखडे ९

९. वै.सा.विद्वन्मनोरञ्जिनी

१०. वे.सा.पृ. ९-११

**परामृष्टाः ग्रन्थाः –**

१. वाक्यपदीयम् – भर्तृहरिः - सम्पा.सूर्यनारायणशुक्ल- २००६- चौ.सं.संस्थान,वाराणसी

२. व्याकरणदर्शनस्य प्रतिमा – श्रीरामाज्ञापाण्डेयः – १९७६- सं.सं.वि.वि.वाराणसी

३. संस्कृतव्याकरणदर्शन- डा.रामसुरेशत्रिपाठी- १९७२- राजकमल प्रकाशन,दिल्ली

४. संस्कृत व्याकरण का उद्भव – श्री सत्यकामवर्मा – १९७१- स्नातकोत्तरसाध्यविकाससंस्थान,दिल्ली,वि.वि.

# न्यायव्याकरणदृष्ट्या शब्दार्थसम्बन्धविमर्शः

डा. नारायणः बी. राय्कर्*

**शोधसारः –**

शब्दार्थयोः सम्बन्धविषये नैके अभिप्रायाः दृश्यन्ते । तत्र मीमांसकवैयाकरणप्रभृतयः द्रव्यादिक्लृप्तपदार्थेभ्यः अतिरिक्तपदार्थः पदपदार्थयोः सम्बन्ध इति वदन्ति । तत्रापि अवान्तराभिप्रायाः दृश्यन्ते । प्राचीनवैयाकरणाः पदनिष्ठं बोधकत्वमेव पदपदार्थयोः सम्बन्धः स एव शक्तिरिति वदन्ति । नव्यवैयाकरणाः इतरेतराध्यासघटिततादात्म्यं पदपदार्थयोः सम्बन्ध इति वदन्ति । मीमांसकास्तावत् दाहानुकूला वह्निनिष्ठा शक्तिरिव पदनिष्ठाऽपि शाब्दबोधानुकूला शक्तिरिति सा पदार्थान्तरमेव इति वदन्ति । एतेषां सर्वेषामभिप्रायान् सङ्गृह्य परिशीलनपूर्वकं नैयायिकानाम् अस्मात् पदादयमर्थो बोद्धव्य इत्याकारकः समयेत्यभिधीयमानः ईश्वरेच्छारूपसङ्केत एव शक्तिरिति सिद्धान्तः न्यायभाष्यवैशेषिकोपस्कारशक्तिवादशाब्दतरङ्गिणिप्रभृतिग्रन्थानाश्रित्य यथाशक्ति विवेचनपूर्वकं विमृष्य अस्मिन् शोधलेखे उपस्थाप्यते ।

**प्रमुखशब्दाः** – शब्दः, अर्थः, शक्तिः, लक्षणा, तादात्म्यम् , ईश्वरेच्छा

समेषामस्माकमनुभवपथमारुढमेव यद्वयमवगतानर्थान् बुबोधयिषया अर्थवद्वर्णसमूहात्मकपदकदम्बभूतवाक्यं प्रयुञ्ज्महे, तथैव परप्रतिपिपादयिषितानर्थानवजिगमिषवो वयं तादृशमेव वाक्यं श्रवसा शृण्म इति । ईदृशेऽस्माकं वाग्व्यापारेऽनादिकालतः प्रधानकारणभावमावहन् उपकरोति शब्दः । अर्थप्रत्यायकोऽयं शब्दः अतस्तेन विना अस्माकं व्यवहारोऽसार्थकतामेवापद्येत । यद्यपि वयं चक्षुरादिभिरिन्द्रियैरर्थानवगच्छेमेति प्रवादो निर्विवादतां भजतेऽथापि अर्थवत्पदसमूहरूपतामापन्नवाक्यात्मकशब्दालम्बनमन्तरेण स्वानवगतानर्थान् व्यवहारोपयोगिनः कृत्वा जीवनयात्रां प्रवर्तयितुं न पारयामः कदापि । अत एव न्यायदर्शनप्रवर्तनाचार्येण गौतमेन अन्यैरपि दार्शनिकैश्च शब्दस्यातिरिक्तप्रमाणपदमारोप्य निरूपणं व्यधायि । अपि चोक्तं वाक्यपदीयाभिधं ग्रन्थं विरचितवता भर्तृहरिणाऽपि

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥** इति

अत एव लोके पदश्रवणानन्तरं तत्पदपरिचयवतः श्रोतुः तत्प्रतिपाद्यार्थस्य प्रतिपत्तिर्जायते । यथा - 'घट' इत्युच्चारिते सति तत्पदपरिचयवान् श्रोता तत्पदवाच्यं कम्बुग्रीवादिमद्रूपमर्थम् अविलम्बेन बुध्यते । 'गौः' इत्युच्चारिते सति तत्पदपरिचयवान् श्रोता तत्पदवाच्यं सास्नादिमद्रूपमर्थमविलम्बेन बुध्यते; न तु तद्विपरीतम् । एवमेतेषामेव घटादिपदानां परिचयो यस्य श्रोतुर्न विद्यते, स श्रोता तादृशपदश्रवणकाले तद्वाच्यमर्थं नैव प्रतिपत्तुं प्रभवति । तत् कथमिमान्युच्चारितानि पदानि कस्यचिदेव स्वप्रतिपाद्यानर्थान् स्मारयितुं प्रभवन्ति न

*सहायकाचार्यः, न्यायविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

तु सर्वस्य? पदज्ञानवतामपि श्रोतृणां कथमुच्चारितानि सर्वाण्यपि पदान्यर्थान् ज्ञापयितुं न क्षमन्ते? कुतः कानिचिदेव तानि पदानि स्ववाच्यानर्थान् ग्राहयन्ति? एवमापाततो पर्यालोचिते अस्यार्थस्य इदमेव पदमिति पदानां स्वप्रतिनियतमर्थबोधकत्वं, अस्य पदस्यायमेवार्थः इति अर्थानाञ्च स्वप्रतिनियतं पदप्रतिपाद्यत्वञ्चानुभूयेते । अनेन पदपदार्थयोः परस्परानुग्राहकतासम्पादकः कश्चिन्नियमरूपः सम्बन्धोऽस्तीत्यवगम्यते । स च किंस्वरूपः इति जिज्ञासायामुत्थितायां गदाधरभट्टाचार्योः शक्तितत्त्वस्वरूपं बुबोधयिषया विरचिते शक्तिवादाभिधे स्वग्रन्थे आदौ सङ्केतो लक्षणा चार्थे पदवृत्तिरिति पदपदार्थयोः सम्बन्धं व्याकार्षुः । सङ्केतो लक्षणा चेति द्विप्रकारिका वृत्तिः पदपदार्थयोः सम्बन्धः इत्यर्थः । तत्र पदस्य वृत्तिरिति पदवृत्तिः । अत्र प्रतियोगिकत्वं षष्ठीविभक्तेरर्थः । तस्य च सप्तम्यन्तार्थे अर्थपदार्थे अन्वयः । अर्थपदोत्तरं सप्तम्याः अनुयोगित्वमर्थः । तथा च पदप्रतियोगिकः अर्थानुयोगिकः अर्थानुयोगिकः पदप्रतियोगिको वा पदपदार्थयोः शाब्दबोधौपयिको यः सम्बन्धः, स एव वृत्तिरित्युच्यते । स एव वृत्तिरूपसम्बन्धः प्राचीननव्यवैयाकरणमीमांसकमतपरिशीलनपूर्वकमत्र विमृष्यते ,

अत्रायं पूर्वपक्षः - ननु संयोगसमवायतादात्म्यादिसम्बन्धेषु सत्सु कुतोऽयं पदपदार्थयोः वृत्तिरूपो विलक्षणः सम्बन्धः कल्प्यते इति चेत्, उच्यते - संयोगादिसम्बन्धाद् विलक्षणोऽयं शब्दार्थयोः सम्बन्धः । संयोगादिस्तु शब्दार्थयोः सम्बन्धपदमारोढुं न क्षमः । संयोगस्तु प्राप्तिलक्षणः सम्बन्धः । प्रतिपादकः शब्दो गुणः, प्रतिपाद्योऽर्थो घटादिद्रव्यम् । अतस्तयोः संयोगरूपसम्बन्धो न घटते, संयोगस्तु द्रव्ययोरेवेति नियमात् ।

किञ्च रूपरसादिगुणोऽपि शब्दस्य प्रतिपाद्योऽर्थः । अतस्तेनापि समं गुणात्मकशब्दस्य संयोगो नोपपद्यते । एवं गगनादिशब्दप्रतिपाद्येन आकाशादिद्रव्येणापि शब्दस्य संयोगः सम्बन्धो न संभवति, प्रतिपाद्याकाशादिद्रव्यस्य प्रतिपादकस्य गगनादिशब्दस्य च कर्मशून्यत्वेन संयोगोत्पादकक्रियायास्तत्राभावात् ।

किञ्च शब्दार्थयोः संयोगसम्बन्धः प्रमाणेनाऽपि न सिद्धः । संयोगस्य अप्राप्तयोः प्राप्तिरूपत्वेन तादृशप्राप्तेः प्रत्यक्षेणागृहीतत्वात् । शब्दार्थयोर्भिन्नेन्द्रियग्राह्यत्वेन घटपटयोरिव तयोः संयोगस्य ग्रहणासम्भवात् । तथा च भाष्यवाक्यम् - "प्राप्तिलक्षणस्तु शब्दार्थयोः सम्बन्धः प्रतिषिद्धः । कस्मात्? प्रमाणतोऽनुपलब्धेः । प्रत्यक्षतस्तावच्छब्दार्थप्राप्तेर्नोपलब्धिरतीन्द्रियत्वात् । येनेन्द्रियेण गृह्यते शब्दस्तस्य विषयभावमतिवृत्तोऽर्थो न तेन गृह्यते" इति ।

तथैवानुमानेनापि शब्दार्थयोः संयोगो न गृह्यते । शब्दार्थयोः साहचर्यं तदुभयोरेकाधिकरणावस्थानम् । तच्च न सिद्धम् । शब्दस्य निकटे अर्थः, अर्थस्य निकटे वा शब्द इति तु नानुभूयते । शब्दस्य निकटे अर्थस्यावस्थानस्वीकारे अन्नशब्दस्योच्चारणदशायां मुखे पूरणम्, अग्निशब्दस्योच्चारणदशायां मुखे दाहानुभवः, असिशब्दोच्चारणदशायां

पाटनानुभवश्च प्रसज्येरन् । नैता अनुभूतयः दृश्यन्ते । एवमर्थस्य निकटे शब्दस्यावस्थानस्वीकारे कण्ठताल्वादिशब्दोच्चारणस्थानस्य तदनुकूलप्रयत्नविशेषस्य च घटाद्यर्थदेशेऽवस्थानप्रसङ्गः । नैवं लोकेऽनुभवोऽस्ति । एतेन शब्दार्थयोः साहचर्यलक्षणायाः व्याप्तेरसिद्धत्वात् अनुमानेनापि शब्दार्थयोः संयोगो न गृह्यते । तथा च न्यायसूत्रम् – "पूरणप्रदाहपाटनानुपलब्धेश्च सम्बन्धाभावः(न्या.सू.२ -१ -५३)"

एवं समवायोऽपि न शब्दार्थयोः सम्बन्धः, गुणगुणिनोरेव समवायसम्बन्धस्वीकारेण शब्दस्याकाशगुणत्वेन च आकाशातिरिक्तवस्तुनः शब्दप्रतिपाद्यत्वानुपपत्तिः । आकाशातिरिक्तवस्तुनोऽपि समवायेन शब्दस्य सम्बन्धित्वस्वीकारे, अयुतसिद्धयोरेव सम्बन्धः समवाय इति नियमात् घटाद्यर्थविनाशे तदभावे वा सति तत्प्रतिपादकपदानामपि विनाशोऽनुत्पादो वा स्यात् । न हि क्वापि घटाद्यर्थविनाशदशायां तदत्यन्ताभावदशायां वा, घटादिपदानाम् अभावोऽनुत्पादो वा दृष्टः । न वा क्वापि घटाद्याश्रयनाशोत्तरकाले तदभावे वा तदीयरूपादिगुणानामस्तित्वं दृष्टम् । एवमग्निशब्दोच्चारणे सति मुखे दाहापत्तिः, मधुशब्दोच्छारणे सति मुखे माधुर्यापत्तिश्च स्यात्, तत्तच्छब्दानां समवायसम्बन्धेन तत्तदर्थैः साकं सम्बन्धित्वसम्भवात् ।

एवं यथा संयोगसंबन्धावगाही 'दण्डी पुरुष' इति प्रत्ययः, यथा च समवायसंबन्धावगाही 'करी कुञ्जर' इति प्रत्ययश्च लोकानां स्वारसिकतया प्रसिद्धः ; तथा 'घटवान् घटशब्दः', 'घटशब्दवान् घट' इत्यादिप्रत्ययो न प्रसिद्ध इति पदपदार्थयोर्न संयोगो न वा समवायः सम्बन्धः ।

एवं कालिकादिसम्बन्धः अपि शब्दार्थयोर्न घटते, घटादिपदानामुच्चारणकाले तादृशपदानां कालिकादिसम्बन्धस्य भूतलपटादावपि सत्त्वेन घटादिपदानां भूतलपटाद्यर्थप्रतिपादकत्वप्रसङ्गात् । ननु यद्येवं संयोगसमवायादीनां शब्दार्थयोः सम्बन्धत्वमनुपपन्नम्, तर्हि किमर्थं तयोः सम्बन्धोपन्यासः ? असम्बद्धावेव तौ स्यातामिति चेत्, न । तथा सति अस्यार्थस्यायं शब्दः वाचक इति, अस्य शब्दस्यायमर्थो वाच्य इति वा नियमस्यानुपपत्या शब्दमात्रेण अर्थमात्रप्रतिपादनं सम्भाव्येत । तदेवोपन्यस्तं न्यायसूत्रे "शब्दार्थव्यवस्थानादप्रतिषेधः(न्या.सू.२.१.५४) ।" भाष्यकारैरिदमेव स्पुटीकृतम् - "असम्बन्धे हि शब्दमात्रादर्थमात्रे प्रत्ययप्रसङ्गः । तस्मादप्रतिषेधः सम्बन्धस्येति ।" तस्मात् शब्दार्थयोः सम्बन्धप्रतिषेधो न शक्य इत्यतः तयोर्नियतपरस्परानुग्राहकतासम्पादकः वाच्यवाचकभावनियामकलक्षणः कश्चित् सम्बन्धोऽभ्युपगन्तव्यः ।

ननु तर्हि कस्माच्छब्दार्थयोः वाच्यवाचकभावनियम उपपद्यते इति चेदुच्यते समयादिति । अत्र समयः सङ्केतः । तदुक्तं वैशेषिकसूत्रे "सामयिकः शब्दादर्थप्रत्ययः(वै.सु.७.२.२०)" तथा च शब्दात् = घटादिशब्दात् अर्थप्रत्ययः = कम्बुग्रीवादिमद्रूपार्थानां प्रतिपत्तिः सङ्केतप्रयोज्य इत्यर्थः । स च घटादिपदानां कम्बुग्रीवादिमदाद्यर्थेषु


ISSN : 2249-538X

ईश्वरेच्छारूपः इति, शास्त्रकारादिसङ्केतितवृद्ध्यादिपदानाम् आदैजादिषु परिभाषारूपः इति चाख्यायते । स एव पदपदार्थयोः बोध्यबोधकभावनियामकतया शाब्दबोधप्रयोजक इत्यतः वृत्तिरिति व्यपदिश्यते । घटादिपदानां कम्बुग्रीवादिमद्रूपार्थानां अस्यार्थस्येदं वाचकमिति नियमेनायं बोध्यबोधकभावरूपसम्बन्ध उपपद्यते । गङ्गादिपदानां तीराद्यर्थानाञ्च अन्वयानुपपत्यादिवशात् गङ्गादिपदोपस्थाप्यप्रवाहादिना सामीप्यादिसम्बन्धद्वारा स्मारिततीराद्यर्थस्य गङ्गादिपदं लाक्षणिकमिति स्वीकारात् गङ्गादिशब्दतीराद्यर्थयोः बोध्यबोधकभावरूपसम्बन्ध उपपद्यते । तत्र वाच्यवाचकभावप्रयोजकसङ्केतमन्तरा शब्दार्थयोः शक्यसम्बन्धरूपलक्षणया बोध्यबोधकभावोऽनुपपन्नः इत्यतः सङ्केतस्यैव प्राधान्येन सम्बन्धत्वोपस्थापनं युज्यते प्राचीनतार्किकाणाम् ।

सा च वृत्तिः सङ्केतो लक्षणा चेति द्विविधा । 'घटः', 'गौः' इत्यादौ सङ्केतरूपवृत्तिः । 'गङ्गायां घोषः', 'मञ्चाः क्रोशन्ति' इत्यादौ तु लक्षणारूपवृत्तिः ।

ननु शब्दात् पदार्थविषयकबोधे बोध्यबोधकभावनियामकतया वृत्तिरूपसम्बन्धस्य कथं प्रयोजकत्वमिति चेत् उच्यते । पदपदार्थयोर्वृत्तिरूप-सम्बन्धज्ञाने सत्येव पदज्ञानमेव सम्बन्धिज्ञानात्मना पदार्थं स्मारयति, "एकसम्बन्धिज्ञानम् अपरसम्बन्धिस्मारकमि"ति नियमात् । यथा हस्ति-हस्तिपकयोः सम्बन्धज्ञानं विना हस्तिपकदर्शनेऽपि हस्तिनः स्मरणं नोपपद्यते, तथैवात्रापि । अतः सम्बन्धज्ञानस्य सम्बन्धिज्ञानहेतुत्वं मन्तव्यम् । ननु वृत्तिज्ञानमेव पदार्थोपस्थापकमस्तु किं पदज्ञानेनेति चेत्, न । पदपदार्थयोः सम्बन्धज्ञाने सत्यपि पदज्ञानोत्तरक्षणे एव अर्थस्मरणस्यानुभवसिद्धत्वात् । यथा वृत्तिरूपसम्बन्धज्ञानस्य सम्बन्धिज्ञानविधया अर्थस्मरणहेतुत्वं, तथैव पदज्ञानस्यापि सम्बन्धिज्ञानविधयाऽर्थस्मृतिहेतुत्वमिति । तथा चादौ पदश्रवणम्, पश्चात् वृत्तिज्ञानं, परं पदार्थोपस्थितिः, तदुत्तरं शाब्दबोधः इति । पदस्य तत्तदानुपूर्वीप्रकारेण उच्चारणविषयकज्ञानमेव पदज्ञानम् । केवलमुच्चारणज्ञानेन पदं स्वार्थविषयकं बोधं जनयितुं न क्षमते इत्यनुभवात् ।

तत्र वृत्तिः सङ्केतो लक्षणा चेति द्विविधा । अस्मात् पदादयमर्थो बोद्धव्य इत्याकारकस्य इच्छाविशेषस्य एव सङ्केतेति व्यपदेशः । स च सङ्केतो द्विविधः, ईश्वरसङ्केतः आधुनिकसङ्केतश्चेति । तत्र ईश्वरीयसङ्केतरूपा इच्छा शक्तिः । अयमेव नित्यसङ्केत इत्यभिधीयते । तादृशशक्त्या अर्थबोधकं पदं वाचकं, तया च शक्त्या वाचकप्रतिपाद्योऽर्थः वाच्य इति । वाच्यार्थ एव मुख्यार्थः शक्यार्थः इति व्यवह्रियते । एवम् आधुनिकैः पाणिनिपतञ्जलिप्रभृतिभिः शास्त्रकारैः कृतः 'नदीवृद्ध्या'दि सङ्केतः परिभाषा इति व्यपदिश्यते । तादृशपरिभाषया अर्थबोधकं पदं पारिभाषिकं, परिभाषया प्रतिपाद्योऽर्थः परिभाषितः परिभाष्यः इति वा ।

एवं शक्यसम्बन्धो लक्षणा इत्युच्यते । तादृशलक्षणया अर्थबोधकं पदं लाक्षणिकमिति कथ्यते ।

लाक्षणिकप्रतिपाद्योऽर्थः लक्ष्यार्थ इत्युच्यते । सा पुनः द्विविधा जहल्लक्षणा अजहल्लक्षणा चेति । शक्यार्थपरित्यागे सत्यन्यार्थग्रहणं जहल्लक्षणा । यथा - 'गङ्गायां घोष' इत्यादौ । गङ्गापदस्य तीरे मञ्चाः क्रोशन्तीत्यादौ मञ्चपदस्य पुरुषेषु च जहल्लक्षणा । शक्यार्थापरित्यागे सत्यन्यार्थग्रहणमजहल्लक्षणा । छत्रिणो यान्तीत्यत्र छत्रिपदस्य छत्रिवदच्छत्रिसाधारणसंघत्वावच्छिन्ने, काकेभ्यो दधिरक्ष्यतामित्यत्र काकपदस्य दध्युपघातकत्वावच्छिन्ने जहल्लक्षणा । जीवब्रह्मणोरैक्यं ब्रुवतां वेदान्तिनां मते जहदजहल्लक्षणा चाङ्गीक्रियते । तन्मते तत्त्वमसीत्यादिषु चैतन्यादिरूपव्यक्तिमात्रबोधनार्थं जहदजहल्लक्षणा । नैयायिकानां मते तु सा नास्तीति लक्षणाद्वयमेव । इत्येवं न्यायसम्मतः सिद्धान्तः ।

अत्र प्राचीनवैयाकरणाः शब्दार्थयोर्मध्ये शब्दनिष्ठं बोधकत्वमेव शक्तिरिति वदन्ति । तेषामयमाशयः - यथा चक्षुरादीन्द्रियेषु घटादिचाक्षुषप्रत्यक्षजनने कारणत्वम् अनादि, तथा घटादिपदे घटादिशाब्दबोधस्योत्पत्तौ कारणत्वम् अनादि । सैव शक्तिः । स एव शब्दार्थयोः सम्बन्ध इति । तदुक्तम् -

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा ।
अनादिरर्थैः शब्दानां संबन्धो योग्यता तथा ।

अत्र योग्यतापदेन पदनिष्ठमर्थबोधकतारूपशक्तिरुच्यते । यथा इन्द्रियाणां स्वविषयीभूतघटाद्यर्थेषु बोधकत्वरूपा योग्यता अनादिरनुभूयते, तथैव घटादिपदानामपि कम्बुग्रीवादिमदात्मकार्थेषु बोधकत्वरूपा योग्यता अनादिर्वर्तते । सैव शक्तिरित्युच्यते ।

कथमिदमुच्यते इति चेत् इदं पदमस्मिन्नर्थे योग्यमिति सम्बन्धिशब्दव्यवहार एव समयः सङ्केतो वा । तस्मिन् व्यवहारे योग्यता विषयः । अतस्तादृशव्यवहारात् योग्यतायाः ज्ञानं जायते । यथा अयमस्या पुत्र इति व्यवहारे मातापुत्रयोः सम्बन्धोऽवगम्यते, तथा शब्दार्थयोरपीति । तदेवाभिहितं -

संबन्धिशब्दे संबन्धो योग्यतां प्रति योग्यता ।
समयाद्योग्यतासंविन्मातापुत्रादियोग्यवत् ॥

अत्र बोधकत्वे अनादित्वञ्च स्वप्रयोज्यशाब्दबोधसमानाकारपूर्वपूर्वबोधध्वंसकालीनत्वम् । ननु यत्र घटपदश्रवणेन घटपदगजोभयविषयकसमूहालम्बनस्मरणात् घटशाब्दबोधो जातः, तत्र घटबोधकारणसमूहालम्बनज्ञानविषयत्वं घटपदे इव गजेऽपि वर्तते इति गजस्यापि घटवाचकत्वापत्तिरिति चेत्, न । बोधकत्वमित्यस्य बोधजनकतावच्छेदकविषयिताकत्वमित्यर्थो विवक्षितः । प्रकृते च समूहालम्बनज्ञानस्य घटपदविषयकत्वेनैव घटशाब्दबोधकारणत्वमिति बोधजनकतावच्छेदिका पदनिरूपितैव विषयितेति नातिप्रसङ्गः । तथा च निष्कृष्टमते बोधजनकताव-


ISSN : 2249-538X

च्छेदकविषयिताकत्वं शक्तिरिति सिद्धम् ।

ननु तथापि पदे अनादिबोधकारणत्वं शक्तिरिति न युज्यते । आधुनिकसंकेतिते देवदत्तादिपदे बोधकत्वसत्त्वेऽपि अनादिबोधकत्वाभावात् । यदि अनादिभूतबोधकत्वस्य तत्राभावेऽपि केवलबोधकत्वत्वावच्छिन्नविषयकज्ञानत्वेन शक्तिज्ञानं शाब्दबोधहेतुरिति स्वीकारे न शाब्दबोधानुपपत्तिरित्युच्यते, तदा देवदत्तादिपदं पित्रा व्यक्तिविशेषे संकेतितमिति संकेतज्ञानाभावे देवदत्तपदे व्यक्तिविशेषबोधकत्वज्ञानं नोत्पद्यते इत्यतः सङ्केतज्ञानं नियमेनापेक्षितम् । तथा च 'तद्धेतोरेवास्तु हेतुत्वं मध्ये किं तेन' इति न्यायात् संकेतज्ञानमेव शाब्दबोधहेतुः, न बोधकत्वज्ञानम् । तस्मादावश्यकः संकेत एव शक्तिः । स च संकेतः आधुनिके नाम्नि पित्रादेः । गवादिपदे तु ईश्वरस्य । तथा च बोधकत्वं न शक्तिरिति चेत्, न । अत्र पृच्छामः - किं संकेतः स्वरूपसन् शाब्दबोधकारणमुत ज्ञातः सन् । नाद्यः, घटपदे उच्चारिते संकेतमजानतोऽपि पुरुषस्य वस्तुतः तस्मिन् संकेतस्य सत्त्वेन शाब्दबोधप्रसङ्गात् । नापि द्वितीयः । तत्राऽपि सामान्यतः संकेतज्ञानं शाब्दबोधं प्रति कारणमुत ईश्वरसंकेतत्वेन ज्ञानं वा ? न तत्र प्रथमः । घटपदे संकेतमजानतः प्रमेयमिति ज्ञानवतोऽपि शाब्दबोधापत्तेः । "इदं प्रमेयपदवाच्य" इति प्रमेयत्वेन सङ्केतज्ञानस्य तत्र सुलभत्वात् । नाऽपि द्वितीयः । ईश्वरानङ्गीकर्तॄणां मीमांसकादीनां ईश्वरसंकेतत्वेन संकेतज्ञानाभावेऽपि शाब्दबोधोदयेन व्यतिरेकव्यभिचारात् ।

नन्वत्र अर्थबोधजनकतावच्छेदकत्वेन संकेतज्ञानं कारणमिति स्वीक्रियते । इदं पदमेतदर्थबोधजनकतावच्छेदकवद्भवतु इति सङ्केतज्ञानं मीमांसकादीनामपि आवश्यकमिति न व्यभिचारः इति चेत्, ततोऽपि लाघवेन इदं पदं अर्थबोधजनकमिति अर्थबोधजनकतात्वावच्छिन्नविषयकज्ञानत्वेन कारणत्वमुचितम् । तथा च शाब्दबोधकारणज्ञानविषयीभूतं बोधकत्वमेव शक्तिरिति ।

ननु तथापि आधुनिकसंकेतितदेवदत्तादिपदे बोधकत्वज्ञानाभावेऽपि संकेतज्ञानादेव शाब्दबोधोत्पत्त्या बोधकत्वज्ञानस्य शाब्दबोधहेतुत्वस्वीकारे व्यतिरेकव्यभिचार इति चेत्, न । अत्र संकेतज्ञानस्यैव बोधकत्वज्ञानरूपत्वस्वीकारेण न व्यभिचारप्रसक्तिः । इदं पदमेतदर्थबोधकं भवतु इति संकेते बोधकत्वं विषयः । संकेतज्ञाने विषयीभूते इदं पदं एतदर्थबोधकं भवतु इति संकेतेऽपि बोधकत्वं विषयः । इच्छादिविषयकज्ञानस्य इच्छाविषयविषयकत्वनियमात् । इत्थञ्च संकेतज्ञानमपि बोधकत्वज्ञानमेवेति न व्यभिचारः इति प्राचीनवैयाकरणाशयः ।

अत्र नव्यवैयाकरणाः - पदपदार्थयोः वाच्यवाचकभावाख्यः क्लृप्तपदार्थेभ्योऽतिरिक्तः संबन्ध एव शक्तिरित्युच्यते । तादृशशक्तिग्राहकतया शब्दार्थयोः तादात्म्यं सम्बन्धः । स एव संकेतः । शक्त्युपकारकत्वात् तादात्म्यमपि शक्तिरिति स्वीक्रियते, उभयनिरूपिततादात्म्यवानुभय इत्यर्थपदयोर्व्यवहारदर्शनात् । यथा दीपादौ

सत्यपि प्रकाशकत्वशक्तौ आलोकविषयसम्बन्धसहकारेणैव तस्य वस्तुप्रकाशकत्वं, तथैव पदनिष्ठशक्तेरपि शाब्दबोधजनकतायां तादात्म्यरूपसम्बन्ध आवश्यक एव । तदुक्तं भर्तृहरिणाऽपि -

उपकारः स यत्रास्ति धर्मस्तत्रानुगम्यते ।
शक्तीनामप्यसौ शक्तिर्गुणानामप्यसौ गुणः ॥

अत्र बोधः उपकार्यः, शक्तिः उपकारिका । तयोः उपकारो नाम कश्चन सम्बन्धः यत्र वर्तते, तत्र विद्यमानः धर्मः शक्तिरूपः इति स्वीक्रियते । स च सम्बन्धः शाब्दबोधरूपकार्यादनुमीयते । असौ सम्बन्धः शक्तीनामपि कार्यजनने उपकारकः गुणानामपि द्रव्याश्रितत्वनियामक इति ।

स च तादात्म्यसम्बन्धः इतरेतराध्यासरूपः । उक्तं च पातञ्जलभाष्ये "सङ्केतस्तु पदपदार्थयोरितरेतरा-ध्यासरूपः स्मृत्यात्मको योऽयं शब्दः सोर्थो, योऽर्थः स शब्द" इति । अत्र तादात्म्यं तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम् । ननु भेदाभेदयोः परस्परविरोधेन कथं तयोरेकत्र समावेश इति चेन्न । तत्र अभेदस्याध्यस्तत्वान्न तयोर्विरोधः ।

किञ्च, चक्षुरादिप्रमाणानि बोधजनकत्वघटितसंबन्धभिन्नेन संयोगादिना घटादिप्रमेयसंबद्धानि घटादिकं बोधयन्ति । एवं शब्दोऽपि प्रमाणम् । अतश्च शब्दः बोधजनकत्वघटितसंबन्धभिन्नसंबन्धेन प्रमेयसंबद्धः प्रमेयं बोधयति प्रमाणत्वादिति कल्प्यते । अन्यथा वह्निधूमयोः व्याप्तिरूपः संबन्धो मास्तु, धूमाद्वह्निज्ञानं जायतामितीश्वरेच्छाविषयत्वमेव संबन्धोऽस्तु इति व्याप्तिरप्युच्छिद्येत ।

तस्मात् क्लृप्तायाः बोधकत्वेनेश्वरेच्छायाः पदतदर्थसंबन्धत्वासंभवात् वाच्यवाचकभावाख्यसंबन्धान्तरमेव कल्प्यते । न च शब्दार्थयोस्तादात्म्ये, अन्नमित्युक्ते मुखे पूरणापत्तिः, पूरणहेतोरर्थस्य अन्नस्य शब्दाभिन्नत्वेन मुखे सत्त्वादिति वाच्यम् । अत्र शब्दार्थयोरत्यन्तभेदरूपं तादात्म्यं नाभ्युपगम्यते, अपि तु भेदसमानाधिकरणाभेदरूपता-दात्म्यमेव । तस्मादुक्तापत्तिर्नैवावतरति ।

एवं कः शब्दः इति प्रश्ने घट इति शब्दः, कोऽर्थः इति प्रश्ने च घट इत्यर्थः इत्येकाकारकोत्तरस्य दर्शनात् तन्मूलतादात्म्यप्रतीतिरवगम्यते । तया च शब्दार्थयोः तादात्म्यं सिद्ध्यति । अपि च, पदं श्रुतम्, अर्थं शृणु इति व्यवहारे अर्थपदं न शब्दपरम् । पदं श्रुतमिति पृथगभिधानात् । अपि तु अर्थपरमेव । अर्थस्य च श्रावणप्रत्यक्षकर्मत्वं न संभवति । अपि तु शब्दस्यैव । तस्मात् शब्दार्थयोः तादात्म्यमभिसन्धायैव 'अर्थं शृणु' इति व्यवहारः इति । अनेन व्यवहारेण शब्दार्थयोस्तादात्म्यं सिद्ध्यति ।

इत्थं शब्दार्थतादात्म्योपकृतश्च वाच्यवाचकभावः अतिरिक्तः संबन्धः शक्तिः । तस्य अर्थोऽनुयोगी ।

 ISSN : 2249-538X

# 47

पदं प्रतियोगि । तादृशसंबन्धानुयोगित्वं शक्यत्वम् । तादृशसंबन्धप्रतियोगित्वं शक्तत्वं वाचकत्वम् वा । अनुयोगितावच्छेदकं शक्यतावच्छेदकमिति । विस्तरस्तु शाब्दतरङ्गिणिमञ्जूषाप्रभृतिग्रन्थादाकलनीयः ।

अत्र नैयायिकानां सिद्धान्तः - नैवं पदनिष्ठं बोधकत्वं शक्तित्वेन स्वीकर्तुमुचितम् । अस्मात् पदादयमर्थो बोद्धव्य इतीश्वरसङ्केतमन्तरा पदे बोधकत्वानुपपत्या सङ्केत एव शक्तिरिति स्वीकारो युज्यते । लोकेऽपीदमनुभूयते यत् ढित्तादिपदात् काष्टमयहस्त्यादिर्बोद्धव्य इति कस्यचित् सङ्केतकर्तुर्वाक्यात् ढित्तादिपदस्य काष्टमयहस्त्यादिबोधकत्वं निश्चीयते । तत्र ढित्तादिपदस्य बोधकत्वं आप्तत्वाभिमतस्य सङ्केतकर्तुरिच्छाधीनम् । अतः तादृशसङ्केतमन्तरा ढित्तादिपदे काष्टमयहस्त्यादिबोधकत्वासम्भवात् तदीयसङ्केतः ढित्तादिपदोच्चारणकाले काष्टमयहस्त्यादिविषयकशाब्दबोधं प्रति कारणत्वेन निर्णियते । अन्यथा तादृशसङ्केतकर्तृवाक्ये आदरमनावहन्तो जनाः यं कमपि शब्दं काष्टमयहस्त्यादौ प्रयुञ्जीरन् । तथैव ईश्वरेण सर्गादौ घटादिपदानि कम्बुग्रीवादिमदादीनर्थान् बोधयत्वितीच्छया तत्तदर्थेषु नियुक्तानि । अतः तादृशेश्वरेच्छारूपसङ्केत एव पदपदार्थयोः बोध्यबोधकभावनियामकतया सम्बन्धपदमारोढुं योग्यः । स च सम्बन्धः शक्तिरिति ।

एवं तादात्म्यमपि शब्दार्थयोः न सम्बन्धः, तस्य अभेदाध्यासघटितत्वासम्भवात् । केवलं घट इति शब्दोच्चारणानन्तरं किं श्रुतमिति पृष्टे "घट इति पदं श्रुतम्" इत्युत्तरमेव प्रदीयते, किमस्यार्थ इति पृष्टे "घट इत्यर्थः" इत्युत्तरमेव प्रदीयते । अत्र उत्तरयतः पुरुषस्य घटशब्दतदर्थयोः अध्यासघटिततादात्म्यप्रतीतिरभविष्यत् , तदा विपरीतमेवोत्तरमदास्यत् । अभेदाध्यासघटिततादात्म्यमयुक्तमेव । शब्दः बोधकत्वघटितसंबन्धभिन्नसंबन्धेन प्रमेयसंबद्धः सन् बोधकः प्रमाणत्वादित्यनुमानेन शब्दार्थयोरतिरिक्तसम्बन्धः सिद्ध्यतीत्यपि न युक्तम् । तत्रानुमाने प्रमाणत्वहेतुरप्रयोजकः व्यभिचारशङ्कावारकत्वाभावात् । एवञ्चानेनैव क्रमेण अनुमानादिप्रमाणानि परामर्शादिज्ञानं व्यापारीकृत्य प्रमां जनयतीत्यतः "प्रत्यक्षप्रमाणं ज्ञानद्वारा प्रमितिजनकं प्रमाणत्वात् अनुमानादिवत्" इत्यपि वक्तुं शक्यत्वेन प्रत्यक्षज्ञानस्यापि ज्ञानकरणकत्वापत्तिः ।

एवं वह्निधूमयोः धूमाद्वह्निज्ञानं जायतामितीच्छाविषयत्वमेव संबन्धोऽस्तु इत्यप्यसंगतम् । ईश्वरेच्छायाः सन्मात्रविषयकत्वस्वीकारेऽपि धूमाच्च वह्निज्ञानं जायते । कुतः इति पृष्टे ईश्वरेच्छावशादिति न कोऽप्युत्तरयति, अपि तु महानसादौ तयोः साहचर्यग्रहणादित्येव । अतस्तयोः साहचर्यलक्षणा व्याप्तिरनुभवसिद्धा । शब्दार्थयोस्तु संयोगसमवायसामानाधिकरण्यादयः संबन्धा न संभवन्ति । अतः शाब्दबोधकादाचित्कत्वान्यथानुपपत्त्या च कश्चन संबन्धो वाच्यः । अतिरिक्तसंबन्धरूपधर्मिकल्पनामपेक्ष्य, अवश्यज्ञेयस्य क्लृप्तस्य संकेतस्य संबन्धत्वकल्पने लाघवम् । तथा च निरुक्तलाघवज्ञानसहकृतशाब्दबोधकादाचित्कत्वान्यथानुपपत्तिरेव संकेतस्य संबन्धत्वे

प्रमाणमिति ।

एवमस्य शब्दस्येदमर्थजातमभिधेयमिति अभिधानाभिधेयनियमनियोगरूपसङ्केतः स्वाभाविकसम्बन्धवादिभिरपि स्वीकरणीयः । अन्यथा शब्दादर्थप्रतिपत्तेरपलापप्रसङ्गः । तदुक्तं भाष्ये "तस्मिन्नुपयुक्ते शब्दादर्थसंप्रत्ययो भवति । विपर्यये हि शब्दश्रवणेऽपि प्रत्ययाभावः । संबन्धवादिनोऽपि चायमवर्जनीय इति ।" तदेव तात्पर्यटीकाकाराः स्पष्टयन्ति - "येऽपि मीमांसकाः वैयाकरणा वा स्वाभाविकं शब्दार्थयोः संबन्धमास्थिषत, तेषामपि नैव सत्तामात्रेण गमकः, अपि तु ज्ञातः सन् । विज्ञाने च अयमस्य वाचक इति वा, अस्मादयं बोद्धव्यः इति वा संकेत एवोपायः । वृद्धव्यवहारोऽपि गवादिशब्दानां देवदत्तादिशब्दवत्, संकेतपूर्व एव । तत् वरमस्तु संकेत एव । कृतमत्र स्वाभाविकेन संबन्धेन । तन्मात्रादेव प्रयोगप्रतिपत्तिव्यवहाराणामुपपत्तेरित्यर्थः ।" इति एतेन अस्मात् पदादयमर्थो बोद्धव्य इत्याद्याकारः इच्छैव सङ्केतः शब्दार्थयोः सम्बन्धः इति स्थितम् ।

**आकरग्रन्थः -**

१. वैशेषिकोपस्कारः
२. शाब्दशक्तितरङ्गिणी
३. शक्तिवादार्थसङ्ग्रहः
४. शाब्दबोधविमर्शः (NS Ramanujatatacharya)
५. न्यायभाष्यम्
६. परमलघुमञ्जूषा
७. वाक्यपदीयम्


ISSN : 2249-538X

# वेदार्थनिर्णये ब्राह्मणग्रन्थानां योगदानम्

डा. दुर्गाशरणरथः*

**शोधसारः –**

वेदार्थोपबृंहणाय हि ब्राह्मणग्रन्थाः । तस्मात् यज्ञपरिभाषायामापस्तम्बेनाभाणि यत् –

**मन्त्रब्राह्मणयोर्वेदनामधेयम् ।** (यज्ञपरिभाषा)

वैदिकसाहित्ये ब्राह्मणग्रन्थानां विशिष्टं महत्त्वमस्ति । यतोहि ब्राह्मणग्रन्थानां महत्त्वं भाषा व्याख्यानपद्धतिश्च अत्यन्तविलक्षणमस्ति । ब्राह्मणग्रन्थाः संहिताशास्त्रविषयस्यैव प्रतिपादकाः व्याख्यानग्रन्थाः सन्ति । प्राक्कालिकभारतीयसंस्कृतीनां परिचायका इमे ग्रन्थाः तदानीन्तन–धर्मव्यवस्थां कर्मकाण्ड–परम्परादीनां व्यवस्थां प्रतिबोधयन्ति । ब्राह्मणग्रन्थानामनुशीलनेन ज्ञायते यत् तस्मिन् काले यागाद्यनुष्ठानविषये विद्वत्सु शास्त्रार्थो भवतिस्म । तस्माच्छास्त्रपर्यालोचनात् मीमांसाशास्त्रस्योत्पत्तिरजायत । ब्राह्मणग्रन्थेषु यज्ञीयविषयमीमांसकाः विद्वांसः ब्रह्मवादिनः कथ्यन्ते । ताण्ड्यब्राह्मणे यथोक्तम् 6/4/15 एवं ब्रह्मवादिनो वदन्ति । एवं प्रमाणस्वरूपमपि यज्ञीयसमस्यासमाधानं प्राप्यते । शतपथब्राह्मणेऽपि एवंविधानां ब्रह्मवादिनां मतसमीक्षणं तेषां नामोल्लेखश्च प्राप्यते । तद्यथा दीक्षाग्रहणात् पूर्वदिने भोक्तव्यं न वेति प्रश्नमादाय आषाढनामकस्याचार्यस्य याज्ञवल्क्येन सह गभीरमीमांसा समुपलभ्यते । आषाढाचार्यमतेऽनशनमेव व्रतं कर्त्तव्यं याज्ञावल्क्यमते च भोजनं करणीयम् । परमरण्ये जातानामेव व्रीहि-यव-शमीधान्यादीनां पदार्थानां भोजनं भवेत् । मीमांसन्ते इत्यस्य क्रियापदस्य मीमांसा संज्ञापदस्य इव प्रयोगः ब्राह्मणग्रन्थेषु प्राचुर्येनोपलभ्यते । तद्यथा – **"उत्सृज्यमेवेति" (तै.सं. ६/५/६/१) ब्राह्मणं पात्रे न मीमांसेत (ताण्ड्य ६/५/१)""उदिते होतव्यमनुदिते होतव्यमिति मीमांसन्ते"** (कौषी.ब्राह्म. २/९) ।

ब्राह्मणग्रन्थकाराणां वैज्ञानिकेयं दृष्टिः अत्यन्ता सूक्ष्मा सन्तुलिता च वर्तते । ब्राह्मणग्रन्थेषु सत्यस्य प्रतिष्ठायां बलं प्रदीयतेस्म । तत्र स्पष्टरूपेण निर्देश अस्ति य असत्यं वदति स्वकीयां पवित्रतां हन्ति स स्वात्मानमेव विनाशयति । **अमेध्यो वै पुरुषो यदनृतं वदति ।** (शतपथब्राह्मणे 3/1/3/8 ) ।

ब्राह्मणग्रन्थानां लोकोपकारिणां विचाराणां सिद्धान्तस्य परीक्षणं भगवतो बुद्धस्य वचसापि ज्ञायते सत्यं ह्यत्र साक्षात् वेदस्वरूपत्वेनोक्तम् । तस्मात् ब्राह्मणग्रन्था आर्यजातीनाङ्कृते प्राणरुपाः तत्र भारतीयस्य प्राचीनतमं ज्ञान – विज्ञानम् एकत्र समाविष्टं वर्तते । तत्र भारतस्य सम्पूर्णापि संस्कृतिः साहित्यानि च सुरक्षितानि सन्ति ।

**प्रमुखशब्दाः** – निर्वचनम्, पुराकल्पः, आख्यानम्, यज्ञः, अनुब्राह्मणम्, विधिः, अर्थवादः,

**प्रस्तावना –**

इदं हि ब्राह्मणसाहित्यमत्यन्तं विस्तृतं व्यापकञ्च वर्तते । साहित्यमिदं गद्यात्मकं विद्यते । यज्ञस्य किं

*सहायकाचार्यः, वेदाङ्गवेदभाष्यविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

विधानं कानि च तदर्थमपेक्षितानि साधनानि के च यज्ञानामधिकारिण इत्येतेषां समेषामपि विषयाणां वर्णनं विद्यते । अस्यैव ब्राह्मणस्यैवावान्तरभागोऽनुब्राह्मणमिति अपि व्यपदिश्यते । ब्रह्मणो व्याख्यानपरके ब्राह्मणग्रन्थे मन्त्राणां कर्मणां विनियोगानाञ्च व्याख्या वर्तते ।

ब्राह्मणानामान्तरिकेन परीक्षणेन ज्ञायते यत् ब्राह्मणग्रन्थो यज्ञानां वैज्ञानिकम् आधिभौतिकम् आध्यात्मिकञ्च स्वरूपमुपस्थापयन् एको महनीयो विश्वकोशो वर्तते । संसारस्यान्येषु' धर्मसाहित्येषु ब्राह्मणग्रन्थानामिवान्यग्रन्थानां सर्वथा अभावो विद्यते विशेषतः कर्मकाण्डविषयकाणां यागादिविधानानां साङ्गोपाङ्ग सम्पूर्ण विवरणमुपलभ्यते । सत्यन्त्विदमेव वर्तते यत् यज्ञोऽप्येकं विज्ञानं वर्तते । बाह्यदृष्टिनिक्षेपकानाङ्कृते यज्ञस्य महत्त्वं भवेन्नाम न्यूनं परमाध्यात्मिकदृष्टिमतां मते यज्ञः स्वतन्त्रमेकं विज्ञानं वर्तते यस्य प्रतिपक्षस्य स्वकीयममूल्यं वैशिष्ट्यं वर्तते यस्य च फलमनुष्ठानाधिकृतं भवति ।

**ब्राह्मणशब्दस्यार्थः**

ब्रह्मन् शब्दस्य त्रिविधोऽर्थः तथाहि **प्रथमः** – ब्रह्मन्निति शब्दस्यार्थो भवति मन्त्रः तदधिकृतं शास्त्रं ब्राह्मणम् अर्थात् मन्त्राणां व्याख्या – विनियोगविधायको ग्रन्थः । ब्रह्मन् शब्दो यज्ञार्थे वेदवाचके चापि प्रयुज्यते तस्मात् यज्ञस्य वेदस्य वा व्याख्याग्रन्थः ब्राह्मणम् इति ब्राह्मणस्य **द्वितीयोऽर्थः** । **तृतीयार्थे** ब्रह्मन् शब्दः रहस्यवाचको विद्यते एतेन वैदिकरहस्योद्घाटनादपि इदं ब्राह्मणमित्युच्यते । अत्र यज्ञानामाध्यात्मिकामाधिदैविकं वैज्ञानिकञ्च महत्त्वं वर्णितमस्ति । अत एव भट्टभास्कराचार्येणोक्तम् –

**ब्राह्मणं नाम कर्मणस्तन्मन्त्राणां व्याख्यानग्रन्थः ॥**

ग्रन्थवाचिब्राह्मणशब्दः विशेषतः नपुसंकलिङ्गे प्रयुज्यते । मेदिनीकोशकारेणापि वेदभागब्राह्मणशब्दस्य नपुंसके प्रयोगो विहितः । तद्यथा –

**ब्राह्मणं ब्रह्मसङ्घाते वेदभागे नपुंसकम् ।** (मेदिनीकोषे)

ग्रन्थार्थे ब्राह्मणशब्दस्य नपुंसके प्रयोगः पाणिनिव्याकरणे, निरुक्ते शतपथब्राह्मणे, ऐतरेयब्राह्मणेऽपि प्राप्यते । किञ्च तैत्तिरीयसंहितायामस्य सर्वाधिकप्राच्यप्रयोगः प्राप्यते तथाहि – एतद् ब्राह्मणान्येव पञ्च हवींषि । तै. सं. 1/7/1/1 एवं यज्ञ – रहस्य – मन्त्र वाचकः ब्रह्मन् इति तदधिकृतं शास्त्रं ब्राह्मणमिति ।

वाचस्पतिमिश्रेणापि ब्राह्मणग्रन्थानां प्रयोजनं निर्वचनं मन्त्राणां विनियोग अर्थवादो विधिश्चेति स्वीकृतम् । तद्यथोक्तं तेन –

**नैरुक्तं यस्य मन्त्रस्य विनियोगः प्रयोजनम् ।**
**प्रतिष्ठानं विधिश्चैव ब्राह्मणं तदिहोच्यते ॥**


ISSN : 2249-538X

उपर्युक्तवर्णनेनेदं सिद्ध्यति यत् वेदस्य द्विविधं रूपं भवति । मन्त्रात्मकं ब्राह्मणात्मकञ्च । तस्मात्ब्राह्मणभागोऽपि वेद एव । अत एव ब्रह्म वेदः तद्व्याख्या ब्राह्मणमित्यपि केचित् कथयन्ति । वेदशेषभूताः इमे ब्राह्मणग्रन्था यज्ञानुष्ठानविधिं सम्पादयन्ति । तत्र भट्टभास्करेणाऽपि द्विविधं ब्राह्मणं मन्यते । **कर्मब्राह्मणं कल्पब्राह्मणं** चेति । याजुष्कास्तावत् अष्टौ ब्राह्मणानीत्यामनन्ति । तत्र विद्यारण्यस्वामिना स्वभाष्ये इत्थं प्रत्यपादि –

**ब्राह्मणं चाष्टधाभिन्नम् । तद्भेदास्तु वाजसनेयिभिराम्नायते इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि इति ।** (बृ.उप – 2.4.10)

निरुक्तादिग्रन्थेषु "इति विज्ञायते" इत्युक्त्वा ब्राह्मणग्रन्थानामेव निर्देशो विद्यते । अस्य शब्दस्य व्याख्यायां दुर्गाचार्येणोक्तं यत् –"**एवं ब्राह्मणेऽपि विचार्यमाणे ज्ञायते**" (निरुक्तटीका – ३/११, २११७) । पाणिनेरष्टाध्याय्याम् **अनुब्राह्मणम्** इति शब्दस्य प्रयोग उपलभ्यते यस्यार्थः ब्राह्मणं तु नास्ति परं तत्समानग्रन्थ एवेति प्रतीयते । अस्य शब्दस्य प्रयोगो भट्टभास्करेण तैत्तिरीयसंहिताया भाष्यभूमिकायां कृतः । एतेनेदं प्रतीयते ब्राह्मणस्यावान्तरभागस्यैव "**अनुब्राह्मणम्**" इति संज्ञा प्रदत्ता ।

ब्राह्मणग्रन्थानां स्वरूपमत्यन्तं विततं व्यापकञ्चासीत् । अद्यत्वे ब्राह्मणग्रन्थाः यथोपलभ्यन्ते पूर्वमेतेषां संख्या इतोप्यधिका आसीत् । चतुर्णामपि वेदानां शाखानुगुणं समुपलब्धब्राह्मणग्रन्थानां विवरणं उपरिष्टात् (अग्रिमपुटे) सारणीरुपेण प्रस्तूयते ।

**उपलब्धब्राह्मणग्रन्थाः –**

| **ऋग्वेदः** | **यजुर्वेदः** | **सामवेदः** | **अथर्ववेदः** |
|---|---|---|---|
| ऐतरेयब्राह्मणम्<br>कौषितकी/<br>शांखायनब्राह्मणम् | **शुक्लः –**<br>काण्वशतपथब्राह्मणम्<br>माध्यन्दिनी शतपथब्राह्मणम्<br>**कृष्णः –** तैत्तिरीयब्राह्मणम् | 1.प्रौढ/ताण्ड्य/पञ्चविंशब्राह्मणम्<br>2.षड्विंशब्राह्मणम्<br>3.सामविधान/आर्षेयब्राह्मणम्<br>4.मन्त्र/उपनिषद्ब्राह्मणम्<br>5.देवताध्यायब्राह्मणम्<br>6.वंशब्राह्मणम्<br>7.संहितोपनिषब्राह्मणम्<br>8.जैमिनीयब्राह्मणम् | गोपथब्राह्मणम् |

**ब्राह्मणग्रन्थानां महत्त्वम् –**

धार्मिकसामाजिकादित्तत्वोपस्थापकत्वेनाप्यधिकं वर्तते । तथाहि धर्मस्य विषये ज्ञायते यत् ब्राह्मणयुगे

यज्ञसम्पादनमेव मुख्यमुद्देश्यमासीत् । यज्ञस्य सूक्ष्मातिसूक्ष्मानुष्ठानाय सविस्तृतं वर्णनमत्रोपलभ्यते तथा च तत्रप्रतिपादितविधिसम्पादनं प्रति बद्धादराः दृश्यन्ते ब्राह्मणग्रन्थाः । तद्यथा अग्निस्थापना कदा कर्तव्या ? कथं विधातव्या ? घृतस्याहुतयः वेद्यां कुत्र प्रक्षेप्तव्या इत्यादयः प्रतिपालनीयाः नैकविधविषयाः सन्ति । सकलेष्वपि कार्येषु यज्ञ एव श्रेष्ठतमं कर्मासीत् । ब्राह्मणेषु यज्ञस्य तथाविधं महत्त्वं वर्णितं येन ज्ञायते विश्वपिता प्रजापतिरपि यज्ञस्यैव रुपमस्ति । यथोक्तं शतपथब्राह्मणे "प्रत्यक्षं यज्ञो यत् प्रजापतिः" (शत. ४/३/४/३) विष्णोः शरीरमपि यज्ञ एव – **यज्ञो वै विष्णुः ।** आकाशे दीप्यमान आदित्योऽपि यज्ञ रूप एव '**स यः यज्ञोऽसौ आदित्यः ।** (शत. ब्राह्म. १४/१/१/१६) । अखिलेष्वपि श्रेष्ठत्वात् विश्वेऽस्मिन् यज्ञ एव परममाराध्यं कर्म विद्यते । जगतः येऽपि पदार्थाः सन्ति किं वा प्रजापतिरपि यज्ञस्याध्यात्मिकः प्रतिबिम्बो वर्तते । यज्ञादेव सृष्टिरजायत इत्यस्य तत्त्वस्य ज्ञानं पुरुषसूक्ते प्राप्यते परं ब्राह्मणयुगे यज्ञस्य परमसाधनत्वे नास्ति कश्चन संन्देहः । अश्वमेधयज्ञकर्त्ता यजमानः स्वाखिलेभ्यः पापेभ्यः विमुच्यते । गोपथब्राह्मणे उक्तं यद् यथा सर्पः स्वकीयत्वचा विमुक्तो भवति इषीका मुंञ्ज्ञात् विमुच्यते तथैव शाकलहवनकर्त्ता सर्वपापात् प्रमुच्यते । तथाहि –

**तद् यथा हि जीर्णायास्त्वचो निर्मुच्यते इषीका वा मुञ्ज्ञात् ।**<br>**एवं ह वै ते सर्वस्मात् पाप्मनः समुच्यते ये शाकलां जुह्वति ।** इति

संहिताकालिकाः देवाः अस्मिन् युगे गौणतां गताः गौणाश्च मुख्याः जाताः । कुत्रचित् नूतनस्यापि देवस्यापि कल्पनापि प्राप्यते ऋग्वेदे गौणेषु दैवेषु प्रजापतिरग्रगण्यो वर्तते । ऐतरेयब्राह्मणस्यारम्भ एव विष्णोः परमदेवत्वेन प्रतिष्ठा प्राप्यते – **"अग्निर्वै देवनामवमो विष्णुः परमः"** (ऐत. १/१) रुद्रस्य कृते **"महादेव"** इति शब्दस्य प्रयोगः ब्राह्मणेषूपलभ्यते । प्रजापतेः देवेष्वग्रस्थानीयं वर्तते । प्रजापतिरेव जगतः स्रष्टा वर्तते । प्रजापतिः देवानां सृष्टिकर्तास्ति । प्रजापतिरेवभूतलपदार्थानां स्रष्टा । स एव देवानुत्पाद्य ऊर्जा विभंजयति तदूर्जाविभागादुम्बरवृक्षस्य जन्म अभवत्, तस्मात् **"प्रजापतिः"** इत्यस्य ब्राह्मणेषु सर्वतो महान् वर्तते । चातुर्वर्ण्यम् – ब्राह्मणयुगीये समाजे ब्राह्मण – क्षत्रिय – वैश्य – शूद्र इत्येषां चतुर्णां तथा च तत्कार्याणां सर्वाः व्यवस्थाः प्रतिष्ठाश्चोपलभ्यन्ते । वैदिकयज्ञस्य 'सम्पादकत्वात् निर्वाहकत्वाच्च ब्राह्मणानां स्थानं चतुर्वर्णेष्वग्रतमम् आसीत् । ब्राह्मणेषु वेदशास्त्रपाठकाः मनुष्यदेव इति महनीयाभिधानेन मण्डिताः । यथोक्तम् शतपथब्राह्मणे – **ये ब्राह्मणाः शुश्रुवांसोऽनूचानास्ते मनुष्यदेवाः । विद्वांसो हि देवाः** (शत.ब्राह्मणम् – ३/६/३/१०) ब्राह्मणः प्रत्यक्षदेवत्वेनोद्बोधितः **"एते देवाः प्रत्यक्षं यद् ब्राह्मणाः ।** तैत्तिरीयसंहितायाम् (१/६/३/२)" शतपथब्राह्मणे द्विविधो देवोऽङ्गीकृत – अग्न्यादयः हविर्भोजिनः देवाः मनुष्यदेवः ब्राह्मणश्च । उभयोः कृते यज्ञस्यापि भागद्वयं


ISSN : 2249-538X

विहितम् । आहुतयः देवेभ्यः दक्षिणा च मनुष्यदेवेभ्यः येन प्रसन्नौ तौ यजमानाय कल्याणं सम्पादयतः । ब्राह्मणानां राजा सोमः वर्त्तते । प्रसङ्गेऽस्मिन्नुच्यते काण्वसंहितायाः राजसूयप्रकरणे – **सोमोऽस्माकं ब्राह्मणानां राजा** (काण्व – 11.3.3) शतपथव्याख्यानुसारं अस्येदं तात्पर्यं यत् राज्ञे सर्वा अपि प्रजा अन्नस्थानीयाः "ब्रह्मवर्चसी" ब्राह्मणानामाचार्यः । स एव ब्राह्मणः वीर्यवान् यो वेदज्ञाता भवति । यथोक्तम् –

**तद्धयेव ब्राह्मणेनैष्टव्यं यद् ब्रह्मवर्चसी स्यादिति ।**

**यो वै ब्राह्मणानामनूचानतमः स एषां वीर्यवत्तमः ।** (श. ४/६/६/५)

ब्राह्मणानां बलं तेषां मुखे – वचने वाक्शक्तावेव भवति यतोहि तेषां सृष्टिः मुखादेवाभवदिति । यथोक्तं (ताण्ड्यब्राह्मणे) तस्माद् ब्राह्मणो मुखेन वीर्यं करोति । मुखतो हि सृष्टः । एवंभूतानां ब्राह्मणानां वशङ्गते क्षत्रिये राष्ट्रस्य मङ्गलं भवति राष्ट्रे च वीरवत्तमः पुत्रो भवति । तथा उक्तं (ऐत. ब्राह्मणे ८/९) "तद् यत्र ब्राह्मणः क्षत्रं वशमेति तद् राष्ट्रं समृद्धं तद्वीरवदाहास्मिन् वीरो जायते ।" (ऐ. ब्रा. ८/९)

क्षत्रियो राष्ट्रस्य रक्षको वैश्यश्च तस्य वर्धको भवति स्म । पादाभ्यामुत्पन्नत्वात् शूद्राणां प्रधानोधर्मः सेवाधर्म एवासीत् । एवं यज्ञप्रधाने वैदिकसमाजे वेदज्ञ ब्राह्मणानां महती प्रतिष्ठास्वाभाविकी आसीत् । एवं बहुविधानुष्ठानानां याज्ञिकस्वरूपाणाञ्चेतिहासस्य सम्पूर्ण ज्ञानमत्र प्राप्यते । ब्राह्मणेषु यज्ञो मुख्यो विषयो वर्तते । ब्राह्मणाध्ययनेन बहुविधशास्त्राणामुदयस्य कथा ज्ञातुं शक्यते । यज्ञीयावश्यकतासम्पूर्त्यर्थं शास्त्रमिदं तदानीन्तनं धर्मार्थकाममोक्षविषयकं सर्वविधं तथ्यं समुपस्थापयति । ब्राह्मणग्रन्थेषु यज्ञ एव सर्वोत्तमं कर्मेति प्रतिष्ठितम् । यथोक्तं यज्ञो वै श्रेष्ठतमं कर्म इति । एतेन सह तत्रेदमपि प्रतिपादितमस्ति यत् यज्ञविधानेन सर्वपापात् विमुच्यते मानवः । तद्यथोक्तम् – "सर्वस्मात्पाप्मनो निर्मुच्यते य एवं विद्वानग्निहोत्रं जुहोति" । यज्ञात् वैयक्तिकात्मोद्धारातिरिक्तं सामाजिकं कल्याणमपि भवति यतोहि ब्राह्मणग्रन्थेषूक्तं यत् यज्ञात् सर्वप्राणिनां कल्याणं भवति । यज्ञे दीयमाना आहुतिः अन्तरिक्षमभिव्याप्य सूर्यं यावत् गच्छति तत्र मेघेन सह एकीभूय वृष्टिरूपेण पृथिवीमभिषिञ्चति तथाह्युक्तं शतपथब्राह्मणे अग्निर्वै धूमो जायते, धूमादभ्रमभ्रमावृष्टिरिति । यज्ञात् ऐहिक्यः विपत्तयस्तु नश्यन्त्येव मनुष्यः जन्ममरणरूपादसाध्यकष्टादपि विमुच्यते तद्यथोक्तम् – **पुनर्मृत्युं मुच्यते य एवमेतामग्निहोत्रे मृत्योरतिमुक्तिं वेद** इति । (शतपथब्राह्मणे – 2/3, 3, 9 )

**वेदार्थनिर्णये ब्राह्मणग्रन्थानां योगदानम् –**

वेदार्थनिर्णये चतुर्णामपि वेदानां उपलब्धब्राह्मणग्रन्थानां अनितरसाधारणयोगदानमस्ति । संहितानां ब्राह्मणग्रन्थानाञ्च स्वतन्त्रमस्तित्वं वर्तते । यतोहि संहिता–ब्राह्मणयोः स्वरूपं यदि विचार्यते तर्हि मन्त्रभागस्य

कर्मकाण्डे विनियोगो भवति । ब्राह्मणभागश्च मन्त्राणां विनियोगविधिं बोधयति । एको मूलं द्वितीयश्च व्याख्याग्रन्थः । यज्ञेषु मन्त्रैराहुतिः प्रदीयते ब्राह्मणभागश्च तदुपयोगितां वक्ति । वेदशब्दो मूलतः वैदिकसंहितानामेव वाचकोऽस्ति न तु ब्राह्मणग्रन्थानाम् । वैदिकसाहित्ये ब्राह्मणाख्यकोपनिषदां समावेशो भवति । वेदशब्दस्य गौणार्थे प्रयोगश्चेत्तदा ब्राह्मणग्रन्था अपि वेदपदे बोध्या भवेयुः । तस्माद् गौणार्थमादायैव **'मन्त्रब्राह्मणयोर्वेदनामधेयम्'** इत्यापस्तम्बसूत्रे कथितम् । इदमेव तात्पर्यम् आपस्तम्ब श्रौतसूत्रे (24.1 – 31) बौधायन गृह्यसूत्रे (2.6.3) कौशिकसूत्रे (1 – 3) तन्त्रवार्तिके (1 – 3 – 10) शांकरभाष्ये (वेदान्त दर्शन – 1 – 3 – 3) चापि प्रकटितमस्ति । मन्त्रेषु ब्राह्मणेषु वस्तुतः मौलिको भेदो वर्तते तद्यथा – भाव–भेदः, रचना भेदः, विषय–भेदः प्रक्रियाभेदश्च ।

**संहिताग्रन्थाः –**

गद्यं पद्यमित्युभयरूपेण सन्ति किञ्च ब्राह्मणग्रन्थाः सर्वथा गद्यात्मका एव । विवेच्यविषयदृष्ट्यापि ऋग्वेदमन्त्रेषु देव – स्तुतीनां प्राधान्यम् अथर्वमन्त्रेषु ऐहिकामुष्मिकयोः फलसाधकसाधनानि सन्ति । यजुर्वेदसंहितायां दर्शपूर्णमासादियज्ञानां विस्तृतं विवरणमुपलभ्यते परं ब्राह्मणग्रन्थानां विषय भिन्न एव । तद्यथा – यज्ञस्य विधानं कदा कथञ्च कर्त्तव्यं कानि साधनानि अधिकारिणश्च के इत्येतेषां विधीनां प्रतिपादनाय ब्राह्मणसाहित्यस्योद्भवः । शबरस्वामिमते तु संहिताः स्तुतिप्रधानाः ब्राह्मणग्रन्थाश्च तद्विधिग्रन्थाः सन्तीति ।

एवं ह्यत्रावलोक्यते यत् विधिरेव ब्राह्मणग्रन्थानां प्रतिपाद्यो मुख्यो विषयः । यत्र च सन्त्यन्ये विषयाः ते तस्य विधिपोषका एवेति वक्तुं शक्यते । मीमांसकमतेऽयमेव विषयः अर्थवाद इति संज्ञयापि बोध्यते । मीमांसकस्यार्थवादे स्तुतिनिन्दयोरुभयोरपि विधानमस्ति अस्मिन् वादे यागनिषिद्धवस्तूनां निन्दा वर्तते तथा यागोपयोगिनां द्रव्याणां प्रशंसा । ब्राह्मणग्रन्थेषु विधिरेव तत्केन्द्रबिन्दुरस्ति यं परितः निरुक्तस्तुत्याख्यानहेतुवचनादयो विविधाः विषया स्वकीयमावर्तनं सम्पूरयन्ति ।

राजशेखरेण तु इतिहासस्य द्वौ प्रभेदौ कथितौ । तद्यथोक्तं तेन –

**अन्यस्यान्यस्य चोक्तिर्या बुधैः प्रोक्ता पुराकृतिः ।**
**यो ह्यत्यन्तपरोक्षार्थः स पुराकल्प उच्यते ॥**

अर्थात् यस्यां कथायामेक एव भवति नायकः सा परक्रियेति कथ्यते । यथा – रामायणम् । यत्र बहुनायकाः भवन्ति सा कथा पुराकल्पेति नाम्ना बोध्यते । यथा – महाभारतम् । अत्र च ब्राह्मणग्रन्थेषूभयविधविषयाणां वर्णनं – भवतीति बोध्यम् । वेदभाष्यकारापस्तम्बऋषीणां कथनमस्ति यत् मन्त्रसंहिता ब्राह्मणग्रन्थाश्चेमावुभावपि यज्ञस्य प्रमाणम् । यथोक्तं मन्त्रब्राह्मणे यज्ञस्य प्रमाणम् । आपस्तम्ब ऋषेरनेन वचनेन मन्त्रब्राह्मणात्मको वेद इति

कथनं सर्वथा सत्यं प्रतिभाति । वैदिकसंहिताः ब्राह्मणग्रन्थाश्चेत्यनयोः वेदशब्देनापि बोधकेषु ग्रन्थेषु कतिचन सूत्र ग्रन्थामीमांसाग्रन्थाः वेदान्तग्रन्थाः वार्तिकग्रन्थाः स्मृतिग्रन्थाश्चोल्लेख्याः सन्ति । एतेषु सर्वेष्वपि ग्रन्थेषु उभावपि समानभावेन प्रतिष्ठापितौ वर्तते ।

**ब्राह्मणग्रन्थानां प्रतिपाद्यो विषयः –**

ब्राह्मणग्रन्थेषु प्रतिपाद्यान् विषयाः चतुर्धा विभाजयितुं शक्यन्ते । तत्र **प्रथमो** विधिः इति । विधिशब्दः यज्ञार्थे प्रयुज्यते । यज्ञस्याङ्गानामुपाङ्गानाञ्चानुष्ठानविधानमेव विधिशब्देन व्यवह्रिते । विधिविषयस्तु ताण्ड्यब्राह्मणे नैकविध उपलभ्यते । तद्यथा **"बहिषः पवमानाय"** अध्वर्यु उद्गातादिपञ्चऋत्विजां प्रसर्पणविधानम् तेन सह नियमद्वयस्य पालनमावश्यकं भवति । ऋत्विजप्रसर्पणं कुर्वद्भिः शनैः शनैः पदक्षेपस्यापि विधानं वर्तते । पञ्चस्वपि ऋत्विक्षु क्रमानुसारम् अध्वर्युः प्रस्तोता उद्गाता प्रतिहर्त्ता ब्राह्मास्तेषां बद्धपक्तिभिः गमनं भवति । शतपथब्राह्मणे तु विधिविधानानां समवायो दृश्यते प्रारम्भ एव काण्डे दर्शपूर्णमासादीनां मुख्यस्यावान्तरस्य चानुष्ठानानां वर्णनं यागक्रमेण वर्तते । द्वितीये काण्डे आधान – पुरोधानाग्निहोत्रोपस्थापनाग्रायणदाक्षायणादियज्ञानां वर्णनं सविशदं वर्तते । संक्षेपतः यत्र यज्ञानां तत्सम्बद्धानाञ्च क्रियाणां नियमा वर्णिता भवन्ति स विधिरित्युच्यते यो हि ब्राह्मणग्रन्थानां मुख्यो विषयः ।

**द्वितीयः** अर्थवादः यत्र यज्ञमहत्त्वानां तत्सम्बद्धोपाख्यानानां विवेचनं भवति सोह्यर्थवाद इति उच्यते । तथाहि यज्ञे निषिद्धपदार्थानां निन्दा ब्राह्मणग्रन्थेष्वनेकस्थलेषु समुपलभ्यते यज्ञे माषस्य विधानं निषिद्धं तदर्थमुक्तमस्ति तैत्तिरीय संहितायाम् अमेध्या वै माषाः । एवमेव ताण्ड्यब्राह्मणेऽग्निष्टोमयज्ञस्य महती प्रशंसा प्राप्यते तथा च तत्रानुष्ठानानां हव्यद्रव्याणां देवानाञ्च भूयसी महत्ता ब्राह्मणग्रन्थेषु कृता विद्यते । वस्तुत अर्थवादो हि प्रयोगविधिपुष्ट्यर्थमेवेति वक्तुं शक्यते ।

**तृतीय** उपनिषद् – यत्राध्यात्मिकदार्शनिकविचाराणां सन्निवेशः तदुपनिषदित्युच्यते । उपनिषद् विषयेषु तत्त्वज्ञानं मुख्यो विषयः । इयं ब्रह्मविद्याप्युच्यते । अत्र चाविद्याशमनोपायः दुःखनिरोधोपायो ब्रह्मप्राप्त्युपायश्चादयः वर्णिताः सन्ति ।

**चतुर्थस्त्वाख्यानम्** – ब्राह्मणग्रन्थेषु महत्त्वपूर्णमाख्यानमुपलभ्यते इदञ्चाख्यानमत्यन्तं मनोरमं ज्ञानविवर्धकं महत्त्वपूर्णञ्च भवति ।

एवं व्याख्यानेन प्रतिपाद्यविषयाणां ज्ञानं सौकर्येण प्रदीयते । विधिविधानानां स्वरूपव्याख्यैवाख्यानस्य जननी । आख्यानञ्चेदं द्विविधं भवति । लघुरूपं दीर्घरूपञ्च ।

**लघुरुपे आख्याने** तथाभूतानां कथानां गणना भवति यस्यां सयुक्तिकं विषयनिर्वचनं भवति । एवं विधमाख्यानं किञ्चिद् भेदतया नैकेषु ब्राह्मणग्रन्थेषुपलभ्यते । एवंभूतान्याख्यानानि सन्ति प्रधानभूतानि कतिपयानि तथाहि – ताण्ड्यब्राह्मणे (6/5/10 –12) **वाचः देवान् परित्यज्य सलिले तदनु वनस्पतौ च प्रवेशः ।** तत्रैव च (6 –6 –8) इत्यत्र **स्वर्भानोरसुरस्याऽऽदित्यस्य चाक्रमणं तथात्रिमुनिना तस्यान्धकारविघटनम् ।** एवमेव शतपथब्राह्मणे 1 – 6 – 4 – 15 तमे अग्निमन्थनकाले घोटकस्याग्रे स्थापनम् । एवंभूताख्यानेषु कुत्रचित् गभीरतात्त्विकतथ्यानामपि सङ्केतः प्राप्यते यो हि ब्राह्मणस्य कर्मकाण्डवर्णनाद्भिन्नं गभीरार्थप्रतिपादकञ्च भवति । तथाहि प्रजापतेः प्रार्थनामुपांशुरूपेण कर्तुं शतपथब्राह्मणे यस्य कथानकस्योपक्रमः प्राप्यते स तु नितान्तं रहस्यमयो विद्यते । सृष्टिविषयकान्यनेकान्याख्यानानि ब्राह्मणग्रन्थे समुपलभ्यन्ते ।

**बृहद्रूपकाख्यानेषु** ब्राह्मणग्रन्थे सन्ति नैकविधोपाख्यानानि यथा – पुरुरव-उर्वश्योराख्यानम्, प्राचीन जलौधस्येतिहासः शुनः शेपोपाख्यानम् इत्यादीनि बहुविधानि । एतेष्वनेकाख्यानानां बीजं संहितायामेव सन्निविष्टं वर्तते यमादाय ब्राह्मणग्रन्थेषु विशदतया विवेचनं कृतमस्ति । पुरुरव-उर्वश्योः वर्णनं ऋग्वेदस्यैकस्मिन् विख्यातसंवादसूक्ते त्वस्त्येव शतपथब्राह्मणे इदमेवाख्यानं सविस्तरं प्राप्यते । शुनः शेपकथायाः सङ्केतः ऋग्वेदीयसूक्तेषु उपलभ्यते । अनेन विधिना दृश्यते यत् आख्यानानां विकासे ब्राह्मणग्रन्थस्याख्यायिकायाः विशिष्टा श्रृङ्खला वर्तते ।

**ब्राह्मणविभागः –**

वस्तुतः विषयदृष्ठ्या ब्राह्मणग्रन्थानां सन्ति चत्वारो भागाः । **विधिभागः अर्थवादभागः उपनिषद्भागः आख्यानभागश्च ।** विधिभागे तु कर्मकाण्डसम्बद्धविधानानां वर्णनमस्ति । एतेन सहार्थमीमांसा वैदिकशब्दानां निष्पत्तिरपि प्रथमभागस्य विषयो वर्तते । द्वितीये अर्थवादभागे प्ररोचनात्मका विषया वर्णिताः सन्ति । यज्ञविधिमवबोधयितुमर्थवादस्यज्ञानमावश्यकं भवति । अर्थवादस्तु स दिङ्निर्देशो यत्र यज्ञविधीनामुल्लेखो भवति । मीमांसाकारेणार्थवादस्य मुख्यतः त्रयो भेदाः प्रस्तुताः तथाहि **गुणवादः, अनुवादः, भूतार्थानुवादश्च** । भूतार्थानुवादश्च पुनः सप्तविभागेषु विभक्तः ते च सप्तविभागाः **स्तुत्यर्थवादः, फलार्थवादः, सिद्धार्थवादः, निरर्थवादः, परकृतिः, पुराकल्पः, मन्त्रश्च ।** "विहितकार्ये प्ररोचना निषिद्धकार्ये निवर्त्तना – अर्थवादः" अर्थात् विधेरनुकरणं निषेधस्य च तिरस्करणमेवार्थवादः । ब्राह्मणग्रन्थानां तृतीये उपनिषद्भागे ब्रह्मतत्त्वविषये विचारः कृतो विद्यते । चतुर्थे आख्याने भागे प्राच्यऋषिवंशानाम् आचार्यवंशानां राजवंशानाञ्च कथाः वर्णिताः सन्ति । ब्राह्मणग्रन्थानामिदं महद्वैशिष्ट्यं वर्तते यदैतिहासिकदृष्ठ्या हिन्दूनां सामाजिक – धार्मिक – नैतिकजीवनस्य विकासपरम्परामनुसन्धातुं महानिधिः वर्तते ।


ISSN : 2249-538X

ब्राह्मणेषु यज्ञस्य चतुर्णां पुरोहितानामावश्यकता कथिता एतेषां चतुर्णामप्यकैकं वेदेन सह सम्बन्धो विद्यते । विषयेऽस्मिन् वह्वृचां वचनं निरुक्ते यास्क आचष्टे –

**ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्करीषु ।**

**ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मा त्रां विमिमीत उ त्त्वाः ॥** (ऋ.सं – 10.71.11)

तद्यथा – प्रथमः होता अयं हि यज्ञे तदा तदा ऋग्वेदस्य विभिन्न प्रकरणात् मन्त्रान् एकीकृत्य पठति (यज्ञे प्रयोगं करोति) । (2) अध्वर्युः – अयं यज्ञं सम्पादयति, यजुर्वेदमन्त्राणां पाठञ्च करोति । अयं यज्ञे प्रमुखकार्यं करोति । (3) उद्गाता – अयं हि सामवेदस्य मन्त्रगानं करोति, (4) ब्रह्मा – अयं हि ब्रह्मा चतुर्णामपि वेदानां ज्ञाता भवति । चतुर्ष्वपि पुरोहितेष्वेतस्य स्थानं सर्वोत्तमं भवति । ब्रह्मणः निरीक्षकत्वे निर्देशनत्वे च यज्ञस्य सम्पादनं भवति ।

एवमेव ब्राह्मणानां प्रतिपाद्यविषयेषु दशानां विधीनां निर्देशः शाबरभाष्ये उपलभ्यते । तथाह्यत्र वस्तूनां निर्देशत्वेन संग्रह – श्लोके कथितं तेन –

**हेतुर्निवचनं निन्दा प्रशंसा संशयो विधिः ।**

**परक्रिया पुराकल्पो व्यवधारण – कल्पनाः ॥**

**उपमानं दशैते तु विधयो ब्राह्मणस्य तु ।**

**एतद्वै सर्ववेदानां नियतं विधि लक्षणम् ॥** (शाबरभाष्ये)

**हेतुः –** तेन ह्यन्नं क्रियते । (श.ब्रा – 2.5.2.23)

**निर्वचनम् –** तद्दध्नो दधित्वम् । (तै.सं – 2.5.3.4)

**निन्दा –** अमेध्या वै माषाः । (तै.सं – 5.1.8.1)

**प्रशंसा –** वायुर्वै क्षेपिष्ठा देवता । (तै.सं – 2.1.1.1 )

**सशयः –** तद्वयचिकिसज् जुहवानि3 माहौष3म् । (तै.सं – 6.5.9.1)

**विधिः –** यजमानेन संमितौदुम्बरी भवति । (तै.सं – 6.2.10.3)

**परक्रिया –** माषानेव मह्यं पचन्त ।

**पुराकल्पः –** पुरा ब्राह्मणा अभैषुः । (तै.सं – 1.5.7.5)

**व्यवधारणकल्पना –** यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणांश्चातुष्कपालान् निर्वपेत् । (तै.सं – 2.3.12.1)

**उपमानम् –** दैव्या वा एते होतारोयत्परिधयः (श.ब्रा – 1.8.3.10)

**विधिः –**

ब्राह्मणग्रन्थेषु विधिः हेतुश्चेत्यादयः सन्ति मुख्याः विषयाः । तस्मादेतेषां निर्वचनतयावलोकनीयं भवति तत्स्वरूपमित्युद्दिश्य निरुच्यन्तेऽत्र ते विषयाः तथाहि "विधिः" इत्यस्यार्थो भवति यज्ञः साङ्गोपाङ्गञ्च तस्यानुष्ठानोपदेशः । ताण्ड्यब्राह्मणे विधि – विधानानां समवायः प्राप्यते शतपथब्राह्मणन्तु विधीनां समूहमेव प्रस्तौति । अत्रारम्भे यत्रैकत्र दर्शपूर्णमासेष्ट्यादयः यागक्रमेणोपवर्णिताः सन्ति तदन्यत्र द्वितीये काण्डे आधान – पुनराधानादीनां वर्णनमस्ति । विधिना सह सयुक्तिकं हेतुरपि निर्दिष्टो वर्तते । शतपथब्राह्मणस्यारम्भकण्डिकायामेव सहेतुकं विधिः निर्दिष्टो वर्तते । पौर्णमासस्येष्टौ दीक्षितस्य कृते यथोक्तं शतपथब्राह्मणे "अमेध्यो वै पुरुषो यदनृतं वदति तेन पूतिरन्तरतः । मेध्या वा आपः । मेध्यो भूत्वा व्रतमुपयानीति । पवित्रं वा आपः । पवित्रपूतो व्रतमुपयानीति तस्माद्वा अप उपस्पृशति" । एवमत्र ब्राह्मणग्रन्थे सर्वयाज्ञिकविधानं सविशदं वर्णितं विद्यते नात्र कश्चन संदेहः ।

विनियोगः – ब्राह्मणग्रन्थेषु मन्त्र – विनियोगः प्रथमो विवेच्यविषयो वर्तते । कस्य मन्त्रस्य प्रयोगः कस्मै प्रयोजनाय क्रियते इत्यस्य सयुक्तिका व्यवस्था ब्राह्मणेषु सर्वत्रोपलभ्यते । मन्त्रस्यान्तरिकमर्थं विज्ञाय तदनुसारमेव तस्य मन्त्रस्य प्रयोगो विनियोग इत्युच्यते । समुचितविनियोगपूर्वकमेव कृतो मन्त्रप्रयोगः फलाय कल्पते तस्मात् मन्त्राणां पदैः जातं युक्तियुक्तं विनियोगं विज्ञायैव मन्त्र – प्रयोगः कर्त्तव्य इति । तद्यथोदाहरणरुपेण प्रमाणं द्रष्टुं शक्यते तथाहि – "आ नो मित्रावरुणा( ऋ ३/६२/१६) । इति मन्त्रस्य गायनस्य विनियोगः दीर्घरोगिणां रोगनिवृत्तये क्रियत इति वर्तते विस्मयजनको विषयः परमत्र ब्राह्मणस्य कथनमस्ति यत् मित्रावरुणयोः सम्बन्धः प्राणैः अपानैश्च सह विद्यते । दिनस्य देवत्वात् मित्रः प्राणानां प्रतिनिधिः वर्तते । तथा च रात्रिदेवतात्वात् वरुण अपानस्य प्रतीको वर्तते । तस्मात् दीर्घरोगिनः काये मित्रावरुणयोरधिष्ठानप्रार्थना प्राणापानयोरधिष्ठानमेवास्ति ।

**हेतुः –**

ब्राह्मणग्रन्थेषु यज्ञविधाननिमित्तानि कारणानि सविस्तृतं विवेचितानि सन्ति । हेतोरभिप्रायानुसारमेव कर्मकाण्डस्य विशेषो विधिः प्रतिपादितो वर्तते । अग्निष्टोमयागे उद्गाता "सदस्" इति नामधेये मण्डपे औदुम्बरवृक्षशाखाया उच्छ्रयणं करोति । तद्विधानकारणं निर्देशयन् ताण्ड्यब्राह्मणस्य कथनमस्ति यत् प्रजापतिः देवतानाङ्कृते अर्थस्य विभागं कृतवान् । तस्मादेवोदुम्बर वृक्षोऽभवत् । उद्गातुरपि सम्बन्धो प्रजापतिना सह विद्यते । तस्मादुद्गात्रोदुम्बरशाखोच्छ्रयणं कार्यम् । एवमेवाश्मनः उपरि द्रोणकलशस्य स्थापनविषयेऽपि विधि – विधानानां कारणानां निर्देशो विहितः । एवं हेतुवचनप्रबोधनेऽनुष्ठानानां कारणस्य परिचयः प्राप्यते तान्प्रति समधिका श्रद्धोत्पद्यते ।


ISSN : 2249-538X

**निरुक्तिः –**

ब्राह्मणग्रन्थेषु शब्दनिर्वचनमपि यथास्थानं निर्दिष्टं वर्तते । अस्य निर्देशस्य भाषाशास्त्रदृष्ट्याधिकं महत्त्वं वर्तते । निरुक्ते याः शब्दव्युत्पत्तयः प्रदत्ताः सन्ति तन्मूलं ब्राह्मणग्रन्थेषूपलभ्यते । निर्वचनमिदन्न काल्पनिकं वर्ततेऽपितु भाषावैज्ञानिकदृष्ट्याप्यस्य वैज्ञानिकत्वमक्षुण्णं वर्तते । एवं विधा निरुक्तिः संहिताभागेऽप्युपलभ्यते यामाश्रित्य ब्राह्मणग्रन्थानां व्युत्पत्तयः सन्ति । तद्यथा – दधि शब्दस्योदकशब्दस्य च व्याख्या संहिताग्रन्थेष्वेवं वर्तते – "तद्दध्नो दधित्वम् । तै.सं. २/५/३/३ उदानिषुर्महीरिति तस्मादुदकमुच्यते" अथर्व ३/१३/१ शतपथब्राह्मणे ताण्ड्यब्राह्मणेऽप्येवं भूतानां निरुक्तीनां प्राधान्यं वर्तते । तद्यथा – रथन्तर शब्दस्य निरुक्तिप्रसङ्गे ताण्ड्यब्राह्मणे लिखितं यत् – "रथमर्या क्षेप्लाऽतारीत् इति तद् रथन्तरस्य रथन्तरत्वम् एवमेव बृहत्साम्नः निरुक्तिरेवं वर्तते ततो बृहदनुप्राक्यत । बृहन् मर्या इदं स ज्योगन्तरभूदिति तत् बृहतो बृहत्वम्" (ताण्ड्य ७/६/५) एवमवलोक्यते यत् ब्राह्मणग्रन्थेषु शब्दनिर्वचनद्वारा वेदानां यथार्थज्ञानमवबोधयितुं महान् प्रयासो विहितः ।

**आख्यानम् –**

ब्राह्मणग्रन्थेषु विषयस्थापनाय आख्यानस्यातिविशिष्टं स्थानं वर्तते । विविधविधानानां स्वरूपव्याख्यैवाख्यानस्य जननी विद्यते । आख्यानं द्विविधं भवति – स्वल्पकायिकं दीर्घकायिकञ्च । स्वल्पकायिकेष्वाख्यानेषु सद्योविधेः सयुक्तित्वं प्रदर्शयितुं कथा भवति । आख्यानमिदं किञ्चिद्भेदतयानेकेषु ब्राह्मणग्रन्थेषूपलभ्यते । एवं भूतेष्वाख्यानेषु कतिपयान्याख्यानानि मुख्यानि सन्ति । तद्यथा – वाचः देवपरित्यागपूर्वकं जलेऽनन्तरं वनस्पतौ वा प्रवेशः (ताण्ड्य – ६/५/१०/१२) स्वर्भानुरिति नामधेयस्यासुरस्य आदित्यस्य चाक्रमणम्, अत्रिणा तमसो विघटनम् (६/६/८) मंत्रस्याश्वरुपे देवैः सहापाक्रमणम्, दुम्मुष्टिना तस्य प्रत्यावर्तनम् (ता. ६/७/१८) अग्निमन्थनस्य समये अश्वस्याग्रेसरत्वेन निधानस्य प्राचीनपरम्परा, देवासुरयोर्मध्ये नैकविधसंग्राम इत्यादीन्याख्यानानि प्रसिद्धानि सन्ति ।

एभिराख्यानैः गभीरं तात्त्विकञ्च तथ्यं कदाचित् बोध्यते यत्खलु ब्राह्मणानां कर्मकाण्डात्मकेन वर्णनेन सर्वथा भिन्नं भवति । सृष्टिविषयेऽप्यनेकान्याख्यानानि ब्राह्मणग्रन्थेषूपलभ्यन्ते । विराट्पुरुषेण चतुर्णां वर्णानामुत्पत्तेरुल्लेखस्तु पुरुषसूक्ते प्राप्यते परं ब्राह्मणग्रन्थेष्वप्यस्य प्रसङ्गस्य सुन्दरं वर्णनं प्राप्यते । ताण्ड्यब्राह्मणे (६/१) प्रजापतेरङ्गविशेषेण वर्णानां तत्तद्भेदानामाविर्भावः प्रदर्शितः यस्मिन् शूद्रवर्णाय यज्ञाधिकाररहितत्वस्योपपत्तिरपि प्रस्तुता अस्ति । बृहत्कायिकेष्वाख्यानेषु पुरुरव–उर्वश्योराख्यानम् (शत. ११/५१) प्राच्यजलौघस्येतिहासः (शत. १/८/१) शुनः शेपस्याख्यानम् । ऐत. ६/२१) मुख्यानि सन्ति । एतेषु बहूनामाख्यानानां बीजं संहितायामेवान्तर्विष्टं वर्तते

यदादाय ब्राह्मणेषु पुराणेषु चापि स्वपद्धतेरनुसारं तासां पल्लवनं कृतमस्ति । पुरुरव-उर्वश्योः वर्णनन्तु ऋग्वेदे प्रख्याते संवादसूक्ते परस्परोपकथन – विषयके मन्त्रे कृतमस्ति । शतपथब्राह्मणे इदमेवाख्यानं सविस्तृतं प्रदर्शितमस्ति । शुनः शेपस्य कथासङ्केतः ऋग्वेदीयसूक्तेषु (१/२४ सू. – ३० सू.) उपलभ्यते तथाचास्याभिनवो विन्यासः ऐतरेयब्राह्मणस्य वैशिष्ट्यं वर्तते । एवमाख्यानस्य विकासे ब्राह्मणमप्यावश्यकं विषयप्रतिपादकं वर्तते ।

**भाषासंघटना –**

ब्राह्मणग्रन्थानां भाषा सरला सरसा प्रसादगुणयुक्ता वर्तते । वर्ण्यविषयस्य काठिन्यमवलोक्य एतेषु ग्रन्थेषु एतत्प्रयासो विहितो यत् दीर्घसमासानां क्लिष्ट – पदानाम् अस्पष्टार्थकशब्दानां प्रयोगो न भवेत् । शैली प्रवाहयुक्ता रोचिका च वर्तते । आख्यान – प्रसङ्गे शैलीनां रोचकता विशेषरूपेणोल्लेखनीया वर्तते । ब्राह्मणग्रन्थानां भाषा वैदिकं संस्कृतञ्चेत्युभयविधभाषायाः योजिका वर्तते । यज्ञीय दार्शनिकगभीरप्रसङ्गः सरलभाषायां प्रस्तुतः । ब्राह्मणेषु वैदिक – लौकिकोभयशब्दानां समन्वयो वर्तते । शब्दरूपाणां वैविध्यं ऋग्वेदस्यापेक्षया न्यूना वर्तते । लेट् लकारस्यापि प्रयोग उपलभ्यते परं न्यून एव । तुमर्थकप्रत्ययानां प्राचीनं रूपं यत्र – तत्रोपलभ्यते । वैदिक छन्दोभिरनियन्त्रितत्वात् ब्राह्मणग्रन्थेषु भाव – प्रकाशनस्य पूर्ण स्वातन्त्र्यं वर्तते ।

**उपसंहारः –**

ब्राह्मणग्रन्थानामवलोकनेन ज्ञायते यत् सर्वेऽपि ब्राह्मणग्रन्थाः गद्य एव निबद्धाः सन्ति ।

ब्राह्मणग्रन्थानां गद्यमतीव परिमार्जितं विद्यते । विषयस्य गम्भीरत्वेऽपि दीर्घसमस्तपदानां तु न कुत्रापि दर्शनं भवति न चाप्यर्थज्ञाने कुत्रापि किमाकारकमपि काठिन्यमनुभूयते । अस्य भाषा मन्त्राणां भाषेवास्ति तथापि प्राचीनशब्दप्रयोगातिरिक्तानां नवशब्दानामपि प्रयोग उपलभ्यते । ब्राह्मणग्रन्थानां भाषा पाणिनिना सह संयोजिता वर्तते । वाक्यानां विन्यासः सरलः सुमधुरः चास्ति । अत्र यज्ञीय विधानवर्णनेऽपि न कुत्राप्यौदासीन्यं कल्प्यते लघुवाक्येन विन्यस्तोऽयं ब्राह्मणग्रन्थः अत्यधिकां रोचकताम् आकर्षकतां हृदयावर्जकताञ्च संदधाति ।

आख्यायिकानांसंरचना तु हृदयहारिकैवास्ति । तद्यथा – शतपथब्राह्मणादौ द्रष्टव्यम् तत्रोक्तम् –
**"सत्यं वै चक्षुः सत्यं हि वै चक्षुस्तस्मात् यदिदानीं द्वौ विवदमा नावेयातम्" अहमदर्शम्, अहमश्रौषम् इति । य एवं ब्रूयात् अहमदर्शमिति तस्मा एव श्रद्धध्याम् । तत् सत्येनैवैतत् समर्धयतीति ।** एवं ब्राह्मणग्रन्थानां भाषासंरचना सरला मनोज्ञा विषयप्रतिपादनक्षमा सर्वजनबोध्या वर्तत इति ।

॥इतिशम् ॥


ISSN : 2249-538X

**सहायकग्रन्थसूची**


- ऋक्संहिता विद्यारण्यभाष्यम् – चौखम्बाविद्याभवनम्, वाराणासी, 1983
- तैत्तिरीयसंहिता विद्यारण्यभाष्यम् – वौदिकसंशोधनमण्डल, पुणे, 1892
- तैत्तिरीयारण्यक विद्यारण्यभाष्म् – आनन्दाश्रमः, संस्कृतग्रन्थावली, 2008
- काण्वसंहिता विद्यारण्यभाष्यम् – वैदिकसंशोधनमण्डल, पूणे, 1988
- निरुक्तम् – मुकुन्दझा शर्मा, चौखम्बाविद्याभवनम्, वाराणासी, 2012
- आर्षेयब्राह्मणम् – गिरीजा प्रसाद षडङ्गि, तिरुपतिः, 2023
- काण्वशतपथम् – पिंपळापुरे, महर्षि सान्दिपनि राष्ट्रीय वेदविद्या प्रतिष्ठानम्, उज्जैन, 2000
- शतपथब्राह्ममम् – सायणाचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, नईदिल्ली, 2002
- तैत्तिरीयब्राह्मणम् – सायणाचार्यः, चौखम्बासंस्कृतसिरिज्, वाराणसी, 2021
- सामविधानब्राह्मणम् – डा.V.R.Sharma, राष्ट्रीयसंस्कृविद्यापीठम्, तिरुपतिः, 2004
- गोपथब्राह्मणम् – पं क्षेमकरणदास त्रिवेदी, चौखम्बासंस्कृतप्रतिष्ठानम्, वाराणसी, 2020
- वृहदारण्यकोपनिषद् – गीताप्रेस, गोरखपुर, उत्तरप्रदेश, 1971
- वेदभाष्यभुमिकासंग्रहः, वलदेवउपाध्यायः, चौखम्वाविद्याभवनम्, वाराणसी, 1985
- वैदिकवाङ्मयस्येतिहासः, जगदिशमिश्रः, चौखम्बाविद्याभवनम्, वाराणसी 2009
- वैदिक वाङ्मय का इतिहास – भगवद्दत्त, वैदिक संशोधनमण्डल, पूणे, 1994
- वैदिक साहित्य का इतिहास – रघुवीर वेदालंकार, परिमलपब्लिकेशन्, नईदिल्ली, 2010
- संस्कृतवाङ्मय का वृहद् इतिहास – बलदेव उपाध्याय, उत्तरप्रदेश संस्कृतसंस्थान, 1995

# भारतीय-आलयनिर्माणपद्धतिविवेचनम्

डा. रमानन्द भट्टः एन्*

**शोधसारः –**

अस्मिन् शोधपत्रे मनुष्यालयविचारः चिन्तितः । मनुष्यालयस्य निर्माणे प्राचीना पद्धतिः या अस्ति सा सम्यग् विमृष्टा । विशेषतः मनुष्यालयचन्द्रिकाकारस्य वचनानि इतरवचनैः सह विमृश्य निरूपितानि ।

**प्रमुखशब्दाः** – वास्तु, आलयः, गृहम्, निर्माणम्, मनुष्यालयः ।

अथ च भारतीयाणां विद्याः अन्यादृश्यः, इतरत्र नोपलभ्यन्ते । एतासां विद्यानां मूलं तु वेद एव । उक्तं च "वेदोऽखिलो धर्ममूलम्" । यस्मात् धर्मसिद्धिः तत्सर्वं वेदे एव प्रतिपादितमिति निर्णयः । तदनु आलयानां निर्मितिप्रकारकथनार्थं प्रवृत्तस्य वास्तुशास्त्रस्यापि मूलं वेद एवेति । यतः आलयस्य प्रयोजनमुक्तं संहितायां - **"यशोधर्माभिवृद्धये"**[1] इति । अतः वास्तुशास्त्रनाम्ना प्रसिद्धस्य आलयनिर्माणविधिप्रतिपादकस्य शास्त्रस्य मूलम् अथर्ववेदस्य उपवेदतया स्थापत्यवेदनाम्ना वेदे एव दृश्यते । तदुक्तं चरणव्यूहस्य अथर्ववेदखण्डे – ऋग्वेदस्यायुर्वेद उपवेदो यजुर्वेदस्य धनुर्वेद उपवेदः सामवेदस्य गान्धर्ववेद उपवेदोऽथर्ववेदस्य स्थापत्यवेद उपवेद इत्याह भगवान् कात्यायनः इति । अस्मिन् स्थापत्यवेदे आलयनिर्माणविधिः प्रतिपादितो वर्तते ।

अत्र आलयशब्देन मनुष्यालयदेवालययोः ग्रहणं कर्तुं शक्नुमः । उभयत्रापि केचन अंशाः समानाः दृश्यन्ते । विशेषतया उभयोरपि शास्त्रोक्तं लक्षणं स्यादेव । अन्यथा तदशुभकरं भवति । तदुक्तं चन्द्रिकायाम् –

**लक्षणहीने धामनि वसतामशुभानि सम्भवन्त्येव ।**
**जन्माद्यवसानान्तं मनसा निश्चित्य कारयेत् तस्मात्**[2] **॥**

गृहनिर्माणस्य सोपानानि प्रदर्शितानि तत्रैव –

**तत्र क्रमेण बहुधा धरणीपरीक्षा**
**दिङ्निर्णयादि शुभवीथिपरिग्रहश्च ।**
**धाम्नां प्रमाणविधिरङ्कणकुट्टिमादी-**
**न्यङ्गानि बाह्यविधयश्च तथा विधेयाः**[3] **॥**

गृहनिर्माणार्थं प्रथमं योग्यां भूमिं चिनुयात् । यस्यां भूमौ गवां मनुष्याणां च सञ्चारः सदा दृश्यते, या च भूः

---

*सहायकाचार्यः (संविदा), केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

[1]बृहत्संहिता – प्रासादलक्षणाध्यायः – १ ।

[2]मनुष्यालयचन्द्रिका – १.१५ ।

[3]मनुष्यालयचन्द्रिका – १.१६ ।

फलपुष्पदुग्धतरुभिः आढ्या, स्निग्धा, धीररवा, समा, प्राक्प्लवा, बहुपांसुः, अक्षयजला, शीतोष्णयोः च तुल्या गृहनिर्माणार्थं श्रेष्ठा भवति । एतद्विपरीता त्याज्या भवति । एवं च भूमेः वर्णादिकमपि आश्रित्य, बहुभिः परीक्षाभिश्च योग्यायोग्यत्वं निर्णयेत् ।

**एतदत्यन्तं सुन्दरतया उक्तं मिहिरेण –**

**शतौषधिद्रुमलता मधुरा सुगन्धा**

**स्निग्धा समा न सुषिरा च मही नराणाम् ।**

**अप्यध्वनि श्रमविनोदमुपागतानां**

**धत्ते श्रियं किमुत शाश्वतमन्दिरेषु[१] ॥**

देवालयनिर्माणेऽपि एवमेव । किन्तु तत्र सलिलारामान् विनिवेश्य देवतायतनं कर्तव्यम् इति उक्तम् । तथा च संहितायाम् –

**कृत्वा प्रभूतं सलिलमारामान् विनिवेश्य च ।**

**देवतायतनं कुर्याद् यशोधर्माभिवृद्धये[२] ॥ इति ॥**

ततः चितायां भूमौ दिक्शुद्धिः सिद्धान्तोक्तप्रकारेण साध्या । एवं दिक्शुद्धायां भूमौ वीथीनिर्णयः कार्यः । क्रमेण पूर्वादिदिशां नतत्वे गो-अग्नि-यम-भूत-जल-नाग-गज-धान्यवीथ्यः उक्ताः । एतासु गो-गज-धान्यवीथ्यः प्रशस्ताः । ताः ग्राह्याः, अन्याः निन्द्याः ।

एवं गृहीतां भूमिं चतुःषष्टिभागं वा एकाशीतिभागं वा शतभागं विभज्य वास्तुदेवतापदानि निर्णीय तत्र कर्तुः नक्षत्रादिवशात् वा इष्टमानवशात् ग्रहस्य योन्यादिकं निर्णयेत् । तदुक्तम् **इष्टातानवितानमाननिचये त्रिघ्नेष्टभिर्भाजिते** .....[३] इत्यादिना । इष्टपरिधिः त्रिभिर्गुणितः अष्टभिर्भक्तः चेत् शेषो योनिः, चतुर्भिः विभक्तः चेत् व्ययः, अष्टभिर्गुणितः क्रमेण द्वादशभिः, सप्तविंशत्या, त्रिंशता, सप्तभिः, सप्तविंशत्या च भक्तः चेत् आयः, नक्षत्रम्, तिथिः, वासरः, वयश्च लभ्यते । एवं योन्यादिकं समीचीनं चेदेव स परिधिः ग्राह्यः भवति ।

ततः अङ्कणकुट्टिमादीनाम् अङ्गानां निर्माणं कर्तव्यम् । तत्र माल्लिकाकुट्टिमविचारः उक्तः –

**मल्लीकुट्टिममापवत्सपदयोः कुर्यात् पदे दक्षिणे**

[१]बृहत्संहिता – वास्तुविवेकाध्यायः –८८ ।
[२]बृहत्संहिता – प्रासादलक्षणाध्यायः – १ ।
[३]मनुष्यालयचन्द्रिका – ३.२५ ।

**यद्वा तत्पुनरापवत्सपदयोः चोदक्पदेऽन्तर्वृतौ**[१] ॥ इति ।

एवं गृहस्य द्वारादिबाह्यविधयः अपि अवलोक्याः । ततः उपकरणगृहस्थाननिर्णयः । तानि उक्तानि मुहूर्तचिन्तामणौ –

**स्नानाग्नि-पाक-शयनास्त्र-भुजश्च धान्य-भाण्डार-दैवतगृहाणि च पूर्वतः स्युः ।**

**तन्मध्यतस्तु मथनाज्य-पुरीष-विद्याभ्यासाख्य-रोदन-रतौषध-सर्वधाम**[२] ॥ इति ।

एवं प्रागादिषु दिक्षु स्नानाग्न्यादिगृहाणि कार्याणि इति अस्य अभिप्रायः ।

एवं गृहनिर्माणार्थं सोपानक्रमेण कर्तव्यानि सम्यक् दर्शितानि । अनेन क्रमेण निर्मितं गृहं गृहस्थस्य सर्वार्थसाधकं भवतीत्यत्र नास्ति संशयः । एवं भारतीया गृहनिर्माणपद्धतिः शास्त्रेषु निरूपिता वर्तते इत्युक्त्वा अत्रैव विरमामि ।

**सहायकग्रन्थाः**

1. बृहत्संहिता – आचार्यवराहमिहिरकृता, भट्टोत्पलविवृतिसहिता, डा. कृष्णचन्द्रद्विवेदी, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः, वाराणसी – १९९७ ।
2. मुहूर्तचिन्तामणिः – दैवज्ञश्रीरामविरचितः, गोविन्दकृतपीयूषधारया सहितः, केदारदत्तजोषी, मोतीलाल बनारसीदास, वाराणसी – २००८ ।
3. मनुष्यालयचन्द्रिका – आचार्यः तिरुमङ्गलनीलकण्ठन् – सिद्धमूले शङ्करनारायणभट्टः, सुब्रह्मण्यम् – २००१ ।

[१] मनुष्यालयचन्द्रिका – ५.४ ।
[२] मुहूर्तचिन्तामणिः - १२.२१ ।


ISSN : 2249-538X
# 65

# उगितश्चसूत्रस्य गणकयन्त्रदृष्ट्या विमर्शः

डा. काटूरि शिवकुमारी*

**शोधसारः –**

टाप्, चाप्, डाप्, ङीप्, ङीष्, ङीन्, ति, ऊङ्, ष्फ इति नव स्त्रीप्रत्ययाः, तेषां विधानाय पाणिनिना अनुसृताः पद्धतयः, प्रातिपदिकात् स्त्रीप्रत्ययविधानाय यन्त्राय बोद्धव्याः अंशाः, उगितश्च इति सूत्रप्रवृत्तये यन्त्राय देयायाः उपसामग्र्याः (Metadata) निर्णयविधानं च यथामति प्रास्ताविषम् ।

**प्रमुखशब्दाः** – यन्त्रानुवादः, कृत्रिममेधा, स्त्रीप्रत्ययाः, उगितश्च, सङ्गणकदृष्टिः, स्त्रीप्रत्ययविधानम्, उगित् ।

**स्त्रीप्रत्ययाः** – मुमुक्षुशब्दस्य स्त्रियां किं रूपम्, सुमङ्गलशब्दः स्त्रियां सुमङ्गली उत सुमङ्गला, भवस्य स्त्री भवानी इव शिवस्य स्त्री शिवानी इति भवेद्वा, बहुशब्दस्य स्त्रियां बह्वी इति रूपम् उत बहु इत्यपि भवति, इमे अंशाः स्त्रीप्रत्ययप्रकरणाध्ययनम् अन्तरेण अशक्याः ज्ञातुम् । ते च प्रत्ययाः – टाप्, डाप्, चाप्, ङीप्, ङीष्, ङीन्, ति, ऊङ्, ष्फ इति नव । लिङ्गस्यापि प्रातिपदिकार्थत्वात् इमे प्रत्ययाः स्त्रीत्वद्योतकाः, अत एव क्वचित् प्रत्ययेन विना स्त्रीत्वार्थप्रतीतिः ।

**प्रत्ययविधानम्** – टाबादीनां विधाने विभिन्नाः पद्धतयः अष्टाध्याय्यां दृश्यन्ते ।

अन्त्यवर्णमाश्रित्य प्रत्ययविधानं सामान्यम् – ऋन्नेभ्यो ङीप्[१] , वोतो गुणवचनात्[२] ।

क्वचितद्गणविभागः आश्रितः – अजादिभ्यः टाप्[३] , गौरादिभ्यः[४] ङीष् ।

क्वचित् इद्वर्णः आश्रितः – उगितश्च[५] ।

क्वचिच्च प्रत्ययः आश्रितः – यङश्चाप्[६] ।

क्वचिदर्थविशेषः – पुंयोगादाख्यायाम्[७] ।

**यन्त्रानुवादः – पाणिनीयं व्याकरणम्** – सम्प्रति जगति यन्त्रानुवादाय यत्नाः दृश्यन्ते, तत्र च संस्कृतव्याकरणस्य रचनाशैली सङ्गणकभाषायै उपयोगिनी इति च विद्वांसः ब्रुवन्ति । लाघवेन वाक्यार्थज्ञानाय वाक्यस्य पदेषु पदस्य प्रकृतिप्रत्ययेषु विभागः व्याकरणेन प्रदर्शितः, अयञ्च विभागः यथा बुद्धिजीविः अवगच्छति तथैव यन्त्रमपि

---

*व्याकरणविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

[१]पा. सू 4-1-5
[२]पा.सू 4.1.44
[३]अजाद्यतष्टाप् (पा.सू 4-1-4)
[४]पा.सू. 4-1-41
[५]पा.सू. 4-1-6
[६]पा.सू. 4-1-74
[७]पा.सू. 4-1-48

अवगत्य समर्थं भवेदनुवादे इति अभिमतं विदुषाम् । तत्र च वैज्ञानिकपद्धतीनामनुसारेण प्रकृतिप्रत्ययविभगपुरस्सरं पदनिष्पत्तये पाणिनीयं व्याकरणं इतरेभ्यः व्याकरणेभ्यः अतिशेते इति हेतोः तस्यैव अनुसरणं यन्त्रानुवादे दरीदृश्यते ।

**स्त्रीप्रत्ययप्रकरणम् – सङ्गणकदृष्टिः** – प्रातिपदिकदर्शनेन स्त्रियां कः प्रत्ययः केन सूत्रेण भवेद्, प्रक्रिया च कथं भवतीति वक्तुं यन्त्राय बोद्धव्याः अंशाः –

1. अदन्तेषु स्वाङ्गवाचकाः, अयोपधाः जातिवाचकाः, तोपधाः वर्णवाचकाः ।
2. इदन्तेषु मनुष्यजातिवाचकाः ।
3. उदन्तेषु गुणवाचकाः, जातिवाचकाः ।
4. नान्तेषु वन्नन्ताः, मन्नन्ताः, अन्नन्ताः, उपधालोपिनः अन्नन्ताः ।
5. तद्धिताः, कृतः, समासाः ।
6. गणाः ।
7. पुंयोगः ।
8. विशेषप्रातिपदिकानि ।




तत्र पुंयोगादयः अंशाः यन्त्रेन ज्ञातुमशक्याः अतः ते च मनुष्ययत्नेनैव वक्तव्याः(Human Input) भवन्ति, तस्मात् तत्र प्रातिपदिकेन सह पुंयोगः. स्वाङ्गवाचकम्, गुणवाचकम् इत्यादयः विकल्पाः देयाः, एषु कस्यचित् चयनेन यन्त्रं प्रत्ययं योजयितुं समर्थं भवेत् । यथा -

 ISSN : 2249-538X

# 67


प्रकृतिः : गोप Mandatory field.
पुँल्लिङ्ग स्त्रीलिङ्ग नपुंसकलिङ्ग Mandatory field. Wait for ajax to load.
Devanagari IAST SLP1

पुंयोग जातिवाचि है और अस्त्रीविषय है अन्य
Submit
Developed by: Dr. Dhaval Patel & Dr. Sivakumari Katuri. Layout assistance by: Mr. Marcis Gasuns.
Available under GNU licence.
Disclaimer: Despite our best efforts, intricacies of Sanskrit language may limit our declention machine. We owe no responsibility for wrong declention. User discretion is advised.
Correction submission: We will be greatful if you can send your corrections here.
Note: The source code for this program is available on Github here.
For those who find github clumsy, latest code can be accessed manually here.
For those who want to install the code for offline usage, instruction can be seen in readme file here.
Places where we take user input can be accessed here.
For better rendering of output, use Siddhanta font.
For IAST scheme, please use the lowercase letters.
For SLP1, use this scheme for entering words:
aAiIuUfFxXeEoOMH
kKgGN
cCjJY
wWqQR
tTdDn
pPbBm
yrlvSzsh;

[१]

**उगितश्चसूत्रार्थः** – उगितः, च इति पदविभागः । प्रातिपदिकात्, स्त्रियाम् इत्यधिकारौ स्तः । ऋन्नेभ्यो ङीप् इति सूत्रात् ङीप् इत्यनुवर्तते । उगिदन्तात् प्रातिपदिकात् स्त्रियां ङीप् स्यात् इति सूत्रार्थः । उक् इत् यस्य सः उगित् । उक् इति उ ऋ ऌ एतेषां प्रत्याहारः । उदा – पचन्ती, अतिभवती, भवती ।

**उगितश्च – सङ्गणकदृष्टिः** – यन्त्रावगमनाय उगितां सूची देया । तत्र च सर्वे उगितः स्त्रियां भवन्ति न वा इति विचार्य ये स्त्रियां भवन्ति ते एव यन्त्राय बोद्धव्याः, अन्येच त्याज्याः । एतत् सर्वमालोचयितुमादौ उगितां भेदाः प्रदर्श्यन्ते –




**उगित्प्रातिपदिकम्** – भवती (भवतु), सुदती (दतृ) ।

**उगित्प्रत्ययाः** – उगित्प्रत्ययाः तद्धिताः अपि सन्ति, कृतः अपि ।

[१]https://www.sanskritworld.in/sanskrittool/subanta.html

क्र.सं **प्रत्ययः सूत्रम्** 1. अतृन् **जीर्यतेरतृन्**[१] 2. ईयसुन् **द्विवचनविभज्योपपदे तरबीयसुनौ**[२] 3. इनुण् **अभिविधौ भाव इनुण्**[३] 4. णमुल् **आभीक्ष्ण्ये णमुल् च**[४] 5. कमुल् **शकि णमुल्कमुलौ**[५] 6. तोसुन् **ईश्वरे तोसुन्कसुनौ**[६] 7. कसुन् **ईश्वरे तोसुन्कसुनौ**[७] 8. क्तवतु **निष्ठा**[८] 9. क्वसु **क्वसुश्च**[९] 10. घिनुण् **शमित्यष्टाभ्यो घिनुण्**[१०] 11. ड्मतुप् **कुमुदनडवेतसेभ्यो ड्मतुप्**[११] 12. मतुप् **तदस्यास्त्यस्मिन्निति मतुप्**[१२] 13. वतुप् **यत्तदेतेभ्यः परिमाणे वतुप्**[१३] 14. शतृ **लटः शतृशानचावप्रथमा समानाधिकरणे**[१४] एते सर्वे उगितश्चेदपि केचन एव ङीपं प्राप्नुवन्ति, केचन न, तत्र च हेतुः केचन अव्ययसंज्ञकाश्चेत् केचन नपुंसकलिङ्गे एव भवन्ति ।

**अप्राप्तङीपः उगित्प्रत्ययाः –**

- इनुण् – इनुण्-अन्ताः नपुंसके भवन्ति, अतः ङीप् न ।
- णमुल् – मान्तकृदन्तत्वात् **कृन्मेजन्तः**[१५] इति अव्ययम् । तस्मात् ङीप् न ।
- कमुल् – मान्तकृदन्तत्वात् **कृन्मेजन्तः**[१६] इति अव्ययम् । तस्मात् ङीप् न ।
- तोसुन् – तोसुन्-अन्तस्य **क्त्वातोसुन्कसुनः**[१७] इति अव्ययसंज्ञा । तस्मात् न ङीप् ।
- कसुन् – कसुन्-अन्तस्य **क्त्वातोसुन्कसुनः**[१८] इति अव्ययसंज्ञा । तस्मात् न ङीप् ।
- घिनुण् – अत्र उकारः उच्चारणार्थः । तस्मात् उगित्-कार्यं न भवति ।

**उगिद्धातवः –** उगिद्धातुषु उदितः, ऊदितः, ऋदितः, ऌदितः च सन्ति । **उदितः –** स्रंसु, ध्वंसु, अञ्चु इत्यादयः ।

[१]पा.सू. 3-2-104
[२]पा.सू. 5-3-57
[३]पा.सू. 3-3-44
[४]पा.सू. 3-4-22
[५]पा.सू. 3-4-12
[६]पा.सू. 3-4-13
[७]पा.सू. 3-4-13
[८]पा.सू. 3-2-102
[९]पा.सू. 3-2-107
[१०]पा.सू. 3-2-141
[११]पा.सू. 4-2-187
[१२]पा.सू. 5-2-94
[१३]पा.सू. 5-2-39
[१४]पा.सू. 3-2-124
[१५]पा.सू. 1-1-39
[१६]पा.सू. 1-1-39
[१७]पा.सू. 1-1-40
[१८]पा.सू. 1-1-40


ISSN : 2249-538X

**ऊदितः** – गुपू, त्रपू, तक्षू इत्यादयः । **ऋदितः** – बाधृ, श्लाघृ, ओणृ इत्यादयः । **लृदितः** – गम्लृ, शक्लृ इत्यादयः । एतेषु **अञ्चुधातुरेव उगित्कार्यं** प्राप्नोति[१] । अतः स्त्रियां क्विन्नन्तात् क्विबन्ताद्वा अञ्च्-धातोरेव ङीप् भवति उगितश्च इति सूत्रेण ।

**उगिदादेशाः** – तृ । **अर्वणस्त्रसावनञः**[२] इति विहितः तृ इत्यादेशः उगित्, तस्मात् अर्वत् इति उगिदन्तम् । उगितश्च इति ङीपि अर्वती इति स्यात् ।

**निष्कर्षः** – भवत्, सुदत् एते प्रातिपदिके, अतृन्, ईयसुन्, क्तवतु, क्वसु, ड्मतुप्, मतुप्, वतुप्, शतृ एते प्रत्ययान्ताः ङीपं प्राप्नुवन्ति, क्विबन्तः क्विन्नन्तो वा अञ्चुधातुः, अर्वत् इति शब्दः ङीपं प्राप्नुवन्ति ।

**उपयुक्तानि स्रोतांसि –**

1. पाणिनीयसूत्रपाठः
2. वैयाकरणसिद्धान्तकौमुदी
3. https://www.sanskritworld.in/sanskrittool/subanta.html

---

[१]उगिदचाम् इति सूत्रेऽञ्ग्रहणेन धातोश्चेदुगित्कार्यं तर्ह्यञ्चतेरेव इति नियम्यते । उगितश्च सि.कौ 455 ।
[२]पा.सू. 6-4-127

# भाट्टदीपिकोक्तः जातिशक्तिवादः

डा. गोविन्दगोपालकृष्णहेगडे*

**शोधसारः –**

द्वादशाध्यायात्मकपूर्वमीमांसायां प्रथमाध्याये तृतीयपादे दशममधिकरणम् आकृत्यधिकरणम् । "प्रयोगचोदनाभावादर्थैकत्वमविभागात्[१] । अद्रव्यशब्दत्वात्[२] । अन्यदर्शनाच्च[३] । आकृतिस्तु क्रियार्थत्वात्[४] । न क्रिया स्यादिति चेदर्थान्तरे विधानम्, न द्रव्यमिति चेत्[५] । तदर्थत्वात्प्रयोगस्याविभागः"[६] इत्येतैः सूत्रैः आकृत्यधिकरणं न्यरूपि महर्षिणा जैमिनिना । नैयायिकाः व्यक्तिशक्तिवादिनः । मीमांसकाः जातिशक्तिवादिनः । घटमानय इत्यादि लौकिकवाक्यश्रवणानन्तरं घटत्वजातेः आनयनं न सम्भवतीत्यतः व्यक्तेरेवानयनसम्भवाच्च व्यक्तिरेव शब्दस्य वाच्या इति नैयायिकानां प्रवादः । मीमांसकानान्तु व्यक्तौ शब्दस्य वाच्यत्वाङ्गीकारे व्यक्तेरानन्त्यात् अनेकगुरुभूतकार्यकारणभावकल्पनागौरवाच्च जातौ एव शब्दस्य शक्तिः इति सिद्धान्तः । अयमेव विचारः मीमांसाकौस्तुभरीत्या लेखनेऽस्मिन् प्रपञ्च्यते ।

**प्रमुखशब्दाः** – - व्यक्तिः, जातिः, आकृतिः इत्यादयः ।

पूर्वमीमांसायां आकृत्यधिकरणस्य उपोद्घातत्वेन निरूपिते लोकवेदाधिकरणे लोकवेदयोः शब्दानां तदर्थस्य च एकत्वे सिद्धे व्रीहीनवहन्तीत्यादौ व्रीह्यादिपदानां व्यक्तिरेव वाच्या उत जातिः इति आकृत्यधिकरणे विचार्यते । व्रीहीनवहन्ति, पशुमालभेत इत्यादिविधिचोदनासु व्रीहित्वादिजातेः अमूर्तत्वात् नित्यत्वाच्च अवहननस्य आलम्भस्य च असम्भवेन ब्राह्मणो न हन्तव्यः इत्यादिप्रतिषेधचोदनासु जातेः नित्यत्वेन हननकर्मत्वेन प्राप्त्यभावात् प्रतिषेधासम्भवेन जातिवाच्यत्वमङ्गीकर्तुं न शक्यते । व्यक्तिवाचित्वे तु अवहननालम्भयोः व्यक्तिगतत्वेन सम्भवतीत्यतः व्यक्तिरेव वाच्यत्वेन प्रतीयते । किञ्च जातिः एका अलिङ्गा अमूर्ता च । तस्मात् जातेः एकत्वातिरिक्तसंख्यासम्बन्धः, लिङ्गानन्वयः, क्रियाजन्यफलाश्रयत्वादिकारकत्वायोगेन क्रियासम्बन्धाभावः स्यात् । व्यक्तेस्तु संख्यादिसम्बन्धः उपपन्नतरः इत्यतोऽपि व्यक्तिवाचित्वमेव ।

ननु व्यक्तिमात्रविषयशक्तिकल्पने घटमानयेत्यादि वाक्येभ्यः घटत्वादिजातेः बोधानापत्तिः इति चेन्न । लक्षणया जातिः बुध्यते इति । जातिशक्तिवादिनां मतेऽपि व्यक्तिबोधः लक्षणया भवतीत्यतः विनिगमनाविरहः । न

*सहायकाचार्यः(अ), मीमांसाविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः, श्रृङ्गेरी

[१] जैमिनिसूत्रम,१-३-३०

[२] जैमिनिसूत्रम,१-३-३१

[३] जैमिनिसूत्रम,१-३-३२

[४] जैमिनिसूत्रम,१-३-३३

[५] जैमिनिसूत्रम,१-३-३४

[६] जैमिनिसूत्रम,१-३-३५

च विनिगमनाविरहः , प्रत्युत जातेरेकत्वेन एकस्यां जातौ शक्तिकल्पने लाघवम् । तथा च लाघवरूपनियामकेन जातिरेव वाच्या व्यक्तिस्तु लक्षणया इति वाच्यम् । जातिः बहुभिः व्यक्तिभिः सम्बद्धा न तु व्यक्तिविशेषेण , व्यक्तिस्तु एकया जात्या सम्बद्धा । अतः जातेः व्यभिचारेण व्यक्तिविशेषनिश्चायकत्वासम्भवेन व्यक्तेरव्यभिचारेण जातिविशेषनिश्चायकत्वात् व्यक्त्यैव लक्षणया जातिः बुध्यते । वस्तुतः व्यक्त्या जातिलक्षणायां जात्या व्यक्तिलक्षणायां वा एकस्मिन् पदे वृत्तिद्वयविरोधः स्यात् । जात्या व्यक्त्या वा अपरः यः अर्थः लक्षणया बोध्यते तत्र निरूढलक्षणा । न च निरूढलक्षणायां वृत्तिद्वयविरोधः । साम्प्रतिकलक्षणायामिव "सकृच्छ्रुतं पदं सकृदेवार्थं प्रत्याययति" इति नियमभङ्गस्य दूषकताबीजस्य निरूढलक्षणायामपि तुल्यत्वात् । अतः पूर्वपक्षिसिद्धान्तिभ्यां व्यक्तिशक्तिग्रहस्यैव कार्यतावच्छेदकं जातिविशिष्टव्यक्तिशाब्दबोधत्वम् , जातिशक्तिग्रहस्य कार्यतावच्छेदकं व्यक्तिविशिष्टशाब्दबोधत्वम् इति स्वीकार्यम् । कारणतावच्छेदकमपि शक्यत्वसम्बन्धेन घटपदवत्तानिश्चयत्वम् । अत्र च घटपदवत्तायाः आश्रयरूपो धर्मी कः इति जिज्ञासायां न घटत्वम् । यदि घटत्वं धर्मि धर्मितावच्छेदकं च घटत्वत्वं स्यात् । तथा सति घटत्वत्वस्य घटेतरावृत्तित्वे सति निखिलघटवृत्तित्वरूपत्वेन धर्मितावच्छेदकशरीरे अनन्तघटव्यक्तीनां तदितरानन्तव्यक्तीनां च प्रवेशेन गौरवं स्यात् । अतः घटव्यक्तीनामानन्त्येऽपि घटव्यक्तीनामेव धर्मिता,धर्मितावच्छेदकं च घटत्वम् इति । तथा च घटत्वविशिष्टघटव्यक्तिविषयकशाब्दबोधं प्रति शक्यत्वसम्बन्धेन घटः घटपदवानित्याकारकनिश्चयस्यैव कारणत्वम् । तथा च व्यक्तावेव शक्तिः । ननु देवदत्तीयघटव्यक्तौ सङ्केतग्रहे सति व्यक्त्यन्तरे घटशब्दप्रयोगः पटव्यक्तौ वा घटपदाप्रयोगश्च कथमिति चेदुच्यते । संकेतग्रहवेलायां घटत्वजातेः उपलक्षणत्वात् घटत्वजात्युपलक्षिततत्वस्य व्यक्त्यन्तरेऽपि सत्त्वात् पटादौ च असत्त्वात् प्रयोगाप्रयोगः इति । अतः लाघवात् व्यक्तावेव शक्तिः इति ।

किञ्च व्यक्तिवाचित्वपक्षे शुक्लो घटः इत्यादौ पदद्वयस्यापि एकार्थवाचित्वेन सामानाधिकरण्यमुपपद्यते । जातिवाचित्वे तु भिन्नार्थकत्वेन सामानाधिकरण्यं नोपपद्यते । ननु व्यक्तिवाचित्वे शुक्लो घटः इत्यादौ पर्यायतापत्तिः इति चेन्न । उपलक्षणभूतयोः जातिगुणयोः भेदात् पर्यायतानापत्तेः । शुक्ल इत्यत्र शुक्लत्वरूपगुणोपलक्षितव्यक्तिः, घटः इत्यत्र घटत्वजात्युपलक्षितघटव्यक्तिः अर्थः इत्यतः उपलक्षणीभूतयोः जातिगुणयोः भेदात् पर्यायतापत्तिः नास्ति । अपि च "यदि पशुरुपाकृतः पलायेत अन्यं तद्वर्णं तद्वयसमालभेत" इत्यत्र जातिवाचित्वपक्षे जातेरेकत्वेन अन्यत्वासम्भवात् वयोवस्थाविशेषासम्भवाच्च व्यक्तिवाचित्वमेव इति चेत् -

उच्यते - घटादिशब्दानां व्यक्तिवाचित्वं नास्ति । यदि व्यक्तिवाचित्वं तर्हि सकलव्यक्तिवाचित्वम् उत एक-व्यक्तिवाचित्वम् । सकलव्यक्तिवाचित्वे व्यक्तीनामानन्त्यात् अनन्तशक्तिकल्पनापत्तिः । ननु जातेः उपलक्षणत्वात्

उपलक्षणीभूतायाः जातेरेकत्वेन शक्त्येकत्वं सम्भवति इति चेन्न । उपलक्षणैक्यस्य शक्त्येकत्वानियामकत्वात् । घटत्वादिजातेः उपलक्षणभूतायाः शक्यतावच्छेदकत्वाभावेन तत्तद्व्यक्तित्वस्यैव शक्यतावच्छेदकत्वात् व्यक्तीनामानन्त्येन अनन्तशक्तिकल्पनापत्तिः स्यादेव । घटत्वं धर्मितावच्छेदकीकृत्य शक्यत्वसम्बन्धेन घटपदवत्तानिश्चयत्वं कारणतावच्छेदकं,पदत्वं धर्मितावच्छेदकीकृत्य शक्तत्वसम्बन्धेन घटवत्तानिश्चयत्वं वा कारणतावच्छेदकमित्यत्र नियामकाभावेन विनिगमनाविरहे सति उभयोः कारणत्वकल्पने व्यभिचारः गौरवापत्तिश्च । तस्मात् पदत्वं धर्मितावच्छेदकीकृत्य शक्तत्वसम्बन्धेन घटत्ववत्तानिश्चयस्यैव कारणत्वं लाघवात् । इदानीं विनिगमनाविरहस्तु नास्ति । घटत्वं धर्मि कृत्वा घटत्वं शक्यत्वसम्बन्धेन घटपदवदिति ज्ञानस्य कारणत्वे घटत्वत्वस्य धर्मितावच्छेदकत्वेन तत्र गौरवापत्तेरेव एतत्कार्यकारणभावत्यागे नियामकत्वात् । अतः जातौ एव शक्तिः लाघवात् स्वीकर्तव्या । व्यक्तिबोधस्तु लक्षणया भवति । इति शम् ।

**अनुशीलितग्रन्थसूची –**

१. मीमांसाकौस्तुभः
२. भाट्टदीपिका


ISSN : 2249-538X

#73

# द्वे शते इत्यादौ वाक्यार्थः

डा. राघवेन्द्रः पी आरोल्ली*

**शोधसारः –**

शतत्वादिसङ्ख्याविशिष्टाः गवादिसमूहः यत्र भवति तत्र "शतानि" इति प्रयोगो नैव दृष्टः । अतः शतानि सङ्ख्यावाचकशतादिशब्दानां प्रयोगे सति तत्र प्रत्ययार्थसङ्ख्यायाः प्रकृत्यर्थताच्छेदके शतत्वादौ अन्वयः अभ्युपगन्तव्यः । तेन च एकस्मिन् शते 'शतानि' इति प्रयोगः वारयितुं शक्यते । किञ्च शतादिशब्दानां सङ्ख्येयवाचकत्वमेव न तु सङ्ख्यावाचकत्वम् । अन्यथा 'गवां शतं दद्यात्', 'गवां शतं शुक्लम्' इत्यादिस्थलेषु शाब्दबोधो नोपपद्यते । तस्मात् सर्वासां दशशतादिशब्दानां सङ्ख्येयवाचकत्वमेव । विंशत्याद्याः सदैकत्वे इत्यनुशासनन्तु स्वार्थैकदेशे सङ्ख्यायाम् अन्वयतदभावयोः नियमनार्था इति ।

**प्रमुखशब्दाः** – द्वे शते, त्रीणि शतानि, शाब्दबोधः, विभक्तिप्रत्ययाः, विंशत्याद्याः सदैकत्वे, गवां शतानि, गवां शतं दद्यात् ।

अथास्मिन् विरिञ्चिविततते संसारसागरे निमग्नेषु जीविषु मानवास्तावत् विशिष्टाः वरीवर्तन्ते । ते च बुद्धिवैशद्यशालिनः विचारकुशलाश्च परस्परं विचाराणां विनिमयार्थं विवक्षितान् विशिष्टान् विषयान् ग्रन्थादिरूपेणोपस्थापयितुं च याङ्काञ्चन भाषाम् अनुसरन्ति । अधुनातनकाले उपलभ्यमानासु भाषासु अत्यन्तं प्राचीनापि नवीना सर्वासां भाषाणां जननी संस्कृतभाषा इत्यत्र न कापि संशीतिः । सा चेयं संस्कृतवाणी अस्माकं प्राचीनाविज्ञानधारां ग्रन्थरूपेण सङ्गृह्य अस्माकं सनातनपरम्परायाः महत्वं ज्ञापयति । अस्मत्पूर्वजैः भाषासम्बद्धा अपि बहवः विचाराः सुविचारिताः सन्ति । तेषु शाब्दबोधोऽपि अन्यतमः ।

शब्दाज्जायमानः बोधः शाब्दबोध इत्युच्यते । वाक्यानां श्रवणे सति तद्घटकपदानाम् अर्थाः स्मर्यन्ते, स्मृतानाम् अर्थानां परस्परं सम्बन्धः पश्चात् आकाङ्क्षादिना ज्ञायते[१] । तच्च ज्ञानं शाब्दबोध इत्युच्यते । शाब्दबोधेऽपि केचन नियमाः प्रामाणिकप्रयोगानुसारं स्वीकृताः सन्ति । तेषु सङ्ख्याविषयेऽपि बहवः नियमाः दृश्यन्ते । विभक्तिप्रत्ययास्तावत् सङ्ख्यारूपम् अर्थम् उपस्थापयन्ति । सा च सङ्ख्या स्वोपस्थापकप्रत्ययस्य प्रकृत्यर्थेन सह विशेषणतया अन्वयं प्राप्नोति इति सामान्यतया नियमः । परन्तु 'सम्पन्नो व्रीहिः' इत्यादिस्थलेषु बहुत्वविशिष्टव्रीहौ प्रकृत्यर्थे एकवचनप्रत्ययोपस्थितायाः एकत्वसङ्ख्यायाः अन्वयः बाधितः इत्यतः तत्र प्रकृत्यर्थतावच्छेदके व्रीहित्वे एकत्वस्यान्वयः स्वीक्रियते । अथवा[२] स्वाश्रयप्रकृत्यर्थतावच्छेकवत्त्वरूपपरम्परासम्बन्धेन एकत्वस्य

---

*सहायकाचार्यः(अ), न्यायविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

[१] शाब्दबोधे च एकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते । (व्युत्पत्तिवादः)

[२] अन्वयितावच्छेदकरूपेणोपस्थिते पदार्थे एव पदार्थान्तरस्यान्वयः इति नियमात् प्रत्ययार्थस्यैकत्वस्य स्वरूपतः उपस्थिते प्रकृत्यर्थतावच्छेदके अन्वयो न सम्भवति इत्यतः परम्परासम्बन्धेन प्रकृत्यर्थे अन्वय इति पक्षः समाश्रितः ।

प्रकृत्यर्थे व्रीहान्वयः सम्भवति । तथा च स्वं = प्रत्ययार्थः एकत्वम् , स्वाश्रयप्रकृत्यर्थतावच्छेदकं = व्रीहित्वम् , व्रीहित्वं च जातित्वादेकमेव व्रीहिरूपप्रकृत्यर्थतावच्छेदकं च, तादृशव्रीहित्ववत्त्वं व्रीहिषु वर्तत इति स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्त्वसम्बन्धेन व्रीहिष्वेव एकत्वस्यान्वयो भवति इति ।

इत्थमेव 'शतमेकम्', 'द्वे शते', 'त्रीणि शतानि' इत्यादौ प्रत्ययार्थानाम् एकत्वद्वित्वबहुत्वानां प्रकृत्यर्थावच्छेदकशतत्वसङ्ख्यायामेव अन्वयः, न तु तद्विशिष्टे सङ्ख्येये । अत एव न एकशततात्पर्येण 'शतानि' इति प्रयोगः सम्भवति ।

ननु एकशतेऽपि विद्यमानं शतत्वं नाना भवितुमर्हति । तथा हि - द्वित्वादयः सङ्ख्याः अपेक्षाबुद्धिजन्याः अपेक्षाबुद्धिनाशाच्च[1] नश्यन्ति । पुरुषभेदेन अपेक्षाबुद्धयः भिद्यन्ते । अपेक्षाबुद्धिभेदेन तज्जन्याः सङ्ख्याः अपि भिद्यन्ते । तथा च यत्र शतत्वसङ्ख्याविशिष्टाः गावः सन्ति तत्र चैत्रादिभिः पुरुषैः अपेक्षाबुध्या शतत्वसङ्ख्या जायते । चैत्रादयः पुरुषास्तु बहवः सन्ति । तैः गोसमूहे दृष्टे सति तत्र पुरुषभेदेन कालभेदेन वा उत्पन्ना अपेक्षाबुद्धिः एकस्मिन्नेव गोसमूहे अनेकानि शतत्वानि उत्पादयति । तथा च तत्र 'शतानि' इति प्रयोगः युक्तः एव । तत्र च प्रत्ययार्थबहुत्वस्य प्रकृत्यर्थतावच्छेदके अनेकशतत्वे अन्वयसम्भवात् इति चेन्न । 'शतानि' इत्यादिस्थलेषु बहुवचनप्रत्ययोपस्थापितं बहुत्वं परस्परसमानाधिकरणद्वयावृत्तिबहुत्वरूपं ग्राह्यम् । तथा च एकस्मिन् शते विद्यमानानि शतत्वानि परस्परसमानाधिकरणानीत्यतः तादृशसमानाधिकरणद्वयावृत्तिबहुत्वं निरुक्तस्थले शतत्वेषु नास्तीत्यतः न तादृशप्रयोगापत्तिः । अथवा प्रत्ययोपस्थापितं शुद्धं बहुत्वं परस्परसमानाधिकरणद्वयावृत्तिपर्याप्तिसम्बन्धेन प्रकृत्यर्थतावच्छेदके शतत्वादौ अन्वेति । प्रकृते च बहुत्वस्य तेन सम्बन्धेन शतत्वादौ अन्वयो बाधित इति न तादृशप्रयोगापत्तिरिति ।

अत्र केचित् 'द्वे शते', 'त्रीणि शतानीत्यादिषु स्थलेषु शतादिशब्दानां सङ्ख्यावाचकत्वमेव, न तु सङ्ख्येयवाचकत्वम् । अत एवानुशासनं 'विंशत्याद्याः सदैकत्वे'[2] इत्यादि । तथा हि आदशतः सङ्ख्याः सङ्ख्येयवाचकाः, ततः सर्वाः अपि सङ्ख्यावाचकाः । एवञ्च प्रत्ययार्थसङ्ख्यानां प्रकृत्यर्थे एव अन्वयः युक्त इति । किञ्च 'गवां दश' इति प्रयोगस्तु असाधुः, किन्तु 'गवां शतम्' इति प्रयोगः साधुः । कुत इति चेत् गवां दश इत्यत्र षष्ठ्यर्थसम्बन्धस्य दशत्वे एकदेशे अन्वयो वक्तव्यः, दशादिशब्दानां सङ्ख्येयवाचकत्वात् । गवां शतमित्यत्र तु शतत्वमेव प्रकृत्यर्थः, तत्र च षष्ठ्यर्थसम्बन्धस्यान्वयः सुलभ इत्याहुः । तन्न ।

'गवां शतानि' इत्यादौ शतादिशब्दानां शतत्वादिसङ्ख्यावाचकत्वे 'गवां शतं दद्यात्', 'गवां शतं शुक्लम्' इत्यादौ अन्वयबोधो न स्यात् । यतः दानक्रियानिरूपितकर्मत्वस्य शब्दात् प्रतीयमानस्य शतत्वसङ्ख्यायां बाधात् । तच्च

[1]द्वित्वादयः परार्धान्ता अपेक्षाबुद्धिजा मता ॥ अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः ॥ (भाषापरिच्छेदः)

[2]विंशत्याद्याः सदैकत्वे सर्वासङ्ख्येयसङ्ख्ययोः । (अमरकोशः, वैश्यवर्गः-८३)

 ISSN : 2249-538X

कर्मत्वं गोषु वर्तते, गवां दानसम्भवात् । एवमेव शतं शुक्लमित्यत्र समानविभक्तिकत्वरूपसामानाधिकरण्यस्य सत्त्वात् शुक्लपदार्थस्य शतपदार्थेन सह अभेदान्वयो बोध्यः । परन्तु शुक्लत्वविशिष्टाः गाव एव भवन्ति, ननु तद्गतशतत्वसङ्ख्या इत्यतः एतादृशस्थलेषु अभेदान्वयबोधोपपादनार्थम् शतादिशब्दानां सङ्ख्येयगवादिपरत्वमेव स्वीकरणम् उचितम् । गवामित्यत्र षष्ठ्यर्थसम्बन्धस्य चु प्रकृत्यर्थतावच्छेदके शतत्वादौ अन्वयः स्वीक्रियते, अभेदान्वयस्थले एव एकदेशान्वयस्यानभ्युपगमात् । स्वार्थैकदेशे अपि प्रत्ययार्थसङ्ख्यानां यथा अन्वयः तथैव षष्ठ्यर्थसम्बन्धादेरपि अन्वयः सम्भवति, 'ब्राह्मणानां दश' इत्यादिप्रयोगविरहात् तत्र स्वार्थैकदेशे दशत्वादौ षष्ठ्यर्थसम्बन्धान्वयो नाभ्युपगम्यते इत्येव 'विंशत्याद्याः सदैकत्वे' इत्याद्यनुशासनस्य आशय इत्यलं विस्तरेण ।

**आकरग्रन्थाः –**


- व्युत्पत्तिवादः - श्रीगदाधरभट्टाचार्यविरचितः
- विद्वन्मनोरमा - एन् . एस् . रामानुजताताचार्यकृता
- नामलिङ्गानुशासनम् - अमरसिंहः
- भाषापरिच्छेदः - अन्नंभट्टः

# रथकाराधिकरणन्यायविमर्शः

श्री. आदर्शविनायकभट्टः*

**शोधसारः –**

पूर्वमीमांसाशास्त्रस्य परमं प्रयोजनमेव धर्मानुष्ठानोपयोगि चिन्तनम् । शास्त्रे तावत् प्रत्येकस्मिन्नप्यधिकरणे एकैको विषयः संशयपूर्वपक्षादिरूपेण विचिन्त्य सिद्धान्तपक्षस्थापनेन निर्णीतो भवति । तथा निरूप्यमाणे उपयुज्यमानविधानेन, निरूपितेन सिद्धान्तवाक्यार्थज्ञानेन वा काचन युक्तिः निष्पद्यते । सैव न्यायपदेन अभिधीयते । तादृशन्यायानां संग्रहेण शास्त्रोक्तभिन्नस्थले, धर्मानुष्ठानपद्धतौ च विप्रतिपत्तिनिवारणं सम्भवति । अतः अस्मिन् प्रबन्धे मीमांसाशास्त्रे षष्ठाध्याये प्रथमपादे प्रपञ्चितस्य एकादशाधिकरणस्य विषये निगद्यते । अनेनाधिकरणेन रथकारशब्दार्थनिर्णयः, तदाधानस्य च फलविषको निर्णयश्च सम्भाव्यते ।

**प्रमुखशब्दाः –** रथकारः, आधानम्, मीमांसा, नित्यकर्म, नैमित्तिककर्म, काम्यकर्म ।

**रथकाराधिकरणम् -**

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे । यन्नत्वा कृतकृत्यास्स्युः तन्नमामि गजाननम् ॥

इह खलु जगति शरीरभृतां मानवानां धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु प्रवृत्तिः सर्वसाधारणी एव । तत्र पुरुषार्थेषु आद्यो धर्मः । तादृशधर्मानुष्ठानेन पुरुषा इहामुत्र च लोके सुखमनुभवन्ति । तर्हि को नाम धर्मः? इति विवेचनार्थमेव परमकारुणिकेन भगवता महर्षिणा जैमिनिना पूर्वमीमांसाशास्त्रं प्रणीतम् । शास्त्रेऽस्मिन् द्वादशसु अध्यायेषु धर्मो विचारितः । तत्र द्वादशाध्यायाः सन्तीति "द्वादशलक्षणी" इत्यपि नामान्तरं वर्तते । तच्च पूर्वमीमांसाशास्त्राध्ययनं वेदाध्ययनानन्तरमपि गुरुकुले एव स्थित्वा कर्तव्यमिति वैधं वा? 'अधीत्य स्नायात्' इति स्मृत्या समावर्तनं कर्तव्यमिति अवैधं वा? इति विप्रतिपत्तौ **"स्वाध्यायोऽध्येतव्यः"**[१] इत्यध्ययनविधिविहिताध्ययनस्य अर्थज्ञानपर्यन्तश्रवणात्, तदर्थज्ञानं च विचारशास्त्रमन्तरेण दुर्घटमित्यतः अध्ययनविधिरेव तमाक्षिपतीति शास्त्राध्ययनमिदं वैधमेवेति सिद्ध्यति । तच्च विचारशास्त्रं शबरस्वामि-कुमारिलभट्टपाद-खण्डदेवप्रभृतयो दार्शनिकाः लोकहिताय विस्तारयामासुः ।

तदनु शास्त्रस्यास्य अनुबन्धचतुष्टयम् इत्थमुपवर्ण्यते उपनयनसंस्कारसंस्कृतः अध्ययनविधिविहित-गुरुमुखादधीतवेद एवाधिकारी । प्रतिपाद्यप्रतिपादकभावः संबन्धः । शब्दस्वरूपात्मकस्य अपौरुषेयस्य वेदस्य तात्पर्यार्थनिर्णयद्वारा यथा अनुष्ठानोपयोगित्वं स्यात् तथा धर्मस्यैव विचारात् स एव धर्मो विषयः । **धर्माख्यं**

*सहायकाचार्यः(सं), वेदाङ्गवेदभाष्यविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

[१]तैत्तिरीयारण्यकम् २ प्रश्ने १२ अनुवाकः

**विषयं वक्तुं मीमांसायाः प्रयोजनम्**[1] इति श्लोकवार्तिकोक्तरीत्या निखिलजगत्प्रतिष्ठाहेतोः धर्मस्य प्रामाण्यस्थापनद्वारा अनुष्ठानव्यवस्थासिद्धिरेवप्रयोजनम् ।

एवं च **'लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिः'** इति न्यायेन "वेदज्ञाप्येष्टसाधनताकत्वं धर्मत्वम्"[2] इति धर्मलक्षणमुक्त्वा, तस्मिन् अलौकिकधर्मे प्रत्यक्षादिलौकिकप्रमाणषट्कस्य अगम्यत्वं सुनिरूप्य विधि-अर्थवाद-मन्त्र-स्मृति-आचार-नामधेय-वाक्यशेष-सामर्थ्याख्यानाम् अष्टानां प्रामाण्यं निरूपितम् । तथा च एतावल्लक्षणप्रमाणादिप्रतिपाद्यत्वेन रूपेण सिद्धस्य धर्मस्य, एकत्वानेकत्वादिविषयाः द्वितीयाद्यध्यायेषु प्रपञ्च्यन्ते ।

यागादिरूपधर्मश्च श्रौतः स्मार्तश्चेति विधायकभेदात् भिद्यते । तत्रापि कर्मणां नित्यनैमित्तिककाम्यभेदादपि पुनस्त्रैविध्यं दृश्यते । तत्र हि श्रुतिविहितानाम् अग्निहोत्रादीनां, स्मृत्युक्तौपासनादीनां च कर्मणां प्राधान्येन धर्मत्वं पुष्टीकृतं भवति । तत्र नित्यकर्मणः संस्तुतिः मनुस्मृतौ एवं स्मर्यते-

**वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः । तद्धि कुर्वन् यथाशक्ति प्राप्नोति परमां गतिम् ॥**

**श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन् हि मानवः । इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ॥**[3]

अनयोः श्लोकयोः अयमभिप्रायः श्रुतिविहितं स्मृतिविहितं च कर्मणामनुष्ठानं यः नित्यमनुतिष्ठति सः मानवः इह लोके कीर्तिं, परलोके सुखं च प्राप्नोति इति ।

कर्मणां विषये दार्शनिकेषु भेदो दृश्यते । तद्यथा न्यायवैशेषिकदृष्ट्या 'कर्म' इत्येकः पदार्थः । तैः प्रतिपादितेषु 'द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाख्येषु' सप्तसु पदार्थेषु तृतीयः पदार्थः । तत्र उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानिचेति कर्माणि पञ्चविधानि प्रोक्तानि । सात्विकराजसतामसभेदेनापि कर्मणां त्रैविध्यमिति केचिदाहुः । पुनः उपनिषदि - **'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः'**[4]

इत्यत्र कर्माणि इत्यनेन अग्निहोत्रादीनि प्रतिपादितानि । किन्तु श्रुतिस्मृत्यादिषु नित्यनैमित्तिककाम्यप्रा-यश्चित्तनिषिद्धभेदात् पञ्चधा विभक्तकर्मणामेव प्राशस्त्यं बोध्यते । तत्रापि प्रायश्चित्त निषिद्धकर्मणामपि नित्यादित्रये एवान्तर्भावात् कर्मणां त्रैविध्यमेवेति शास्त्रकाराणामभिप्रायः ।

**नित्यकर्माणि**

नियतरूपेण अवश्यम् अनुष्ठीयमानं कर्म एव नित्यकर्म इत्युच्यते । यस्य कर्मणः अननुष्ठानेनैव प्रत्यवायः

[1]श्लोकवार्तिक १ ११तमः श्लोकः

[2]भाट्टदीपिका १ अध्याये १पादे १अधिकरणम्

[3]मनुस्मृतिः २ अध्याये ९ तमः श्लोकः

[4]ईशावास्योपनिषत् ३.१

उत्पद्यते तत्कर्म नित्यं कर्म इति । यथा - 'अहरहः सन्ध्यामुपासीत' इति वाक्यविहितस्य सन्ध्यावन्दनस्य उपनयनसंस्कारसंस्कृतेन वटुना अवश्यम् अनुष्ठीयमानत्वात् इदं सन्ध्यावन्दनाख्यं कर्म नित्यकर्म इत्युच्यते । एवमेव पूर्वोक्तरीत्या सन्ध्यावन्दनादीनाम् अकरणे प्रत्यवायदोषोऽपि भवति । इति संक्षेपेण नित्यकर्मणां परिचयः ।

**नैमित्तिककर्माणि**

कमपि असाधारणं कामनातिरिक्तं हेतुं पुरस्कृत्य क्रियमाणं कर्म नैमित्तिकं कर्मेत्युच्यते । निमित्ते सत्येव नैमित्तिकस्यानुष्ठानम् । निमित्तत्वं नाम 'स्वान्वयव्यतिरेकानुविधाय्यावश्यनुष्ठानवत्त्वम्' इति । अस्यायमर्थः, कश्चन असाधारणकारणसत्वे नैमित्तिकस्यानुष्ठानं तदभावे अननुष्ठानमिति । यथा ;- 'ग्रस्ते स्नायात्' इत्यत्र असाधारणकारणं भवति ग्रहणम् । तदुद्देशेन विधीयमानं कर्म भवति स्नानं, तस्मात् ग्रहणं निमित्तं, स्नानं भवति नैमित्तिकम् । ग्रहणसत्त्वे स्नानस्यानुष्ठानं तदभावे स्नानस्याननुष्ठानमिति वाक्यार्थः ।

**काम्यकर्माणि**

काम्यकर्मणां विवरणं क्रियते । काम्यते इति काम्यम् इति व्युत्पत्या पदमिदं निष्पद्यते । स्वाभीष्टफलप्रापकं कर्म काम्यकर्मेत्युच्यते । काामो नाम इच्छाविशेषः । तस्मै करणत्वेन यद्विितं कर्म तत्काम्यकर्म ।

आधानस्य नित्यत्वात् प्रास्ताविकरूपेण कर्मणां विषये किञ्चित् निगदितम् । आधानप्रकरणे श्रूयमाणं 'वर्षासु रथकारोऽग्निमादधीत' इति वाक्यमेव अधिकरणस्य विषयः । संशयस्तु, अनेन वाक्येन शिष्टत्रैवर्णिकानामेव उद्दिश्य रथकरणे निमित्ते वर्षारूपकालविधिः उत रथकारोद्देशेनैव नाम सौधन्वनापरपर्यायजातिविशिष्टोद्देशेनैव कालविशिष्टं आधानान्तरमेव विधीयते इति । अत्र पूर्वपक्षस्तावत् , यदि रथकारः कश्चित् जातिविशिष्टः शिष्टत्रैवर्णिकात् भिन्नः तर्हि तस्य उपनयनादिसंस्काराभावात् अध्ययनस्यापि अभावः स्पष्टः । कथं तेन अनुष्ठानं कर्तुं शक्यम् ? अतः तस्य अवश्यं विद्याद्याक्षेपकत्वं कल्पनीयम् । अतः विद्यादिकल्पनागौरवापेक्षया लाघवं तु, रथकारशब्दस्यैव 'रथं करोति' इति रथकारः इति व्युत्पत्तिमङ्गीकृत्य शिष्टत्रैवर्णिकान्यतमस्यैव ग्रहणे वर्तते । रथकरणे निमित्ते वर्षाकालविधिः इति प्राप्ताधानोद्देशेनैव नैमित्तिककालमात्रविधिरिति पूर्वपक्षे प्राप्ते,

सिद्धान्तः - योगात् रूढेः बलीयस्त्वात् रथकारशब्दस्यापि लोकप्रसिद्धिमङ्गीकृत्य सौधन्वनापरपर्याये जातिविशेषे एव शक्तिः अङ्गीक्रियते । तस्यैव कालविशिष्टाधानान्तरविधिः । तत्रापि पुनश्शङ्का स्यात्, रथं करोतीति रथकारः इति व्युत्पत्यैव सौधन्वनापरपर्यायः वक्तुं शक्यते चेत् पुनः रूढिकल्पने प्रमाणाभावः इति । यद्यत्र यौगिकार्थस्वीकृतिः स्यात्तर्हि रथमकुर्वत्यपि सौधन्वने रथकारपदप्रयोगस्य आनर्थक्यापत्तिः स्यात् । अपि च तेनैवावगम्यते लोकप्रसिद्धिः तत्राप्यस्तीति । पुनः तत्रापि संशयो भवति, प्रोक्षणी शब्दस्य यथा


ISSN : 2249-538X

प्रकर्षेण उक्षतीति स्वरूपयोग्यत्वमङ्गीकृत्य जलमित्येवार्थस्वीकारः कृतः, तद्वदत्रापि स्वरूपयोग्यत्वमात्राङ्गीकारेण शिष्टत्रैवर्णिकान्यतमस्यैव ग्रहणे का हानिः ? इति, तत्रोच्यते यदि प्रोक्षणीशब्दवत् स्यात् तदा ब्राह्मणादावपि रथकारशब्दस्य प्रयोगो दृश्येत, परन्तु ब्राह्मणादौ तु तन्नैव दृश्यते । अतः पुनः तत्रापि निर्णयार्थं पुनः पूर्वपक्षिणा रूढिरेवाश्रयणीया इत्यापत्तिः । अपि च निमित्तत्त्वमपि तस्य वक्तुं नैव शक्यते, रथकरणयोग्यतावच्छेकमनुष्त्वं तु सर्वदा वर्तते इति कादाचित्कत्वाभावात् । अतः रूढेः बलीयस्त्वात् लोकप्रसिद्धिमङ्गीकृत्य सौधन्वनापरपर्याये जातिविशेषे एव शक्तिः अङ्गीक्रियते ।

सुधन्वा नाम- "व्रात्यात्तु जायते वैश्यात् सुधन्वाचार्य एव च" इति पतितवैश्यात् वैश्यायामुत्पन्नः वेदाननधिकृतः, शिष्टत्रैवर्णिकात् किञ्चिन्न्यूनः न तु शूद्रः इत्यपि प्रसिद्धिरुपलभ्यते ।

**"माहिष्येण करण्यां तु रथकारः प्रजायते । माहिष्योग्रौ प्रजायेते विड्ढ्राङ्गनयोर्नृपात् । शूद्रायां करणो वैश्यात् ।"** इत्यादि स्मृतिवाक्योक्ते सङ्करजातिविशेषेऽपि प्रसिद्धिरुपलभ्यते । तर्हि कः अत्राधिकारी इति पुनः जिज्ञासायां, मन्त्रवर्णादिनावगम्यमानत्वात् सुधन्वा एव रथकारः इति निर्णीयते । मन्त्रवर्णस्तावत्, **"ऋभूणान्त्वा देवानां व्रतपते व्रतेनादधामीति रथकारस्य । यथा देवतमग्निराधीयते"**[1] इति श्रूयते, पुनः मन्त्रान्तरे "सौधन्वना ऋभवः" इति च । अनेनैवावगम्यते उभयोः समानार्थबोधकत्वम् । अतः तस्यैवाधिकारः । कालविशिष्टाधानान्तरमेव रथकारोद्देशेन विधीयते इति सिद्ध्यति ।

पुनः तस्य आधानस्य फलजिज्ञासा समुदेत्येव । तत्र समाधानं - रथकारस्य उत्तरक्रतुषु अनधिकारित्वात् अग्निसिद्धिः प्रयोजनमिति वक्तुं न शक्यते, अतः "सस्स्वर्गस्स्यात् सर्वान् प्रत्यविशिष्टत्वात्"[2] इति विश्वजिन्न्यायेनैव स्वर्गार्थमाधानमिति अर्थकर्मत्वमुपस्थाप्यते प्राचीनमीमांसकैः ।

परन्तु भाट्टदीपिकाकाराणां श्री खण्डदेवाचार्याणां मतभेदो दृश्यते । विश्वजिन्न्यायेन स्वर्गकल्पनापेक्षया योगार्थस्वीकारे एव लाघवमस्तीति अर्थकर्मत्वं रथकाराधानस्य निराक्रियते । परं प्रयोजनं किमिति जिज्ञासायां यथा शिष्टत्रैवर्णिकानाम् आधानस्य आहवनीयाद्यग्निसिद्धिरेव प्रयोजनं तथैव अस्याप्याधानस्य आहवनीयाद्यग्निसिद्धिरेव प्रयोजनम् । वैलक्षण्यं तु रथकारस्य उत्तरक्रतुषु अधिकाराभावात्, "आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्च" इति वाक्यविहितायाम् अन्त्येष्टौ विनियोगः इति संस्कारकर्मत्वमेव अभ्युपगच्छन्ति नवीनाः ।

**अनुशीलितग्रन्थाः** - तैत्तिरीयब्राह्मणम्, भाट्टदीपिका , अध्वरमीमांसाकुतूहलवृत्तिः, जैमिनीयन्यायमाला, शास्त्रदीपिका, जैमिनिसूत्रम्, मनुस्मृतिः, ईशावास्योपनिषत् ।

[1]तैत्तिरीय ब्राह्मणम् १.१.४.०९

[2]जैमिनि सूत्रम्- ४ अध्याये ३ पादे १५ तमं सूत्रम्

# कोऽयं नित्यसमासः ?

डा. अरुण भट्टः*

**शोधसारः –**

समासाधिकारस्थसूत्रणां पर्यवेक्षणे नित्यसमासः इति वचनमसकृत् श्रूयते । 'अविग्रहो नित्यसमासः, अस्वपदविग्रहो वा' इति तस्य लक्षणमपि कौमुद्यां समासशेषप्रकरणे श्रीमद्भिः भट्टोजीदीक्षितैः प्रत्यपादि । किञ्च समासाधिकारे 'विभाषा' इति महाविभाषा च कृता वर्तते । अतः क्व विभाषा, क्व नित्यसमासः इति जिज्ञासा जागर्ति । अतोऽत्र कः नित्यसमासः, किं तस्य लक्षणमिति विचार्यते ।

**प्रमुखशब्दाः** – नित्यसमासः , वृत्तिः, विग्रहः, अस्वपदविग्रहः, व्याकरणम् ।

**उपोद्घातः विषयप्रस्तावः च -**

कृत्-तद्धित-समास-एकशेष-सनाद्यन्तधातुरूपाः पञ्च वृत्तयः शास्त्रे प्रथिताः । परार्थाभिधानं वृत्तिरिति सामान्यं लक्षणम् । वृत्त्यर्थावबोधकं वाक्यं विग्रहः इत्युच्यते । विग्रहस्तु द्वेधा । लौकिकोऽलौकिकश्चेति । परिनिष्ठितत्वात् साधुर्लौकिकः, प्रक्रियामात्रोपयोगी लोके प्रयोगानर्हः द्वितीयः अलौकिकः । एवञ्च कृष्णश्रित इत्यादौ कृष्णं श्रित इति लौकिकः, कृष्ण अम् श्रित सु इत्यलौकिकविग्रहः च प्रदर्श्यते । यथाशक्ति, उपकृष्णम् इत्यादौ शक्तिम् अनतिक्रम्य, कृष्णस्य समीपम् इति अस्वपदविग्रहः तथा कृष्णसर्पः इत्यादौ अविग्रहश्चोच्यते । यद्यप्यत्र कृष्णः सर्पः इति विग्रहः प्रदर्शयितुं शक्यः इति भाति, तथापि वाक्याद्योऽर्थोऽवगम्यते समस्तपदेन तन्न बुध्यते, समस्तपदस्य च योऽर्थः तस्य न वाक्येन बोधः इति कृष्णसर्प इत्यत्र विग्रहो नैवोच्यते । कृष्णसर्प इति जातिविशेषस्य ग्रहणात् ।

न हि नित्यसमास इति पृथक् समासः सूत्रेण विधीयते । विभाषा[१] इति महाविभाषाबलात् ततः पूर्वम् अव्ययं विभक्तीत्यादिपञ्चभिः सूत्रैर्विहिताः समासाः नित्या इत्यनुमीयते । विशेषणं विशेष्येण बहुलम् इति सूत्रेण कृष्णसर्पादयः, षष्ठीतत्पुरुषान्तर्भूताः अश्वकर्णादयः, मयूरव्यंसकादिगणे पठिताः राजान्तरप्रभृतयः अपि नित्यसमासा एव । अतः विभाषाधिकारात् पूर्ववर्तिनः एव नित्यसमासाः इति न मन्तव्यम् । अत एव भाष्यं - "नित्याधिकारे यः समासः स नित्यसमासः" इति पक्षमुद्भाव्य "नित्यः समासो नित्यसमासः, यस्य विग्रहो नास्ति"[२] इत्युपसंहृतम् ।

समासस्य नित्यत्वे किं नियामकम् ? इति चेत् ब्रूमः गमकत्वम् इति । समानार्थेन वाक्येन भवितव्यं समासेन च । यश्चार्थो वाक्येन गम्यते स एवार्थः समासेनापि वक्तव्यः । एतदभावेऽपि समासवचनं नित्यसमासस्य

*सहायकाचार्यः(सं), केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

[१] अष्टाध्यायी – २.१.११

[२] महाभाष्यम् – उपपदमतिङ् सूत्रभाष्यम्

बीजम् । यत्र कश्चिद्विशिष्टोऽर्थो समस्तपदाद् गम्यते, स चार्थः समासघटितपदयुक्तेन विगृहीतवाक्येन न गम्यते तत्र नित्यसमासत्वम् । काशिकावृत्तौ कौमुद्यादिषु सर्वत्र नित्यसमासप्रतिपादकस्थलेषु गमकत्वमेवाश्रितम् । "विभाषाधिकारेऽपि नित्यसमास एवायम् । न हि वाक्येन क्षेपो गम्यते"[१] "नित्यसमासोऽयम् । न हि वाक्येन निन्दाऽवगम्यते"[२] 'न हि वाक्येन संज्ञा गम्यते । उन्मत्तगङ्गं नाम देशः"[३] इत्यादिषु सर्वत्र गमकत्वमाश्रितम् । खट्वा क्षेपे इति सूत्रे बालमनोरमाकारेण - "तत्र खट्वामारूढ इति वाक्यं हि गृहस्थाश्रमिणि निन्दां न गमयति । खट्वारूढ इति समासस्तु रूढ्या निन्दां गमयति" इत्युक्तम् । तत्रैव तत्त्वबोधिनीकारेणोच्यते "तेन खट्वामारोहतु मा वा, निषिद्धानुष्ठानपरः सर्वोऽपि खट्वारूढ इत्युच्यते" इति । अत एव लघुशब्देन्दुशेखरे नागेशभट्टेन एवमुक्तम् – "गमकत्वादेव शिवस्य भगवतो भक्त इत्यर्थे शिवभागवत इति भाष्ये प्रयोगः"[४] इति । अत्र वृत्तिरेव, न तु शिवस्य भागवत इति वाक्यम् । यत्र समासेन प्रतीयमानोऽर्थः वाक्यात् न प्रतीयेत, तत्र नित्यसमासः । अतः गमकत्वमाश्रित्य यत्र कश्चिद्विशिष्टोऽर्थो समस्तपदात् गम्यते, स चार्थः विग्रहेण वाक्येन न गम्यते तत्र नित्यसमासः इति सिद्धम् । यथा कृष्णसर्प इति पदात् कश्चित्सर्पजातिविशेषो गम्यते । कृष्णवर्णयुक्तो भवतु न वा, एतज्जातीयकः सर्वोऽपि सर्पः कृष्णसर्प इत्येवोच्यते । विग्रहवाक्ये कृष्णः सर्प इति प्रयोगे कृष्णवर्णयुक्तः सर्प इत्येव अर्थो गम्यते, जातिविशेषो न गम्यते । अतोऽत्र नित्यसमासः । अत्र हि अगमकत्वाद् विग्रहाभावः । शिष्टैः तस्मिन्नर्थे वाक्यप्रयोगाभावात् । अनेन कृष्णः सर्प इति वाक्यस्य असाधुत्वमिति तु नार्थः । तेन वाक्येन योऽर्थो गम्यते तद्भिन्नः कश्चिद्विशिष्टार्थः समासेन गम्यते इत्येव । अनेनैवाभिप्रायेण भाष्यकारः 'सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणयोगो न' इति वार्त्तिकस्य व्याख्याने "महत्कष्टं श्रितः इत्यत्र वृत्तिः कस्मान्न भवति" इति विचार्य अगमकत्वादित्यवोचत् । "इह समानार्थेन वाक्येन भवितव्यं समासेन च । यश्चेहार्थो वाक्येन गम्यते 'महत्कष्टं श्रितः' इति, नासौ जातुचित्समासेन गम्यते 'महत्कष्टश्रितः"[५] इति ।

**नित्यसमासलक्षणम् -**

'अविग्रहो नित्यसमासः, अस्वपदविग्रहो वा' इति लक्षणं सिद्धान्तकौमुद्यां सर्वसमासशेषप्रकरणे प्रादर्शि - "वृत्त्यर्थावबोधकं वाक्यं विग्रहः । स द्विविधः । लौकिकोऽलौकिकश्च । परिनिष्ठितत्वात्साधुर्लौकिकः । प्रयोगानर्होऽसाधुरलौकिकः । यथा राज्ञः पुरुषः राजन् ङस् पुरुष सु इति । अविग्रहो नित्यसमासः, अस्वपदविग्रहो

[१]काशिका(खट्वा क्षेपे) – पा सू - २.१.२६
[२]कौमुदी - (अन्यपदार्थे च संज्ञायाम्) – पा सू - २.१.२१
[३]काशिका(अन्यपदार्थे च संज्ञायाम्) – पा सू - २.१.२१
[४]शेखरः – पा सू २.१.१
[५]महाभाष्यम् – समर्थः पदविधिः सूत्रभाष्यम् ।

वा"[१] इति । तस्य व्याख्यानं बालमनोरमायामेवं विहितम् "यद्यपि वृत्तावेव समुदायशक्त्या विशिष्टैकार्थप्रतिपादकता, न तु वाक्ये इति समर्थसूत्रे भाष्ये प्रपञ्चितम् । तथापि समासवृत्तियोग्यविभक्त्यन्तपदानां पृथक्प्रयुज्यमानानां समूहो विग्रहवाक्यमिति बोध्यम् । अविग्रहो नित्यसमास इति । लौकिकविग्रहवाक्यरहित इत्यर्थः, समासस्य नित्यत्वादिति भावः" इति । भाष्यकारेण तु "अविग्रहो नित्यसमासः" इत्येव प्रपञ्चितम् । "नित्यः समासो नित्यसमासः, यस्य विग्रहो नास्ति"[२] इति, चतुर्थीसमासविधायकसूत्रे 'सर्वथा अर्थेन नित्यसमासो वक्तव्यः, विग्रहो मा भूदिति"[३] इति । कृष्णः सर्पः, अश्वस्य कर्णः इति विग्रहसदृशत्वेन प्रयुज्यमानान्यपि वाक्यानि समासघटकपदस्वरूपमात्रं बोधयन्ति, न तु कृष्णसर्पः, अश्वकर्णः इत्यादीनां वृत्यर्थस्य बोधने शक्ताः । अत एवेतादृशेषु स्थलेषु 'न हि वाक्येन संज्ञा गम्यते' इत्युच्यते वृत्तिकृद्भिः । अत्र प्रयुक्तस्य वाक्यस्य च नास्ति विग्रहत्वम्, वृत्त्यर्थबोधकत्वाभावात् । शेखरेऽप्युक्तं - "संज्ञाविषयसमासे वाक्येन संज्ञाऽनवगमेऽपि वृत्तिघटकपदज्ञापनाय समस्यमानपदार्थबोधकवाक्यप्रयोगो भवत्येव"[४] इति । इत्थञ्च विग्रहरहितेष्वपि नित्यसमासेषु विग्रहसदृशानि क्वचित् वृत्त्यर्थबोधनपरकाणि, क्वचित् वृत्तिघटकपदस्वरूपबोधनपरकाणि च वाक्यानि प्रयुज्यन्ते । कृष्णस्य समीपम्, कुम्भं करोति इत्यादिषु विग्रहेषु प्रयुक्तेष्वपि उपकृष्णम्, कुम्भकारः इत्यादिषु नित्यसमासेषु अविग्रहो नित्यसमासः इति लक्षणं सङ्गच्छत एव । एताभ्यां वृत्तेर्वैकल्पिकत्वं नास्त्येव नित्या एव वृत्तिः । अतः भाष्योक्तं नित्यः समासो नित्यसमासः यस्य विग्रहो नास्ति' इत्येतदेव नित्यसमासस्य पारमार्थिकं लक्षणम् ।

**उपसंहारः -**

इत्थञ्च अविग्रहो नित्यसमासः इत्येव नित्यसमासलक्षणम्, एतादृशेष्वविग्रहेषु नित्यसमासेषु समासार्थस्य अवगमनार्थं प्रायेण समाससमानार्थकपदघटितास्वपदविग्रहाख्यं वाक्यं प्रयुज्यते । एतदेव कौमुदीकाराणां "अविग्रहो नित्यसमासः, अस्वपदविग्रहो वा' इत्यस्य वाक्यस्य तात्पर्यमित्यलमतिविस्तरेण ।

**अनुशीलितग्रन्थाः –**


१. अष्टाध्यायी पाणिनिः/ईश्वरचन्द्रः चौखम्बाविद्याभवन 2004
२. वैयाकरणसिद्धान्तकौमुदी भट्टोजीदीक्षितः/गिरिधरशर्मा मोतीलालबनारसीदास 1979
३. काशिका वामनजयादित्यौ/शोभितमिश्रः चौखाम्भा सस्कृत पुस्तकालयः 1976
४. परिभाषेन्दुशेखरः नागेशभट्टः/श्रीपाद सत्यनारायणमूर्ति राष्ट्रियसंस्कृतविद्यापीठम् 2004
५. व्याकरणमहाभाष्यम् पतञ्जलिः/चारूदेव शास्त्री मोतीलालबनारसीदास 1968


[१] कौमुदी – सर्वसमासशेषप्रकरणम्
[२] महाभाष्यम् – उपपदमतिङ् सूत्रभाष्यम्
[३] महाभाष्यम् – भक्ष्येण मिश्रीकरणम् सूत्रभाष्यम्
[४] शब्देन्दुशेखरः – सर्वसमासशेषप्रकरणम्

 ISSN : 2249-538X

# ऋ-ऌवर्णयोः मिथः सावर्ण्यं वाच्यमिति वार्त्तिकविमर्शः

डा. पि. आर्. अर्चनाकारन्त्*

**शोधसारः –**

"ऋ-ऌ वर्णयोः मिथः सावर्ण्यम् वाच्यम्" इति वार्त्तिकस्यार्थः सविस्तरमत्र लेखने उपवर्णितोऽस्ति । सावर्ण्यबोधकस्य अस्य वचनस्य व्यापकत्वं निरूप्य **"ऋति ॠ वा वचनम् । २) ऌति ॡ वा वचनम्"** इति द्वयोः षाष्ठवचनयोरर्थः अपि प्रकृतवार्त्तिकेनैव सिध्यतीत्यंशः सुष्ठ्वत्र व्याख्यातः । किञ्च सावर्ण्यबोधकस्यास्य वार्त्तिकस्याभ्युगमे जायमानानां दोषाणां कथङ्कारं वारणमिति कथनपुरःसरं वार्त्तिकस्य निर्दुष्टत्वञ्च यथावदत्र लेखने उपस्थापितम् ॥

**प्रमुखशब्दाः** – सावर्ण्यम्, दीर्घः, द्विमात्रिकः, नरसिंह-ऋकारऌकारौ, अज्भक्तिः, लपरः, अग्रहणपक्षः ।

ऋ-ऌवर्णयोः यथाक्रमं मूर्धास्थानम्, दन्तस्थानमिति स्थानभेदात् **"तुल्यास्यप्रयत्नं सवर्णम्"**[१] इत्यनेन अनयोः सवर्णसंज्ञायाः अप्राप्तौ तद्विधानार्थमिदं वार्त्तिकम् । तथा ऋकार-ऌकारयोः परस्परं सवर्णसंज्ञा अपूर्वतया वक्तव्येति तदर्थः । तत्र ऋकारस्य अष्टादशभेदाः, ऌकारस्य द्वादशेत्याहत्य त्रिंशत्प्रभेदानां परस्परसावर्ण्यम् । वार्त्तिकस्य प्रयोजनं तावत् – **होतृ + ऌकारः = होतृकारः** - इत्यत्र सवर्णदीर्घसन्धिः । स च सन्धिः सवर्णे अचि परे एव विधीयते । वार्त्तिकाभावे ऋकारस्य ऌवर्णः न सवर्ण इति हेतोः दीर्घसन्ध्यप्रवृत्तिः स्यात् । सति च वार्त्तिके ऋकार-ऌकारयोः परस्परसावर्ण्ये ऋकारस्य ऌकारः सवर्णः अच् भवतीत्यतः तयोः स्थाने दीर्घ-ॠकारः आदेशः भवति । ऌकारस्य दीर्घत्वाभावात् स तु न भवति ।

ननु ऋ-ऌवर्णयोः सावर्ण्यविधानस्य होतृ + ऌकारः = होतृकारः इति रूपसिद्धिः प्रयोजनम् इति यदुक्तं तदसमीचीनम् । प्रकृतवार्त्तिकं विनापि होतृकारः(होतृ + ऌकारः) इति रूपं सिध्यत्येव । तथाहि – सवर्णदीर्घसन्धिविधायके **"अकः सवर्णे दीर्घः"**[२] इति सूत्रे द्वे वार्त्तिके पठ्येते – १) **ऋति ॠ वा वचनम् ।** २) **ऌति ॡ वा वचनम् इति ।** तत्र **ॠ** – इत्यत्र द्वौ रेफौ, एकः ऋकारः । **ॡ** – इत्यत्रापि द्वौ लकारौ, एकः ऋकारः । व्यञ्जनाभ्यामेका मात्रा, ऋकास्यैकेत्यतः द्विमात्रिकावेतावादेशौ ।[३] अनयोर्यथाक्रमं नरसिंह-ऋकारः, नरसिंह-ऌकारश्चेति नाम । यथा नरसिंहे नरत्व-सिंहत्वधर्मौ समानरूपेण भवतः तद्वदनयोरादेशयोरपि अर्धांशत्वेनाच्त्वधर्मस्य अवशिष्टार्धांशत्वेन हल्त्वधर्मस्य सद्भावात् तथा व्यवहारः ।

उभयत्र वार्त्तिके **"अकः सवर्णे दीर्घः"** इत्यस्मात् **अकः, दीर्घ** इति द्वयोः पदयोः अनुवृत्तिः क्रियते । वावचनमित्यत्र वाशब्दः दीर्घसमुच्चयार्थः । ततश्च प्रथमवार्त्तिकस्यायमर्थः पर्यवस्यति - अकः ऋति परे ॠ आदेशः विकल्पेन भवति, पक्षे दीर्घः अपि इति । यथा – **होतृ + ऋकारः** इत्यत्र द्वयोः ऋकारयोः स्थाने ॠ आदेशे सति **होत्**

*अतिथिप्राध्यापिका, व्याकरणविभागः, कर्णाटकसंस्कृतविश्वविद्यालयः, बेङ्गलूरु

**ॠकारः** – १ इति रूपम् । द्विमात्रिकादेशाभावे दीर्घः । सोऽपि प्रकृतवार्त्तिकेनैव **होतॄकारः** – २ । द्वितीयस्य चार्थः - अकः ऌति परे ॡ आदेशः विकल्पेन भवति, पक्षे दीर्घः इति । यथा – **होतृ + ऌकारः** इत्यस्यामवस्थायां द्वयोः ऋकार-ऌकारयोः स्थाने ॡ आदेशे **होतॢकारः** – १ इति रूपसिद्धिः । द्विमात्रिकादेशाभावे अनेन वार्तिकेनैव दीर्घे **होतॄकारः**[४] - २ इति च रूपम् । तस्मात् ऋ-ऌवर्णयोः सावर्ण्यं विनापि होतॄकारः (होतृ + ऌकारः) इति रूपसिद्धिर्भवतीत्यतः वार्त्तिकस्य नेदं प्रयोजनमिति चेन्न -

ऋ-ऌवर्णयोः सावर्ण्यबोधकं वार्त्तिकमपेक्षितमेव । यतोहि **ऋति ॠ वा, ऌति ॡ वा** इति वार्त्तिकद्वयेऽपि सवर्णग्रहणमिष्यते । अन्यथा अयं "ॡ" इति द्विमात्रिकादेशः दधि +ऌकारः / मधु +ऌकारः इत्यत्रापि स्यात् । उभयत्र अकोः इकार-उकारयोः ऌकारपरकत्वात् । सति सवर्णग्रहणे इकारस्य ऌकारः असवर्ण इत्यतः ॡ इत्यादेश-अप्राप्तिः । तस्मात्सवर्णपदस्यानुवृत्तिरनिवार्या । यदि ऋ-ऌवर्णयोः सवर्णसंज्ञामनुक्त्वा सवर्णे ऌति परे ॡ आदेशः विधीयते तर्हि होतृ + ऌकारः इत्यत्र ऋकारस्य ऌकारः न सवर्ण इति हेतोः द्विमात्रिकादेशः, दीर्घश्च न स्यात् । अतः ऋ-ऌवर्णयोः सावर्ण्यमुक्त्वा 'सवर्णे' इति पदस्य वार्त्तिकद्वयेऽपि अनुवृत्तिः कर्तव्या । तस्मात्प्रकृतवार्त्तिकमारम्भणीयमेव ।

नन्वथापि ऋ-ऌवर्णयोः सावर्ण्यकथनं विनापि होतॄकारः(होतृ + ऌकारः) इति रूपस्य सिद्धिर्भवति, दधि + ऌकारः इत्यत्र अतिप्रसङ्गश्च न भवति । तथा च "ऋति ॠ वा वचनम्" इत्याद्यवार्त्तिके "अकः सवर्णे दीर्घः" इत्यस्मात् सवर्णम्, दीर्घ इति द्वयोः पदयोः अनुवृत्तिः क्रियते । तत्र वार्त्तिके 'ऋति' इति न सप्तम्यन्तम् । किन्तु **ऋतः इति पञ्चम्यन्तम् ।** ततश्च वार्त्तिकस्येदं स्वरूपम् – **"ऋतः सवर्णे ॠ वा वचनम्"** – ह्रस्व ऋकारस्य सवर्णे अचि परे ॠ आदेशः वा, पक्षे दीर्घः । यथा - होतृ + ऋकारः – **(होत् ॠकारः)१ (होतॄकारः)२ इति** रूपद्वयसिद्धिः । **"ऌति ॡ वा वचनम्"** इत्युत्तरवार्त्तिकम् । अत्र प्रथमवार्त्तिकात् केवलं 'ऋतः' इति पञ्चम्यन्तपदस्यानुवृत्तिः । अर्थस्त्वित्थम् – ह्रस्वर्कारस्य ऌकारे परे ॡ आदेशः वा, पक्षे दीर्घः इति । यथा - होतृ + ऌकारः – **(होतॢकारः)१ (होतॄकारः)२** । 'ऋतः' इत्यनुवर्तनात् **दधि + ऌकारः** इत्यत्र **ॡ** आदेशाप्राप्तिः । तस्मात् **"अकः सवर्णे दीर्घः"** इत्यत्र अवश्यंकर्तव्यस्थितत्वेन वार्त्तिकद्वयेनैव सकलार्थनिर्वाहात् मास्तु ऋकार-ऌकारयोः सावर्ण्यबोधकं वार्त्तिकमिति चेन्मैवम् -

यदि **"ऋ-ऌवर्णयोः मिथः सावर्ण्यम्"** इति वार्त्तिकमारभ्यते तदा **"ऋति ॠ वा वचनम्", "ऌति ॡ वा वचनम्"** इति द्वयोः वार्त्तिकयोः अकर्तव्यत्वरूप-लाघवमस्ति । द्वाभ्यां वार्त्तिकाभ्यां यानि चत्वारि रूपाणि [(**होत् ॠकारः**)१(**होतॄकारः**)२(**होतॢकारः**)१(**होतॄकारः**)२] साध्यन्ते तानि, ऋ-ऌवर्णयोः सावर्ण्यमुक्त्वा "अकः


ISSN : 2249-538X

# 85

सवर्णे दीर्घः" इत्यनेनैव सूत्रेण साध्यन्ते । ॠं – ॡ इति द्वौ आदेशौ दीर्घौ । ततश्च "अकः सवर्णे दीर्घः" इति सूत्रेणैव तयोर्विधानं भवति । यथा - होतृ + ऋकारः – **(होतॄकारः)१** अकः ऋकारे परे कदाचित् ॠ इति दीर्घः । **(होत् ॠंकारः)२** इति द्वितीयं रूपम् । कदाचित् रेफद्वययुक्तः ॠं इत्यादेशः । अयमपि दीर्घ एवादेश इति "अकः सवर्णे दीर्घः" इत्यनेनैव तत्सिद्धिः । होतृ + ऌकारः – **(होतॄकारः)१** इत्यत्र ऋ-ऌवर्णयोः सावर्ण्यात् "अकः सवर्णे दीर्घः" इत्यनेन दीर्घः । **(होत्ॡकारः)२** – कदाचित् लकारद्वयघटितः दीर्घः आदेशः । तस्मात् लाघवात् ऋ-ऌवर्णयोः सावर्ण्यबोधकं वार्त्तिकमेव अस्त्वित्यभिप्रायः ।

ननु **ऋति ॠं वा वचनम्, ऌति ॡ वा वचनम्** इति वार्त्तिकद्वयमवश्यं वक्तव्यम् । अनयोः ॠं – ॡ इत्यनयोः "अकः सवर्णे दीर्घः" इत्यनेन विधानासम्भवात् । तथा च दीर्घशब्देन नेमौ आदेशौ गृह्येते, अच्त्वाभावात् । **"ऊकालोऽज्झ्रस्वदीर्घप्लुतः"**[५] इत्यनेन अचामेव दीर्घसंज्ञा विधीयते । ॠं इत्यत्र द्वौ रेफौ, तयोरेका मात्रा, परितः अज्भक्तेरपरा । एवं ॡ इत्यत्रापि दौ लकारौ, तयोरेका मात्रा, परितः अज्भक्तेरपरा । एतादृशद्विहल्गर्भयोः वर्णयोरच्त्वमप्रसिद्धम् । किञ्चानयोरादेशयोः अर्धतृतीयमात्रा इत्यप्यस्ति कश्चन पक्षः । तत्र पक्षे अनयोः द्विमात्रिकत्वाभावादसम्भव एव दीर्घसंज्ञा । तद्वनयोरादेशयोः ईषत्स्पृष्टप्रयत्नोऽप्युररीकृतः कैश्चिदाचार्यैः ।[६] तस्मिन्मते अच्प्रत्याहारस्थयोः ऋ-ऌवर्णयोः विवृतप्रयत्नात्, विवृतप्रयत्नयोः तयोः ऋऌवर्णयोः एतावादेशौ न सवर्णौ भवत इति हेतोः "अकः सवर्णे दीर्घः" इत्यनेन पक्षे दीर्घः न भवति । तस्मादपूर्वतया तयोरादेशयोर्विधानार्थं ऋति.... इत्यादि वार्त्तिकद्वयं वक्तव्यमेव । ताभ्यामेव होतॄकारः इति सिद्धे, ऋ-ऌवर्णयोः इति वार्त्तिकं नापेक्षितम् इति चेन्न -

तयोरादेशयोः अच्त्वं वक्ष्यते । अर्थात् तयोः(ॠं-ॡ) इत्यनयोः अच्त्वसंपादनाय अयोगवाहेषु पाठः क्रियते । तदुक्तं भाष्ये – **"तयोरादेशयोः अच्त्वं वक्ष्यते"**[७] इति । यदि अच्त्वं तर्हि दीर्घसंज्ञा । सत्यां दीर्घसंज्ञायां "अकः सवर्णे दीर्घः" इत्यनेनैव रूपद्वयसिद्धिः । मास्तु सावर्ण्यबोधकं वार्त्तिकम् । किञ्च ऋति.... इत्यादि वार्त्तिकयोः आरम्भपक्षेऽपि तयोरादेशयोः अच्त्वं वक्तव्यमेव । अन्यथा तयोः अच्त्वाभावात् [**होत् ॠं३कारः/ होत्ॡ३कारः**] इत्यत्र **"दूराद्धूते च"**[८] इत्यनेन विहितः प्लुतः नैव स्यात् । अचः एव प्लुतसंज्ञाविधानात् । अन्यथा विधानमात्रमनयोः आदेशयोः स्यात्, अच्कार्यं प्लुतः कदापि नैव स्यात् । इत्थञ्च तयोरादेशयोः अच्त्वं तु सावर्ण्यपक्षे सावर्ण्याभावपक्षे च वक्तव्यमेव । कथिते अच्त्वे सिध्यति दीर्घसंज्ञा । सत्यां दीर्घसंज्ञायां "अकः सवर्णे.." इत्यनेनैव तयोरादेशयोः विधानं संभवति । तस्मात् लाघवात् "ऋ-ऌवर्णयोः..." इत्यादि वार्त्तिकारम्भ एव न्याय्यः ।

ततश्च भाष्ये प्रश्नः कृतः - किं पुनरत्र ज्यायः ?[९] इति । प्रश्नस्यायमाशयः – "ऋ-ऌवर्णयोः सावर्ण्यविधिः" इति वार्त्तिकमारम्भणीयम्, आहोस्वित् "ऋति ॠं वा वचनम्", "ऌति ॡ वा वचनम्" इति वार्त्तिकद्वयं पठनीयम्

वा इति । उभयत्र पक्षे इष्टरूपाणि तु सिध्यन्त्येव । यथा – सवर्णसंज्ञायाः अकथने "ऋति...", "लृति..." इति द्वाभ्यां वार्त्तिकाभ्यां होतृ + ऋकारः, होतृ + लृकारः इत्यत्र रूपद्वयं सिध्यति । तच्च पूर्वत्र निरूपितम् । एतच्च संहितायाः विवक्षणे । असंहितायां तु **"ऋत्यकः"**[१०] इत्यनेन शाकलह्रस्वे **होतृ ऋकारः, होतृ लृकारः** इत्यपि तृतीयरूपे सिध्यतः । यदि सवर्णसंज्ञामुक्त्वा एतत् वार्त्तिकद्वयं नैव पठ्यते तदानीमपि रूपद्वयसिद्धिर्भवत्येव । यथा – होतृ + ऋकारः – इत्यत्र "अकः सवर्णे दीर्घः" इत्यनेन दीर्घविधिः प्राप्नोति । अत्र द्वौ ऋकारौ स्तः(तृ ऋ) । ततश्च स्थानिनः रेफद्वययुक्तत्वं, विवृतत्वञ्च । तत्र स्थानसाम्यात् कदाचित् रेफद्वययुक्तः ॠ इत्यादेशः भवति । कदाचिच्च विवृतरूपप्रयत्नसाम्यात् ॠ इति एकरेफयुक्तः विवृत आदेशोऽपि भवति । तथा च **होतॄकारः – होत् ॠकारः** इति द्वयं रूपं सिध्यति । एवं होतृ + लृकारः इत्यवस्थायामपि **"अकः सवर्णे दीर्घः"** इत्यनेन दीर्घः प्राप्तः । तत्र च द्वौ स्थानिनौ (ऋ लृ) इति च । ततश्च कदाचित् ऋकारस्य अन्तरतमः ॠकारः आदेशः भवति – होतॄकारः इति । कदाचित् लृकारस्य अन्तरतमः लकारद्वयघटितः ॡ इत्यादेशः – **होत्ॡकारः** इति । तथा च उभयथा रूपाणि तु सिध्यन्ति । स्थिते चैवं कः पक्षोऽत्र समाश्रयणीय इति संशयस्याभिप्रायः ।

तदानीं भाष्यकारैरवादि – सवर्णसंज्ञावचनमेव ज्याय इति[११] । ननु स्थानेऽन्तरतमपरिभाषया विवृतस्य स्थानिनः विवृतावेव दीर्घौ स्याताम्, न त्वीषत्स्पृष्टाविति चेत्? न, रेफद्वयुक्त एवादेशः 'सुसदृशः' इत्यपि हि सम्भवति । तथा च किं रेफद्वययुक्तमादर्तव्यं, किं वा विवृतत्वमित्यत्र विनिगमकाभावेन पर्यायेण उभयप्राप्तौ रूपद्वयस्य निर्वाहः । भाष्यकाराणामनेन वचनेन ऋति..... लृति... इति द्वयोः वार्त्तिकयोः प्रत्याख्यानं ध्वन्यते । उक्तं च शब्दकौस्तुभे – **"तदेवं षाष्ठं वचनद्वयं न कर्तव्यमिति स्थितम्"**[१२] इति । व्यापकत्वात्, लाघवाच्च ऋ-लृवर्णयोः सावर्ण्यविधानमेव साधीयान् । तथा च तयोः सावर्ण्ये सति "अकः सवर्णे.." इत्यादिना एव चतुर्णामपि रूपाणां सिद्धिर्भवति । एतदपेक्षया ऋति ॠ..., लृति ॡ... इति वचनद्वयकथने गौरवदोषः । गौरवस्तावत् – उभयत्र वार्त्तिके दीर्घपदस्य अनुवृत्तिकरणरूपम् । सावर्ण्यविधाने दीर्घपदानुवृत्तिं विना दीर्घः सिध्यति । किञ्च व्यापकत्वमप्यस्ति[१३] ऋ-लृवर्णयोर्विहितायाः सवर्णसंज्ञायाः । यथा – **"ऋत्यकः"** इत्यनेन अकः ऋति परे ह्रस्वः, प्रकृतिभावश्च विधीयते । स यथा खट्वा + ऋश्यः = **खट्व ऋश्यः**, माला + ऋश्यः = **माल ऋश्यः** इति ऋकारे परे भवति, तद्वत् खट्वा + लृकारः = खट्व लृकारः, माला + लृकारः = माललृकारः इति लृकारे परेऽपि भवति, ऋकारे लृकारस्यापि ग्रहणात् । एवमेव अवर्णान्तात् उपसर्गात् ऋकारादौ सुब्धातौ परे वृद्धिरेकादेशः स्यात् इत्यर्थकेन **"वा सुप्यापिशलेः"**[१४] इत्यनेन वैकल्पिकवृद्धिर्विधीयते । सा यथा उप + ऋकारीयति = **उपार्कारीयति/उपर्कारीयति** इति ऋकारादि धातौ परे भवति, तद्वत् उप + लृकारीयति = **उपाल्कारीयति/उपल्कारीयति** इत्यत्र लृकारादि धातौ परेऽपि भवति, तयोः


ISSN : 2249-538X

सावर्ण्यसत्त्वात् ।

**ऋकार-ऌकारयोः सावर्ण्ये दोषाः –**

यदि सर्वत्र स्थले ऋकारेण ऌकारस्यापि ग्रहणं तर्हि **“उरण् रपरः”**[१५] इति सूत्रे दोषः स्यात् । ऋकारस्य स्थाने जायमानः अण् रपरः सन् भवतीत्यर्थं बोधयति तत्सूत्रम् । ततश्च यथा ऋवर्णस्य स्थाने जायमानः अण् रपरः भवति कृष्ण + ऋद्धिः = **कृष्णर्द्धिः** इति, तद्वत् ऋकारेण ऌकारस्यापि ग्रहणात् ऌवर्णस्य स्थाने जायमानः अणपि रपर एव स्यात् । ततश्च तव + ऌकारः = **तवर् कारः** इत्यनिष्टरूपापत्तिः स्यादित्याद्यः दोषः ।

तस्य निराकरणं तावत् भाष्यकारैः क्रियते – **“ऌकारस्य लपरत्वं वक्ष्यामि”** इति वचनेन । वक्ष्यामीत्यस्य व्याख्यास्यामीत्यर्थ इति कैयटेन निगदितम्[१६] । व्याख्यानं च रप्रत्याहारसमाश्रयणरूपम् । तथा च **“उरण् रपरः”** इति सूत्रे रपरशब्दे र इति प्रत्याहारः समाश्रीयते । स च हयवरट् सूत्रस्थरेफस्य लण् सूत्रस्थावर्णेन सह सम्भवति । तथा च रप्रत्याहारे वर्णद्वयम् – रेफः, लकारश्च । ततश्च आन्तरतम्यात् ऋकारस्य स्थाने जायमानः अण् रपरः भवति, ऌकारस्य स्थाने जायमानः अण् लपरः भवतीत्यर्थः सिध्यति । ततश्च तव + ऌकारः = तवल्कारः इति ऌकारस्थानिकः अण् लपर एव भवतीत्यदोषः । किञ्च सवर्णसंज्ञावादी (ऋ-ऌवर्णयोः... इति वार्त्तिकारम्भवादी) सवर्णसंज्ञा अभाववादिनं प्रति वदति – **“तच्चावश्यं वक्तव्यम्”** । अर्थात् येन ऋकार-ऌकारयोः सवर्णसंज्ञा नेष्यते तेनापि तव + ऌकारः इत्यादौ लपरत्वविधानाय ऌकारस्य स्थाने यः अण् सः लपरः भवतीत्यर्थबोधकं **“ऌकारस्य लपरः”** इति वचनमवश्यं वक्तव्यं “उरण् रपरः” इति सूत्रानन्तरमित्यभिप्रायः । सवर्णसंज्ञायाः कथिते तु तव + ऌकारः इत्यत्र रेफबाधनार्थं (रपरः मा भूत्) “ऌकारस्य लपरत्वं वक्ष्यामीति” वचनम् । इत्थं ऋ-ऌवर्णयोः सावर्ण्यस्वीकारे/ अस्वीकारे वा “उरण् रपरः” इति सूत्रे “ऌकारस्य लपरत्वं वक्ष्यामीति” वचनमवश्यं वकतव्यम् । तेनैव अतिप्रसङ्ग न्यवार्यत इति ऋ-ऌवर्णयोः सावर्ण्ये दोषाभावः ।

ऋकार-ऌकारयोः सावर्ण्ये द्वितीयः दोषस्तावत् – यदि ऋ-ऌवर्णयोः सावर्ण्यं स्वीक्रियते तर्हि **“ऋवर्णान्नस्य णत्वं वाच्यम्”** इत्यनेन क्ऌप्यमानम् इत्यादौ णत्वापत्तिः । तथा हि **“रषाभ्यां नो णः समानपदे”**[१७] इति सूत्रे वार्त्तिकमिदं पठ्यते **“ऋवर्णान्नस्य णत्वं वाच्यम्”** इति । तेन मातृ + नाम् = **मातृणाम्, पितृणाम्** इत्यादौ नस्य णत्वं साध्यते । तत्र च यथा ऋकारात् परस्य नस्य णत्वं क्रियते, तद्वत् ऋकारेण ऌकारस्यापि ग्रहणात् **‘क्ऌप्यमानम्’** इत्यत्रापि ऌकारात् परस्य अड्कुप्वाङ्गिः व्यवहितस्य नस्यापि णत्वं स्यात् इत्यपरः दोषः ।

समाधानं तावदित्थं प्रोच्यते – ऋकारविषये **“वर्णैकदेशाः वर्णग्रहणेन गृह्यन्ते”** इति पक्षः भाष्यकारैर-भ्युपगतः[१८] । तथा च प्रत्याहाराह्निके इदं वार्त्तिकं पठितम् – **“नुड्विधि-लादेश-विनामेषु वर्णैकदेशाः वर्णग्रहणेन**



#88

**गृह्यन्ते**"[१९] इति । ऋकारे यः रेफः सः स्वतन्त्रेण रेफवर्णेन तुल्यः भवति । ततश्च मातृणाम्/ पितृणाम् इत्यादौ ऋकारे रेफांशः अस्तीत्यतः, **"रषाभ्याम्..."** इति सूत्रेणैव णत्वं सिध्यतीति हेतोः **"ऋवर्णात्...."** इत्यादि वार्त्तिकं भाष्ये प्रत्याख्यातम् । तथा च ऋवर्णात् इति वार्त्तिकाभावे 'क्लृप्यमानम्' इत्यत्र णत्वापादनं कर्तुमेव न शक्यत इति दोषः नैव सम्भवति । "रषाभ्याम्..." इत्यनेन तु णत्वं वक्तुं न शक्यते, रेफाभावात्(लकारसत्वात्) । वर्णैकदेशाः वर्णग्रहणेन न गृह्यन्त इत्यग्रहणपक्षेऽपि, "ऋवर्णात् नस्य ..." इत्यनेन प्राप्तं णत्वं, **"क्षुभ्नादिषु च"**[२०] इत्यनेन प्रतिषिध्यते, क्षुभ्नादेराकृतिगणत्वात् ।

भाष्ये तावत् पूर्वोक्ताक्षेपस्य प्रत्याक्षेपः कृतः यथा – "अथासत्यामपि सवर्णसंज्ञायाम्, इह कस्मान्न भवति – प्रक्लृप्यमानं पश्येति" । प्रोपसर्गपूर्वक – कृपू सामर्थ्ये इति धातोः शानच् प्रत्यये इदं रूपम् प्रक्लृप्यमानमिति । तत्र शानचः नस्य **"कृत्यचः"**[२१] इति सूत्रेण णत्वप्राप्तिर्भवति । उपसर्गस्थात् निमित्तात् परस्य अच उत्तरस्य कृत्स्थस्य नस्य णत्वं स्यादिति तदर्थः । प्रकृते **'प्रक्लृप्यमानम्'** इत्यत्र लृकारस्य अट्वात् अड्कुप्वाङ्भिः व्यवधानेऽपि णत्वं प्राप्नोति, स च कस्मान्नभवतीत्याशङ्का ।

तत्र च समाधानद्वयम् – एकं तु **"चुटुतुलशर्व्यववाये न"** इति वचनेन णत्वं प्रतिषिध्यते । चवर्ग-टवर्ग-तवर्ग-लकार-शरां च अन्यतरेण व्यवधाने रषाभ्यां परस्य नस्य णत्वं नेति तदर्थः । द्वितीयं तु – **"त्रिभिश्च मध्यमैर्वर्गैः लशसैश्च व्यवाये न"** इत्यनेन वा णत्वनिषेधः । पञ्चवर्गेषु मध्यमाः ये च-ट-तवर्गाः, तैः लकारेण शकारेण वा व्यवधाने रषाभ्यां परस्य नस्य णत्वं नास्तीति तदर्थः[२२] । प्रकृते – प्रक्लृप्यमानम् इत्यत्र रेफ-नकारयोर्मध्ये लकारेण व्यवधानसत्त्वात् **"कृत्यचः"** इत्यनेन णत्वाभावः । नन्वयं लृवर्णः, न लकारः, येन लकाररूपव्यवधानमादाय णत्वं प्रषिध्यते इति चेन्न – वर्णैकदेशाः वर्णग्रहणेन गृह्यन्ते इति पक्षे लृकारे यः लकारः तमादायः णत्वप्रतिषेधात्[२३] । यद्यग्रहणपक्ष एवेत्याग्रहः तर्हि क्षुभ्नादेराकृतिगणत्वं स्वीकृत्य तत्र प्रक्लृप्यमानशब्दं च पठित्वा "क्षुभ्नादिषु च" इत्यनेन णत्वनिषेधः सुकरः ।

**उपसंहारः -**

इत्थञ्च ऋकार-लृकारयोः सावर्ण्ये न क्वापि दोषः । किञ्च तयोः सावर्ण्यविधानेन ऋकारस्य यानि कार्याणि दीर्घसन्धिप्रभृतीनि तानि भवन्ति, न तु स्वयं लृकारः ऋकाररूपत्वं प्राप्नोति । ऋ-लृवर्णयोः सावर्ण्ये सत्यपि अनुबन्धकार्येषु साङ्कर्यं न भवति, ऋदितां लृदितानाञ्च भेदेन अनुबन्धनिर्देशात् । ओणृ-अपनयने, गम्लृ- गतौ इत्यादिरीत्या अनुबन्धाः पृथक् पृथक् निर्दिष्टाः सन्ति । ततश्च **"नाग्लोपिशास्वृदिताम्"**[२४] इत्यनेन ऋदितां धातूनां विहितः उपधाह्रस्वनिषेधः लृदितां (गम्लृ इत्यस्य) स्यात्, **"पुषादिद्युताद्य्लृदितः परस्मैपदेषु"**[२५] इत्यनेन विहितः

 ISSN : 2249-538X

अङादेशः ऋदितां (चकासृ इत्यस्य) स्यादिति नाशङ्कनीयम् । चकासृ – गम्लृ इति भेदेन अनुबन्धोपादानात् परस्परेण परस्परस्याग्रहणम् (ऋकारेण ऌकारस्य, ऌकारेण च ऋकारस्य) । यदि परस्परग्रहणमिष्येत तर्हि एकेनानुबन्धेनैव पाणिनिर्निर्दिशेत्, अर्थात् ऋकारं ऌकारं वा इतं कृत्वा ऋदितः इत्येव सर्वत्र ब्रूयात्, यद्वा ऌदितः इति वा, न तूभयोर्निर्देशं कुर्यादिति शम् ॥

**पादटिप्पण्यः –**

१) पाणिनीयसूत्रम् १/१/९

२) पाणिनीयसूत्रम् ६/१/१०१

३) द्विमात्रोऽयम् । मध्ये द्वौ रेफौ, तयोरेका मात्रा, अभितोऽज्भक्तेरपरा – शब्दकौस्तुभः ।

४) होतृ + ऌकारः – इत्यवस्थायां कः दीर्घवर्णः भवति? "ऌवर्णस्य दीर्घः नास्ति" इति वचनान्न ऌवर्णः । ततश्च ऋकार-ऌकारयोः अन्तरतमः वर्णस्याभाव इत्यत्रः अन्यतरस्य-ऋकारस्य दीर्घः – ॠकारः आदेशः ।

५) पाणिनीयसूत्रम् १/२/२७

६) ईषत्स्पृष्टश्चायम् – शब्दकौस्तुभः ।

७) महाभाष्यम् १/१/९

८) पाणिनीयसूत्रम् ८/२/८४

९) महाभाष्यम् १/१/९

१०) पाणिनीयसूत्रम् ६/१/१२८

११) महाभाष्यम् १/१/९

१२) शब्दकौस्तुभः १/१/९

१३) अन्यानि प्रयोजनान्यपि सन्तीत्यर्थः ।

१४) पाणिनीयसूत्रम् ६/१/९२

१५) पाणिनीयसूत्रम् १/१ /५१

१६) प्रदीपव्याख्या १/१/९

१७) पाणिनीयसूत्रम् ८/४/१

१८) प्रत्याहाराह्निकम् – एओङ् – ऐऔच्

१९) प्रत्याहाराह्निकम् – एओङ्-ऐऔच्

२०) पाणिनीयसूत्रम् ८/४/३९

२१) पाणिनीयसूत्रम् ८/४/२९

२२) अनयोर्निषेधयोः मध्ये प्रथमापेक्षया द्वितीयः युक्ततरः । यतोहि पूर्वनिषेधे शर् प्रत्याहारः समाश्रितः । तत्र षकारः अपि अन्तर्भवति । परं षकारः साक्षात् णत्वविधिं प्रति निमित्त इति हेतोः सः व्यवधायकत्वेन नाश्रीयते । द्वितीयनिषेधे तु षकारः नोपात्त इति सः युक्तः ।

२३) ऋकारविषये ग्रहणपक्षः भाष्ये स्वीकृतः, ऋ-ऌवर्णयोः सावर्ण्यात् ऌकारविषयेऽपि ग्रहणपक्षः अभ्युपगत इव

२४) पाणिनीयसूत्रम् ७/४/२

२५) पाणिनीयसूत्रम् ३/१/५५

**सन्दर्भग्रन्थाः –**

१) प्रौढमनोरमा -बृहच्छब्दरत्न-लघुशब्दरत्नसहितः प्रथमो भागः

२) लघुशब्देन्दुशेखरः, (पञ्चसन्ध्यन्तो भागः) – 'सुबोधिनी' व्याख्या सहितः, आचार्यः विश्वनाथ मिश्रः

३) व्याकरणमहाभाष्यम्, भाष्यप्रदीपोद्योतसमुल्लसितम्, श्री भार्गव शास्त्री जोषी,

४) शब्दकौस्तुभः (त्रयः भागाः), चौखम्बा संस्कृत प्रतिष्ठान

५) सिद्धान्तकौमुदी बालमनोरमा तत्त्वबोधिनी सहिता, मोतीलाल बनारसीदास पुस्तकालयः

६) सिद्धान्तकौमुदी - लक्ष्मीव्याख्यानम्


ISSN : 2249-538X

# गुहाम्प्रविष्टाधिकरणम्

श्री निरञ्जन भट्टः*

**शोधसारः –**

वेदान्तसम्प्रदाये न्यायप्रस्थानत्वेन प्रसिद्धस्य ब्रह्मसूत्रग्रन्थस्य प्रथमाध्यायस्य द्वितीयपादे तृतीयमिदम् अधिकरणं भवति गुहाप्रविष्टाधिकरणम् । तत्र "गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्" इति प्रथमं सूत्रम् । अधिकरणेऽस्मिन् "ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे । छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः" इति कठोपनिषदन्तर्गतं वाक्यं विषयः । अत्र च वाक्ये ऋतपानोपलक्षितकर्मफलभोक्तृत्वेन किं बुद्धिजीवौ निर्दिष्टौ अथवा जीवपरमात्मानौ इति संशयः । तत्र 'गुहां प्रविष्टौ' इति विशेषणश्रवणात् बुद्धिक्षेत्रज्ञयोरेव ग्रहणं युक्तमिति पूर्वपक्षः प्राप्तः । गुहाशब्देन शरीरं हृदयं वा गृह्येत । उभयथापि बुद्धिक्षेत्रज्ञयोरेव ग्रहणम् उपपद्यते । छायातपौ इत्यपि परस्परविलक्षणत्वेन निर्देशात् चेतनाचेतननिर्देश एव समुपपद्यते इत्यतः बुद्धिक्षेत्रज्ञयोरेव ग्रहणमिति पूर्वपक्षस्याशयः । सिद्धान्तस्तु चेतनत्वेन उभयोरपि समानस्वभावत्वात् विज्ञानात्मपरमात्मानौ हि इह निर्दिष्टौ इति । लोके च समानस्वभावानामेव सङ्ख्याश्रवणे प्रतीतिः भवतीति दृष्टम् । अत्रापि वाक्ये ऋतपानरूपेण लिङ्गेन निश्चितस्य विज्ञानात्मनः द्वितीयस्य अन्वेषणं क्रियते चेत् तस्य चैतन्येन समानस्वभावस्य परमात्मनः एव प्रतीतिः भवति । जीवपरमात्मनोः अविद्याकृतसंसारित्वासंसारित्ववैलक्षण्यात् छायातपौ इत्यत्रापि विरोधो नास्ति । तस्मात् गुहां प्रविष्टौ जीवपरमात्मानौ एव इति सिध्यति ।

**प्रमुखशब्दाः –** गुहाप्रविष्टाधिकरणम्, बुद्धिजीवौ, जीवपरमात्मानौ, गुहां प्रविष्टौ, विज्ञानात्मपरमात्मानौ, बुद्धिक्षेत्रज्ञौ ।

वेदान्तसम्प्रदाये न्यायप्रस्थानत्वेन प्रसिद्धस्य ब्रह्मसूत्रग्रन्थस्य प्रथमाध्यायस्य द्वितीयपादे तृतीयमिदम् अधिकरणं भवति गुहाप्रविष्टाधिकरणम् । तत्र "गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्[1]" इति प्रथमं सूत्रम् । अधिकरणेऽस्मिन् "ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे । छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः[2]" इति कठोपनिषदन्तर्गतं वाक्यं विषयः । अत्र च वाक्ये ऋतपानोपलक्षितकर्मफलभोक्तृत्वेन किं बुद्धिजीवौ निर्दिष्टौ अथवा जीवपरमात्मानौ इति संशयः । यदि अत्र बुद्धिजीवयोः निर्देशः स्यात् तर्हि बुद्धिप्रधानात् कार्यकरणसङ्घातात् विलक्षणः जीवः प्रतिपादितो भवति । तच्च जीवस्य बुद्धिवैलक्षण्यं "येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके । एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः[3]" इति

*सहायकाचार्यः (सं), वेदान्तविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः शृङ्गेरी

[1] ब्रह्मसूत्रम् – १.२.११

[2] कठोपनिषत् - १.३.१

[3] कठोपनिषत् - १.१.२०

प्रश्नसामर्थ्यात् प्रतिपादनीयं भवति । यदि च जीवपरमात्मनोः निर्देशः स्यात्, तदा जीवादतिरिक्तस्य परमात्मनः प्रतिपादनं कृतं भवति । तच्च परमात्मस्वरूपमपि “अन्यत्र धर्मादन्यत्राधर्मादन्यात्रास्मात्कृताकृतात् । अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वद[१]” इति प्रश्नसामर्थ्यात् प्रतिपादनीयं भवति । किन्तु अत्र उभयोरपि पक्षयोः बुद्धिपरमात्मनोः भोक्तृत्वायोगात् संशयासम्भवः आक्षिप्यते । यतः ‘सुकृतस्य लोके’ इति लिङ्गश्रवणात् कर्मफलस्य उपभोगः ऋतपानस्यार्थः भवति । स च उपभोगः चेतनस्य क्षेत्रज्ञस्यैव भवितुमर्हति न तु अचेतनबुद्धेः । किञ्च श्रुतौ तु ‘पिबन्तौ’ इति द्विवचनयोगात् उभयोरपि भोक्तृत्वं दृश्यते । अतः बुद्धिक्षेत्रज्ञपक्षस्य उपादानम् अशक्यम् । “अनश्नन्नन्योऽभिचाकशीति[२]” इति श्रुतिवचनात् चेतनत्वेऽपि परमात्मनि कर्मफलभोक्तृत्वासम्भवात् क्षेत्रज्ञपरमात्मपक्षोऽपि न सम्भवति इति ।

यथा छत्रिणो गच्छन्तीत्यत्र छत्रिपदेन गन्तारः उपचरिताः भवन्ति तद्वत् एकस्यैव भोक्तृत्वं चेदपि उभयोः भोक्तृत्वं उपचर्यते । अथवा जीवः पिबति चेदपि ईश्वरः पाययिता भवति । यथा पाचयितुरपि देवदत्तस्य पक्तृत्वव्यवहारः तथा पाययन्नपि ईश्वरः पिबतीति व्यपदेशः सम्भवति । अपि च यथा एधांसि पचन्तीति इत्यत्र करणेऽपि कर्तृत्वोपचारः तथा बुद्धेरपि करणभूतायाः कर्तृत्वव्यपदेशसम्भवात् बुद्धिक्षेत्रज्ञपरिग्रहोऽपि सम्भवति । अध्यात्माधिकारे अन्ययोः पिबतोः अयोगात् बुद्धिजीवयोः जीवपरमात्मनोः वा निर्देशः स्यात् इति संशयकारणम् । यथा पूर्वस्मिन् अत्त्रधिकरणे सन्निहितमृत्युपदात् ब्रह्मक्षत्रयोः अनित्यवस्तुपरत्वमुक्तं तथैव अत्रापि सन्निहितगुहापदात् पिबन्तौ इत्यस्य बुद्धिजीवपरत्वमिति दृष्टान्तेन पूर्वपक्षः उत्थाप्यते इति अस्याधिकरणस्य पूर्वाधिकरणेन दृष्टान्तसङ्गतिः ।

तत्र ‘गुहां प्रविष्टौ’ इति विशेषणश्रवणात् बुद्धिक्षेत्रज्ञयोरेव ग्रहणं युक्तमिति पूर्वपक्षः प्राप्तः । गुहाशब्देन शरीरं हृदयं वा गृह्येत । उभयथापि बुद्धिक्षेत्रज्ञयोरेव ग्रहणम् उपपद्यते । यदा तु अर्थान्तरप्राप्तिसम्भवः अस्ति तदा सर्वव्यापकस्य ब्रह्मणः विशिष्टदेशपरिच्छिन्नत्वकल्पना न युक्ता । अपि च सुकृतस्य लोके इति कर्मफलविषयत्वं दर्शयति श्रुतिः । परमात्मनस्तु “न कर्मणा वर्धते नो कनीयान्[३]” इति श्रुत्या सुकृतदुष्कृतफलाविषयत्वमेव अवगतं भवति । छायातपौ इत्यपि परस्परविलक्षणत्वेन निर्देशात् चेतनाचेतननिर्देश एव समुपपद्यते इत्यतः बुद्धिक्षेत्रज्ञयोरेव ग्रहणमिति पूर्वपक्षस्याशयः ।

सिद्धान्तस्तु चेतनत्वेन उभयोरपि समानस्वभावत्वात् विज्ञानात्मपरमात्मानौ हि इह निर्दिष्टौ इति । लोके

[१]कठोपनिषत् - १.२.१४
[२]मुण्डकोपनिषत् – ३.१.१
[३]बृहदारण्यकोपनिषत् – ४.४.२३


ISSN : 2249-538X

च समानस्वभावानामेव सङ्ख्याश्रवणे प्रतीतिः भवतीति दृष्टम् । यथा अस्य गोः द्वितीयोऽन्वेष्टव्यः इत्युक्ते द्वितीयस्य गोरेव अन्वेषणं क्रियते न तु अश्वस्य पुरुषस्य वा अन्वेषणं भवति । अत्रापि वाक्ये ऋतपानरूपेण लिङ्गेन निश्चितस्य विज्ञानात्मनः द्वितीयस्य अन्वेषणं क्रियते चेत् तस्य चैतन्येन समानस्वभावस्य परमात्मनः एव प्रतीतिः भवति । गुहाहितत्वश्रवणात् परमात्मग्रहणम् अयुक्तमित्यपि शङ्का न कार्या । "गुहाहितं गह्वरेष्ठं पुराणम्[१]", "यो वेद निहितं गुहायां परमे व्योमन्[२]", 'आत्मानमन्विच्छ गुहां प्रविष्टम्' इत्येवं श्रुतिस्मृतिषु परमात्मन एव गुहाहितत्वश्रवणात् तेनैव लिङ्गेन परमात्मग्रहणं युक्तमिति सिद्ध्यति । यद्यपि सर्वगतः परमात्मा तथापि तस्य उपलब्ध्यर्थं देशविशेषस्य उपदेशः अविरुद्धः । परमात्मनः सुकृतलोकवर्तित्वं च छत्रिन्यायेनैव एकस्मिन् क्षेत्रज्ञे वर्तमानं परमात्मन्यपि सम्भवतीति न विरुध्यते । जीवपरमात्मनोः अविद्याकृतसंसारित्वासंसारित्ववैलक्षण्यात् छायातपौ इत्यत्रापि विरोधो नास्ति । तस्मात् गुहां प्रविष्टौ जीवपरमात्मानौ एव इति सिद्ध्यति ।

"विशेषणाच्च[३]" इति द्वितीयेन सूत्रेण जीवपरमात्मनोरेव निर्देशः इत्यत्र हेत्वन्तरं प्रदर्शयति । "आत्मानं रथिनं विद्धि शरीरं रथमेव तु[४]" इत्यादिना रथिरथादिरूपककल्पनावसरे विज्ञानात्मनः संसारमोक्षयोः गन्तृत्वं कल्पयति श्रुतिः । तथैव "सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्[५]" इति परमात्मा गन्तव्यत्वेन कल्प्यते । अस्मात् पूर्वमपि "तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् । अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति[६]" इति जीवपरमात्मनोः मन्तृमन्तव्यत्वेन विशेषणं श्रुत्या प्रदर्शितम् । प्रकरणमपि इदं परमात्मन एव इत्यतः 'ब्रह्मविदो वदन्ति' इति वक्तृविशेषग्रहणमपि परमात्मपरिग्रहे एव सङ्गच्छते । अतः अत्र जीवपरमात्मनोरेव ग्रहणं युक्तम् । "द्वा सुपर्णा सयुजा सखाया[७]" इत्यादिमुण्डकवाक्येऽपि अयमेव न्यायः आश्रीयते । तत्रापि वाक्ये अध्यात्मिकाधिकारादेव साधारणौ पक्षिणौ नोच्येते । किन्तु 'तयोरन्यः पिप्पलं स्वाद्वत्ति' इति भक्षणलिङ्गात् 'अनश्नन्नन्योऽभिचाकशीति' इति अनशनलिङ्गाच्च जीवपरमात्मनोरेव ग्रहणमिति स्थितं भवति । तस्मादनन्तरं "समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः[८]" इत्यत्रापि जीवस्य द्रष्टृत्वेन परमात्मनः द्रष्टव्यत्वेन विशेषणं श्रुत्या प्रदर्शितम् । तस्मात् जीवपरमात्मनोरेव

[१]कठोपनिषत् – १.२.१२
[२]तैत्तिरियोपनिषत् – २.१
[३]ब्रह्मसूत्रम् – १.२.१२
[४]कठोपनिषत् – १.३.३
[५]कठोपनिषत् – १.३.९
[६]कठोपनिषत् – १.२.१२
[७]मुण्डकोपनिषत् – ३.१.१
[८]मुण्डकोपनिषत् – ३.१.२

गुहाप्रविष्टत्वेन ग्रहणं युक्तमिति सिद्धान्तः पर्यवस्यति ।

**सहायकग्रन्थसूची –**


1) ब्रह्मसूत्रशाङ्करभाष्यम्
   सम्पादकः – आचार्यजगदीशशास्त्री,
   प्रकाशनम् – मोतीलाल बनारसीदास, दिल्ली, 2018
2) उपनिषद्भाष्यम्
   सम्पादकः – एस्. सुब्रह्मण्यशास्त्री
   प्रकाशनम् – श्रीदक्षिणामूर्तिमठ प्रकाशनम्, वाराणसी, 2004
3) श्रीमद्भगवद्गीता
   सम्पादकः – वासुदेवशर्मा
   प्रकाशनम् – मुन्शीराम मनोहरलाल पब्लिशर्स, न्यू दिल्ली, 1996
4) बृहदारण्यकोपनिषत्
   प्रकाशनम् – गीताप्रेस, गोरखपुर
5) https://advaitasharada.sringeri.net



ISSN : 2249-538X

# 95

# न्यायवैशेषिकदर्शनयोः सृष्टिनिरूपणम्

श्री शशांक शिवराम भट्टः*

**प्रमुखशब्दाः** – सृष्टिः, आरम्भवादः, परमाणणुकारणतावादः ।

तत्रास्माभिः दृश्यमानजगतः कादाचित्कत्वादुत्पत्तिविनाशापरपर्यायमनित्यत्वमवगम्यत एव । तत्र सर्वैरपि दार्शनिकैः जगदुत्पत्तिविनाशौ स्वीक्रियेते परं तत्क्रमस्तु तत्र तत्र भिद्यते । ब्रह्मणो विवर्तभूतं जगदित्यद्वैतिनः । मूलप्रकृतेर्जगदुत्पद्यत इति कापिलाः । शून्यमेव जगदुपादानमिति बौद्धाः । तत्र नित्यभूतैः स्वतन्त्रैः परमाणुभिः जगदुत्पद्यते इति न्यायवैशेषिकराद्धान्तः ।

तत्रादौ न्यायदर्शनमनुसृत्य सृष्टिर्निरूप्यते । न्यायदर्शने चतुर्थेऽध्याये "अभावाद्भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात्"[१] इत्यादिसूत्रैः शून्यमेव जगदुपादानमिति बौद्धादीनां मतमनूद्य दूषयित्वा, सिद्धान्ते त्रिभिः सूत्रैः ईश्वरस्य जगत्कारणत्वं स्थापितम् । तथा हि पुरुषोऽयं समीहमानः अवश्यं समीहाफलमाप्नोति, तेनानुमीयते पराधीना पुरुषस्य कर्मफलप्राप्तिरिति । यदि परापेक्षां विना पुरुषः कर्मफलभोगे समर्थः स्यात्तदा कदाचिदपि अफला क्रिया नैव भवेत् । तस्मात् यदधीना पुरुषस्य कर्मफलप्राप्तिः स ईश्वरः कारणमिति "ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्"[२] इति प्रथमसूत्रार्थः । ईश्वराधीना यदि फलनिष्पत्तिः स्यात् तर्हि पुरुषस्य समीहामन्तरेण फलं निष्पद्येत, ततश्च कर्मलोपः स्यादित्याक्षेपपरं "न पुरुषकर्माभावे फलानिष्पत्तेः"[३] इति द्वितीयसूत्रम् । तत्रास्माभिः नैवमुच्यते पुरुषकर्मानपेक्षः ईश्वरः कारणमिति, अपि तु ईश्वर एव पुरुषकर्म अनुगृह्णाति । फलाय यतमानस्य पुरुषस्येश्वरः फलं सम्पादयति तस्मादीश्वरकारितत्वात् पुरुषकर्माभावे फलानिष्पत्तेरित्यहेतुरिति "तत्कारितत्वादहेतुः"[४] इति तृतीयसूत्रार्थः ।

अत्र प्रकरणे वार्तिककारा उद्योतकराचार्याः महता प्रपञ्चेन ईश्वरस्य जगत्कारणत्वं प्रतिपादयन्ति । 'तत्कारितत्वात्' इति ब्रुवता सूत्रकारेण निमित्तकारणमीश्वर इत्युपगतं भवति । ईश्वरश्चेज्जगतो निमित्तं जगतः कारणयोरनुग्राहकं साक्षादुपादानकारणं किमिति चेत् परमसूक्ष्मं परमाणुसंज्ञितं पृथिव्यादिद्रव्यमिति । परमाणुकर्माणि प्राक् प्रवृत्तेः बुद्धिमत्कारणाधिष्ठितानि प्रवर्तन्ते अचेतनत्वात् वास्यादिवदिति । यथा वास्यादि अचेतनं बुद्धिमता पुरुषेणाधिष्ठितं प्रवर्तते तथा अचेतनानि परमाणुकर्माणि जगत्सृष्टौ प्रवर्तमानानि बुद्धिमत्कारणाधिष्ठितान्येव प्रवर्तन्त इति । कालविशेषापेक्षाः प्रवर्तन्त इत्यपि न सम्यक्, कालस्याप्यचेतनत्वात् बुद्धिमन्तमधिष्ठातारमन्तरेण

---

*अतिथिप्राध्यापकः, न्यायविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

[१]न्या. सू. 4-1-14

[२]न्या. सू. 4-1-19

[३]न्या. सू. 4-1-20

[४]न्या. सू. 4-1-21

प्रवृत्तिर्दुर्घटा । अतोऽधिष्ठातेश्वरोऽपेक्षितः । तत्र ईश्वरस्य सिसृक्षावशात्परमाणौ क्रिया जायते, ततः द्वाभ्यां परमाणुभ्यां द्व्यणुकमुत्पद्यते, ततः त्रिभिः द्व्यणुकैः त्र्यणुकमुत्पद्यते, इत्येवं क्रमेण महती पृथिवी, महत्य आपः, महत्तेजः, महांश्च वायुः उत्पद्यते ।

एवं धर्माधर्मौ बुद्धिमत्कारणाधिष्ठितौ पुरुषस्योपभोगं कुरुतः कारणत्वात् वास्यादिवत् । आत्मैवाधिष्ठाता धर्माधर्मयोरिति न वक्तुं शक्यते, न हि यस्य धर्माधर्मौ स एव तयोरधिष्ठाता भविष्यतीति युक्तम्, शरीरोत्पत्तेः प्राक् तद-सम्भवात् शरीरोत्पत्तेः प्राक् अज्ञोऽयमात्मा उपलम्भयोग्यान् रूपादीनपि तावन्नोपलभते कुत उपलम्भानर्हौ धर्माध-र्मावुपलप्स्यत इति । धर्माधर्माभ्यामेवाधिष्ठिताः परमाणवः प्रवर्तन्तामित्यपि न सम्यक्, धर्माधर्मयोरप्यचेतनत्वात् । न हि किञ्चिदचेतनं स्वतन्त्रतया इतराधिष्ठायकं दृष्टम् तस्मात् जगत्सृष्टिहेतुधर्माधर्माधिष्ठातृतया ईश्वरः सिध्यति ।

ननु क्रियावतामेव कारणत्वं लोके दृश्यते । ईश्वरस्य तु क्रियाशून्यत्वान्न कारणत्वमिति चेन्न । परिस्पन्दरूपक्रियाशून्यत्वेऽपि आख्यातवाच्यज्ञानचिकीर्षाप्रयत्नरूपक्रियावत्त्वादीश्वरस्य कारणतोपपत्तेः, किञ्च परिस्पन्दरूपक्रियाशून्यानामपि कारणत्वं लोके दृश्यते यथा कदाचित् द्रव्याणि उपरतक्रियाणि द्रव्यमारभन्ते, संयोगादिना निवृत्ते कर्मणि संयोगोपकरणानि द्रव्याणि द्रव्यमारभन्ते इति निष्क्रियाणामारम्भकत्वम् । क्वचित् अनुत्पन्नक्रियेष्वपि द्रव्येषु पूर्वद्रव्योपरतौ द्रव्यान्तरोत्पादो दृश्यते यथा एकावयवविभागे द्रव्यनिवृत्तौ शेषाणि द्रव्यान्तराणि द्रव्यमारभन्त इति । कानिचित् पुनः क्रियावन्त्यारभन्ते यथा अन्यतरकर्मजात् नोदनात् संयोगात् निवृत्ते कर्मणि इतरस्मिन् द्रव्ये द्रव्यमुत्पद्यत इति ।

ननु ईश्वरश्चेत् कर्ता स किं सापेक्षः करोति उत निरपेक्षः ? यदि सापेक्षः, यदपेक्ष्य करोति तस्याकर्तेति कृत्वा अन्यत्राप्यकर्तृत्वप्रसङ्गः । अथायं किञ्चिदनपेक्ष्य करोति तदा पुरुषकर्मणः वैफल्यं स्यात् इति चेत् न । नायं नियमोऽस्ति यो येन करोति स तन्न करोतीति । यथानेकशिल्पनिपुणः पुरुषः कारणान्तरसापेक्षः वास्यादि करोति, वास्यादिसापेक्षः दण्डादि करोति दण्डादिसापेक्षो घटादि करोति । तथेश्वरोऽपि धर्माधर्मोपादानः शरीरसुखदुःखादि, आत्ममनस्संयोगशुद्धाशुद्धाभिसन्धिसाधनश्च धर्माधर्मौ सुखदुःखस्मृत्यपेक्षः तत्साधनापेक्षश्च करोतीति । यदा करोति तदा साधनस्याकर्तेति चेत्, न ब्रूमो वयं सर्वार्थानयमेकस्मिन् काले करोतीति, अपि तु पर्यायेण । पर्यायकर्तृत्वे च नायं दोषः ।

अथायमीश्वरः कुर्वाणः किमर्थं करोति, लोके हि ये कर्तारो भवन्ति ते किञ्चिदुद्दिश्य कुर्वन्ति इदमाप्स्यामि इदं हास्यामि चेति, न तावदीश्वरस्य हेयमस्ति, दुःखाभावात् । नोपादेयमस्ति, आप्तकामत्वादिति । केचिद्वदन्ति क्रीडार्थमीश्वरः करोतीति, तन्न युक्तम् क्रीडा हि नाम विना क्रीडाया रतिमविन्दतां रत्यर्थं भवति । न च रत्यर्थी


ISSN : 2249-538X

भगवान्, दुःखाभावात् । दुःखिनो हि सुखोपभोगार्थं क्रीडन्ति । विभूतिख्यापनार्थं सृजति, सृष्ट्या हि विश्वरूपत्वं ख्यापितं भवतीति केचिदाहुः । तदपि न युक्तम् । न हि विभूतिख्यापनेन कश्चिदतिशयो लभ्यते, न वा विभूत्यख्यापनेन किञ्चिद् हीयते । अतः किमर्थमीश्वरः सृजतीति चेदत्रोच्यते - यथा भूम्यादीनि धारणादिक्रियां स्वाभाव्यात् कुर्वन्ति, तथेश्वरोऽपि स्वाभाव्यात् प्रवर्तते प्रवृत्तिस्वभावकत्वादीश्वरस्येति न कोऽपि दोषः । यदि स्वाभाव्यात् प्रवर्तते सततं प्रवर्तताम्, तथा च निवृत्तिर्न युज्यत इति चेत् - ईश्वरस्य बुद्धिमत्त्वात् धर्माधर्मसापेक्षत्वाच्च न सततं प्रवृत्तिरिति । एवमादिरीत्या जगत्सृष्टौ निमित्तकारणमीश्वर स्वेच्छया जदत्सृजतीति सिद्धम् ।

अत्र घटादेः कार्यस्य निरवयवत्वमेव वा अवयवानन्त्यं वा परमाण्वन्तता वा । तत्र निरवयवत्वमनुपपन्नम् । पटे अवयवानां तन्तूनां घटे च कपालानां प्रत्यक्षमुपलम्भात् । अनन्तावयवयोगित्वमपि न युक्तम्, मेरुसर्षपयोरनन्तावयवयोगित्वेन तुल्यपरिमाणत्वप्रसङ्गात् । तस्मात् परमाण्वन्ततैव युक्तिमती । इमे परमाणवोऽचेतनत्वात् चेतनेच्छाधीनं प्रेरणमन्तरेण विशिष्टक्रमयुक्तमितरेतरसंयोगमलभमानाः कार्यसिद्धये नालम् । अतः एषामधिष्ठाता चेतनः सकलभुवननिर्माणनिपुणमतिः ईश्वरोऽङ्गीकृतः । तथा च द्व्यणुकादिक्रमेण परमाणवः कार्यमारभन्ते । ननु द्वावेव परमाणू प्रथमं संयुज्येते इत्यत्र का युक्तिः इति चेत् बहुत्वसंख्यायाः महत्परिमाणकारणत्वदर्शनात् त्रिषु परमाणुषु प्रथमं मिलितेषु तद्गतबहुत्वसंख्यावशात् तत्कार्ये महत्त्वे जाते तस्य प्रत्यक्षत्वं प्रसज्येत । तस्य प्रत्यक्षता तु नह्यस्ति, अतिसूक्ष्मत्वात् । अतः द्वाभ्यां परमाणुभ्यां द्व्यणुकमादावुत्पद्यते । तच्च परमाणुवत् अप्रत्यक्षमेव, महत्त्वानुत्पादात् । तर्हि द्वाभ्यां द्व्यणुकाभ्यां त्र्यणुकारम्भोऽस्तु, कुतस्त्रिभिर्द्व्यणुकैस्त्र्यणुकारम्भ इष्यत इति चेत् न । द्व्यणुके इव तत्रापि महत्वोत्पत्तौ कारणाभावात् । अतः त्रिभिः द्व्यणुकैः त्र्यणुकमारभ्यते । द्व्यणुकगतबहुत्वसंख्यया त्र्यणुके महत्त्वमारभ्यते, अतस्तस्य प्रत्यक्षता भवति । त्र्यणुकानन्तरं तु अल्पपरिमाणादवयवात् महापरिमाणोऽवयवी भवतीति नियमः न त्ववयवसंख्यानियमः ।

अत्र युक्तिरेषा परमाणुसद्भावे ततो जगत्सृष्टौ चोक्ता कन्दल्याम्- अणुपरिमाणतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वात् महत्परिमाणतारतम्यवत् यत्रेदं विश्रान्तं यतः परमणुर्नास्ति स परमाणुः । स चैको न जनकः । एकस्य नित्यस्य चारम्भकत्वे कार्यस्य सततोत्पत्तिः स्यात् अपेक्षणीयाभावात् । अविनाशित्वं च प्रसज्येत । आश्रयविनाशस्य अवयवविभागस्य विनाशहेतोरभावात् । त्रयाणां परमाणूनामारम्भकत्वं च न सम्भवति । महत्कार्यद्रव्यस्योत्पत्तौ स्वपरिमाणापेक्षया अल्पपरिमाणस्य कार्यद्रव्यस्यैव सामर्थ्यदर्शनात् । त्र्यणुकं कार्यद्रव्येणैव जायते महत्परिमाणत्वात् घटवत् । इत्थं च त्रयाणामेकस्य चारम्भकत्वे प्रतिक्षिप्ते द्वाभ्यामेव परमाणुभ्यामारभ्यते यत् तत् द्व्यणुकमुच्यते । द्वाभ्यां द्व्यणुकाभ्यां त्र्यणुकोत्पत्तौ त्र्यणुकस्य महत्त्वं न स्यात्,

अवयवबहुत्वस्यापेक्षितत्वात् । अतस्त्रिभिर्द्व्यणुकैस्त्र्यणुकमिति । न चैवं सति द्व्यणुकानामेव घटारम्भकत्वापत्तिः घटस्य भङ्गेऽल्पतरतमादिभावदर्शनेन तथैवारम्भकत्वात् । अतस्त्र्यणुकादिक्रमेण घटाद्युत्पत्तिः इति ।

नन्वीश्वरः किं सशरीर जगत् सृजति आहोस्वित् अशरीरो वा, न तावदशरीरः लोके अशरीरस्य कर्तृत्वाद-र्शनात् । सशरीरश्चेत् शरीरत्वात् चैत्रादिशरीरवत् उत्पत्तिमत् तच्छरीरं तदीश्वरकर्तृकं वा स्यादीश्वरान्तरकर्तृकं वा? आद्ये सशरीरः स्वशरीरं सृजति अशरीरो वा? आद्ये आत्माश्रयः । द्वितीये पूर्वोक्तदोषः (लोके तथाऽदर्शनादिति) ईश्वरान्तरकर्तृकं चेत् ईश्वरानन्त्यप्रसङ्ग इति ।

अत्रोच्यते । अशरीर एव स्रष्टेति । लोके तथा न दृष्टमिति यदुक्तं तन्न, कर्तृत्वज्ञानचिकीर्षाप्रयत्नवत्त्वादिकञ्च अशरीरस्यापि संभवति । स्वशरीरप्रेरणे च दृष्टमात्मनः अशरीरस्य कर्तृत्वम् ।

वैशेषिकसूत्रेषु यद्यपि सृष्टिप्रकारः न कण्ठतः स्पष्टमुक्तः किन्तु प्रशस्तपादभाष्ये तु प्रशस्तपादाचार्यैः निरूपितः विद्यते । अस्माकं पञ्चदशनिमेषाः काष्ठा । विंशतिः काष्ठाः कला । पञ्चदश कलाः नाडिका । त्रिंशत्कलाः मुहूर्त्तः । त्रिंशता मुहूर्तैरहोरात्रः । पञ्चदशाहोरात्राः पक्षः । द्वौ पक्षौ मासः । द्वौ मासावृतुः । षड्तवो द्वादशमासाः संवत्सरः । ऋतुत्रयेणोत्तरायणम् । ऋतुत्रयेण दक्षिणायनम् । उत्तरायणं च देवानां दिनम्, दक्षिणायनं रात्रिः, तथाभूताहोरात्रशतत्रयेण षष्ठ्यधिकेन वर्षं, द्वादशसहस्रैश्च वर्षैश्चतुर्युगम् । चतुर्युगसहस्रेण ब्रह्मणो दिनमेकम् इत्यनेन मानेन वर्षशतस्यान्ते, वर्तमानस्य ब्रह्मणो मुक्तिकाले संसारे नानास्थानेषु भूयोभूयः शरीरादिपरिग्रहेण खिन्नानां गर्भवासादिविविधदुःखेन दुःखितानां प्राणिनां कञ्चित्कालं विश्रामार्थं (दुःखोपशमार्थं) सकलभुवनपतेः महेश्वरस्य संजिहीर्षा भवति । तदनन्तरं शरीरेन्द्रियमहाभूतारम्भकाणां सर्वेष्वात्मसु समवेतानामदृष्टानां शक्तिप्रतिबन्धः स्यात् । तस्मिन् सति अनागतानां शरीरेन्द्रियमहाभूतानामनुत्पत्तिः । उत्पन्नानां च विनाशार्थं महेश्वरेच्छया आत्मनां परमाणूनां च संयोगेभ्यश्च परमाणुषु क्रियाः जायन्ते । ततः शरीराणामिन्द्रियाणां च ये परम्परया कारणभूताः परमाणवः तेषु विभागाः भवन्ति । विभागेभ्यस्तेषामणूनां संयोगाः निवर्तन्ते । संयोगनिवृत्तौ सत्यां तेषामापरमाण्वन्तो नाशः । एवमेव पृथिव्यप्तेजोवायूनामपि अनेनैव क्रमेण उत्तरस्मिन्नुत्तरस्मिन् सति पूर्वपूर्वस्य विनाशः । ततः प्रविभक्ताः परमाणवः अवतिष्ठन्ते । धर्माधर्मभावनाख्यसंस्कारैश्चानुविद्धाः आत्मानश्च ब्रह्मणो वर्षशतं यावदवतिष्ठन्ते । अयं संहारक्रमः ।

ततः पुनः आत्मनां सुखदुःखानुभवोत्पत्तये महेश्वरस्य सिसृक्षा जायते । ततः सर्वेष्वात्मसु विद्यमानानि अदृष्टानि वृत्तिं लभन्ते । तदपेक्षेभ्यः आत्मपरमाणुसंयोगेभ्यः परमाणुषु कर्माण्युत्पद्यन्ते । ततः द्व्यणुकादिक्रमेण जगदुत्पत्तिः इति सृष्टिसंहारप्रक्रिया निरूपिता ।


ISSN : 2249-538X

**आकरग्रन्थसूची (Bibliography) –**


- **न्यायभाष्यवार्तिकतात्पर्यटीका** – Choukhamba Sanskrit Series Office, Vidyavilas Press, Gopal Mandir Lane, Varanasi City -1925
- **प्रशस्तपादभाष्यम्** – Sri Satguru Publications, Indological and oriental Publishers, 1st floor, 40 5 Shakti Nagar, Delhi, 110007
- **वैशेषिकसूत्रोपस्कारः** - Vyasa Prakashan, D16/13, Manmandir, Varanasi 221001
- **वैशेषिकरसायनम्** - Sri Uttamur Viraraghavacharya, 5, Wason st, madras
- **न्यायसिद्धान्तमुक्तावली** ( दिनकरी-रामरुद्री-प्रभासहिता) - Sri Balamanorama Press, Mylapore, Madras 600004
- **तर्कसङ्ग्रहः** ( दीपिकाप्रकाशिका ) Elago Achukoodam, 166, R.H.Road, Mylapore, Madras 600004
- **तर्कप्रवेशः** (काणादसरणिः) – प्रज्ञानम्, श्रीमाता,#2/3 भारतीनगरम्, मेणसे, श्रृङ्गेरी 577139

# नाटकरचनावैचक्षण्यविचारः

डा. एम्. श्रीनिवास मूर्तिः*

**शोधसारः –**

काव्यं द्विविधं दृश्यं श्रव्यञ्चेति । दृश्यकाव्यमेव रूपकमित्युच्यते । रूपकेषु नाटकस्य इतररूपकापेक्षया महाप्राधान्यात्, बहुलप्राचुर्यात्, नाटकसामान्यलक्षणवत्त्वाच्च सर्वमपि रूपकम् नाटकनाम्ना प्रसिद्धिं गतम् । अतः काव्यं नाम श्रव्यकाव्यम् इति,नाटकं नाम दृश्यकाव्यम् इति च लोके व्यवहारः समागतः वर्तते । काव्यस्य स्वभावे द्वैविध्यात् कव्यलेखकस्यापि स्वभावे द्वैविध्यम् अङ्गीकर्तव्यं भवति । श्रव्यकाव्यलेखनार्थं कवेः कीदृशं सामर्थ्यम् आवश्यकम्, दृश्यकाव्यलेखनार्थं कवौ कीदृशी सिद्धिः भवेत्, कः प्रयोजनभेदः, के के उभयनिष्ठाः विशेषाः इत्याद्यंशाः लेखेऽस्मिन् यथाशक्ति, यथामति च निरूपयितुं प्रयत्नः क्रियते ।

**प्रमुखशब्दाः** – काव्यम् , दृश्यम् , श्रव्यम् , नाटकम् , गद्यम् , पद्यम् , चम्पूः, शब्दार्थज्ञानम् , इतिवृत्तनिर्वहणम् , वर्णनम् , प्रदर्शनायोग्यत्वम् , भावनाशक्तिः, रसानन्दः ।

साहित्यपठनपाठनसम्प्रदाये यथासन्दर्भम् एकं वाक्यं श्रूयते 'नाटकान्तं हि साहित्यम्' इति । सामान्यतया अस्य वाक्यस्य अर्थः एवम् उच्यते यत् – आदौ छात्रः गद्यपद्यचम्पूकाव्यानि पठित्वा शब्दार्थज्ञानं व्याकरणादीनां शास्त्राणां सामान्यं विषयज्ञानं प्राप्नुयात्, तदनन्तरं सः नाटकं पठेत् । नाटकपठनेन सः साहित्ये परिनिष्ठितं ज्ञानं प्राप्नोति । तत्पश्चादेव तस्य साक्षात् शास्त्राध्ययनार्थं योग्यता लभ्यते - इति ।

अर्थात् यथा उपनिषदः वेदेषु नितरां प्रमुखं स्थानमावहन्ति तथैव नाटकमपि साहित्ये – अत्यन्तं मुख्यां विष्ठां समावहति । यथा उपनिषज्ज्ञानं विना वेदाध्ययनं संपूर्णतां न गच्छति तथैव नाटकज्ञानात् ऋते साहित्यज्ञानं समग्रं भवितुं नार्हति ।

अत्र किञ्चिद्विचारणीयमस्ति । वस्तुतः गद्यपद्यचम्पूरूपश्रव्यकाव्यापेक्षा दृश्यकाव्ये समधिकं सृजनात्मकं सौन्दर्यं भाषागाम्भीर्यञ्च भवतीति काव्यतत्त्वविज्ञैः नाङ्गीक्रियते सुतराम् । किञ्च नाटके भाषा नितरां सरला व्यावहारिकी सुलभग्राह्या च भवतीत्यत्र न काचिद् विप्रतिपत्तिः दृश्यते साहित्यविद्वल्लोके ।

विचित्रशब्दार्थसङ्घटनासमाकुलात् दशकुमारचरितात् किरातार्जुनीयात् नैषधाच्चापि वेणीसंहारे अभिज्ञान-शाकुन्तले वा साहित्यस्य प्रागल्भ्यं भवितुमर्हतीति वक्तुं केनापि विदुषा साहसं नैव क्रियते इति कथने – अतिशयोक्तिः भवितुं नार्हति ।

एवं युक्तियुक्तविचारेण 'नाटकान्तं हि साहित्यम्' इति साम्प्रदायिककथने वितर्कः प्रायः न केवलं पठनपाठनविषयसम्बद्धः, अपि च रचनाविषयकोऽपीति विज्ञातुं शक्यते । कविः स्वकीयोपज्ञया यद्यपि बहूनि

*सहायकाचार्यः (सं), साहित्यविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

काव्यानि प्रणयति, नाटकरचनया-एव तस्य साहित्यसृष्टिः कृतकृत्यतां गात्वा तस्मै सार्थकतां प्रयच्छतीति भावः साहित्यसम्प्रदायाभिज्ञैः एतद्वाक्येन नूनम् अभिहितः स्यात् । अत्र काव्यमीमांसायाः लेखकस्य राजशेखरस्य 'नाटकान्तं कवित्वम्' इति वाक्यम् उपोद्घलकं वर्तते । अतः नाटकम् अन्ते पठनीयमित्यत्र साहित्यसम्प्रदायज्ञैः शिल्परचनापरिज्ञानमेव निर्दिष्टं स्यात् न तु शब्दार्थपरिज्ञानम् ।

नाटकप्रणेता स्वमत्या कानिचन पात्राणि विसृज्य तत्तत्पात्रोचितस्वभावगुणानुगुणव्यवहारस्य शब्दरूपं प्रदाय प्रपञ्चे प्रदर्शयति । कुत्रापि स्वस्वभावानुगुणवाक्यप्रकाशनं यथा न भवति तथा आत्मानं निगूह्य साक्षीभूतो भूत्वा तत्तत्पात्राणि –इतिवृत्तानुगुणं संप्रवर्तयति । अर्थात् ताटस्थ्यमुपसेवते । एतत् ताटस्थ्यमेव आत्मपरिमार्जनम् (Self Obliteration)[१] इति पाश्चात्यविमर्शकैः प्रकथ्यते । आत्मपरिमार्जनं तावत् परिणतबुद्धावेव कवौ सिद्ध्यति, न तदन्यस्मिन्, कवित्वस्य मूलम् आत्मव्यक्तीकणमेवेति हेतोः ।

श्रव्यकाव्यरचनायां यद्यपि तत्तत्पात्रभावव्यक्तीकरणसन्दर्भे तदा तदा आत्मतिरोधानमवाप्नोति तथापि दीर्घकालं तावत् ताटस्थ्यं वोढुमशक्तो भूत्वा पुनः तत्तत्पात्रेषु संलग्नः भवति । कवेः नाटकरचनायाम् इदमेव प्रथमं शिक्षास्थानम् । श्रव्यकाव्यरचनानन्तरं कविः कौतुकहेतोः नाटकलेखनाय समुद्याति । नाटके कवेस्स्वभावः क्वापि न दृश्यते । अर्थात् नाटकसृष्टौ कर्ता न दृश्यते ।

अत्रैतत् सन्देहस्थानं भवितुमर्हति यत् – यथा जगत्सृष्टौ सृष्टिकर्ता न दृश्यते चेदपि सकलचराचरपदार्थेषु सः अन्तर्लीनो भवति तथैव नाटकेऽपि कविः तत्तत्पात्रगतो भवतीत्यतः आत्मपरिमार्जनं यथाक्षरं न निरुह्यते खल्विति ।

अत्रैतत् समाधानं भवितुमर्हति यत् – आत्मपरिमार्जनं नाम ताटस्थ्यमेवेति । पात्रस्वभावानुगुणं यद्वचनं प्रकाशयितुम् उचितं न भवितुमर्हति स्वाभीष्टस्यापि तादृशवचनस्याकथनरूपताटस्थ्यमेवात्रात्मपरिमार्जनमिति ज्ञातव्यम् ।

नाटकप्रणेतुरेतदावश्यकम् प्राथमिकं तत्त्वमस्ति । केवलश्रव्यकाव्यलेखके कवौ अयं स्वभावः न दृश्यत एव । श्रव्यकाव्यप्रणेतरि कवौ केवलं स्वभावानुगुणवर्णनावेश एव भवितुमर्हति, न तु कथा निर्वहणसामर्थ्यम् । साहित्यरचनायाम् एतदन्तिमं सोपानमित्यतः 'नाटकान्तं हि साहित्यम्' इति वाक्यं प्रसिद्धिङ्गतम् ।

आलङ्कारिकैराचार्यैः भरतादिभिरादौ काव्यलक्षणं नाटकपरतयैवोक्तम्[२] । ईषद्भेदेन पश्चात्तदेव लक्षणं श्रव्यकाव्यस्याप्यनुवर्तितम् । तथापि रचनायान्तु द्वयोर्भेदः सुग्राह्य एव । एतद्भेदं परिलक्ष्यैव 'नाटकरचनं गुणाधिकम्' इत्यर्थे नाटकान्तं हि साहित्यम् इति साहित्याभिज्ञैः उक्तमिति वक्तुं शक्यते । इतिवृत्ते रससम्पादने च उभयोस्समानत्वं

[१] An Introduction to the Study of Literature
[२] काव्यप्रकाशः

स्यात्, किन्तु कथासंविधाने श्रव्यकाव्यलेखकापेक्षया नाटकप्रणेतुः श्रमाधिक्यं सुस्पष्टमेव ।

नाटककर्त्रा पात्रचित्रणधर्मोऽवश्यमनुष्ठेयः । श्रव्यकाव्यनिर्माणकर्तुः कवेः तादृशधर्मः नियमो वा नास्त्येव । चित्रविचित्रवर्णनैः यथेष्टं सः स्वकाव्यं प्रौढं सर्वाङ्गसुन्दरञ्च कर्तुमर्हति । एते कथांशाः त्याज्याः, एते घट्टाः अवश्यं प्रदर्शनीयाः एतावदेव वर्णनीयमिति वा तस्य नियमः नास्ति । तस्य काव्यं रमणीयं भवति चेत् सः कृतार्थ एव ।

नाटककर्त्रा तावत् कथासन्निवेशेनैव स्वकीयप्रज्ञा प्रदर्शनीया भवति । सुन्दरं चेदपि सर्वमपीतिवृत्तं नाटकरचनार्थं स्वीकर्तुं न शक्यते । उपयुक्तेऽपीतिवृत्ते सर्वे विषयाः प्रदर्शनयोग्याः न भवितुमर्हन्ति । केषाञ्चन भागानां त्यागेनापीतिवृत्तस्य हानिं विना निर्वाह एव नाटकप्रणेत्रा परिपालनीयः - असिधाराव्रततुल्यविषयः ।

नाटकस्यासमग्रत्वं तदा स्पष्टं भवति यदा तत्प्रदर्शनीयमित्यपरिलक्ष्य केवलं श्रव्यकाव्यरूपेण पठ्यते । काव्यविशेषरूपेण तत् कदापि स्वयं सम्पूर्णं भवितुं नार्हति । परिपूर्णतासम्पादनाय नाटकस्य सङ्गीतादिकलासाहाय्यमावश्यकमेव । पठितुं योग्ये नाटकेऽपि केचन भागाः भावनागम्या एव भवन्ति ।

कवित्वं नाम वर्णनमेव । नाटककर्ता तस्य कविताप्रज्ञां यावच्छक्यं निगृह्य, नाटकार्थम् आवश्यकं साहित्यवस्तुमात्रं प्रदाय, तस्य समग्रसौन्दर्यसम्पादनभारं नटेषूपस्थापयति ।[1] स एव नाटककर्ता तदेव इतिवृत्तं स्वीकृत्य श्रव्यकाव्यं लिखति चेत् तस्य काव्यस्य समग्रं सौन्दर्यं सम्पादयितुं शक्नोत्येव । काव्यत्वेन परिगणनायां नाटकं असमग्रं भवतीत्यतः श्रव्यकाव्येन नाटकं कदापि समानं भवितुं नार्हति । रघुवंशरामायणमहाभारतादिभिस्साकं नाटकं कदापि स्पर्धितुं न शक्नोति ।

भरतमुनिकृतनाट्यशास्त्राध्ययनेन वेणीसंहारादिनाटकानाञ्च परिशीलनेन इदं स्पष्टं भवति यत् - अभिनयः सर्वधा प्रत्यक्षप्रदर्शनमेव न भवतीति, बहुत्र स सामाजिकस्य भावनाशक्त्यैव ग्राह्य इति च । वेणीसंहारे तृतीयेऽध्याये रणरङ्गनिरूपणघट्टः, रत्नावल्यां मकरन्दोद्यानवनसौन्दर्यवर्णनाघट्टप्रभृतयः अत्र उदाहरणभूताः ।

एवं नाटकप्रदर्शनमपि भावनाशक्तिसम्पन्नस्य सामाजिकस्यैव सम्पूर्णानन्दं दातुं शक्नोति । अर्थात् काव्यरसास्वादनशक्त एव नाटकेऽपि सम्पूर्णतया आनन्दं प्राप्तुं शक्नोति, न सर्वोऽपि । एवं श्रव्यकव्यमेव शब्दार्थव्युत्पत्त्यै सहकारकं भवतीति स्पष्टम् । सामाजिकः नाटकदर्शनेन श्रव्यकाव्यपठनापेक्षया सुलभतया रसानन्दं प्राप्नोतीति अनुभवसिद्धः । अतः नाटकान्तं हि साहित्यमिति वाक्यं नाटकरचनावैलक्ष्यण्यं सूचयतीति वक्तुं शक्यते ।

[1]साहित्यशिल्पसमीक्षा

 ISSN : 2249-538X

## सन्दर्भग्रन्थसूची

1. An Introduction to the Study of Literature – William Henry Hudson,George G.Harrap& Company,London.1913
2. Kavya Prakasha – Pullela Srirama Chandrudu, Samskrita Bhashaprachara Samiti, Hyderabad..2010
3. Sahitya Silpa Sameeksha of Sri Pingali Lakshmi Kantam.- Pingali Lakshmi Kantam, Visalandhra Publishers, Vijayawada.1970.

# द्वारस्थापनदिक्कालविचारः

डा. सुधांशुकुमारनन्दः*

द्वारस्थापनविचारः वास्तुशास्त्रस्य विषयः । वास्तु इति शब्दः वस् धातोः निष्पन्नः । वासोपयोगिस्थलं भवनभूखण्डं वा वास्तु । पुनश्च वसन्त्यस्मिन्निति वास्तु, वसन्ति प्राणिनो यत्र वेति । अर्थात् यः यत्र निवसति तत्तस्य वास्तु इति चिन्त्यते । सा निवासयोग्या भूमिः वास्तु, तत्सम्बद्धं शास्त्रं वास्तुशास्त्रमिति । एवमपि वक्तुं शक्यते यदुपयुक्तस्थानस्य चयनं कृत्वा तदुपरि प्रकृत्यानुकूल्येन गृहादीनां निर्माणाय मानवः यत् शास्त्रमाश्रयति तदेव वास्तुशास्त्रम् । अस्मिन् शास्त्रे निर्माणप्रक्रियायाः परम्परा पञ्चभूतन्याश्रित्य वर्णितमस्ति । अत्र न केवलं वासार्थं गृहनिर्माणम् अपि च कूपतडागादीनां खननं, पशुशालानिर्माणं, देवालयनिर्माणम् एवञ्च वाटिकादिनिर्माणयोजनाभिः सह सर्वविधनिर्माणकौशलानां विवरणं यस्मिन् शास्त्रे विद्यते तदेव वास्तुशास्त्रम् । अस्य वास्तुशास्त्रस्य प्रसिद्धिः स्थापत्यशास्त्रत्वेन, शिल्पशास्त्रत्वेनापि वर्तते । विश्वकर्मणः वास्तुशास्त्रे शास्त्रस्यास्य स्वरूपं एवं प्रतिपादितमस्ति यत् -

**देवतानां नराणाञ्च गजगोवाजिनामपि ।**
**निवासभूमिश्शिल्पज्ञैर्वास्तुसंज्ञमुदीरितम् ॥**

मानवस्य सुखं सौविध्यञ्च लक्ष्यीकृत्य शास्त्रमिदं सर्वदा कार्यं करोति । शास्त्रेऽस्मिन् विभिन्नाः निर्माणपरकविषयाः विवेचिताः सन्ति । एकस्मिन् गृहे कुत्र किं निर्मातव्यम् इति शास्त्रेऽस्मिन् स्पष्टतया विचारितं वर्तते । सन्दर्भेऽस्मिन् मुख्यद्वारस्य स्थापनं गृहस्य कस्मिन् भागे कर्तव्यम् इति विषये विचारः विधीयते ।

गृहरूपकशरीरस्य मुखं भवति मुख्यद्वारम् । तस्य मुख्यद्वारस्य विषये वास्तुरत्नाकरस्याशयः एवमस्ति यत् द्वारं चतुर्विधं प्रोक्तं वास्तुसंक्रान्तिभायजम् । वास्तुरत्नाकरः-द्वारप्रकरणम्-45

अर्थात् द्वारं तु चतुर्विधं भवति । यथा – 1.वास्तुसम्बन्धि, 2.माससम्बन्धि, 3.नक्षत्रसम्बन्धि, 4. आयसम्बन्धि इति । इदानीम् एकैकं विचारयामः -

1. वास्तुसम्बन्धि -

क्षेत्रस्याधारेण द्वारस्थापनविधिः अत्र प्रदर्शितो वर्तते । यथोक्तम् -

**नवभागं गृहं कृत्वा पञ्चभागन्तु दक्षिणे ।**
**त्रिभागमुत्तरे कार्यं शेषं द्वारं प्रकीर्तितम् ॥** वास्तुरत्नावली-गृहद्वारनिर्णयाध्याय- 1

तत्र भवनम् अर्थात् क्षेत्रस्य समानतया नवविभागं कृत्वा, तेषु दक्षिणे पञ्चभागम् उत्तरे त्रिभागं विहाय

---

*सहायकाचार्यः(सं), केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः,श्रृङ्गेरी

शेषस्थाने द्वारस्थापनं कार्यम् । अनेन प्रकारेण तदा कर्तुं शक्नुमः यदा अस्माकं क्षेत्रस्य दक्षिणोत्तरविषयकं ज्ञानं भवति । बृहद्वास्तुमालायां विषयेऽस्मिन् बृहद्वास्तुमालाकारः व्याखानावसरे एवं प्रतिपादयति यत्

**दक्षिणाङ्गः स वै प्रोक्तः मन्दिरान्निःसृते सति ।**
**यो भूयाद्दक्षिणे भागे वामे भूयात्सवामगः ॥**

अर्थात् गृहात् निर्गमनकाले मानवस्य दक्षिणहस्तः यस्यां दिशि तिष्ठति सो भागः दक्षिणः, वामहस्तः यस्यां दिशि तिष्ठति सो भागः वामभागः इति ज्ञातव्यः ।

पुनः एकाशीतिवास्तुपदविन्यासेन अथवा चतुःषष्ठिवास्तुपदविन्यासेन यानि अनलादीनि द्वात्रिंशत् द्वाराणि भवन्ति, तेषामनलादीनां द्वाराणां क्रमेण फलनिरूपणम् अत्र क्रियते । -

**नवगुणसूत्रविभक्तान्यष्टगुणेनाथवा चतुःषष्टेः ।**
**द्वाराणि यानि तेषामनलादीनां फलोपनयः ॥ अनिलभयं स्त्रीजननं प्रभूतधनता नरेन्द्रवाल्लभ्यम् ।**
**क्रोधपरताऽनृतत्वं क्रौर्यं चौर्यं च पूर्वेण ॥**

बृहसंहिता-वास्तुविद्याध्यायः-71-72

अर्थात् शिखिभागे द्वारे अनिलभयम् । स्त्रीजननं पर्जन्ये । प्रभूतधनता जयन्ते । नरेन्द्रवाल्लभ्यं इन्द्रे । सूर्ये क्रोधपरता । सत्ये असत्यभाषित्वम् । भृशे क्रूरता । अन्तरिक्षे चौर्यम् । एवं पूर्वभागस्य द्वारकल्पना ।

| पूर्वभागः | शिखिः | पर्जन्यः | जयन्तः | इन्द्रः | सूर्यः | सत्यः | भृशः | आकाशः |
|---|---|---|---|---|---|---|---|---|
| फलम् | अनिलभयं | स्त्रीजननं | प्रभूतधनता | नरेन्द्रवाल्लभ्यं | क्रोधपरता | अनृतत्वं | क्रौर्यं | चौर्यं |

**अल्पसुतत्वं प्रैष्यं नीचत्वं भैक्ष्यपानसुतवृद्धिः ।**
**रौद्रं कृतघ्नमधनं सुतवीर्यघ्नं च याम्येन ॥** बृहसंहिता-वास्तुविद्याध्यायः-73

अनिले अल्पसुतत्वम्, पौष्णे दासत्वम्, वितथे नीचता, बृहत्क्षते भक्षपानसूतानां वृद्धिः । याम्ये कल्याणराहित्यम्, गन्धर्वे कृतघ्नं, भृङ्गराजे धनशून्यम् । मृगाख्ये सुतवीर्यघ्नम् । एवं प्रकारेण दक्षिणस्यां द्वारविचारः ।

| दक्षिणभागः | वायुः | पूषा | वितथः | बृहत्क्षतः | यमः | गन्धर्वः | भृङ्गराजः | मृगः |
|---|---|---|---|---|---|---|---|---|
| फलम् | अल्पसुतत्वं | प्रैष्यं | नीचत्वं | सुतवृद्धिः | रौद्रं | कृतघ्नं | अधनं | सुतवीर्यघ्नं |

**सुतपीडा रिपुवृद्धिर्न सुतधनाप्तिः सुतार्थफलसम्पत् ।**
**धनसम्पन्नृपतिभयं धनक्षयो रोग इत्यपरे ॥** बृहसंहिता-वास्तुविद्याध्यायः 74

पित्र्ये सुतपीडा । दौवारिके रिपुवृद्धिः । सुग्रीवे सुतधनाप्तिः । पुष्पदन्ते सुतार्थफलसम्पत् । वरुणे

धनसम्पत् । असुरे नृपतिभयम् । शेषे धनक्षयः । पापयक्ष्माख्ये रोगो । एवं प्रकारेण पश्चिमस्यां द्वारविचारः ।

| पश्चिमभागः | पितृ | दौवारिकः | सुग्रीवः | पुष्पदन्तः | वरुणः | असुरः | शोषः | पापः |
|---|---|---|---|---|---|---|---|---|
| फलम् | सुतपीडा | रिपुवृद्धिः | न सुतधनाप्तिः | सुतार्थफलसम्पत् | धनसम्पत् | नृपतिभयं | धनक्षयः | रोग |

**वधोबन्धो रिपुवृद्धिः सुतधनलाभः समस्तगुणसम्पत् ।**

**पुत्रधनाप्तिवैरं सुतेन दोषाः स्त्रियां नैःस्वम् ॥** बृहसंहिता-वास्तुविद्याध्यायः-75

रोगाख्ये वधबन्धः । सार्पे रिपुवृद्धिः । मुख्याख्ये सुतधनलाभः । भलाटे समस्तगुणसम्पत् । सौम्ये पुत्रधनाप्तिः । भौजङ्गे सुतेन सह वैरम् । आदित्ये स्त्रियां दोषाः । दिव्याख्ये नैस्वम् । एवं प्रकारेण उत्तरस्यां द्वारविचारः ।

| उत्तरभागः | रोगः | नागः | मुख्यः | भल्लाटः | सोमः | सर्पः | अदितिः | दितिः |
|---|---|---|---|---|---|---|---|---|
| फलम् | वधोबन्धः | रिपुवृद्धिः | सुतधनलाभः | समस्तगुणसम्पत् | पुत्रधनाप्तिः | वैरं | सुतेन दोषाः | स्त्रियां नैःस्वम् |

विषयोऽयं संक्षेपेणापि एवं वर्णितोऽस्ति । यथा -

**पूर्वादौ त्रिषडर्थपञ्चमलवे द्वाःसव्यतोऽङ्कोद्धृते ।**

**दैर्घ्ये द्व्यंशसमुच्छ्रिताब्धिलवके सर्वासु दिक्षुदिता ॥**

वास्तुरत्नावली-गृहद्वारनिर्णयाध्यायः

गृहदैर्घ्यं नवभागं कृत्वा पूर्वाभिमुखं गृहे क्रियमाणे वामभागादंशद्वयं त्यक्त्वा तृतीयांशे द्वारं कर्त्तव्यम् । एवं दक्षिणाभिमुखे गृहे दैर्घ्यं नवभागं कृत्वा अंशपञ्चकं त्यक्त्वा षष्ठांशे द्वारं कार्यम् । पश्चिमाभिमुखे अंशचतुष्टयं त्यक्त्वा पञ्चमांशे द्वारं कार्यम् । एवञ्च सर्वासुदिक्षु चतुर्थभागे द्वारं कार्यम् ।

पुनश्च उक्तमस्ति यत् –

**दैर्घ्यं नवांशात्पदमत्र सव्याद् द्वारं शुभं त्रिचतुर्थभागे ।**

**चतुर्थषष्ठे दिशि दक्षिणस्यां पश्चाच्चतुः पञ्चमके तथोदक् ॥**

वास्तुरत्नावली-गृहद्वारनिर्णयाध्यायः

दैर्घ्यं दक्षिणात् नवभागादत्र पदं ज्ञातव्यम् । पूर्वदिशि त्रिचतुर्थभागे द्वारं शुभं भवति । दक्षिणस्यां चतुर्थषष्ठभागे, पश्चिमस्यां चतुःपञ्चमके, उत्तरस्यामपि चतुःपञ्चमके द्वारं शुभं भवति ।

2.माससम्बन्धि - सूर्यस्य राशिस्थितिमाश्रित्य द्वारस्थापनविचारः अत्र वर्णितोऽस्ति यत् -

**अलित्रये पूर्वभागे दक्षिणे कुम्भतस्त्रिभे ।**


ISSN : 2249-538X

**वृषात्त्रिभे परे भागे उत्तरे सिंहतस्त्रिभे ॥**
**यस्यां दिशि यदा राहुः स्थितो लोकभयङ्करः ।**
**तस्यां दिशि तदा द्वारं न कर्त्तव्यं बुधैरिह ॥**

वास्तुरत्नावली – वास्तुनिर्णयाध्यायः,पृ-109

सूर्यस्य स्थितिः यदा वृश्चिकधनुमकरेति राशित्रये भवति तदा पूर्वभागे, कुम्भमीनमेषेति त्रये दक्षिणे, वृषमिथुनकर्केति पश्चिमे भागे एवं च सिंहतस्त्रिभे उत्तरे राहुस्तिष्ठति । लोकभयङ्करो राहुः यदा यस्यां दिशि तिष्ठति, तस्यां दिशि बुधैस्तदा द्वारं न कर्तव्यम् । विचारेऽस्मिन् अनेके विषयाः सन्ति । इदनीं द्वारस्थापने नक्षत्रस्य अथवा राशेः विचारः कथं क्रियते इति पश्यामः ।

3.भसम्बन्धि – भम् अर्थात् नक्षत्रम् अथवा राशिः । आदौ सूर्याधिष्ठितनक्षत्रानुसारं द्वारचक्रमाध्यमेन द्वारस्थापनविचारः -

**सूर्यर्क्षाद्युगभैः शिरस्यथ फलं लक्ष्मीस्ततः कोणभै-**
**र्नागैरुद्वसनं ततो गजमितैः शाखासु सौख्यं भवेत् ।**
**देहल्यां गुणभैर्मृति गृहपतेर्मध्यस्थितैर्वेदभैः**
**सौख्यं चक्रमिदं विलोक्य सुधिया द्वारं विधेयं शुभम् ॥**

मुहूर्त्तचिन्तामणिः-वास्तुप्रकरणम् -29

द्वारचक्रेऽस्मिन् नक्षत्राधारेण विचारः क्रियते । यथा सूर्याधिष्ठितनक्षत्रात् चतुर्भिः शिरसि अवस्थितैर्नक्षत्रैः गृहकर्तुर्लक्ष्मीप्राप्तिः भवति । ततः अष्टभिः कोणेष्ववस्थितनक्षत्रैः जनावासरहितम् इति । पुनः अष्टपरिमितैः द्वारशाखास्ववस्थितैः नक्षत्रैः सौख्यम् । ततः त्रिभिर्नक्षत्रैर्देहल्यवस्थितैर्गृहपतेः मरणं भवति । तदग्रिमैर्वेदभैश्चतुर्भिर्नक्षत्रैर्मध्यस्थितैः सौख्यम् । एवं प्रकारेण अत्र विचारः विधीयते ।

स्पष्टार्थं द्वारचक्रम् –

| सूर्याधिष्ठितनक्षत्रात् नक्षत्रसंख्या | 4 | 8 | 8 | 3 | 4 |
|---|---|---|---|---|---|
| फलम् | लक्ष्मीप्राप्तिः | वासहानिः | सौख्यम् | मृत्युः | सौख्यम् |

राश्यनुसारं द्वारविचारः –

**पूर्वे ब्राह्मणराशीनां वैश्यानां दक्षिणे शुभम् ।**
**शूद्राणां पश्चिमे द्वारं नृपाणामुत्तरे मतम् ॥** वास्तुरत्नावली-भूपरिग्रहाध्यायः

पुनः मुहूर्तचिन्तामणौ वास्तुप्रकरणस्य प्रथमश्लोके **द्वारं द्विजवैश्यशूद्रनृपराशीनां हितं पूर्वतः** इति वाक्यं दृश्यते । अर्थात् ब्राह्मणराशीनां कर्कवृश्चिकमीनास्तेषां पूर्वस्यां, वैश्यराशीनां वृषकन्यामकरास्तेषां दक्षिणदिशि,

शूद्रराशीनां मिथुनतुलाकुम्भास्तेषां पश्चिमदिशि, क्षत्रियराशीनां मेषसिंहधनूंषि तेषामुत्तरदिशि द्वारनिवेशः शुभः । यथोक्तं –

**कुलीरालिझषाणां च पूर्वद्वारं शुभावहम् ।**
**कन्यामकरयुग्मानां दक्षिणद्वारमिष्टदम् ।**
**तुलाकुम्भवृषाणां च पश्चिमाभिमुखं स्मृतम् ।**
**सौम्यद्वारं शुभाय स्यान्मेषसिंहधनुर्भृताम् ॥** वास्तुरत्नाकरः 8, 1 - 2

4. आयसम्बन्धि – गृहस्य आयाधारेण द्वारस्थापनमपि क्रियते । यथा -

**ध्वजादिकाः सर्वदिशि ध्वजे मुखं कार्यं हरौ पूर्वयमोत्तरे तथा ।**
**प्राच्यां वृषे प्राग्यमयोर्गजेऽथवा पश्चादुदक्पूर्वयमे द्विजादितः ॥**

मुहूर्त्तचिन्तामणिः – वास्तुप्रकरणम् -5

ध्वजे आये सति सर्वदिशि मुखं भवितुमर्हति, हरौ तु पूर्वयमोत्तरे तथा वृषे प्राच्यां, गजे तु प्राग्यमयोः अथवा द्विजादितः पश्चादुदक् पूर्वयमे द्वारं शुभं भवति ।

एवं रूपेण द्वारस्थापनविचारमाधारीकृत्य वास्तुशास्त्रोक्ताः केचन विषयाः अत्र विचारिताः सन्ति ।

**सन्दर्भग्रन्थसूची**

बृहत्संहिता – व्याख्याकार-श्री अच्युतानन्द झा- चौखम्बा विद्याभवन, वाराणसी ।

वास्तुरत्नावली – टीकाकार - श्री अच्युतानन्द झा- चौखम्बा अमरभारती प्रकाशन, वाराणसी ।

भवनभास्कर – राजेन्द्रकुमार धवन – गीताप्रेस, गोरखपुर ।

वास्तुरत्नाकरः – श्रीविन्ध्येश्वरीप्रसादद्विवेदी – चौखम्बा संस्कृत सीरीज आफीस, वाराणसी ।

बृहद्वास्तुमाला – मुक्तस्वाध्यायपीठम् , केन्द्रीयसंस्कृतविश्वविद्यालयः, नई दिल्ली ।

मुहूर्त्तचिन्तामणिः – डा. रामचन्द्र पाठक, चौखम्भा संस्कृत संस्थान, वाराणसी ।

# रसवदाद्यलङ्कारसमालोचनम्

डा. माचर्ल उमामहेश्वर रावु*

संस्कृतसाहित्ये साहित्यशास्त्रं सदा सर्वजनसुमनोहरं सत् सर्वैः समाश्रीयते । तस्मिन्नपारे साहित्ये यथा वाल्मीकिव्यासमहर्षिभ्यां विरचितेतिहासद्वारा महाकाव्यपरम्परायाः मार्गस्सुगमोऽभूत् । तद्यथा कालिदासरघुवंशे –

**अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः ।**
**मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥**

तथैव भरतमुनेः नाट्यशास्त्रद्वारा काव्यशास्त्रपरम्परापथः सुपथस्समभूत् । इदमलङ्कारशास्त्रं भामह-दण्डि-वामन-रुद्रट-उद्भट- रुय्यक-भोज- आनन्दवर्धन-विद्यानाथ- मम्मट-विश्वनाथ-जगन्नाथादिभिरालङ्कारिकैः परिपुष्टिमवाप । यतो हि तेषामलङ्कारग्रन्थेषु रस-अलङ्कार-रीति-ध्वनि-वक्रोक्ति-औचित्यानि तथा काव्यलक्षणानि माधुर्यादि गुणान् अभिधादिव्यापारान् काव्ये वर्णनीयांशान् परिहरणीयांशान् दोषान् इत्याद्यनेकांशान् ससूक्ष्मं विचार्य काव्यशास्त्रस्य गभीरतां प्रादर्शयन् । तादृक् सौन्दर्यशास्त्रम् लक्ष्यलक्षणग्रन्थैस्समन्वितं सहृदयसद्बोधकञ्च सदालोचनधारां धारयति ।

अपि च षड्रसाः यथा परस्परपूरकास्सन्तः भोजनस्वारस्य सम्पादने प्राधान्यं भजन्ते तद्वदेव काव्यरसस्यास्वादने षट् सम्प्रदायाः सहकुर्वन्ति । ते च –

- रससम्प्रदायः - भरतमुनिः
- अलङ्कारसम्प्रदायः - भामहाद्याचार्याः
- रीतिसम्प्रदायः - वामनाचार्यः
- ध्वनिसम्प्रदायः - आनन्दवर्धनाचार्यः
- वक्रोक्तिसम्प्रदायः - कुन्तकाचार्यः
- औचित्यसम्प्रदायः - आचार्यःक्षेमेन्द्रः

**अलङ्कारसम्प्रदायः -**

अलङ्कारशब्दविवेचनम् यथा –

अलम् + कृ + करणे घञ् इति व्युत्पत्या अलङ्कार इति शब्दो भवति । अर्थात् भूषणम् - तच्च साधनम् इति न तु साध्यम् । अलम् + कृ + भावे + घञ् इति व्युत्पत्या तु अलङ्कार शब्दस्य साध्यार्थः सिद्ध्यति ।

तस्मात् वामनाचार्योऽपि काव्यालङ्कारसूत्रे "काव्यं ग्राह्यमलङ्कारात्" इति सूत्रेण अलङ्कारशब्दः सौन्दर्यार्थे तथा काव्यग्रहणहेतु-प्रदर्शनपुरस्सरं तच्छास्त्रस्याप्यलङ्कारनाम्ना प्रसिद्धिः प्रतिष्ठिता स्यादिति स्वग्रन्थमारभत ।

*सहायकाचार्यः (अ), साहित्यविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

ततः "सौन्दर्यमलङ्कारः" इति स्पष्टीचकार । तच्च सौन्दर्यं पुनः दोषत्यागेन गुणालङ्कारग्रहणेन भवतीति तृतीयसूत्रमकथयत् । यथा - "स दोषगुणालङ्कारहानादानाभ्याम्" । अपि च रससम्प्रदये रसः अलङ्कार्यः शब्दार्थस्वरूपकाव्यस्य । रीति सम्प्रदाये रीति अलङ्कार्या । इत्थं क्रमशः तत्तत्सम्प्रदायानां शब्दार्थस्वरूपकाव्यस्य अलङ्कार्यत्वं (प्राधान्यम्) सिद्ध्यति । अस्माकं हिन्दुसंस्कृतौ कदाचित् कामपि स्त्रियं कुङ्कुमाद्यलङ्काररहीनवदनां पश्यामस्तर्हि सा सुन्दरी चेदपि सपदि तां कुङ्कुमं धर्तुं सूचयामः । यतो हि विना भूषणं तन्मुखं मनोहरं न भवति । इदमेव द्रढयति अचार्यदण्डी स्वकाव्यादर्शे "न कान्तमपि निर्भूषं विभाति वनितानननम्" इति । किञ्च काव्यस्य अलङ्कारत्वमलङ्कारैरेव सम्भवति । यथा –

**अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती ।**
**असौ न मन्यते कस्मादनुष्णमनलङ्कृती[१]।।**

आलङ्कारिकैः निरूपितालङ्कारसंख्या यथा –

भरतमहामुनिः नाट्यशास्त्रे - ४ (६-१६-१७ तमाध्यायेषु )

**उपमा रूपकञ्चैव दीपकं यमकं तथा ।**
**अलङ्कारास्तु विज्ञेयाश्चत्वारो नाटकाश्रयाः[२] ॥**

भामहः – ३८, दण्डिन् – ३७, उद्भटः-४९, वामनः – ३२, रुद्रटः – ६६, भोजः – ७२, मम्मटः – ७४, भट्टिः – ३८

रसवदाद्यलङ्कारविषये विभिन्नालाङ्कारिकाणां मतम् यथा –

ते राजानकरुय्यक – विश्वनाथ-अप्पय्यदीक्षिताचार्याः रसवदादीन् सप्तालङ्कारान् अङ्गीकृतवन्तः ।

आचार्यभामहेन चत्वारोऽलङ्काराः स्वीकृताः ।

एवञ्च भामहः रसादीन् रसवदलङ्कारत्वेन स्वीकृतवान् । उद्भटोऽपि तमेवानुसरन् विभावानुभावव्यभिचारिभिः प्रकाशितं रसं रसवदलङ्कारत्वेन प्रतिपादितवान् ।

जयदेवकृत चन्द्रालोके –

**रसभावतदाभासभावशान्तिनिबन्धनाः । रसवत्प्रेय ऊर्जस्विसमाहितमयाभिधाः[३] ।**
**भावानामुदयस्सन्धिः शबलत्वमिति त्रयः । अलङ्कारानिमान् सप्त केचिदाहुर्मनीषिणः ॥**

साहित्यदर्पणे यथा –

[१]चन्द्रालोकः १-८
[२]नाट्य६-१६-१७
[३]चन्द्र-५-११७


ISSN : 2249-538X

**रसभावौ तदाभासौ भावस्य प्रशमस्तथा । गुणीभूतत्वमायान्ति यदालङ्कृतयस्तदा । ।**

**रसवत्प्रेय ऊर्जस्वि समाहितमितिक्रमात् । भावस्य चोदये सन्धौ मिश्रत्वे च तदाख्यकाः**[१] ॥

**रसवदलङ्कारः** – साहित्यदर्पणस्य लक्ष्मीव्याख्याने रसवद् इति पदस्य व्युत्पत्तिं दर्शयन् रसो अस्यास्ति इति रसः ।

**भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।**

**सम्बन्धेऽस्ति विवक्षायां भवन्ति मतुबादयः ॥**

इति कारिकायामतिशयार्थः स्वीकर्तव्यः । यथा – धनवान् इत्यादि ।

**अयं स रसनोत्कर्षी पीनस्तन विमर्दनः ।**

**नाभ्यूरुजघनस्पर्शी नीवीस्त्रंसनः करः** ॥ महाभारतम् – स्त्रीपर्व २४ अध्याये

अत्र युद्धरङ्गे मृतस्य भर्तुःभूरिश्रवसः भग्नं हस्तं वीक्ष्य तद्भार्यायाःविलपनं तथा हस्तस्य दर्शनेन पीनस्तनविमर्दनादि श्रृङ्गारचेष्टाःवर्णिताः । पत्युःमरणेन जायमान शोकवर्णनत्वात् प्रधानतया करुणरसोऽस्ति । किन्तु तस्मिन्नेव सन्दर्भे तत्करेण विहितश्रृङ्गारचेष्टानां वर्णनेन विप्रलम्भश्रृङ्गारःपरिपुष्टिमवाप । तेन श्रृङ्गारः करुणस्याङ्गतां नीत इति रसवदलङ्कारो भवति ।

रसवदलङ्कारः - आनन्दवर्धनाचार्यमतौ

**प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गन्तु रसादयः ।**

**काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः**[२] ॥

स च रसालङ्कारस्तु द्विविधः । शुद्धं सङ्कीर्णश्चेति ।

अर्थात् यत्रैको रसः रसान्तरस्य भावस्य वा अङ्गत्वेन उपवर्ण्यते तत्र रसोऽस्तीति व्युत्पत्या रसवदलङ्कारः ।

तत्र शुद्धं यथा –

**किं हास्येन न मे प्रयास्यसि पुनः प्राप्तिश्चिराद्दर्शनं केयं निष्करुणप्रवासरुचिता केनासि दूरीकृतः ।**

**स्वप्नान्तेष्विति ते वदन् प्रियतमव्यासक्तकण्ठग्रहो बुद्ध्वा रोदिति रिक्तबाहुवलयस्तारं रिपुस्त्रीजनः ॥**

भोः मया सह किमर्थं हास्यचेष्टादिकं ते ? बहोः कालादनन्तरं मत्सकाशमागतोऽसि । कृपया पुनर्मा प्रति गच्छ । हे दयाविहीन ! कुतो वा इदृशी रुचिः प्रवासे ? मत्तः क एवं दूरीकरोति? स्वप्नान्तेष्वित्थं स्वप्रियकण्ठं परिष्वजमानस्ते शत्रुस्त्रीजनः निद्रायाः प्रतिबुध्य शून्यबाहुयुक्तस्सन् उच्चैः विलपतीति । श्लोकेऽस्मिन्

[१]साहित्य- ९५,९६

[२]ध्वन्यालोकः २-५



#112

शोकस्थायिभावेन स्वप्नदर्शनोद्दीपितेन करुणरसेन चर्व्यमाणेन सुन्दरीभूतो नरपतिप्रभावो भातीति करुणश्शुद्ध एवालङ्कारः ।

सङ्कीर्णं यथा –

**क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितःसम्भ्रमेण ।**
**आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः कामीवापराद्र्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः ॥**

यश्च शराग्निः अश्रुभिर्युक्त कुवलयनयनैः त्रिपुरासुरयुवतिभिः कृतनवापराध-कामुक इव स्पृष्टहस्ताभ्यां दूरं क्षिप्यमानः बलाद्वस्त्रं गृह्णन् ततः प्रक्षिप्तं केशेषु पतमानः सपदि पादयोः पतन् तत्क्षणे परिष्यज्यमानं तिरस्क्रियमाणस्स त्रिनयनस्य बाणाग्निः युष्माकं पापं भस्मीकरोत्विति ।

अत्र परमशिवस्य शराग्निः अस्माकं पापं भस्मीकरोत्विति प्रार्थयन् कविः करुणरसस्याङ्गत्वेन कामीव इति व्यपदेशाद्विप्रलम्भश्शृङ्गारोऽङ्गताङ्गत इति सङ्कीर्णालङ्कारः । तस्मदयं रसवदलङ्कारस्थानमेति ।

**प्रेयोलङ्कारः**

यत्र भावः अपरस्याङ्गं तत्र प्रेयोऽलङ्कारः । प्रकृष्टप्रियत्वं प्रेय इत्युच्यते । भावो नाम विभावादिपरिपुष्टा निर्वेदादयस्त्रयस्त्रिंशद्भावा देवता-गुरु-राजविषयिणी रतिरेव ।

**कदा वराणस्याममरतटिनीरोधसि वसन् वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटम् ।**
**अयि गौरीनाथ ! त्रिपुरहर ! शम्भो ! त्रिनयन ! प्रसीदेत्याक्रोशन् निमिषमिव नेष्यामि दिवसान् ॥**

कदा वा कश्यां परमपावन्याः भगारथ्यास्तीरे स्थित्वा केवलं कौपीनं धृत्वा शिरसि मुकुलीकृतहस्तद्वयं संस्थाप्य परमशिवं अयि गौरीनाथ ! त्रिपुरहर ! शम्भो ! त्रिनयनेत्यादि नामभिः संस्मरन् प्रसीदेति संप्रार्थयन् क्षणमिव दिनानि यापयिष्यामि इति ।

एवमत्र कस्यचिद्भक्तस्य परमशिवे विद्यमान विशिष्टभक्तिभावोऽत्र वर्णितः । तस्मादत्र प्रेयो नामालङ्कारो भवति । अनुचितविभावालम्बनत्वं रसाभासत्वम्[१] ।

**ऊर्जस्वि-अलङ्कारः (रसाभासे)**

**वनेऽखिलकलासक्ताः परिहृत्य निजस्त्रियः ।**
**त्वद्वैरिवनितावृन्दे पुलिन्दाः कुर्वते रतिम् ॥**

हे राजन् ! अरण्ये केचन पुलिन्दाः सकल कलासु निपुणाः स्वकीय पत्नीः परित्यज्य भवच्छत्रोःस्त्रीसमूहेन सह रतिं कुर्वन्ति । इति ।

अत्र कस्यचित् चाटुकारः राजविषयकरतिभावं प्रकटयन् किराताः निजनारीजनान् विहाय शत्रोःवनिता-

[१]रसगङ्गाधरः ७६


ISSN : 2249-538X

भिस्सह प्रचलितरतिविषयकवर्णनत्वात् रसाभासरुप ऊर्जस्वि-अलङ्कारः परिगण्यते ।

ऊर्जस्वि-अलङ्कारः (भावाभासे)

**त्वयि लोचनगोचरं गते सफलं जन्म नृसिंह ! भूपते ! ।**
**अजनिष्ट ममेति सादरं युधि विज्ञापयति द्विषां गणः ।**

अत्र प्रभुविषयकरतिभावस्य तद्विषयकशत्रुभय इति रुपोऽङ्गमिति भावाभास ऊर्जस्वि-अलङ्कारः ।

**अविरल कराल कम्पनैर्भ्रुकुटी तर्जनगर्जनैर्मुहुः ।**
**ददृशे तव वैरिणां मदः स गतः क्वापि तवेक्षणं क्षणात् ॥**

हे राजन् ! भवच्छत्रूणां निरन्तरखड्गकम्पनैः भ्रुकुटिभर्त्सनैः गर्वध्वनिभिर्मत्तता दृष्टा (केनचित्) । किन्तु भवद्दर्शने सा च भावना अदृश्यताङ्गत्तेति ।

**भावोदयालङ्कारः**

**मधुपानप्रवृत्तस्ते सुहृद्भिः सह वैरिणः ।**
**श्रुत्वा कुतोऽपि त्व न्नाम लेभिरे विषमां दशाम् ॥**

हे राजन् ! मित्रैस्सह मदिरासेवने दत्तचित्त्ताः ते शत्रवः अकस्मात् कस्माच्चिज्जनात् भवन्नामाकर्ण्य सङ्कटमयीमवस्थामवापुः ।

अत्र त्रास इति व्यभिचारिभावो राजविषयकरतिभावस्याङ्गतां गतः । तस्मादयं भावोदयो नामालङ्कारः ।

**कुवलयान्दे यथा –**

**तदद्य विश्रम्य दयालुरेधि मे दिनन्निनीषामि भवद्विलोकिनी ।**
**अदर्शि पादेन विलिख्य पत्रिणा तवैव रूपेण समस्स मत्प्रियः ॥** नैषधम् ९-६६.

अत्र स्वप्रियस्य नलमहाराजस्य चित्रम् आलिखतवत्याः दमयन्त्याः लज्जाभावस्योदयःतद्विषयकश्रृङ्गारस्याङ्गताम-वाप । तस्मादत्र भावोदयो नामालङ्कारः ।

**भावसन्धिः**

**जन्मान्तरीण रमणस्याङ्ग सङ्ग समुत्सुका ।**
**सलज्जा चान्तिके सख्याः पातु नः पार्वती सदा ॥**

एकदा उमा महेश्वरम् आलिङ्गनं कर्तुमुत्सुका जाता । तदैव आगतवत्याः स्वसख्याः दर्शनेन लज्जमापन्ना पार्वती अस्मान् रक्षतु इति ।

अत्र औत्सुक्यलज्जारुपभावयोः सन्धिः पार्वतीविषयकरतिभावस्य अङ्गमित्यतः भावसन्धिर्नाम अलङ्कारो

भवति ।

**भावशबलता**

**पश्येत् कश्चिच्चल चपल रे ! का त्वराऽहं कुमारी हस्तावलम्बं वितर हहहा ! व्युत्क्रमः क्वासि यासि ।**
**इत्थं पृथ्वी परिवृढ ! भवद्विद्विषोऽरण्यवृत्तेः कन्या काचित् फलकिसलयान्याददानाऽभिधत्ते ॥**

कस्यचित् कवेः राजप्रतापवर्णनोक्तिरियम् । पराजयेन वनवासिनः कस्यचिद्राज्ञः फलकिसलयान्याददानायाः कुमार्याः कस्यचिद्वनेचरस्य च संवादोऽत्र दृश्यते । यथा-

कुमारी – हे चञ्चलमनस्क ! कोऽपि जनः अस्मान् अवलोकयेत् !

मया सह अन्यत्र आगच्छा ।

वनेचरः – कुतो वा शीघ्रता ?

कुमारी – अहं रजकुमारी । भवता सह चरन्तीं मां न कोऽपि पश्येत् ।

वनेचरः – मे करावलम्बनं कुरु ।

कुमारी – हहहा ! अहो विपरीतं वदसि ! राजकुमारी भूत्वा कथं तथा व्यवहरामीति ।

अत्र शङ्का- असूया – धृति – स्मृति – श्रम- दैन्य विविधौक्यानां भावानां शबलता राजविषयकदूतीभावस्याङ्गमिति भावशबलता नामालङ्कारो भवति ।

निष्कर्षः – भामहोद्भट-रुद्रटादि आलङ्कारिकाः रसान् पृथक् काव्यस्य शोभाधायकत्वेन नाङ्गीकृतवन्तः । किन्तु तेषां स्थाने रसवदाद्यलङ्कारान् स्वीचक्रुः । परं रसवादिनः काव्यशोभायै अलङ्काराः नैव प्राधान्यं भजन्त इत्यभिप्रयन्ति ।

एवं सति आनन्दवर्धनाचार्यः "प्रधानेऽन्यत्र वाक्यार्थे" इत्यादि कारिकाद्वारा अलङ्काराः काव्यशोभायै मुख्या इति स्पष्टीचकार ।

**परिशीलितग्रन्थसूची**


- चन्द्रालोकः – जयदेवः (डा. श्रीकृष्णमणित्रिपाठी)
- नाट्यशास्त्रम् – भरतमुनिः (अभिनवगुप्तः)
- साहित्यदर्पणम् – विश्वनाथः ( चन्द्रकला संस्कृत-हिन्दीव्याख्योपतम्- आचार्य शेषराजशर्मा रेग्मी)
- ध्वन्यालोकः – आनन्दवर्धनः – (महामहोपाध्याय पुल्लेल श्रीरामचन्द्रुडु)
- रसगङ्गाधरः – जगन्नाथपण्डितः (चन्द्रकला संस्कृत-हिन्दीव्याख्योपतम्)
- काव्यादर्शः – दण्डिः (मूलम्- CSU)
- रघुवंशः – कालिदासः (मल्लिनाथ सूरिः)

# समायोजनम्
# (Adjustment)

आचार्यः रामचन्द्रुलबालाजी*

**शोधसारः –**

'समायोजनं' मनोविज्ञाने काचित् संस्थितिः दशास्थितिः(condition)वा वर्तते । इयं संस्थितिः मानवम् अपेक्षितं परिवर्तनम् अग्ङीकर्तुं प्रेरयति । अत्र परिवर्तनस्य तात्पर्यं शारीरिकं व्यावसायिकं सामाजिकं च वर्तते । अन्यस्मिन् चिन्तने मानवस्य आवश्यकतानां पूर्त्यर्थं समायोजनं काचित् तुलिता समीकृता वा व्यावहारिकी प्रक्रिया विद्यते या बहून् अन्तर्द्वन्द्वान् (conflicts) अपहरति दूरीकरोति च । प्रस्तुते शोधपत्रे समायोजनसम्बध्दाः बहवः अंशाः विश्लेषिताः सन्ति ; तेषु किं नाम समायोजनम् ? कुत्र समायोजनम् आवश्यकम् ? उत्तमसमायोजकस्य विशेषताः काः ? कुसमायोजकस्य विशेषताः काः ? कुसमायोजकस्य कारणानि कानि ? कुसमायोजकस्य उपचारः कः ? इत्येतान् विषयान् एतत् शोधपत्रं प्रतिपादयति । इदं शिक्षार्थिनां कृते मनोविज्ञानसम्बध्दं महत्त्वपूर्णं सम्पत्ययं स्पष्टयति ।

**प्रमुखशब्दाः** – अस्मिन् शोधपत्रे कुञ्चिकापदानि अग्रलिखितानि सन्ति ; समायोजनं, सामञ्जस्यं, परिवेशः, अपेक्षाः, कुसमायोजनम्, इङ्गितभावः, तन्यता इत्यादीनि ।

सर्वेऽपि जनाः प्रशान्तमयं दुःखक्लेशरहितं जीवनयापनं वाञ्छन्ति । परन्तु, एतादृशं निरामयं सुखमयं जीवनं प्रायः विरलाणामेव सम्भवति । तत्र यद्यपि बहूनि कारणानि भवन्ति, यथा धनम् आरोग्यं बहुविधाकाङ्क्षाः, सामाजिकस्थितिः, व्यक्तित्वम् इत्यादीनि बहूनि, परन्तु प्रधानं कारणं समायोजनं भवति । अतः वक्तुं शक्यते यत् शान्तिपूरकं जीवनं केवलं समायोजनेन सम्भवति ।

अस्माकमावश्यकतानां पूरणे परिवेशानुगुणं सन्निवेशानुगुणं सानुकूलरूपेण व्यवहारपरिवर्तमेव समायोजनमिति नाम्ना वक्तुं शक्यते । अत्र बहूनि निर्वचनानि वर्तन्ते । तत्र कानिचन -

१. **रूथस्ट्रेंजमहोदयस्य** कथनानुसारं "सामञ्जस्यं नाम स्थितिर्नास्ति परन्तु गत्यात्मिका आजीवने जायमाना अनुस्यूता प्रक्रिया" । ("Adjustment is a process not a state, it is continuous throughout life". – Ruth Strang.)

२. **सफरवर्यस्यानुसारं** "समायोजनम् एका प्रक्रिया भवति, यत्र जीविनः आवश्यकतानां पूरणार्थम् अपेक्षाभिः, परिवेशेण च समतौलनं प्राप्तुं प्रयत्नशीलाः भवन्ति" । (According to Shaffer L. S. "Adjustment is the process by which living organism maintain a balance between his needs and the circumstances that influence the satisfactions of thease needs".)

३. **कार्टर. वी. गुडमहोदयस्यकथनानुसारं** "समायोजनं नाम परिवेशस्य परिवर्तनानुगुणम् अथवा वातावरणानुगुणं

*शिक्षाशास्त्रविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, राजीवगान्धी परिसरः, शृङ्गेरी

च तदनुरूपव्यवहारप्रक्रिया" । (According to Cartar V. Good– "Adjustment is the process of finding and adopting modesof behaviour suitableto the environment or the change in the environment".)

अनेन ज्ञायते यत् अस्माकं दैनन्दिनजीवने वातावरणानुसारम् अस्माभिः बहुविधसामञ्जस्यानि प्राप्तव्यानि भवन्ति ।

**कुत्रसमायोजनमावश्यकम्**(Where Adjustment is Necessary ?)

१. परिवेशेण साकम्(With the environment)

२. परिवारजनैः साकम्(With the family members)

३. समाजेन साकम् (With the society)

४. अपेक्षादिभिस्साकम्(With expectations)

**उत्तमसमायोजकस्यविशेषताः**(Charecteristics of a well adjusted person)

१. चिन्तने परिपक्वता(Maturity in thinking)

२.सांवेगिकानुकूलनम् सांवेगिकसमतौल्यं च (Emotional Adaptation or Balance)

३. इङ्गितज्ञत्वम्(Understanding others state)

४. स्वतन्त्रनिर्णेता (Independent Judge)

५. आत्मनः सामर्थ्यानां विषये अवबोधः (Understanding about own abilities)

६. व्यवहारे नमनीयता(Flexible in behaviour)

७. नित्यजीवने तन्यतायाः अभावः(Stressless in Daily Life)

८.वास्तविकप्रपञ्चप्रत्यक्षीकरणसामर्थ्यम्(Ability to Perceive facts)

९. अन्यदोषान् न परिगणयति (Does not count the faults of others)

**कुसमायोजकस्यविशेषताः**(Charecteristics of a mal adjustment person)

१. कार्यमध्ये स्थगनं कार्यकरणे भीरूता च(withdrawl and timidity)

२. लज्जालुः सङ्कुचितस्वभावी(Shyand Narrow minded)

३. अत्यधिकः क्रोधपूर्वकव्यवहारः(Extremely anger temper)

४. व्याकुलता (Anxiety)

५. शक्तिम् अतिक्रम्य आकाङ्क्षी (Aspiration beyond of capacity)

६. सङ्कोचभावः (Hesitation)


ISSN : 2249-538X

७. निराशाभावः (Feelings of disappointment)

८. रोदनस्वभावः (Crying Temperament)

९. अधिक-हृदयस्पन्दनम् (Palpitation)

१०. कम्पनस्वभावः (Shivering Temperament)

**कुसमायोजनस्यकारणानि**(Causes of mal adjustment)

१. परिवारे भद्रताभावः (Insecurity in Family)

२. सामाजिककारणानि (Social causes)

३. आर्थिककारणानि (Economic causes)

४. मनोवैज्ञानिककारणानि (Psychological causes)

५. वैयक्तिककारणानि (Personal causes)

६. विद्यालयीयकारणानि (School related causes)

७. शैक्षिककारणानि (Academic causes)

८. मित्रसमूहकारणानि (Peer group related causes)

**कुसमायोजनस्यउपचाराः**(Remedies of Mala Adjustment)

१. प्रत्यभिज्ञानम् (Identification)

२. क्षतिपूर्तिः (Compensation)

३. वैयक्तिकसाक्षात्कारः परामर्शश्च (Interview& Counseling)

४. प्रक्षेपीकरणम् (Projection)

५. दिवास्वप्नः (Day Dream)

६. मनोचिकित्सा (Psychotherapy)

७. प्राथमिकावश्यकतानां पूरणम्(Satisfaction of basic Needs)

८. व्यवहारे नमनीयता (Flexibility in Behaviour)

९. सन्तुलनात्मकं दार्शनिकं जीवनयापनम् (A Balanced Philosophical Life)

१०. वास्तविकप्रपञ्चस्य प्रत्यक्षीकरणम् (A perception of realistic world)

**सन्दर्भाः(References) -**

1. अरुण कुमार सिंह,संज्ञानात्मक मनोविज्ञान(2006), मोतीलाल बनारसीदास, दिल्ली
2. प्रवीण शर्मा, शिक्षा मनोविज्ञान एवं मनोवैज्ञानिक परीक्षण(2010), शिप्रा प्रकाशन, दिल्ली

3. प्रो. सुरेश भवनागर, डा. प्रदीप सिंह, डा. विनोद कुमार चाइल्डहुड एण्ड डवलपमेंट इयर्स(2016), आर लाल बुक डिपो, मेरठ
4. गणपत राम शर्मा, हरिश्चन्द्र व्यास,अधिगम– शिक्षण और विकास के मनो – सामाजिक आधार(2020), राजस्थान हिंदी ग्रंथ अकादमी, जयपुर
5. डा. एस.एस.माथुर, शिक्षा मनोविज्ञान(2000), विनोद पुस्तक मंदिर, आगरा

 ISSN : 2249-538X

# पारिवारिकमूल्यानां संरक्षणे गृहस्थाश्रमस्य काव्यानां च योगदानम्

डा. श्रीकरः वि.*

**शोधसारः –**

काव्येषु भावान्, अनुभावान् च, अभिव्यञ्जयितुं अद्वितीयक्षमता भवति । काव्यं जनानां मनसि गभीरं प्रभावं जनयितुं शक्नोति । यदा पारिवारिकमूल्यानां विषये चिन्तयामः तदा काव्यानि परिवारस्य पारस्परिकप्रेम्णः, एकतायाः, अवगमनस्य, समर्थनस्य च महत्त्वं बोधयितुं शक्तिशालिमाध्यमरूपेण कार्यं कुर्वन्ति । अत्र काव्यानि पारिवारिकमूल्यानां रक्षणं, सुदृढीकरणं च कथं कर्तुं शक्नुवन्ति इति जिज्ञासायां कश्चन विचारः कृतः वर्तते ।

**प्रमुखशब्दाः** – काव्यानि,पारिवारिकमूल्यानि,कालिदासः,गृहस्थाश्रमः,विवाहः ।

अन्ताराष्ट्रियपरिवारदिवसः मे मासस्य पञ्चदशदिनाङ्के आचर्यते । यः वैश्विकपरिवारदिवसः इति अपि प्रसिद्धः वर्तते । , सः एकः महत्त्वपूर्णः अवसरः अस्ति यः वैश्विक रूपेण कौटुम्बिकव्यवस्थायाः महत्त्वं सम्मानयितुं विविधसंस्कृतिषु पृष्ठभूमिषु च परिवारेषु एकतां प्रवर्धयितुम् आचर्यते । परिवारः समाजस्य लघुतमः खण्डः अस्ति, तथा च महत्त्वपूर्णोऽपि अस्ति । दृढीयान् पारिवारिकसम्बन्धः भवति चेत् व्यक्तेः समर्थनं तस्मै सुरक्षितं वातावरणं च प्राप्यते । तेन व्यक्तित्वस्य विकासः भवति । तन्माध्यमेन उत्तमसमाजस्यापि निर्माणं भविष्यति ।

कौटुम्बिकं जीवनं, तत्रापि अविभक्तकुटुम्बे परस्परं सौहार्देन जीवनयापनं भारतीयानां वैशिष्ट्यम् । कुटुम्बस्य प्रधानस्तम्भः भवति कुटुम्बजनानां मध्ये वर्तमानं परस्परं प्रेम । किन्तु आधुनिके समाजे कुटुम्बस्य सदस्येषु परस्परं प्रेमविश्वासादीनामभावो वर्तत इति । पुत्रः पितरं द्वेष्टि, अनुजोऽग्रजं, श्वशुरौ स्नुषाम् द्विष्टः, पत्नी पतिं, पतिः पत्नीम् -एवमेवानुवर्तते द्वेषपरम्पराऽऽधुनिके कुटुम्बे । विवाहानन्तरं केनापि कारणेन पति-पत्न्योः सम्बन्धो न निवर्तत इति मन्वादयो धर्मशास्त्रकारा वदन्ति । किन्तु अत्यल्पं कारणं पुरस्कृत्य विवाहविच्छेदसन्दर्भाः बहुत्र दृग्गोचरा भवन्ति । तत्र यद्यपि अनेकानि कारणानि स्युः, तथापि प्रधानं कारणं तु सङ्कुचितं मन एवेति स्पष्टं विज्ञायते । तादृशानां सामान्यजनानां कृतेऽयं मदीयः, एषोऽन्य इत्यादिभावनैव प्रिया भवति । किन्तु विशालहृदयाः विश्वकुटुम्बिनो भवन्ति । अत एवोच्यते-

अयं निजः परो वेति गणना लघुचेतसाम् । उदारचरितानां तु वसुधैव कुटुम्बकम् ॥[१]

इति । कवयोऽपि लोकसङ्ग्रहनिरताः सन्तः स्वकाव्येषु कुटुम्बस्यौन्नत्यं चित्रयित्वा लोकानां पुरतः कुटुम्बस्यादर्शं प्रास्तुवन् । रामायणे रामस्य पितृवाक्यपरिपालनं, भ्रातृस्नेहः, सीतायामतिशयितोऽनुरागः, भरतस्य भ्रातृप्रेम, लक्ष्मणस्य रामान्तर्गतत्वं, सीतायाः पातिव्रत्यं सहनशीलता च, कौसल्यायाः दुःखसहनम्, महाभारते द्रौपद्याऽनुसृतानि कौटुम्बिकजीवनतत्त्वानि, भासमहाकवेः रूपकेषु कौटुम्बिकजीवनस्य प्राधान्यं, कौटुम्बिकं प्रेम, कालिदासस्य कृतिषु कौटुम्बिकजीवनस्यौन्नत्यम् इत्यादिसन्दर्भा अधुनिककुटुम्बजीवनं समीकर्तुं मार्गदर्शका

---

*सहायकाचार्यः (सं), साहित्यविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

[१]हितोपदेशः २,३-७१

भवन्तीति निश्चप्रचं वक्तुं शक्नुमः । काव्येषु गृहस्थाश्रमस्य विशदवर्णनस्य कारणं किं स्यादिति चिन्त्यमाने सति उच्यते-

**गृहस्थाश्रमस्य महत्त्वम्**

कामः सृष्टेः परमसत्यमस्ति । एतदर्थं प्रतिष्ठितरीत्या कामसेवनं कर्तुं वैदिककाले एव 'विवाहसंस्था' विकसिता आसीत् । ऋग्वेदीये समाजे पारिवारिकजीवनम् एतादृशे विकसिते रूपे आसीत् यदत्र माता, पिता, पुत्रः पुत्री, पतिः, पत्नी इत्यादयः सर्वेऽपि सम्बन्धाः आसन् । अथ च अनेन प्रकारेण अस्मिन् समाजे गृहस्थाश्रमः विकसिते रूपे आसीत् । अस्य आश्रमस्य आधारभूता विवाहप्रथा समीचीनतया प्राचलत् । प्राचीनभारतीये समाजे वर्णव्यवस्था एवं वर्णाश्रमव्यवस्था विकसिता आसीत् । अनया व्यवस्थया श्रमविभाजनादिना भारतीयसमाजस्य दृढे संघटने अनुशासने, अथ च तस्य सम्पन्नत्वस्य सुखसमृद्धियुक्तत्वस्य बलिष्ठत्वस्य च सम्पादने महत्त्वपूर्णयोगदानं दत्तम् ।

वेदेषु पुराणेषु इतिहासेषु किं बहुना, समस्ते संस्कृतसाहित्ये च गार्हस्थ्यस्य माहात्म्यम्, पोष्यवर्गं सुतादिरूपं कुटुम्बं चाधिकृत्य महान् विचारः प्रवृत्त उपलभ्यते । यद्यपि वर्णाश्रमधर्मा एतेषां ग्रन्थानां मुख्यतया प्रतिपाद्यविषया न भवन्ति, तथापि मनुष्यकथानुगायिषु तेषु ग्रन्थेषु महात्मभिः महर्षिभिः चतुर्णामाश्रमाणां विशिष्य गार्हस्थ्यस्य च भूयान् विचारः कृत इत्येतत् स्वभावसिद्धमेव । किन्तु वर्णाश्रमधर्ममधिकृत्य शास्त्रीयया रीत्या कूलङ्कषो विचारः मन्वादिप्रणीतेषु धर्मशास्त्रग्रन्थेषु दरीदृश्यते ।

त्रिभिः ऋणैः साकं जायमानः मानवः स्वाध्यायेन यागाद्यनुष्ठानेन पुत्रोत्पादनेन च तेभ्यो विमुच्यत इति बहोः कालात् प्रभृति भारतीया जना मन्यन्ते । स्वाध्यायेन अथवा ब्रह्मचर्येण आर्षयागाद्यनुष्ठानेन दैवात्, पुत्रोत्पादनेन पित्रृऋणात् मानवः विमुक्तो भवति । प्रागुक्तात् त्रिविधादपि ऋणात् गृहस्थ एवात्मानं मोचयितुं शक्नोतीति गार्हस्थ्यमाश्रमं श्रेष्ठतरं मन्यन्ते महर्षयः । तदुक्तं मनुना

यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः । तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः ॥[१]

अकृतोद्वाहस्य पुंसः दैवात् पित्र्यात् च ऋणात् विमुक्तिरसाध्या । याज्ञिकेषु कर्मसु दम्पत्योः सहैवाधिकारः महर्षिभिर्विहितः । धर्मपत्नीं विना यागादिकर्म अनुष्ठातुं न शक्यते । 'पाणिग्रहणादधिगृहमेधिनो व्रतम्' इत्यापस्तम्बसूत्रोक्तं गृहमेधिनोरिति द्विवचनम् एकाकिनः यज्ञेष्वनधिकारं स्पष्टमभिधत्ते । धर्मपत्नी यदि म्रियेत तर्हि तत्सम्बन्धिनीनामपरक्रियाणां करणादूर्ध्वं पुनर्विवाहः कार्य इति याज्ञवल्क्यस्मृतिव्याख्याने अपरार्केणाचार्येणाभिहितम् । तथा हि-

भार्यायै पूर्वमारिण्यै दत्त्वाग्निं विधिपूर्वकम् ।

[१]मनुस्मृति ३.७७

 ISSN : 2249-538X

पुनर्दारक्रियां कुर्यात् पुनराधानमेव च ॥[१]

इति विधिवत्परिणीतायामेव कन्यायां पुत्रोत्पत्तिमनुमन्यन्ते धर्मशास्त्रकाराः । तादृश एव पुत्रः पितरौ पुन्नाम्नः नरकात् त्रायते इति धर्मशास्त्रमुद्घोषयति । एतावता देवपितृयज्ञौ कर्तुं कृतपत्नीपरिग्रह एव शक्नोतीति सिद्धम् । स्मृति-प्रसिद्धेषु षोडशसु संस्कारेषु मुख्यभूतः संस्कारः विवाह एवेत्यस्मिन् विषये धर्मशास्त्रकाराणां मतैक्यमस्ति । वि इत्युपसर्गात् 'वह प्रापणे' इति धातोः घञि प्रत्यये विवाहशब्दः निष्पद्यते । कुटुम्बव्यवस्थायाः प्रारम्भः विवाहादारभ्यते खलु ? उद्वाहः दारकर्म, दारपरिग्रहणम्, उपयमः, परिणयः, पाणिग्रहणम्, इत्यादीनि विवाहवाचकानि पर्यायपदानि भवन्ति । एतानि पदानि क्वचित् अर्थविशेषमपि सूचयन्ति । तथा हि विवाहशब्दः कन्यासंस्कारं सूचयति । उद्वाह-शब्दस्तु वरसंस्कारं च मुख्यतया सूचयति । तदुक्तं काठकगृह्यसूत्रे - 'कन्यासंस्कारो विवाहः । वरसंस्कारस्तु उद्वाह ' इति । अकृतविवाहः गार्हस्थ्ये विहितानि कर्माणि अनुष्ठातुं न अर्हति । विवाहेन संस्कारेण पत्नी पत्युरर्धं सञ्जायते । 'अर्धं वा एषा यत् पत्नी'[२] इति श्रुतिवाक्यमपि एतत्सूचयति । अर्धमर्धेन सङ्गतं किल पूर्णमिति कथ्यते । तथा च विवाहसंस्कारेणैव पूर्णता प्राप्यत इति बोध्यम् ।

दम्पती इति पदं पदद्वयघटितं भवति । ऋग्वेदे 'दम्' इति पदं गृहवाचकत्वेन प्रयुज्यते । ततश्च दम्पती इति पदस्य गृहपतिरित्यर्थः सिद्ध्यति । विश्वासां त्वा विशां पतिं हवामहे, सर्वासां समानं दम्पतिम्[३] इत्यादिषु ऋङ्मन्त्रेषु । प्रगुक्तोऽर्थः अस्माभिः दृश्यते । भर्ता हि भार्याया प्रभुरित्येष प्राचां सङ्कल्पः पश्चात् कालिदासादीनां महाकवीनां कृतिष्वपि विलोकयितुं पार्यते । तथा हि -'उपपन्ना हि (उपयन्तुर्हि ) दारेषु प्रभुता सर्वतोमुखी' (शाकुन्तलम्-५/२९) इति वाक्यं तदेव सूचयति । गृहस्याधिपतित्वेन पतिं पत्नीं च सङ्कल्प्य केचन मन्त्राः पश्चात्काले प्रसिद्धिं प्राप्ताः । जायापती इति द्वन्द्वसमासः प्रकृते स्मर्तव्यतामर्हति । उभयपदार्थप्रधानः द्वन्द्वः इति वचनात् प्रागुक्ते पदे द्वयोः जायापतिपदार्थयोः तुल्यं प्राधान्यं विद्यते । एवं "मे ने इव तन्वा शुभमाने दम्पतीव क्रतुविदा जनेषु"[४] इत्याद्या मन्त्राः स्त्रीणामधिकारस्य वृद्धिं सूचयति । गृहस्य जायायाः पतिरित्यर्थे प्रयुज्यमानं दम्पतिपदं गृहस्य स्वामिनौ सूचयति ।

धर्मशास्त्रेषु अष्टविधा विवाहाः प्रतिपादिताः सन्ति । तेषु प्रथमे चत्वारः प्रशस्ताः, अत एवं ग्राह्या इति, शिष्टाश्चत्वारः अप्रशस्ताः, अत एव त्याज्या इति च धर्मशास्त्रग्रन्थेषु उपलभ्यते । अस्मिन् विषये ब्राह्मणादिवर्णभेदेन महान् भेद आचार्यैरुच्यते । विवाहसंस्कारानुबन्धिषु कर्मसु सर्वेषामाचार्याणां मतभेदो विद्यत इत्येतत् अत्र प्रस्ताव्यम् । तथापि-अनिन्दितैः स्त्रीविवाहैः अनिन्द्या भवति प्रजा इत्यस्मिन् विषये सर्वेऽपि एकाभिप्राया एव । अप्रशस्तेन प्रतिलोमेन च विवाहेन जायमानाः पुत्राः धर्मानुष्ठानेऽनर्हा भवन्तीति गौतमो मन्यते । विवाहे वधूवरयोः

[१]मनु ५.१६६
[२]तैत्ति ब्र ३.३.३.५
[३]ऋग्वेद .१२७.७
[४]ऋग्वेद २.३९

वयोविषयेऽपि धर्मशास्त्रकाराणां मतभेदाः सन्ति । सर्वं भार्याधीनं भवतीति मनुरभिप्रैति । तदुक्तम्-

अपत्यं धर्मकर्माणि शुश्रूषा गतिरुत्तमा ।
दाराधीनस्तथा स्वर्गः पितॄणामात्मनश्च ह ॥[१]

**कालिदासकाव्येषु विवाहवर्णनम्**

महाकविकालिदासकृतिषु उपर्युक्तविवाहप्रकारेषु चतुर्णां विवाहानां चित्राङ्कनम् अस्ति - प्राजापत्यरीत्या विवाहस्य, स्वयंवरविवाहस्य, गांधर्वविवाहस्य च विस्तृतवर्णनं तथा आसुरविवाहस्य च चर्चामात्रं करोति कालिदासः । एतेषु विवाहपद्धतिषु के के गुणाः के के दोषाश्च आसन् तत्सर्वं दर्शयति कालिदासः ।

महाकविकालिदासस्य मन्तव्यमस्ति यत् वैवाहिकप्रसंगे यदा अभिभावकैः सह परामर्शं कृत्वा दाराकर्म सम्पाद्यते तदा सः दाम्पत्यजीवनं सुखदायि भवति । मानवजीवने अभिभावकानां आशीर्वचनं परमलाभप्रदं भवति । भारतवर्षस्य चारित्रिकी शिष्टाचारसम्बन्धिनी वा शिक्षा उच्चस्तरीया अनुकरणीया च वर्तते । अत्र 'मातृदेवो भव', 'पितृदेवो भव', 'आचार्यदेवो भव', 'अतिथिदेवो भव' इत्यादिरूपेणायमुपदेशः दत्तः वर्तते यत् मातापितरौ आचार्यः अतिथिश्च, एते सर्वे देवरूपाः सेव्याश्च सन्ति । अत्र जीवनस्य विभिन्नेषु क्षेत्रेषु व्यवहरणीया उन्नता चारित्रिकी शिक्षा दत्ता वर्तते या भारतीयसंस्कृतेः गौरवं प्रकटयति ।

कुमारसंभवमहाकाव्ये - प्राजापत्यरीत्या विवाहस्य विशदवर्णनं समुपलभ्यते । प्राजापत्यविवाहपद्धतौ विविधवैवाहिकसंस्काराणां सम्पादनं क्रियते स्म । वैवाहिकी वार्ता वरपक्षतः वधूपक्षतश्च सर्वप्रथमं वार्ता निमित्तनियोजितपुरोहितः करोति स्म । अस्मिन् कार्ये गृहिण्याः सत्परामर्शोऽपि अपेक्षितः आसीत् । समाजः पितृप्रधानः आसीत् । अत एव पितुः अनुमतिरेव सर्वोपरि आसीत् । शीलवती कन्या पार्वती अभीष्टं वरमवाप्तुं भगवन्तं शङ्करं पतिरूपेण प्राप्तुम् उग्रं तपः कृतवती । परं यदा भगवान् शङ्करः प्रसन्नः अभवत् तदा वैवाहिकानुमतिमवाप्तुं भगवन्तं शङ्करं स्वपितुः समीपे प्रेषयति । सा कथयति मम वैवाहिकनिर्णयस्य अधिकारी मम पिता हिमवान् अस्ति । तस्य आदेशात् एव वैवाहिककर्म सम्पन्नं भवति । भगवान् शङ्करः अपि वरपक्षतः सप्तऋषिभिः सह आर्याम् अरुन्धतीमपि हिमवतः गृहे प्रेषयति ।

अभिज्ञानशाकुन्तले नाटके गान्धर्वरीत्या विवाहस्य सन्दर्भः दृश्यते । अभिज्ञानशाकुन्तले नाटके राजा दुष्यन्तः क्षत्रियः अस्ति । अत्र सवर्णविवाहस्य संकेतः प्राप्यते । राजा दुष्यन्तः शकुन्तलां वीक्ष्य कामासक्तः भवति तदा गान्धर्वरीत्या विवाहं करोति , यदा सः सुष्ठु जानाति यत् इयं शकुन्तला क्षत्रिया अस्ति । परं एतादृशे विवाहसम्बन्धस्थापने विकटस्थितिरपि उत्पन्ना भवति । सामाजिकमर्यादादृष्ट्या दाम्पत्यजीवने अस्य दुष्प्रभावः भवति ।

[१] मनुस्मृति ९.२८


ISSN : 2249-538X

रघुवंशमहाकाव्ये अज-इन्दुमतीविवाहप्रसङ्गे स्वयंवरविवाहस्य वर्णनं करोति कालिदासः । तस्मिन् काले मनोनुकूलवरचयनस्य अधिकारः कन्याया आसीत् । परं राजपरिवारेषु स्वयंवरसभायाः आयोजनं सम्भवति स्म । सामान्यवर्गे एवं प्रकारेण द्रव्याणां व्ययस्य सम्भवः नासीत् । अस्मिन् विवाहे कन्या मनोनुकूलं वरं चित्वा प्रसन्नतापूर्वकं दाम्पत्यजीवनं यापयति स्म ।

कालिदासीयसाहित्ये आसुरपद्धत्या विवाहस्य अप्रत्यक्षसूचना प्राप्यते एकया लोकोक्त्या "दुहितृशुल्कसं-स्थया"[१] परिस्थितिविशेषं एतादृशः विवाहः क्रियते स्म । कन्यापक्षी वरपक्षतः द्रव्यं विना अन्यां प्रतिज्ञां कारयित्वा कन्यादानं कुरोति स्म । एतादृशः विवाहः अधमकोट्यां परिगणितमासीत् ।

**उपसंहारः**

काव्येषु परिवारस्य सदस्यानां प्रति प्रेम, कृतज्ञता, स्नेहस्य च भावाः अभिव्यक्ताः भवन्ति । एतेषां भावानां रमणीयशैल्या अभिव्यक्तिं कृत्वा काव्यानि पारिवारिकसम्बन्धस्य पोषणं कुर्वन्ति । रघुवंशादिकाव्येषु दिलीप-रघु- अजादीनां परिवारसंबद्धकथाः उपनिबद्धाः वर्तन्ते । अस्माकं प्रचीनपरम्परां, संस्कृतिं च ताः पुनः कथयितुं शक्नुवन्ति । येन इतिहासस्य संरक्षणे सहायका भवति । अग्रिमपरम्परायै मूल्यानां प्रसारणार्थं माध्यमरूपेण काव्यानि कार्यं कुर्वन्ति । काव्यानि कारुण्यक्षमादिविषयेषु गहनज्ञानं ददति । , परिवारेषु द्वन्द्वानां समाधानं कथं करणीयमिति शिक्षयन्ति । तानि परिवारस्य सदस्यान् पारस्परिकदृष्ट्या विषयान् द्रष्टुं प्रोत्साहयन्ति । दुःखस्य समये परिवारेभ्यः काव्यानि सान्त्वनं प्रेरणाञ्च दातुं शक्नुवन्ति । पाठकेभ्यः नमनीयतां प्रतिकूलतां दूरीकर्तुं क्षमतां च स्मारयन्ति । सङ्कटसमयेऽपि कथं अन्यपरिवारसदस्यं प्रोत्साहयेदिति नीतिं बोधयन्ति ।

**सन्दर्भग्रन्थसूची**

1. अभिज्ञानशाकुन्तलम्,कालिदासः,कपिलदेव द्विवेदी, समनारायणलाल विजयकूमार,इलाहबाद,सस्करण, १९९७
2. अलंकारशास्त्र का इतिहास, कृष्णकुमार,साहित्यभण्डार,सुभाष बाजार मेरठ १९९८
3. कालिदास की कला और् संस्कृति, डा देवीदत्त शर्मा,देववाणी परिषत,दिल्ली,प्रथम संस्करण-१९८१
4. Narang, Manju, Bha̎sa aur Ka̎lidasa ke Na̎ṭakon ka̎ Vivecana̎tmak Adhyayan, Manasi Prakashan, Kailaspuri, Merath, 1994
5. Works of Kalidasa - Devadhar C.R. (Ed.), Vol.2 (Poetry), Motilal Banarsidas, Delhi, 1984

[१] रघुवंशम् ११/३८

# पर्यावरणशिक्षायाः वैज्ञानिकं महत्त्वम्

डा. वेङ्कटरमणभट्टः*

**शोधसारः –**

पत्रेऽस्मिन् पर्यावरणशिक्षायाः स्वरूपं प्रतिपादितम् । समग्रे भारते पर्यावरणं कलुषितमस्ति । पर्यावरणप्रदूषणपरिणामतः समेषां जीवननिर्वहणं महते क्लेशाय कल्पते । पर्यावरणस्य पर्यावरणसंरक्षणस्य च विषये वैज्ञानिकं वैशिष्ट्यं महत्त्वपूर्णं स्थानं बिभर्ति । सर्वेषां जीवजन्तूनामेव जीवननिर्वहणं कृष्टमित्युक्तौ विपर्यासः नास्ति । शिक्षासंस्थासु छात्राणां कृते पर्यावरणसंरक्षणविषयिणी जागृतिः समुत्पादनीया । भाविनि काले ये छात्राः नागरिकाः भविष्यन्ति तेषां समेषामपि उत्तरदायित्त्वमस्मिन् कर्मणि निहितमस्ति । लेखेऽस्मिन् पर्यावरणस्य महत्त्वम्, पर्यावरणस्य वैज्ञानिकं वैशिष्ट्यम्, पर्यावरणशिक्षायाः जागृतिश्च उल्लिखितमस्ति ।

**प्रमुखशब्दाः** – भूमण्डलम्, सृष्टिः, यद्रपः, पुनातु, निम्बः, द्रुमः, सर्वबीजप्रकृतिः, पर्जन्यः, प्रदूषणम्, अश्वत्थः, उदानः इत्यदयः ।

**विषयः-**

परि +आङ् इत्युपसर्गद्वयपूर्वकात् वृञ् वरणे इति धातोः भावे ल्युट् प्रत्ययः । युवोरनाकौ इति सूत्रेण अनादेशः भवति । नस्य णत्वे पर्यावरणमिति रूपं सिध्यति । परि इत्यस्य अर्थः चतस्त्रः दिशः इति । आवरणमित्यस्य आच्छादितम् अर्थः । आहत्य चतसृभिः दिग्भिः आच्छादितमित्यर्थः । अस्मान् परितः यानि पञ्चमहाभूतानि सन्ति तेषां समवायः एव पर्यावरणमिति व्यपदेशः । मनुष्यः यत्र निवसति, यज्जलं पिबति, यत् खादति , यद्वस्त्रं धरति, यं वायुं सेवते तत्सर्वं पर्यावरणमिति व्यपदिश्यते । यावद्भूमण्डलं धत्ते सशैलवनकाननम् ।

तावत्तिष्ठति मेदिन्यां सन्ततिः पुत्रपौत्रिकी ॥[1] यावत् पर्यन्तं पृथिव्यामस्यां पर्वतनदीनदादयः अरण्यादीनि च भवन्ति तावत् पर्यन्तं मनुष्यसन्ततिः क्लेशमन्तरा जीवति इति अस्य पद्यस्य तात्पर्यम् ।

या सृष्टिः सृष्टुराद्या वहति विधिहुतं या हविर्या च होत्री ।
ये द्वे कालं विधत्तः श्रुतिविषयगुणान् या स्थिता व्याप्य विश्वम् ।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः ।
प्रत्यक्षाभिः प्रपन्नः तनुभिरवतु वः ताभिरष्टाभिरीशः ॥[2]

---

*सहाचार्यः, शिक्षाशास्त्रविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

[1] सप्तशतीसर्वस्वम् . श्लो – 49

[2] अभि.शाकु. अङ्कः – 1. श्लो – 1

**जलम्-**

भारतीयाः प्रकृतितत्त्वेषु दैवत्त्वम् अवालोकयन् । ब्रह्मणः आद्या सृष्टिः जलमयी वरीवर्ति । "आप एव ससर्जादौ तासु वीर्यमवासृजत्"[1] इति वचनेन जगतः प्रथमा सृष्टिः जलमयी इति ज्ञायते । वर्त्मनि, अप्सु, नद्यादितीर्थेषु, श्मशाने च मलमूत्रादि विसर्जनं नैव करणीयमिति पर्यावरणसंरक्षणजागृतिचिन्तनं शास्त्रेषु समुपनिबद्धमस्ति । "आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम्" इति मन्त्रः एतद्विषये अस्मान् प्रबोधयति ।

**अग्निः-**

पञ्चमहाभूतेषु अग्निरप्यन्तर्भवति । अग्निः प्रत्यक्षदेवता वर्तते । होमहवनादीनाम् आचरणे हविः प्रदीयते । हविर्भागं तत्तत् देवताभ्यः अग्निः प्रापयति । विधिना हुतं हविर्भागं प्रापयति इत्यर्थः । पर्यावरणतत्त्वेषु अग्नेः स्थानं महद्वर्तते । मनुष्याणां जठरेऽपि जाठराग्निः वर्तते । सा अग्निः अस्माकं जीर्णप्रक्रियायां महत्तमं स्थानं बिभर्ति । यथा –

**अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।**
**प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥**[2]

**वायुराकाशश्च-**

वायुतत्त्वम् आकाशतत्त्वमपि पञ्चसु महाभूतेषु स्थानमलङ्करोति । वायुः भिषग्वरः वर्तते । ऋग्वेदस्य मन्त्रः इत्थं वदति यथा –

"आवातवाहि भेषजं विवात वाहि यद्रपः । त्वं हि विश्वभेषजो देवानां दूत ईयसे"[3] ॥ इति ।

अस्मज्जीवने वायोः महत्त्वं बहु वर्तते । प्राणवायुमन्तरा न कोऽपि जीवः जीवितुं शक्नोति । अस्माकं हृदयं प्राणवायुः अधितिष्ठति । यथा –

**हृदि प्राणो गुदोऽपानः समानो नाभिसंस्थितः ।**
**उदानः कण्ठदेशस्थो व्यानस्सर्वशरीरगः ॥**[4]

**पृथिवीतत्त्वम्-**

"माता भूमिः पुत्रोऽहं पृथिव्याः" इति वचनानुसारेण सर्वबीजप्रकृतिः पृथिवी समेषामस्माकं माता अस्ति । क्षमया धरित्री इत्येव भूमिः प्रथिता वर्तते । अस्माकम् आनुकूल्यार्थं पृथिव्याः उपरि वयं बहु आक्रमणं कुर्वन्तः

[1]स्मृतिः
[2]भ.गी.अ- 5. श्लो - 14
[3]ऋग्वेदः
[4]अम – को. का – 1. श्लो – 75.

स्मः । तथापि क्षमागुणभूयिष्ठा भूमिः सर्वमपि सहते । "पृथिव्या ओषधयः ओषधीभ्योऽन्नम्"[१] इति मन्त्रेण पृथिव्याः प्रामुख्यमस्माकं प्रतीयते ।

**अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।**
**यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥**[२]

पर्जन्यः वर्षति चेत् भूमिः सस्यशालिनी जायते । सस्यानि प्रादुर्भवन्ति चेत् धान्यादिकं समुपलभ्यते । खादितुं नः अन्नमुपलभ्यते । भूतानि जीवन्ति अन्नेन । यज्ञकरणेन देवः सन्तुष्टः भवति । तेन वृष्टिर्जायते । यज्ञः कर्मणां सेवनेन जायते । पर्यावरणसंरक्षणमस्माकं कर्तव्यमस्ति । यादृशं कर्म कुरुते मानवः तादृशं फलं लभते इति तात्पर्यम् । **"पर्जन्यो वर्षतु फलिन्यः ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्"**[३] इति मन्त्रेण मनुष्याणां जीवनस्य कल्याणं कथं वेदेषु प्रदिपादितमस्तीति अवगम्यते ।

पर्यावरणतत्त्वेषु वृक्षाणां विषये बहु रामणीयकरूपेण वैज्ञानिकरूपेण च प्रतिपादितमस्ति । यथा –

**दशकूपसमा वापी दशवापीसमो ह्रदः ।**
**दशह्रदसमः पुत्रो दशपुत्रसमो द्रुमः ॥**[४]

दशानां कूपानां प्रयोजनं कयाचित् वाप्या वयं प्राप्तुं शक्नुमः । एकः ह्रदः दशवापीसमो भवति । कश्चित् सुपुत्रः कस्मिंश्चित् कुले समुत्पन्नः चेत् सः दशह्रदसमः भवति । परं तु एकः पादपः चेत् दशपुत्रसमो भवति । इत्थं कस्यचित् द्रुमस्य वैशिष्ट्यं संस्कृतसाहित्ये प्रातिपादितमस्ति ।

**मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे ।**
**अग्रतः शिवरूपाय वृक्षराजाय ते नमः ॥**[५]

वृक्षेषु दैवत्वभावनया भारतीयाः वयम् तान् अर्हामः । वृक्षस्य छेदनं संविधाने निषिद्धमस्ति । वृक्षनाशः मानवसन्ततेः क्लेशकरः अस्ति ।

**वनस्पतीन् भक्ष्यफलान् न च्छिन्दुर्विषये तव ।**
**ब्राह्मणानां मूलफलं धर्म्यमाहुर्मनीषिणः ॥**[६]

वनस्पतिभ्यः वयं फलानि प्राप्नुमः । तानि फलानि अवाप्य वयं खादामः । तादृशवृक्षाणां नाशः न

---

[१]तैत्ति.उपनि.प्रपा.- 2.
[२]भ. गी. अ - 3. श्लो - 14
[३]तैत्तिरीयसंहिता. 7.5.18
[४]सुभा. राज. नीति. प्र. श्लो - 114
[५]संस्कृत विकिपीडिया
[६]महाभारतम्. शान्तिपर्व


ISSN : 2249-538X

करणीयः । गीतायां यथा –

**अश्वत्थः सर्ववृक्षणां देवर्षीणाञ्च नारदः ।**
**गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥**[1]

सर्वेषामपि वृक्षाणाम् अश्वत्थः श्रेष्ठः । अश्वत्थवृक्षस्य प्रत्यहं परिक्रमणं पुण्याय कल्पते । तादृशवृक्षस्यापि ब्राह्मणवत् उपनयनसंस्कारः शास्त्रे विहितः अस्ति । तस्य पूजनेन अस्मदादीनां जीवनं उज्वलं भवतीति विश्वासः । निम्बवृक्षः अत्यधिकं प्राणवायुं प्रददाति । निम्बवृक्षः औषधगुणोपेतः विद्यते । अस्य वृक्षस्य सर्वोऽपि अवयवभागः नितान्तं प्रयोजनकरः विद्यते । अस्य मूलं, पत्राणि, त्वक्, काण्डञ्च बहु औषधगुणोपेतः वर्तते । यद्यपि स्वभावतः सः कटुरस्ति । कटुत्वे सत्यपि आयुर्वेदे अस्य महत्त्वम् अत्यधिकं प्रतिपादितम् अवलोक्यते । अश्वत्थवृक्षेण सह निम्बमपि आरोपयन्ति । जनाः अर्हन्ति च एनम् । निम्बवृक्षं परितः वातावरणमपि प्राणवायुयुक्तं भवति । नकारात्मकशक्तेः नाशः जायते । तं परितः वातावरणे विद्यमानाः विषाणवः म्रियन्ते । वृक्षस्यास्य स्वभावविषये कश्चित् श्लोकः इत्थं ब्रवीति यत् –

**यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा ।**
**तस्यैनं गन्धमाल्याद्यैः सर्वस्य कटुरेव सः ॥**[2]

निम्बवृक्षं कश्चित् परशुना छिनत्ति चेदपि सः आत्मनः स्वभावं नैव मुञ्चति । कश्चित् मधुना घृतेन च अभिषिञ्चति चेत् अपि स्वीयस्वभावं नैव जहाति । यदि कश्चित् सुगन्धपुष्पादिभिः अर्चति चेदपि स्वीयं कटुत्वं न त्यजति । तस्मिन् वृक्षे विद्यमानः कटुत्वस्वभावः समेषामपि अमृततुल्यः वर्तते । कटुः आयुर्वेदे प्रतिपादितः अमृततुल्यः औषधगुणः वर्तते । किं बहुना युगादिपर्वणि निम्बपत्रेण सह गुडं वयं स्वीकुर्मः । अस्य तात्पर्यं भवति यत् जीवने सुखदुःखादिकं समानतया वयं स्वीकुर्मः इति ।

**उपसंहारः-**

अस्माकं संस्कृतसाहित्ये वैदिकसाहित्ये च पर्यावरणसंरक्षणसम्बद्धानि नैकानि चिन्तनानि कृतानि सन्ति । सर्वत्रापि वैज्ञानिकदृष्टिकोणः भृशं वर्तते । अस्माभिः पर्यावरणसंरक्षणदायित्त्वं सुष्टु निर्वहणीयमस्ति । पर्यावरणप्रदूषणेन कीदृशी हानिः सम्पद्यते इति सर्वत्र जागृतिः समुत्पादनीया वर्तते । विद्यालयेषु महाविद्यालयेषु विश्वविद्यालयेषु च एतद्विषये प्रचारः कर्तव्यः । वनमहोत्सवादि पर्यावराणसम्बद्धाः कार्यक्रमाः समायोजनीयाः । शैक्षिकसंस्थासु पर्यावरणजागृतिपरकाः नैके कार्यक्रमाः समायोजनीयाः ।

**॥ इति शम् ॥**

[1]. भ. गी. अ – 10. श्लो - 26
[2]सरस्वतीकण्ठभारणम्

**अनुशीलितग्रन्थाः –**

1) ऋग्वेदः
2) अभिज्ञानशाकुन्तलम्
3) भगवद्गीता
4) स्मृतिः
5) उपनिषत्
6) सुभाषितरत्नभाण्डागारः
7) कुवलयानन्दः
8) अमरकोषः
9) महाभारतस्य शान्तिपर्व
10) सिद्धान्तकौमुदी
11) सरस्वतीकण्ठाभरणम्
12) संस्कृताविकिपीडिया
13) सप्तशतीसर्वस्वम्
14) कुवलयानन्दः
15) मन्त्रमन्दारः


ISSN : 2249-538X

# योगदर्शनानुसारं न्यायाभिमतेश्वरस्य अनुशीलनम्

डा. रविकुमारः शास्त्री*

**प्रमुखशब्दाः** – ईश्वरः , पुरुषविशेषः, पूर्वेषामपि गुरुः, पुरुषः , परमाणूः, सांख्यदर्शनम् , योगदर्शनम् , न्यायदर्शनम् , वैशेषिकदर्शनम् ,तत्त्वमीमांसा, क्लेशः, कर्माणि, विपाकः, आशयः ।

**प्रस्तावनाः–**

सांख्यदर्शनस्य समानतन्त्रं योगदर्शनम् । साङ्ख्ययोगयोः सिद्धान्तेष्वत्यन्तं साम्यम् । उभयोः दर्शनयोः तत्त्वमीमांसा प्रायशः समानैव । यदि सांख्ययोगयोः तत्त्वमीमांसा भिद्यते चेत्तदा परमेश्वरविषय एव । सांख्ययोगयोरुभयोरपि दर्शनयोः अतः साङ्ख्य- संज्ञा प्रदीयते, सांख्यदर्शनं निरीश्वर सांख्यपदेनाभि-धीयते, योगदर्शनं सेश्वर सांख्यपदेन । एवं योगदर्शनेऽपि तानि एव तत्त्वानि सन्ति यानि च सांख्यदर्शने-ऽङ्गीक्रियन्ते । केवलं चेश्वरनामकं तत्त्वमधिकं भवति । षड्विंशतितत्त्वान्यङगीक्रियन्ते योगदर्शने एवं योगदर्शनीया तत्त्वमीमांसा सांख्यदर्शनीया च न भिद्येते परस्परमाधिक्येन । तत्त्वमीमांसायां यद्यन्यः कश्चिद्भेदोऽस्ति चेत् स एष एव यत् सांख्यदर्शने प्रकृतेः महत्तत्त्वम्, महतोऽहङ्कारः, अहङ्कारात् पञ्च कर्मेन्द्रियाणि पञ्च ज्ञानेन्द्रियाणि उभयात्मकं मनः, पञ्च तन्मात्राणि च जायन्ते । योगदर्शने च प्रकृतेर्मह-त्तत्त्वम्, महत्तत्त्वाच्च पञ्च तन्मात्रणि अहङ्कारश्च जायते । अन्यश्च सर्गक्रमः समान एव ।

**योगदर्शने परमेश्वरः -**

योगदर्शने परमेश्वरस्य स्थानं महत्त्वपूर्णं विद्यते । न हि केवलमयं परमेश्वरः मोक्षकारणी-भूतस्येश्वरप्रणिधानस्य विषयीभूतोऽपितु सृष्टिप्रक्रियायामपि महत्वपूर्णां भूमिकामङ्गीकरोति । अस्य लक्षणं क्रियते **"क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः"**[1] अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः, धर्माधर्माः कुशलाकुशलानि कर्माणि, तयोः क्लेशकर्मणोः विपाकः फलं जात्यायुर्भोगाः, आशयः तदनुगुणा वासना एतैरपरामृष्टः सदैवाव्यपदिष्टः पुरुषविशेष एवेश्वरः । अविद्या नाम अनित्ये नित्यत्वबुद्धिः अशुचौ शुचित्वबुद्धिः, दुःखे सुखत्वबुद्धिः, अनात्मनि शरीरादौ आत्मत्वबुद्धिः ।[2] दृक्शक्ति, दर्शनशक्त्योरेकात्मताऽस्मिता पदेनोच्यते तथाहि "ज्ञाताहं" इत्यत्र प्रत्यये विशुद्धो ज्ञाता दृक्, अस्मिन् प्रत्यये च दृश्याभिमानरूपेणाहंपदवाच्येन जडेन सह ज्ञातुरेकत्वं प्रतीयते । अयमेकत्वप्रतिभास एवास्मिता पदेनोच्यते ।[3] सुखविषयकः यः लोभः सुखसाधनविषयको वा यः लोभः स एव रागपदेनोच्यते ।[4] दुःख-विषयकः दुःखसाधनविषयकश्च यः क्रोधः जिघांसा स एव द्वेषपदेनोच्यते ।[5] सर्वस्यैव प्राणिनो जातमात्रस्य मा न भूवं भूयासमित्येषाऽऽत्माशीर्भवति न चाननुभूतमरणधर्मकस्यैषाऽत्माशीर्भवितुं

---

*सहायकाचार्यः (सं), योगविज्ञानविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

[1]योगसूत्रम् 1/24

[2]योगसूत्रम् 2/5

[3]योगसूत्रम् 2/6

[4]योगसूत्रम् 2/7

[5]योगसूत्रम् 2/8

शक्नोति अनया च पूर्वजन्मः प्रतीयते । अयमेवाभिनिवेशः मूर्खविद्वज्जनसाधारणः सर्वमपि लोकं तापयति ।[१] न हि संसारी कश्चिदेतादृशो जीवो विद्यते य एतैः क्लेशैर्विमुक्तः स्यात् । अयं परमेश्वरस्त्वेतैः पञ्चभिः क्लेशैर्हीनो न कदाचिदपि परामृष्टः क्लेशैः । शुभैरशुभैश्च कर्मभिः पुण्यजनकैरपुण्यजनकैश्चापरामृष्टोऽयम् । जाति, आयुः भोगाश्च विपाकपदेनोच्यन्ते । जातिपदेन जन्म, योनिः गृह्यते यथा मनुष्ययोनिः । आयुः शतवर्षादि । भोगश्च सुखदुःखसाक्षात्कारः । विपाकानुगुणाः वासनाः आशयपदेनोच्यन्ते । एतैरव्यपदिष्टः पुरुषविशेष ईश्वरः । ये च मुक्ताः पुरुषाः तेऽपि हि त्रीणि बन्धनानि छित्त्वा कैवल्यं प्राप्ताः तेषां पूर्वा बन्धकोटिः ज्ञायते, ये च प्रकृतिलीनाः तेषामग्रे बन्धनं भवति, उत्तरा बन्धकोटिः प्रज्ञायते, ये च बद्धाः तेषां वर्त्तमाना बन्धकोटिः परिज्ञायते । परमेश्वरस्य तु न हि पूर्वा बन्धकोटिः विद्यते, न वोत्तरा बन्धकोटिः, न वा वर्तमाना । सोऽयमीश्वरः सदैव मुक्तः । पुरुषाः क्लेशकर्मविपाकाशयैः परितप्यन्ते नैवमीश्वरः क्लेशादिभिः सम्बद्धो भवति । अत्राशङ्केयं जायते यत् पुरुषाणामपि क्लेशकर्मविपाकाशयैरपरामृष्टत्वं विद्यते यतो हीमे क्लेशकर्म-विपाकाशयाः बुद्धेः धर्माः न तु पुरुषस्यातो नेमे क्लेशादयः बुद्धिधर्माः कथञ्चिदपि पुरुषं परामृशन्ति । इति पुरुषेष्वीश्वरलक्षणस्यातिव्याप्तिः, पुरुषपदेनैव क्लेशकर्मविपाकाशयापरामृष्टत्वलाभाद् विशेषणवैयर्थ्यञ्च । अत्र समाधीयत एतत् यदिमे यद्यपि मनस्येव विद्यन्ते परन्तु पुरुषेऽपि व्यपदेशो भवत्येतेषाम्, कस्मात्? पुरुषो हि तेषां फलानां स्वस्मिन् प्रतिबिम्बितानां भोक्तेति पुरुषेऽपि व्यपदिश्यन्ते क्लेशादयः । यथा योद्धृषु विद्यमानो जयः पराजयो वा स्वामिनि व्यपदिश्यते तथैव पुरुषेऽवर्त्तमानो मनसि वर्तमानो क्लेशादिः पुरुषेऽपि व्यपदिश्यते ।[२] यश्च क्लेशकर्मफलस्य भोक्तृभावेनापरामृष्टोऽव्यपदिष्टः स एव पुरुषविशेष ईश्वरः । सोऽयमीश्वरः सर्वज्ञः सर्वेषामपि गुरुः, एकः, ऐश्वर्यस्य काष्ठाप्राप्तिर्विद्यते । अस्य च शाश्वतिक उत्कर्षः प्रकृष्टसत्त्वोपादानादस्ति प्रकर्षश्च सार्वज्ञ्यम् सत्त्वं नाम बुद्धिः । तथा चास्येश्वरस्य सार्वज्ञ्ययुतबुद्धेर्योगात् शाश्वतिकः उत्कर्षः ।[३] अयमीश्वरः प्रकृष्टं चित्तसत्त्वमुपादत्ते परन्तु न हि पृथग् जनस्येव चित्तसत्त्वेनाऽविद्या-निबन्धनः स्वस्वामिभावः, अपितु तापत्रयपरीतान् प्रेत्यभावसंसारसागराज्जन्तूनुद्धरिष्यामि ज्ञानधर्मोप-देशेन, ज्ञानक्रियासामर्थ्यातिशयसम्पत्तिमन्तरेण च न ज्ञानधर्मोपदेशः सम्भवति, ज्ञानक्रियाशक्तिसम्पत्तिश्च न हि विशुद्धसत्त्वोपादानं विना सम्भवति, इत्यालोच्य अविद्ययाऽपरामृष्टोऽपि अवद्याऽभिमानीव स्वयमेव सत्त्वमयं प्रधानमुपादत्ते । यथा च नटो रामत्वमारोप्य तास्ताश्चेष्टाः प्रदर्शयन् न भ्रान्तो भवति तथैवायमपि सत्त्वमयं प्रधानमुपाददानोऽविद्वान् न भवति । अत्र चाशङ्का भवति यज्जगदुद्दिधीर्षयाऽयं भगवान् सत्त्वमुपादत्ते, सत्त्वोपादानाच्चोद्दिधीर्षा सम्भवति, उद्दिधीर्षाया इच्छात्मक-त्वेनेच्छायाश्च प्रकृतेः चित्तसत्त्वस्य गुणत्वात् । तथा

[१]योगसूत्रम् 2/9

[२]ते च मनसि वर्तमानाः पुरुषे व्यपदिश्यन्ते, सहि तत्फलस्य भोक्तेति, यथा जयः पराजयो वा योद्धृषु वर्तमानः स्वामिनि व्यपदिश्यते । व्या० भा०, पृ० 65-66

[३]योऽसौ प्रकृष्टसत्त्वोपादानादीश्वरस्य शाश्वतिक उत्कर्षः । व्या० भा०, पृ० 68-69


ISSN : 2249-538X

#131

च स्पष्टमेवान्योन्याश्रयो भविष्यति । अत एव शाश्वतिक उत्कर्ष इत्युच्यते । अस्य चायमाशयो यदनादिरयं संसारस्य सर्गसंहारप्रबन्धः सर्गान्तर-समुत्पन्नसजिहीर्षाव- धिसमये पूर्णे मया सत्त्वप्रकर्ष उपादेय इति प्रणिधाय भगवान् जगत् संहरति । एवं चेश्वरचित्तसत्त्वं प्रणिधानेन वासितं सत् प्रधाने लीनमपि प्रलयावधौ परिपूर्णे सति प्रणिधानवासनावशात् तथैवेश्वरचित्तसत्त्वभावेन परिणमते । एवमेवेश्वरः प्रलयकाले तम उपादत्ते । अत्र चोदाह्रियते यथा चैत्रः श्वः प्रातरेवोत्थातव्यं मयेति प्रणिधाय सुप्तस्तदैवोत्तिष्ठति प्रणिधानसंस्कारात् । एवमीश्वरप्रणिधानसत्त्वोपादानयोः शाश्वतिकत्वेन नान्योन्याश्रयः ।[१]

**ईश्वरः सर्गे निमित्तकारणम् -**

ईश्वरोऽयं सर्गं प्रति निमित्तकारणं भवति । योगदर्शने प्रकृतिः सृजतीश्वरेक्षणक्षुभिता । ईश्वरेच्छावशादस्यां क्षोभः सञ्जायते तस्माच्च सर्गः ।[२] प्रकृतेर्द्वे शक्ती विद्येते साहजिके सृष्टिशक्तिर्लीला-शक्तिश्च । यदा चेश्वरः सत्त्वं परिगृह्णाति तदा सृष्टिशक्तिरुद्बुद्धा भवति यदा च तम उपादत्ते तदा लयशक्तिरुद्बुद्धा भवति ।[३] तत्तच्छक्त्युद्बोधे त्वनादिवासनासहकारेण प्रकृतिस्तत्तत् कर्मानुरूपं परिणमते । अस्माद्धेतोर्न वैषम्यनैघृण्ये परमेश्वरस्य प्रसज्येते । ईश्वरस्य च प्रकृतेः प्रेरकतया सर्गं प्रति निमित्तकारणत्वम् । प्रधानप्रेरकता च परमेश्वरस्य लोकानामुद्दिधीर्षया चित्तसत्त्वात्मिकायाः प्रकृतेरङ्गीकारादेव ।[४] प्रकृतिश्चेयं न हि परमेश्वराधिष्ठिता प्रवर्ततेऽपितु स्वातन्त्र्येणैवोपादानकारणीभवति परमेश्वरस्तु निमित्तकारणमेव केवलम् ।[५] परमेश्वरस्य च केवलं निमित्तकारणत्वान्न प्रकृतेः स्वातन्त्र्यमत्र दर्शने हीयते । यथा घटं प्रति कुलालस्य कारणत्वेऽपि न हि दण्डादेः स्वातन्त्र्यं हीयते तथैव परमेश्वरस्य कारणत्वेऽपि न हि प्रकृतेः स्वातन्त्र्यं हीयते ।[६] यतो हि न निमित्तकारणं प्रकृतीनां प्रयोजकं भवति यथा च क्षेत्रिकः, केदारादपाम्पूरणात् केदारान्तरं पिप्लावयिषुः नापः पाणिनाऽपकर्षति केवलमवरोधकमेव जलस्य दूरीकरोति ।[७] अवरोधके च दूरीकृते स्वयमेव जलं क्षेत्रान्तरमाप्लावयति । तथैव निमित्तकारणीभूतः परमेश्वरोऽपि न हि प्रकृतिं प्रेरयति सर्गं प्रति केवलं गुणक्षोभमेव विदधाति तस्माच्च प्रकृतिः स्वयमेव सर्गं विदधाति । अतः न प्रकृतिस्वातन्त्र्यहानिः ।

[१] तत्त्ववैशारदी, पृ० 68-69, यो० सू० 1/24, नागोजीभट्टवृत्तिः, मणिप्रभा

[२] सेश्वरसाङ्ख्ये प्रकृतिः सृजतीश्वरेक्षणक्षुभिता । स० म० सं०, पृ० 20

[३] तत्र प्रकृतेर्द्वे शक्ती साहजिके सृष्टिशक्तिर्लयशक्तिश्चेति । तत्रेश्वरेण सत्त्वपरिग्रहे सृष्टिशक्तेरुद्बोधः । तमः परिग्रहे च योगनिद्रेत्युच्यते । यो० सू० 1/24 नागोजीभट्टवृत्तिः

[४] एतावतैव प्रधानप्रेरकतास्य यत् लोकोद्धरणेच्छया तदङ्गीकारः । तदेव

[५] समानं साङ्ख्यानामिवात्रापि परमेश्वरानधिष्ठितस्य प्रधानस्य स्वातन्त्र्येणोपादानत्व- प्रतिपादनात्, परमेश्वरस्य निमित्तमात्रत्वाङ्गीकाराच्च । ब्रह्मसूत्रवृत्तिः कौस्तुभप्रभा, पृ० -122

[६] अस्य निमित्तकारणत्वान्न प्रकृतिस्वातन्त्र्यक्षतिः । घटे कुलालवद् दण्डादीनां कारणत्वेऽपि तद्वदेवास्य स्वतन्त्रत्वमपि । यो० सू० 1/26 नागोजीभट्टवृत्तिः

[७] योगसूत्रम् 4/

**ईश्वरः पूर्वेषामपि गुरुः -**

सोऽयमीश्वरः पूर्वेषामपि हिरण्यगर्भादीनामपि गुरुः । पूर्वपूर्वसर्गाद्युत्पन्नानां ब्रह्माविष्णु-महेश्वरादीनामपि गुरुः विद्यया ज्ञानचक्षुप्रदश्च कालेनानवच्छेदात् । यथाऽस्मिन् सर्गेऽस्य सिद्धिर्भवति तथैवापरस्मिन्नपि सर्गेऽतिक्रान्तसर्गेप्यस्य सिद्धिर्भवति । अतो नित्यमुक्तोऽयं परमेश्वरः ।

**वेदानाम् प्रणेता -**

अयमीश्वरः लोकानामुद्दिधीर्षया चित्तसत्त्वमुपादत्ते तस्माच्च प्रकृतिरियमचेतनाऽपि सर्गे प्रवर्तते । तस्येश्वरस्य किं प्रयोजनम्, चित्तसत्त्वोपादाने न हि किञ्चित् प्रयोजनं स्वोपकारात्मकमस्य सम्भवति । भूतानुग्रह एवास्य प्रवृत्तौ प्रयोजनम्, शब्दाद्युपभोगविवेकख्यातिरूपं कार्यं कृत्वा चित्तं निवर्तते तस्माच्च पुरुषो मुक्तो भवति । अस्मै प्रयोजनायैवायं प्रवर्तते । अतस्तस्मै प्रयोजनाय कारुणिकोऽयं परमेश्वरः विवेकख्यात्युपायं कथयति ज्ञानधर्मोपदेशेन संसारिणो पुरुषानुद्धरिष्यामीति परमेश्वरस्य विचारः । एतदर्थ-मेवास्य प्रवृत्तिः ।[१] वेदादिशास्त्राणि प्रकृष्टसत्त्वनिमित्तानि । औषधिभेदानां मन्त्राणां च तत्तद्वर्णावापोद्धारेण सहस्रेणापि पुरुषायुषैः लौकिकप्रमाणद्वाराऽन्वयव्यतिरेकौ ग्रहीतुं नैव शक्येतेऽतः परमेश्वरः कारुण्येन वेदान् करोति ज्ञानधर्मोपदेशार्थम् ।[२]

**योगिनामनुग्राहकः -**

श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वकोऽसम्प्रज्ञातः समाधिर्भवति श्रद्धा नाम चेतसः सम्प्रसादः, तेन च वीर्य-मुपजायते, वीर्ये च समुपजाते स्मृतिरुपतिष्ठते, स्मृत्युपस्थाने च चित्तमनाकुलं समाहितं भवति, समाहितचित्तस्य प्रज्ञाविवेकस्य चाभ्यासाद् तद्विषयाच्च वैराग्यादसम्प्रज्ञातः समाधिर्भवति ।[३] अस्य असम्प्रज्ञातसमाधेरन्यदपि साधनं विद्यते परमेश्वरप्रणिधानम् । परमेश्वरप्रणिधानेनाऽपि आसन्नतमः समाधि-र्भवति । चन्द्रिकाकारास्त्वस्य सुगमोपा-यत्वमङ्गीकुर्वन्ति ।[४] ईश्वरो हि प्रणिधानेनाराधितः "मां जानातु" इति संसाराङ्गारे तप्यमानं पुरुषमिच्छामात्रेणानु-गृह्णाति । तया चासन्नतमः समाधिर्भवति समाराधकस्य न ह्यन्यो व्यापारोऽपेक्षितो भवति योगिनोऽनुग्रहणार्थम् । पुष्करपलाशवन्निर्लेपस्यापि पुरुषस्य तापकस्य रजसः सत्त्वेनोपपद्यते । बुद्ध्यात्मना परिणते सत्त्वे तप्यमाने तदभे-दावगाहनतत्परः पुरुषोऽपि तप्यत इति लक्षणया व्यवह्रियते ।[५]

**ईश्वरसत्त्वे प्रमाणम् -**

योगदर्शने परमेश्वरास्तित्वसाधनायामनुमानं प्रमाणं शब्दप्रमाणं च विद्येते । अनुमानन्तावदिमं सिद्धान्त-

---

[१]योगसूत्रम् 1/25 व्यासभाष्यम् एवं नागोजीभट्टवृत्तिः
[२]तत्त्ववैशारदी, पृ० 70/71
[३]यो० सू० 1/20 एवं व्यासभाष्यम्
[४]सुगमोपायोऽयं भक्तिविशेष ईश्वरे सर्वकर्मार्पणम् वा । यो० सू० 1/23 चन्द्रिकावृत्तिः
[५]यो० सू० 1/23, योगसुधाकरवृत्तिः


ISSN : 2249-538X

माधारीकृत्य प्रयुज्यते यत् परिमितस्य विद्यमानतयाऽपरिमितस्य कस्यचिदस्तित्वं द्योत्यते । यदिदमतीतानागत-वस्तुविषयकमतीन्द्रियाणां विषयाणां ग्रहणं दृश्यते तदेव सर्वज्ञस्यानुमापकम् । एतद्धि वर्द्धमानं यत्र काष्ठां प्राप्नोति सर्वज्ञः, तथाहि ज्ञानतारतम्यं क्वचिद्विश्रान्तं सातिशयत्वात् परिमाणतारतम्य-वत् । यथा परिमाणतारतम्यं गगने विश्रान्तं भवति तथैव ज्ञानतारतम्यमपि वर्द्धमानं क्वचिद्विश्रान्तमिति सिद्धं भवति । एषा च विश्रान्तिर्नास्मदादीनां पुरुषाणां चित्तस्य सम्भवति यत्र च चित्ते एतत्तारतम्यविश्रान्तिर्भवति तच्चित्तवान् पुरुषः सर्वज्ञः इति सिद्धं भवति । यत्र चेतसि ज्ञानशक्तेर्निरतिशयत्वं तच्चित्तवान् सर्वज्ञः पुरुष ईश्वर इत्यनुमानेन सामान्यत ईदृशः परमेश्वरोऽस्तीति निश्चयो भवति । सामान्यमात्रनिश्चयं जनयित्वाऽनुमानं निवृत्तं भवति । तस्य परमेश्वरस्य संज्ञादिविशेषप्रतिपत्तिः शास्त्रतोऽवगन्तव्या ।[१] अनेन चैतत् प्रतीयते यत् यादृश ईश्वरो योगदर्शनेऽङ्गीक्रियते । तादृश ईश्वरो नह्यनुमानेन प्रमाणेन साधयितुं शक्यते । केवलं सर्वज्ञस्य कस्यचित् पुरुषस्यैव सिद्धिर्भवत्यनुमानेन, अपराणि च यानि विशेष-णानि परमेश्वरस्य तानि सर्वाण्यागमतो-ऽवगन्तव्यानि । अनेनेश्वरे शास्त्रमेव प्रामुख्येन प्रमाणमिति सिद्ध्यति । श्रुत्या परमेश्वरस्य सत्ता सिद्ध्यति । सोऽयं सर्वज्ञः परमेश्वरः पूर्वेषामपि गुरुः अस्य परमेश्वरस्य शाश्वतिक उत्कर्षेऽपि शास्त्रं प्रमाणमस्ति । शास्त्रं हि प्रत्यक्षानुमानपूर्वम् भवति । ईश्वरस्य सत्त्वप्रकर्षे कस्यचिदपि प्रत्यक्षमनुमानं वा नास्ति । शास्त्रमेव विद्यते परमेश्वरस्य सत्त्वप्रकर्षे प्रमाणभूतम् । शास्त्रस्य च प्रामाण्यं सत्त्वप्रकर्षनिमित्तत्वादस्ति । एतयोः शास्त्रोत्कर्षयोरीश्वरसत्त्वे विद्यमानयोरनादिः सम्बन्धः । ईश्वरबुद्धिसत्त्वं प्रकर्षप्रतिपादकाच्छद्स्त्राज्ज्ञायते यदयमीश्वरः सदैव मुक्तः । तच्च तस्यैश्वर्यं सार्वज्ञ्यं साम्यातिशयविनिर्मुक्तमस्ति न हीश्वरस्यैश्वर्यमैश्वर्यान्तरेणा-तिशय्यते । यत्रैश्व-र्यस्य काष्ठाप्राप्तिः स एवेश्वरः न हि ब्रह्मादीनामैश्वर्यस्य काष्ठाप्राप्तिरस्ति । न हीश्वरस्य समानमैश्वर्यमपि कस्यचिदपि विद्यते । अत्र प्रमाणं नास्ति किञ्चित् कल्पना गौरवं तु विद्यते । यतो द्वयोस्तुल्ययोरेकस्मिन् अर्थे युगपत् कामिते कस्यचिदेकस्य प्रसिद्धावितरस्य प्राकाम्यविघातादूनत्वं प्राप्तं भवति । यदि तयोरविरुद्धेच्छतेति स्वीक्रियते प्रत्येकं चे-श्वरत्वं स्वीक्रियते तदैकेनैवेश्वरेण निर्वाहसम्भवे-ऽन्यैरीश्वरैः किं कृतं भवति ? यदि च सम्भूय कारित्वं समेषामीश्वराणां तदा कस्यचिदपि परमेश्वरत्वं न स्यात् परिषदादिवत् यथा परिषदि न हि कश्चिदेकः ईश्वरो भवत्यपितु सम्भूय परिशद् ईश्वरत्वम् तथैवात्रापि सिद्धं भवति । अतः परमेश्वरोऽयमेक एवेति स्वीकरणीयं भवति ।[२] परमेश्वरस्वीकारस्य प्र-योजनमस्ति संसाराङ्गारेषु भृशं तप्यमानानां प्राणभृतामनुग्रहः । नहि परमेश्वरानुग्रहं विना जीवाः संसारदुःखात्त्रातुं शक्नुवन्त्यात्मानम्, अतः स्वेच्छया निर्माणकायमधिष्ठाय परमेश्वरो लौकिकवैदिकसम्प्रदायान् प्रवर्तयति ।[३]

**न्यायादर्शनीयेश्वरस्यालोचना -**

यद्यपि योगदर्शनाभिमत ईश्वरो न्यायादर्शनाभिमतेनेश्वरेणात्यन्तं तुल्यता-मावहति । प्रशस्तपादभाष्ये

[१]व्यासभाष्यम्, पृ० 74/77

[२]व्यासभाष्यम् तत्त्ववैशारदी, पृ० 70/72

[३]संसाराङ्गारेषु तप्यमानानां प्राणभृतामनुग्रहार्थं षड्विंशतत्त्वस्य परमेश्वरस्य स्वीकारात् । योगमञ्जरी, पृ० 31

श्रीमता श्रीधरेण न्यायकन्दल्यां व्याख्यायां पतञ्जलेः सूत्रम् "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः" उध्रियते न्यायवैशेषिकाभिमतेश्वरस्वरूपस्य नित्यमुक्तत्वस्य पुष्ट्यर्थम् ।[१] न्यायदर्शन ईश्वरो नित्यमुक्तः भोगादिभिश्चापरामृष्टः आत्मसजातीयश्च स्वीक्रियते । पातञ्जलसूत्रे यदुक्तमस्ति परमेश्वरविषये तत्सर्वमपि न्यायाभिमते परमेश्वरे सङ्घटते । अन्यदपि च सर्वज्ञत्वादिकं निमित्तकारणत्वञ्च परमेश्वरे विद्यते न्यायदर्शनाभिमते ।

परन्त्वत्र भेदा अपि विद्यन्ते केचन । न्यायदर्शने परमेश्वरः क्षित्यादिकर्ता, परमाणूनां संयोजकः अदृष्टाधिष्ठाता सम्प्रदायप्रवर्तकश्च स्वीक्रियते । परन्त्वत्र दर्शने न हि परमेश्वरः क्षित्यादिकर्ताऽपितु प्रकृतिरिव कर्त्री परमेश्वरस्तु केवलं निमित्तमात्रम् । योगदर्शने परमाणुजसृष्टेरेवास्वीकारान् न परमाणूनां संयोजक ईश्वरो भवितुमर्हति । परमाणुजन्यायाः सृष्टेः श्रुत्या बाधितत्वेन साङ्ख्यवद् योगिनोऽपि प्रकृतिसृष्टिमेवाङ्गी-कुर्वन्ति ।[२] अदृष्टस्याचेतनत्वेऽपि प्रकृतिरिव साङ्ख्यसिद्धान्तानुसारमत्रापि फलसम्पादकत्वं चेतनानधि-ष्ठितस्यैव सम्भवति । न ह्यत्र न्यायदर्शनानुसारमचेतनस्य चेतनानधिष्ठितस्य प्रवृत्तिर्नभवति । एवमेव प्रकृतिः अपि परमेश्वरानधिष्ठितैव प्रवर्तते, परमेश्वरेण निमित्तकारणीभूतेन प्रकृतेर्गुण-क्षोभो विधीयते तस्माच्च प्रकृतिः स्वतन्त्रा सती प्रवर्तते सर्गार्थम् । न्यायदर्शने परमेश्वरः सम्प्रदायप्रवर्तकः, योगदर्शने च सम्प्रदाय-प्रद्योतकः । तथा हि न्यायदर्शनानुसारमीश्वरेच्छात्मिका शक्तिः पदे विद्यमाना पदार्थं बोधयति सेयमीश्वरे-च्छात्मिका शक्तिः परमेश्वरात् प्रवर्त्तते । योगदर्शने च नित्यः शब्दार्थसम्बन्धः शक्त्या सह शब्दः प्रलयकाले प्रधानसाम्यमुपगच्छति, पुनराविर्भवंस्तच्छक्तियुक्त एवाविर्भवति भगवता व पूर्वसम्बन्धानुसारेण सङ्केतः क्रियते ।[३]

न्यायदर्शनेऽपि परमेश्वरः आत्मसजातीयः (आत्मविशेषः) एव न हि तस्मादन्यः कल्पः सम्भवति, योगदर्शनेऽपि परमेश्वरः पुरुषविशेष एव । परन्तुभयोः दर्शनयोरात्मस्वरूपस्य भिन्नत्वेनानयापि रीत्योभयोः स्वरूपेऽन्तरमायाति । न्यायदर्शने आत्मा पञ्चभिः सामान्यगुणैः बुद्धिसुखदुःखेच्छाद्वेषप्रयत्न-धर्माधर्मसंस्काराख्यैः नवभिर्विशेषगुणैश्च युक्तः स्वीक्रियते । तत्सजातीयोऽपि परमेश्वरः न ह्येतैः चतुर्दशभि-र्गुणैर्युक्तोऽपितु परमेश्वरे पञ्च सामान्यगुणाः नित्यं ज्ञानं, नित्येच्छा, नित्या कृतिश्च स्वीक्रियन्ते । साङ्ख्ये योगे च न हि पुरुषस्य ज्ञानेच्छादयो गुणाः, अपितु बुद्धेरेवैते गुणाः । पुरुषस्तु पुष्करपलाशवन्निर्लेपः चिन्मात्रम् साक्षी, द्रष्टा, आत्यन्तिकदुःखत्रयाभावयुक्तः उपकारापकारशक्तिरहितः अकर्ता च ।[४] ईश्वरस्यापि पुरुषविशेषतया तस्यापि पुष्करपलाशवन्निर्लिप्तत्वादिकं प्राप्तं भवति । अतः सार्वज्ञ्यादिकं न हीश्वरस्य सम्भाव्यते परन्तु सार्वज्ञ्यमीश्वरीयचित्तसत्त्वे विद्यते । तस्य चित्तसत्त्वस्य

[१]प्रशस्तपादभाष्यम् न्यायकन्दली, पृ० 142

[२]परमाणुजसृष्टेश्च श्रुतिबाधात् प्रकृतिसृष्टिमेवाहुः । स०म०सं० (नारायण), पृ० 19

[३]यद्यपि सह शक्त्या प्रधानसाम्यमुपगतः शब्दस्तथापि पुनराविर्भवंस्तच्छक्तियुक्त एवाविर्भवति……..तेन पूर्वसम्बन्धानुसारेण सङ्केतः क्रियते भगवतेति । तत्त्ववैशारदी - पृ० - 82

[४]सां० का० - 19



#135

स्वामितया परमेश्वरस्यपि सार्वज्ञ्यं लाक्षणिकं व्यवह्रियते न तु वास्तविकम् एवमेव कर्तृत्वादिकमपि नैव परमेश्वरे सम्भवति ।

**निष्कर्षः -**

योगन्यायदर्शनाभिमतेश्वरयोः स्वरूपे नाधिको भेदः । वस्तुतः पातञ्जलदर्शनीयेश्वरः न्यायदर्शनीयैश्वरस्यैकेनैव लक्षणेन लक्षितुं शक्यते तल्लक्षणञ्चेदम्- "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः" । उभयत्रापि भगवतः नैकमात्रा परमसत्ता प्रकृतिपरमाणूनां सत्त्वं विद्यते । अन्यत् यत्सर्वमुभयेऽपि दर्शने परमेश्वरस्वरूपविषये वैमत्यम् तत् सृष्टेः समवायिकारणस्य भिन्नतया सञ्जायते । न्यायदर्शने परमाणूनामुपादानकारणत्वम् । परमाणुषु च स्वतः सृष्ट्यनुकूला प्रवृत्तिर्नैव सम्भवति । अतःन्यायदर्शनाभिमत ईश्वरः परमाणूनधिष्ठाय प्रेरयति । योगदर्शने च प्रकृतेरुपादानकारणत्वम् प्रकृतेश्च स्वतः प्रवृत्तिशीलत्वात् केवलमीक्षणेन प्रकृतेः गुणक्षोभमसावीश्वरो विदधाति तेनैव च सृष्टिर्भवति । एवमीश्वरस्योरुभयत्र निमित्तकारणत्वेऽपि सिद्धान्तभेदवशात् स्वरूपे भेदः । उभयदर्शनयोरीश्वरस्य स्वरूपेऽत्यन्तं सादृश्यम् ।

**सन्दर्भग्रन्थाः -**


- 2013 - सांख्यकारिका - व्याख्याकारः- डॉ. सुधांशुकुमारः षड़ंगी, चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी ।
- 1995 - सांख्यदर्शनम् - आचार्य उदयवीर-शास्त्री, विजयकुमार-गोविन्दराम-हासानन्दः, दिल्ली ।
- 2004 - योगदर्शनम् - आर्ष-गुरुकुल-महाविद्यालयः आबूपर्वतम् ।
- 1992- पातंजलयोगसूत्रवृत्ति (मणिप्रभा-टीका) प्रो. विमला कर्नाटक, चौखंबा कृष्णदास अकादमी, वाराणसी ।
- 1992 - पातंजलयोगदर्शनम् (तत्त्ववैशारदी, योगवार्तिक) प्रो. विमला कर्नाटक, रत्ना पब्लिकेशन वाराणसी ।
- 2000 - योगसिद्धान्तचन्द्रिका - प्रो. डॉ. विमला कर्नाटक, चौखंबा संस्कृत सीरीज ऑफिस, वाराणसी
- 1936 - योगविज्ञानशब्दकोशः - प्रो. डॉ. विमला कर्नाटक , सम्पूर्णानंद संस्कृत विश्वविद्यालय, वाराणसी
- 2002 - सांख्य कारिका, प्रो. डॉ. विमला कर्नाटक, चौखंबा पब्लिशर्स, वाराणसी
- 2004 - योगदर्शनम् – व्याख्याकारः – स्वामी-सत्यपति-परिव्राजकः , आर्यवनम् रोजडः, गुजरातः ।
- 1957 - योगसिद्धांत-चन्द्रिका - नारायणतीर्थः, लालबनारसीदासः, वाराणसी
- 2004 - ईश्वरपर्यालोचनम् – डॉ. सच्चिदानन्दमिश्रः भारतीय-विद्या-प्रकाशनम्, दिल्ली-07 ।
- 1921- योगमकरन्दः - योगमंजरी व्याख्या सहित - श्रीकुलयशखि शास्त्री, सरस्वती यंत्रालय, कालिकाता

- 1963 - भारतीय दर्शन की रुपरेखा - प्रो० हरेन्द्र-प्रसाद-सिन्हा, मोतीलाल-बनारसीदासः, दिल्ली ।
- 1997 - पातंजल-योग-प्रदीपः - स्वामी-ओमानन्द-तीर्थः , गीता प्रेस गोरखपुर ।
- 1997 - प्रशस्तपादभाष्यम् न्यायकन्दली - श्रीधरः, संपूर्णानंद संस्कृत विश्वविद्यालय वाराणसी ।
- 1921 - ब्रह्मसूत्रवृत्ति कौस्तुभ प्रभा, श्री वैद्यनाथ झा, महन्त श्री संतदास जी महाराज
- 2013 - योग सार संग्रह, डॉ पवन कुमारी, ईस्टर्न बुक लिंकर्स, दिल्ली
- 1935 - योग वार्तिक - पं. दामोदर शास्त्री, चौखंबा प्रकाशन, वाराणसी
- 1935 - योगसूत्र - पं. दामोदर शास्त्री, चौखंबा प्रकाशन, वाराणसी
- 1935 - व्यास भाष्य - पं. दामोदर शास्त्री, चौखंबा प्रकाशन, वाराणसी
- तत्त्ववैशारदी । https://sa.wikisource.org/s/11jm
- चन्द्रिकावृत्तिः । https://ci.nii.ac.jp/ncid/BB07169532.amp?l=en
- योगसिद्धांत-चन्द्रिका -https://kymyogavaisharadi.org


 ISSN : 2249-538X

# शिक्षायाम् अवधानम् आवधानिकप्रक्रियाश्च
# ( Attention & Attentional Process in the Education)

डा. रामजियावन प्रजापतिः*

**शोधसारः –**

जगति जीवनं वटवृक्षसदृशं वर्तते । अस्मिन् विद्यमाने जैविकवटवृक्षे प्राणिनां विविधाः शाखाः प्रकृतौ अधः उपरि च प्रसृताः वर्तन्ते । मानवजीवनेन साकं विविधानि विषयवस्तूनि सम्बद्धानि सन्ति । जीवने त्रिगुणात्मकप्रकृत्यनुसारं जनानाम् अवधानानि चिन्तनानि क्रियाकलापाश्च तेषु एव अनुवर्तन्ते । मानवानां चिन्तनम् अवधानं च विविधविषयाणां स्वभाव-गुण-प्रकृति-इच्छा-शक्त्याद्यनुगुणं निश्चीयते । तत्र अवधानम् अतीव महत्त्वपूर्णः विषयः वर्तते । क्रमेऽस्मिन् 'अवधानम्' इति पदम् आङ्ग्लभाषायाः 'Attention' इति पदात् निष्पन्नो जातः । यस्य अर्थः 'ध्यानम्' अथवा 'अवधानम्' इति भवति । सम्प्रति एतस्य पदस्य सम्बन्धः उन्मुक्तचिन्तनेन साकं शैक्षिकप्रक्रियया च सह वर्तते । अवधानम् एका चयनात्मिका प्रक्रिया (Process of Selection) वर्तते । आवधानिकप्रक्रियायाम् ऐच्छिकावधानम् (Voluntary Attention), स्वाभाविक्यवधानम् (Naturally Attention) इति भवतः । शास्त्रीयपरम्परया अवधानस्य निर्धारककारकेषु मुख्यतया पञ्च कारकाणि वर्तन्ते । तद्यथा- आर्तः, जिज्ञासुः, अर्थिनः ज्ञानिनश्च । एतदतिरिच्य आवधानिकप्रक्रियायां प्रभावकारितत्त्वेषु उद्दीपनस्य तीव्रता, अवधिः, स्थानम्, आकारः, पुनरावृत्तिः, नावीन्यम्, औदासीन्यम्, आवश्यकताः, अभिरुचयः, जिज्ञासा, उद्देश्यं, मानसिकतत्परता, प्रवृत्तयः, प्रशिक्षणं, मनोवृत्तयः वैयक्तिकमूल्यानि च विशिष्टतत्त्वानि अन्तर्निहितानि भवन्ति । श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेनोक्तम्-

**अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ।**
**अधश्च मूलान्यनुसन्ततानि, कर्मानुबन्धीनि मनुष्यलोके ॥**[1]

**प्रमुखशब्दाः** – अवधानम्, जिज्ञासा, आर्तः, अर्थः, अर्थिनः, गुणत्रयम् (सत्त्वगुणः, रजोगुणः, तमोगुणः), अभिलाषा, स्वाभाविकी, मनोवृत्तयः, चयनात्मिकी, उद्देश्यम्, आवधानिकप्रक्रिया, अभ्यासः, नूतनता विषमोद्दीपकाश्च ।

**अवधानस्य सङ्कल्पना** (Concept of Attention) - प्रकृतौ जीवजगति विविधानि विषयवस्तूनि परस्परसम्बद्धानि भवन्ति । जीवने त्रिगुणात्मकप्रकृत्यनुसारं जनानाम् अवधानं चिन्तनानि क्रियाकलापाश्च तेषु एव अनुवर्तन्ते । मानवानां चिन्तनम् अवधानं च विविधविषयाणां स्वभाव-गुण-प्रकृति-इच्छा-शक्त्याद्यनुगुणं निश्चीयते । यत्र अध्ययनक्षेत्रे अवधानं महत्त्वपूर्णं वर्तते । क्रमेऽस्मिन् 'अवधानम्' इति पदम् आङ्ग्लभाषायाः 'Attention'

---

*सहायकाचार्यः (अ.), शिक्षाशास्त्रविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः, शृङ्गेरी

[1]श्रीमद्भगवद्गीता, अध्याय-15.2

इति पदात् निष्पन्नो जातः । यस्य अर्थः 'ध्यानम्' अथवा 'अवधानम्' भवति । लोकैः 'अवधानम्' इति पदं 'ध्यानम्' इत्यर्थे उपयुज्यते । सम्प्रति एतस्य पदस्य सम्बन्धः शिक्षया साकं शैक्षिकप्रक्रियया च सह वर्तते । अवधानम् एका चयनात्मिका प्रक्रिया (Process of Selection) वर्तते । यदि केचन जनाः कानिचन वस्तूनि पश्यन्ति तर्हि आत्मना एव ध्यानेन पश्यन्ति । अनेन सह केचन अन्यविधकारणेनाऽपि कानिचन वस्तूनि ध्यानेन पश्यन्ति । केचन विविधयोगेन साकं कर्मेच्छया अनिच्छया वा अन्यं विषयं प्रति ध्यानं ददति । अतः जनैः वस्तुनः संख्याज्ञान-अवकलन-व्यवकलन-गुण-प्रकृति-कर्मादिगुणानुसारं अवधानं दीयते । श्रीमद्भगवद्गीतायामुक्तम्-

**ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना ।**
**अन्ये साङ्ख्येन योगेन कर्मयोगेन चापरे ॥**[1]

अतः अवधानं नाम कस्यचित् कार्यसम्पादनाय मानसिकशक्तेः केन्द्रीकरणं भवति । यत्र मनसा, वाचा कर्मणा च ध्यानपूर्वककार्यसम्पादनं क्रियते । जनाः सोद्देश्यपूर्णोद्दीपनं प्रति ध्यानं दत्त्वा अपेक्षितकार्याणां निष्पादनं कुर्वन्ति । अवधानं कस्यचित् वस्तुनः प्रत्यक्षीकरणस्य अथवा कार्यसम्पादनस्य विशिष्टा प्रक्रिया भवति । शिक्षणक्षेत्रे प्रायशः दृश्यते यत् जनाः शिक्षणाधिगमकार्यसंपादने अवधानस्य प्रयोगम् आधिक्येन कुर्वन्ति । पठनपाठने बालकानाम् अवधानं अधिकं भवति । यदा बालकाः परीक्षाकाले सहसा उच्चध्वनिं श्रुत्वा ध्वनिप्रदूषणस्य अनुभवं कुर्वन्ति तदा आवधानिकसंक्रियायाः एव प्रभावः भवति । छात्राणां विविधक्रियाकलापेन व्यवहारेण च यत्र यत्र मनः गच्छति अथवा तेषां मनसि यथा चिन्तनम् आगच्छति तेनैव आवधानिकक्रिया सञ्जायते । आवधानिकक्रियायां मनः चञ्चलं भवति । तस्मिन् काले बालकाः स्वोद्देश्यानुसारं चयनात्मकम् अवधानविषये क्रियाशीलाः भवन्ति । ते चञ्चलेन मनसा एव कस्यचिद् विशिष्टवस्तुनः चयनं कृत्वा अवधानेन सह विषयस्य प्रत्यक्षीकरणं कुर्वन्ति । अत्र इदं स्पष्टं भवति यत् अवधानम् (Attention) एका मानसिकी प्रक्रिया (Mental Process) भवति । अनया सह अवधानसम्बद्धानि बहूनि निर्धारकतत्त्वानि सन्निहितानि भवन्ति । अस्यां प्रक्रियायां कश्चन चयनात्मकव्यवहारः क्रियाशीलः भवति । केचन मनोवैज्ञानिकाः अवधानं प्रत्यक्षीकरणस्य प्रारम्भिकीम् अवस्थां (First Stage of Perception) स्वीकुर्वन्ति । केचन इदं स्वीकुर्वन्ति यत् अवधानं प्रत्यक्षीकरणस्य प्राथमिकी क्रिया (Primary Activity of Perception) भवति । अनेन ज्ञायते यत् यदा आवधानिकी क्रिया सम्पन्ना भवति तदैव प्रत्यक्षीकरणस्य अनुक्रिया सञ्जायते । यदा अस्माभिः कस्यचित् उद्दीपनं प्रति अवधानं प्रदीयते तदैव उद्दीपनस्य प्रत्यक्षीकरणं भवति । अवधानं विना प्रत्यक्षीकरणं न संभवति । अतः आवधानिकक्रियया साकं प्रत्यक्षीकरणक्रियायाः प्रस्थापनं महत्त्वपूर्णं कार्यं भवति । केचन इदं स्वीकुर्वन्ति यत् अवधानम् एका स्वतंत्रमानसिकी प्रक्रिया (Openly Mental Process) भवति । अस्मिन् क्रमे जनः स्वतन्त्ररूपेण एकस्य वस्तुनः चयनं कृत्वा

[1] श्रीमद्भगवद्गीता, अध्याय-13.25


ISSN : 2249-538X

आवधानिकक्रियया सह प्रत्यक्षीकरणस्य क्रियां सम्पादयन्ति । परन्तु आधुनिकैः मनोवैज्ञानिकैः स्विक्रियते यत् अवधानं सा मानसिकी क्रिया भवति यया बालकः प्राकृतिकवातावरणे नैकेभ्यः उद्दीपकेभ्यः कस्यचित् एकस्य विशिष्टवस्तुनः अथवा विशिष्टोद्दीपकस्य चयनं करोति ।

अतः उपर्युक्तेन विचारेण स्पष्टं भवति यत् अवधानम् एका चयनात्मिका प्रक्रिया (Process of Selection) वर्तते । आवधानिकप्रक्रियायाम् एकस्य वस्तुनः चयनस्य क्षेत्रम् (Special Area of Selection) भवति । तस्य वस्तुनः चयनक्षेत्रे बालकः स्वानुभवानुसारम् अथवा चिन्तनं कृत्वा अवधानं ददाति ।

**अवधानस्य परिभाषाः** (Definition of Attention) -

**श्री.बी.यन्.झा महोदयानुसारम् -** "अवधानं नाम कस्यचित् विचारस्य संस्कारस्य वा मूलभूतकारकाणां चेतनायां स्थिरीकरणप्रक्रिया भवति ।"

**स्पीयरमैन् महोदयानुसारम् -** "अवधानम् एका शक्तिः अथवा प्रेरणा भवति, यस्याः सञ्चालनं गुणात्मकक्षेत्रैः साकं ज्ञानात्मकक्षेत्रेषु भवति ।"

**मन् महोदयानुसारम् -** "अवधानम् एका अभिप्रेरणात्मिकी प्रक्रिया वर्तते ।"

**रेबर् एवं रेबर् महोदयानुसारम् -** "अवधानं प्रत्यक्षीकरणाय चयनात्मकक्रियया साकं परस्परं सम्बद्धं भवति । अनेन कारणेन एकस्मिन् काले जनः वातावरणेषु विद्यमानेभ्यः उद्दीपकेभ्यः विशिष्टोद्दीपनं प्रति एव अवधानं स्थापयति । सः अन्यान् उद्दीपकान् प्रति उपेक्षाभावं प्रकटयति ।"[१]

उपर्युक्तानां विचाराणाम् अवलोकनेन इदं स्पष्टं भवति यत्- अवधानम् ऐतादृशी मानसिकी प्रक्रिया वर्तते यस्यां मनः कस्यचित् उद्दीपनस्य कृते अथवा विचारं प्रति ध्यानं सुनियोजयति ।

**अवधानस्य प्रकाराः** (Types of Attention) - अवधानस्य मुख्यतया विभागत्रयं वर्तते-

- **ऐच्छिकावधानम्** (Voluntary Attention) -

  जनाः सर्वदा प्रकृत्यनुसारं स्वकर्मसु चिन्तनेषु एव विचरन्ति । जनाः सर्वदा कर्माणि कुर्वन्ति । प्रकृत्यनुसारं सर्वे मानवाः गुणत्रययुक्ताः भवन्ति । अनेन साकं सर्वे जनाः कर्मशीलाः चिन्तनशीलाश्च भवन्ति । ते उद्देश्यानुसारम् आजीवनं विशिष्टकार्याणि सम्पादयन्ति । सम्बद्धकार्यसम्पादने जनानां वैयक्तिकेच्छाः अपि प्रवृत्ताः भवन्ति । कस्यचित् विषयस्य कृते बालकस्य अवधानं तस्यात्मेच्छया एव गच्छति । अत्र व्यक्तेः आवश्यकता इच्छा एव (Needs/Interest) प्रधाना भवति । बालकः स्वात्मेच्छया एव कस्मिंश्चित् उद्दीपने अवधानं प्रदर्शयति । तद्यथा-

**न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ।**

[१] Rebar& Rebar (2001)

**कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥**[१]

यदि वयं चिन्तयामः तर्हि अस्माकं परिसरे जनाः बहूनि वस्तूनि पश्यन्ति । अस्माभिः यस्य वस्तुनः विशिष्टावश्यकतानुभूयते तस्य वस्तुनः कृते एव चयनात्मकम् (Selective Attention) अवधानं दीयते । यथा- यदि कक्षायाः बहिः ध्वनिप्रदूषणं भवति अथवा अनावश्यकं विषमवातावरणं दृश्यते पुनरपि ये छात्राः कक्षायाम् उपस्थिताः भवन्ति ते छात्राः अध्यापकेन प्रदीयमानस्य व्याख्यानस्य श्रवणम् अनिवार्यावश्यकतानुभूय विशिष्टावधानेन सह स्वेच्छया एव अध्ययनं कुर्वन्ति । तेषाम् अवधानं बाह्यतः आगच्छन्तं प्रदूषितं ध्वनिं प्रति न गच्छति ।

**ऐच्छिकावधाने मुख्यतया त्रीणि तत्त्वानि अन्तर्निहितानि भवन्ति -**

1. विशिष्टोद्दीपनम् (For Special Stimuli)
2. विशिष्टोद्देश्यम् (Special Aim or Purpose)
3. चयनात्मिका प्रक्रिया (Effort for Selection Process)

- **अनैच्छिकम् अवधानम्** (Involuntary Attention) -

अस्याम् आवधानिकप्रक्रियायां स्पष्टं भवति यत् श्रेष्ठैः जनैः स्वीकृतानि विषयवस्तूनि आचरिताः व्यवहाराः च यादृशाः भवन्ति तादृशाः लोकैः अनैच्छिकरूपेण अवधानं दीयते । अर्थात् यस्य वस्तुनः गुणम् अधिकं भवति अथवा यस्य वस्तुनः महत्त्वम् अधिकं भवति तस्मिन् वस्तुनि अवधानम् अधिकं भवति । तद्यथा-

**यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।**
**स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥**[२]

अतः महत्त्वपूर्णवस्तुनः कृते जनानां ध्यानम् अधिकं गच्छति । जनैः क्रियमाणं चिन्तनं विना एव कस्यचिदपि वस्तुनः कृते अथवा उद्दीपनस्योपरि अवधानं दीयते । अस्मिन् आवधानिकप्रक्रियायां व्यक्तेः इच्छा (Desire) प्रधाना न भवति अपि तु वस्तुनः महत्त्वं, गुणः (Qualities of Stimulus) एव प्रधानः भवति । यथा- यस्मिन् काले छात्राः कक्षायाम् अध्ययनार्थम् उपस्थिताः भवन्ति तस्मिन्नेव काले यदि कक्षायाः बहिः कोऽपि विशिष्टः जनः आगच्छति चेत् छात्राणाम् अवधानं तं विशिष्टं जनं प्रति अनैच्छिकया एव गच्छति । एतत् सदृशमेव यदि कुतः मधुरध्वनिः आगच्छति इत्यत्रापि भवति । तर्हि अस्यां परिस्थितौ अपि छात्राणाम् अवधानं अनैच्छिकया गमिष्यति ।

[१]श्रीमद्भगवद्गीता, अध्याय-3.5
[२]श्रीमद्भगवद्गीता, अध्याय-3.21


ISSN : 2249-538X

# 141

- **स्वाभाविकम् अवधानम्** (Naturally Attention) -

मानवः सदैव मानसिकचिन्तने एव प्रवृत्तः भवति । यत्र कस्यचिद् वस्तुनः आवश्यकता, महत्त्वं, गुणः, स्वभावः वर्णादयश्च प्रभावं प्रदर्शयन्ति । अत्रैव स्वाभाविकं अवधानम् अपि जायते । आवधानिकप्रक्रियायां जनानां स्वभावः तु अधिकं महत्त्वपूर्णं कारकं भवति । जगति जनानां स्वकर्मणा फलसंयोगेन एव यः स्वभावः जायते स एव स्वभावः आवधानिकप्रक्रियायाम् स्वाभाविकावधानं भवति । मानवानां स्वभावः तेषां कर्मानुसारं कर्मफलसंयोगेन एव जायते । अतः कस्यचित् वस्तुनः कृते तेषाम् अवधानं स्वाभाविकरीत्या (Naturally) एव शीघ्रं गच्छति । पूर्वजैः साहचर्येण सह अनुभवेन च यादृशः स्वभावः जायते तादृशः अनुभवः एव आवधानिकप्रक्रियायाम् अनुष्ठीयते । मनुसमृतौ उक्तमस्ति यत्-

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥**[१]

अध्यापकेन छात्रेषु अनुभवाभ्यासप्रशिक्षणादिमाध्यमेन स्वभावनिर्माणं क्रियते । अनेनैव स्वाभाविकगतिविधयः जायन्ते । अनेन स्वभावेन एव छात्राणाम् अवधानं कस्यचित् वस्तुनः चयने अथवा उद्दीपनस्य चयने केन्द्रीभूतकारणं भवति । अर्थात् यत्र छात्राणाम् अवधानं स्वाभाविकरीत्या शीघ्रं गच्छति एतदेव स्वाभाविकम् अवधानं भवति । तद्यथा-

**न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।**
**न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥**[२]

लोके यदि कोऽपि वैद्यः भवति, तर्हि तस्य अवधानं रुग्णं प्रति अथवा चिकित्सालयं प्रति त्वरितं गच्छति । यदि कोऽपि छात्रः भवति, तर्हि तस्य अवधानं विद्यालयं प्रति, पुस्तकानि प्रति शिक्षकान् प्रति च शीघ्रं गच्छति ।

**अवधानस्य निर्धारककारकाणि** (Effective factors of Attention) - भारतीयशास्त्रपरम्परानुसारम् अवधानस्य निर्धारककारकेषु पञ्चकारकाणि महत्त्वपूर्णानि सन्ति -

**1.आर्तः** **2.जिज्ञासा** **3.अर्थः** **4.अर्थिनः** **5.ज्ञानिनः**

यस्य जनस्य यस्मिन् वस्तुनि अधिकः आर्तता भवति अर्थात् पिपासिता आवश्कताश्च (Thirsty, Needy) भवति तस्य अवधानं तस्मिन् वस्तुनि अधिकं भवति । यस्मिन् विषये येषां महती जिज्ञासा भवति तस्मिन्

[१] मनुस्मृतिः
[२] श्रीमद्भगवद्गीता, अध्याय-5.14

विषये अपि तस्य अवधानं शीघ्रं गच्छति । यस्य वस्तुनः उद्दीपकस्य च धनम् (अर्थः) अधिकं भवति तस्य वस्तुनः ध्यानम् अधिकं भवति । अर्थिनः नाम येषां कस्यचित् वस्तुनः विशिष्टावश्यकता भवति तस्य वस्तुनः अर्थिनः अथवा कस्यचित् उद्दीपकस्य अनिवार्यावश्यकतायुक्तः जनः । यत्र अनिवार्योद्दीपकं भवति तत्र अवधानं सर्वाधिकं भवति । इदृशं ये जनाः ज्ञानिनः भवन्ति अथवा विद्वांसः भवन्ति तेषाम् अवधानं कस्यचित् वस्तुनः चयने निर्धारणे वा शीघ्रं गच्छति । श्रीमद्भगवद्गीतायामुक्तम्-

**चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुनः । आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥**[१]

अथ च ये जनाः अभिलाषाशून्याः भवन्ति तेषाम् अवधानं तु कस्मिंश्चित् वस्तुनि अतीव मन्दं गच्छति । अभिलाषारहितपरिस्थितौ कस्यचित् उद्दीपनस्य कृते अवधानं शून्यम् अपि भवितुं शक्नोति । यदि देशकालपरिस्थितौ आवधानिकवातावरणम् अनूकूलं वर्तते तर्हि तस्य उदीपनस्य कृते अवधानम् अधिकं भवति । यथोक्तम्-

**अन्याभिलाषिताशून्यं ज्ञानकर्माद्यनावृतम् ।**
**आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा ॥**[२]

- **अवधानस्य बाह्यनिर्धारकतत्त्वानि -**

**त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ।**
**मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥**[३]

अवधानस्य बाह्यनिर्धारकतत्त्वानि प्रकृतौ विद्यमानैः त्रिगुणात्मिकोद्दीपकैः (सत्त्वगुणः, रजोगुणः, तमोगुणः) सह सम्बद्धानि भवन्ति । प्रकृतौ विद्यमानैः त्रिगुणकारकैः जनाः प्रभावितो भूत्वा कस्मिंश्चित् विषये अवधानं स्थापयन्ति । ते जनाः विविधकारकेभ्यः एकस्य विशिष्टकारकस्य चयनं कृत्वा तस्य विशिष्टकारकस्य कृते एव अवधानं ददति । आवधानिकप्रक्रियायामास्यां मुख्यनिर्धारककारकाणां विवरणम् अधः प्रदीयते-

- **उद्दीपनस्य तीव्रता** (Power of Stimuli) - यत्र उद्दीपकानां तीव्रता अधिका भविष्यति तत्र अवधानस्य गतिः अधिका भविष्यति । यत्र उद्दीपकस्य तीव्रता न्यूना भविष्यति तत्र अवधानस्य गतिः न्यूना भविष्यति । यथा- यदि कस्यचित् गन्धयुक्तोद्दीपने गन्धस्य तीव्रता अधिका भवति, तर्हि तस्य गन्धस्य कृते अवधानं शीघ्रतया गच्छति, परन्तु यस्य गन्धयुक्तवस्तुनः गन्धस्य तीव्रता न्यूना

[१]श्रीमद्भगवद्गीता, अध्याय-7.16
[२]भक्तिरसामृतसिन्धु.1.1.11
[३]श्रीमद्भगवद्गीता, अध्याय-7.13


ISSN : 2249-538X

भवति तस्य उद्दीपनस्य कृते अवधानं शीघ्रं न गच्छति ।

– **उद्दीपनस्य अवधिः** (Times of Stimuli) -

**पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ।**
**जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥**[1]

आवधानिकक्रियायाम् उद्दीपनस्य अवधिः महत्त्वपूर्णं निर्धारकतत्त्वं भवति । यः उद्दीपकः यावत् कालपर्यन्तं तिष्ठति तावत् कालपर्यन्तम् अवधानं तस्य उद्दीपकस्य कृते अधिकम् अथवा न्यूनं भवति । प्राक्तनकाले अधिककालपर्यन्तं क्रियमाणं कार्यं प्रति पूर्वाभ्यासकारणात् जनानाम् अवधानं शीघ्रं भवति । यदि उद्दीपकः अधिककालपर्यन्तं तिष्ठति, तर्हि अवधानम् अपि अधिकं भवति । यदि उद्दीपकस्य अवधिः न्यूना भवति, तर्हि अवधानस्य गतिरपि न्यूना भवति ।

– **उद्दीपनस्य स्थानम्** (Place of Stimuli) - इदं तत्त्वं वाह्यनिर्धारकतत्त्वं भवति । यत्र वस्तूनि अथवा उद्दीपनानि पुरतः (Front Place) भवन्ति, तत्र तानि उद्दीपनानि प्रति अस्माकम् अवधानं शीघ्रं गच्छति, परन्तु यानि उद्दीपनानि साक्षात् पुरुतः न भूत्वा परोक्षे अथवा मध्ये (Middle or Inside) भवन्ति तानि उद्दीपनानि प्रति अस्माकम् अवधानं शीघ्रं न गच्छति । यथा- सभायां ये जनाः मञ्चस्य पुरतः विराजमानाः भवन्ति तान् जनान् प्रति अस्माकम् अवधानं सर्वादौ शीघ्रं गच्छति । ये जनाः मध्ये अथवा अन्तः तिष्ठन्ति तान् जनान् प्रति अवधानं शीघ्रं न गच्छति । एतादृशमेव विद्यालयेषु कक्षायां ये छात्राः अग्रिमपङ्क्तौ उपविशन्ति तान् छात्रान् प्रति अध्यापकस्य अवधानं शीघ्रं गच्छति, अथ च मध्ये अथवा पृष्ठभागे उपविष्टानां छात्राणां कृते अवधानं न्यूनगत्या एव गच्छति ।

– **उद्दीपनस्य आकारः** (Size of Stimuli) - यस्य वस्तुनः आकारः दीर्घः (Large Size) भवति तस्य वस्तुनः कृते अस्माकम् अवधानं शीघ्रं गच्छति, परन्तु लघ्वाकारवस्तुनः (Small Size) कृते अवधानं मन्दगत्या गच्छति ।

– **उद्दीपनस्य पुनरावृत्तिः** (Frequency of Stimuli) -

उद्दीपकानां पुनरावृत्तिः अवधानस्य महत्त्वपूर्णं निर्धारकतत्त्वं भवति । यस्य उद्दीपकस्य आवृत्तिः वारं वारं भवति तस्य उद्दीपनस्य कृते अस्माकम् अवधानं शीघ्रं गच्छति, परन्तु येषां उद्दीपकानां पुनरावृत्तिः न भवति तेषाम् उद्दीपकानां कृते अधिकम् अवधानम् सति न्यूनं भवति । यथा- भगवता

[1] श्रीमद्भगवद्गीता, अध्याय-6.44

श्रीकृष्णेनोक्तम्-

**अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ।**
**परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥**[१]

अर्थात्त् चिन्तनप्रक्रियायां यदा जनाः आत्मना चैतन्यावस्थायां युक्तरूपेण योगसहितं भृशम् अभ्यासं कुर्वन्ति तदा दिव्यपुरुषं प्रति अथवा निर्धारितलक्ष्यं प्रति तेषाम् अवधानं जवेन गच्छति ।

– **विरुद्धात्मकोद्दीपकाः अथवा विषमोद्दीपकाः** (Odd/Contrast Stimulus) - यदि नैकेषां वस्तूनां मध्ये विरुद्धात्मकोद्दीपकम् अथवा विषमोद्दीपकं भवति चेत् विरुद्धात्मकोद्दीपकं प्रति जनानाम् अवधानं शीघ्रं गच्छति । अथ च समानोद्दीपकेभ्यः अवधानं मन्दगत्या भवति । यथा- एकस्यां सभायां यदि सर्वे जनाः अवनताकाराः (Short Height) भवन्ति परन्तु तेषु एकः जनः उन्नताकारः (Long Height) भवति, तर्हि तस्यां परिस्थितौ तस्योन्नताकारजनस्य उपरि अस्माकम् अवधानं शीघ्रं गच्छति । एवम् सभायां यदि सर्वे जनाः उन्नताकाराः (Long Height) भवन्ति, परन्तु तेषु एकः जनः वामनः (Dwarf) भवति, तर्हि तस्य वामनस्य जनस्योपरि जनानाम् अवधानं शीघ्रं गच्छति । अतः उद्दीपकानां विषमता अपि आवधानिकक्रियायां प्रभावं जनयति ।

– **उद्दीपनस्य नूतनता** (Novelty Stimuli) - अवधानस्य निर्धारकेभ्यः उद्दीपकस्य नूतनता (Novelty) अधिकं महत्त्वपूर्णं कारकं भवति । यस्मिन् उद्दीपने नूतनता भवति तस्मिन् उद्दीपने छात्राणाम् अवधानं शीघ्रं गच्छति । यथा- यदि कक्षायां कस्मिंश्चित् दिवसे कोऽपि नूतनः छात्रः आगच्छति तर्हि छात्राणाम् अध्यापकस्य च अवधानं तस्य नूतनच्छात्रस्योपरि सर्वादौ गच्छति । अतः वस्तुनः नूतनता अपि अवधानं प्रभावयति ।

– **उद्दीपनस्य आवृत्तयः उदासीनताश्च** (Frequency and Stimuli) - यदा उद्दीपनम् एकाकी अथवा तटस्थं (Single/Neutral) भवति अथवा तस्य उद्दीपनस्य आवृतिः भृशं भवति अथवा वारं वारम् अभ्यासः भवति चेत् तस्य उद्दीपनस्योपरि अवधानं शीघ्रं गच्छति । यथोक्तम्-

**असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।**
**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥**[२]

– **उद्दीपकानां प्रकारः** (Types of Stimuli) - वयं जानीमः यत् उद्दीपकाः विविधाः प्रकाराः

[१]श्रीमद्भगवद्गीता, अध्याय-8.8
[२]श्रीमद्भगवद्गीता, अध्याय-6.35


ISSN : 2249-538X

भवन्ति । जैविकवातावरणे अस्माकं दृष्टिपथे विविधानि उद्दीपकानि आगच्छन्ति । तेषु विविधवेषभूषणानि, रूपरङ्ग-गीतसङ्गीतानि, ध्वनिश्रवणगन्धभावानुभावोद्दीपकानि सदृशानि बहूनि उद्दीपकानि प्रसृतानि भवन्ति । एतेषु सर्वेषु उद्दीपकेषु आवधानिककारकाणि भिन्नानि भवन्ति । उपर्युक्तानि विविधानि कारकाणि अवधाने प्रभावं जनयन्ति ।

– **उद्दीपकानां परिवर्तनम्** (Diversion of Stimuli) - कश्चिद्कार्यसम्पादने उद्दीपकेषु परिवर्तनम् अपि आवधानिकसंक्रियायाम् आकर्षकतां जनयति । तस्मात् कारणात् तस्य उद्दीपकस्य कृते छात्राणाम् अवधानं शीघ्रं गच्छति ।

– **उद्दीपकानां वर्णवैविध्यता** (Different Colors of Stimuli) - उद्दीपकानां वर्णवैविध्यकारणात् अवधानं शीघ्रं गच्छति । यथा- वर्णरहितोद्दीपके सति (Colorless Stimuli) विविधवर्णोद्दीपकेषु (Colorfully Stimuli) छात्राणाम् अवधानम् अधिकं भवति । इदृशं सघनवर्णोद्दीपके (Dark Color) अपि अवधानं शीघ्रं गच्छति । यथा- रक्तवर्णोद्दीपकान् प्रति , पीतवर्णोद्दीपकान् प्रति, हरितवर्णोद्दीपकान् प्रति अवधानम् अधिकं भवति । सामान्यतया वर्णरहितान् उद्दीपकान् प्रति जनानाम् अवधाने न्यूनता भवति ।

- **अवधानस्य आन्तरिकनिर्धारकतत्त्वानि -**

– **वस्तुनः आवश्यकताः** (Needs of Stimuli) - आवधानिकनिर्धारककारकेषु वस्तुनः आवश्यकता सर्वाधिकं महत्त्वपूर्णं कारकं भवति । आवश्यकता आविष्कारस्य जननी मता । एकस्य बुभुक्षितस्य बालकस्य अवधानं खाद्यपदार्थान् प्रति शीघ्रं गमिष्यति । येषां जनानाम् आवश्यकता यस्मिन् वस्तुनि यावत् अधिका न्यूना वा भवति तावत् पर्यन्तं तेषां जनानाम् अवधानं तस्मिन् वस्तुनि तीव्रगत्या अथवा मन्दगत्या गच्छति ।

– **वस्तूनि अभिरुचयः** (Interests in goods) - आवधानिकक्रियायां यस्य अभिरुचिः यस्मिन् वस्तुनि अधिका भविष्यति तस्मिन् उद्दीपके तस्य अवधानम् अधिकं भविष्यति । यथा- यदि कस्यचित् छात्रस्य अभिरुचिः क्रीडायाम् अधिका भवति, तर्हि तस्य अवधानं क्रिडाक्षेत्रे तीव्रगत्या गमिष्यति, अथ च यदि सः कदाचित् दैनिकसमाचारपत्रं पठति तर्हि तस्य अवधानं सर्वादौ क्रीडासम्बद्धसमाचारं प्रति गच्छति । एवं सः सर्वादौ क्रीडासम्बद्धसमाचारम् एव पठति । अतः अवधाने जनानाम् अभिरुचयः अपि अधिकं प्रभावं जनयन्ति ।

– **जिज्ञासा** (Curiosity) - जिज्ञासा एव संज्ञानात्मकसङ्क्रियायाः प्रथमं सोपानं भवति । जिज्ञासा नाम ज्ञानपीपासा भवति । नूतनज्ञानाभिलाषा विद्यार्थिनां तु महान् गुणः वर्तते । जिज्ञासया एव छात्राः अध्ययने अधिकम् अवधानं ददन्ति । यस्य छात्रस्य जिज्ञासा यावत् पर्यन्तम् अधिका भवति तावत् पर्यन्तं तस्य छात्रस्य पठनकार्ये अवधानम् अधिकं भवति । यथा- शास्त्रीयज्ञानं प्रति जिज्ञासा, राजनीतौ जिज्ञासा, वैज्ञानिकी जिज्ञासा, आध्यात्मिकीत्यादिजिज्ञासाः अवधानं प्रभावयन्ति ।

– **अवधानस्य उद्देश्यम्** (Aims of Attention) - अवधाने उद्देश्यानां प्रभावः अधिकः भवति । बालकस्य उद्देश्यानुगुणम् एव आवधानिकक्रिया संपाद्यते । यदि कोऽपि छात्रः आपणे पुस्तकं क्रेतुमिच्छति तर्हि उद्देश्यानुसारं सम्बद्धपुस्तके एव तस्य अवधानम् सर्वाधिकं भवति ।

– **मानसिकतत्परता** (Mentally Activeness) - बालकाः आत्मना तत्पराः भूत्वा कस्यचित् उद्दीपनस्य कृते अधिकम् अवधानं ददति । तत्र मानसिकी तत्परता अधिकं प्रभावकारि कारकं भवति । यथा- यदि कोऽपि छात्रः कक्षायां स्वमित्रं प्रति चिन्तयति अथवा मित्रस्य प्रतीक्षां करोति तर्हि तस्य अवधानं केवलं स्वमित्रं प्रति एव गच्छति, अन्यान् प्रति तस्य अवधानं न गच्छति । यदि तेन सहसा द्वारे केनापि कोऽपि ध्वनिः श्रूयते तदपि तस्य अवधानं मित्रं प्रति एव गच्छति । यतो हि तस्यां परिस्थितौ मानसिकरुपेण सः स्वमित्राय एव तत्परः भवति । अतः मानसिकतत्परता अवधानं प्रभावयति ।

– **जनानां प्रवृत्तयः** (Habits of Person) - आवधानिकतीव्रता जनानां प्रवृत्त्यनुसारम् एव निर्धार्यते । जनाः स्वप्रवृत्त्यनुगुणं कस्मिंश्चित् वस्तुनि अवधानं ददति ।

– **प्रशिक्षणम्** (Training) - प्रशिक्षणेन आवधानिकक्रियायां गतिः जायते । प्रशिक्षणेन अवधानम् अधिकं भवति । कस्मिंश्चित् विषये प्रशिक्षणम् आवधानिकप्रक्रियायां कौशलं जनयति ।

– **अवधाने मनोवृत्तयः**(Mentality In Attention) -

सर्वेषां जनानां मनोवृत्तयः भिन्नाः भवन्ति । एकस्य जनस्य मनोवृत्तयः कस्मिंश्चित् उद्दीपने धनात्मिकाः भवन्ति । तस्मात् कारणात् तेषाम् अवधानं तस्मिन् उद्दीपने अधिकं भवति । यथा- एकस्मिन् पक्षे एकं मन्दिरम् अन्ये च पक्षे एका मस्जिद् अथवा गुरुद्वारा भवति । यस्य मनोवृत्तिः मन्दिरं प्रति धनात्मिका भवति तस्य अवधानं मन्दिरं प्रति सर्वादौ गच्छति, परन्तु यस्य मनोवृत्तिः मस्जिदम् अथवा गुरुद्वारां प्रति नकारात्मिकी भवति तस्य अवधानं मस्जिदं प्रति अथवा गुरुद्वारां प्रति शीघ्रं न गच्छति । अधिगमक्षेत्रे बालकानां मनोवृत्तयः आवधानिकप्रक्रियायां सर्वाधिकं प्रभावं


ISSN : 2249-538X

जनयति । येषां छात्राणां मनोवृत्तयः शास्त्राध्ययने अथवा साहित्याध्ययने अधिकाः भवन्ति तेषाम् अवधानं शास्त्रं प्रति अधिकं भवति, परन्तु येषां मनोवृत्तयः व्याकरणे अथवा ज्यौतिषे शास्त्रे अधिकाः भवन्ति ते छात्राः व्याकरणम् अथवा ज्यौतिषं प्रति अधिकम् अवधानं ददति । अतः आवधानिकप्रक्रियायां मनोवृत्तीनां प्रभावः अधिकः भवति । यथा- भगवता उक्तं यत्-

**यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ।सर्वसङ्कल्पसंन्यासी योगारूढस्तदोच्यते ॥**[१]

अर्थात् जनैः अर्थयुक्तस्वकार्येषु मानसिकप्रवृत्त्यनुसारम् इन्द्रियाणां सङ्लग्नता यावत् न संयोज्यते तावत् सर्वाङ्गसङ्कल्पयुक्ततपस्विनः सदृशाः जनाः अपि योगारूढाः न भवन्ति ।

**वैयक्तिकमूल्यानि** (Personal Values) -

अवधाने वैयक्तिकमूल्यानां प्रभावः महत्त्वपूर्णं स्थानं भजति । यथा- विशिष्टज्ञानविषये जनानाम् अवधानं शीघ्रं गच्छति । यतोहि इह लोके ज्ञानसदृशं पवित्रं किमपि वस्तु नास्ति । विद्वद्भिः जीवने विशिष्टावसरेषु आत्मज्ञानामृतं पातुं प्रबोध्यते । आत्मज्ञानमेव जीवने प्रकाशं जनयति । विविधशास्त्रनिष्णाताः गुरवः एव चन्द्रसूर्यसदृशाः जीवने प्रकाशं जनयन्ति । तत्र वैयक्तिकमूल्यानां, धार्मिकमूल्यानां, सामाजिकमूल्यानां, राजनैतिकमूल्यानां तथा च विविधमूल्यानां स्थापनं महत्त्वपूर्णं कार्यं भवति । आवधानिकप्रक्रियायां विविधमूल्यानि प्रभावं जनयन्ति । तद्यथा-

**न हि ज्ञानेन सदृशं पवित्रमिह विद्यते । तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥**[२]

**ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः । तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥**[३]

- **आवधानिकप्रक्रियायाः शैक्षिकानुप्रयोगः** - (Educational Implication of Attention Process)

  – शिक्षायाम् आवधानिकप्रक्रियायाः महत्त्वं सर्वाधिकं भवति । कक्षायां छात्राणां मानसिकावधानं यदि सम्यक्तया न भवति तर्हि तेषां छात्राणां विषयाधिगमः न संभवति । शिक्षकाः आवधानिकसिद्धान्तानाम् अनुप्रयोगं कृत्वा छात्राणां ज्ञानं वर्धयन्ति ।

  – कक्षाकक्षीयशिक्षणप्रक्रियायां शिक्षकेण आवधानिककौशलानुसारम् अध्ययनस्य अनुकूलपरिस्थितीनां निर्माणं करणीयम् ।

[१]श्रीमद्भगवद्गीता, अध्याय-6.4
[२]श्रीमद्भगवद्गीता, अध्याय-4.38
[३]श्रीमद्भगवद्गीता, अध्याय-5.16

– अध्यापकेन आवधानिकप्रक्रियया साकं छात्रेषु विषयबोधने जायमानाः काठिन्यतापरिहाराय विशेषः प्रयत्नः करणीयः । अनेन छात्रेभ्यः विषयाध्ययने भीतिः न भविष्यति । अनेन माध्यमेन कक्षायां विषयावबोधने छात्रैः अधिकावधानं दातव्यम् ।

– अध्यापकेन कक्षासु पाठ्यविषयं प्रति छात्राणां ध्यानाकर्षणाय विशेषः प्रयत्नः करणीयः । अस्मिन् अनुक्रमे अध्यापकाः आवधानिकप्रक्रियायाः साफल्यतायै वाह्यनिर्धारकत्त्वानाम् अध्ययनं कृत्वा अधिगमोद्देश्यानां पूर्तिं सारल्येन कर्तुं शक्यन्ते ।

– अध्यापकैः इदम् अपेक्ष्यते यत् आवधानिकनिर्धारकतत्त्वानाम् अध्ययनं कृत्वा छात्रेषु आत्मविश्वासं वर्धयेत् । अथ च शिक्षणे उचितावधानिकविधीनाम् उपयोगः करणीयः ।

– कक्षायां विषयोद्बोधनावसरे अध्यापकेन क्लिष्टभाषायाः प्रयोगं न कृत्वा सरलभाषया उद्बोधयेत् । क्लिष्टभषया पाठनेन छात्राणां मनसि विषयं प्रति अरुचिः अनवधानञ्च सञ्जायते ।

**सहायकग्रन्थसूची -**

1. मिश्र, लोकमान्य, (2011), आधुनिकशिक्षामनोविज्ञानम्, मृगाक्षी प्रकाशनम्, लखनऊ-226001, (उ.प्र.)
2. पाठक, पी.डी., (2007), शिक्षामनोविज्ञान, विनोद पुस्तक मन्दिर, आगरा-2
3. त्रिवेदी, मानसी शुक्ला, (2004), वैदिक अनुष्ठानों का मनोवैज्ञानिक अनुशीलन, नाग पब्लिशर्स, जवाहर नगर, दिल्ली-110007
4. अस्थाना, विपिन, अग्रवाल, रामनारायण, (1967), मनोविज्ञान और शिक्षा में मापन एवं मूल्याङ्कन, विनोद पुस्तक मन्दिर, आगरा-2
5. माथुर, एस्.एस्. (1997/98), शिक्षामनोविज्ञान, विनोद पुस्तक मन्दिर, आगरा-2
6. लाल, रमन् बिहारी तथा कृष्णकान्त, (2012), अधिगमकर्ता अधिगम एवं संज्ञान, आर.लाल बुक डिपो, मेरठ.
7. पचौरी, गिरीश, (2012), शिक्षा में मनोवैज्ञानिक आधार, आर्.लाल बुक डिपो, मेरठ-01
8. प्रभुपाद्, श्री श्रीमद् ए.सी. भक्तिवेदान्त स्वामी, (1990), श्रीमद्भगवद्गीता यथारूप, भक्तिवेदान्त बुक ट्रस्ट, हरे कृष्ण धाम, जुहु, मुंबई-49
9. श्रीमद्भगवद्गीता, गीताप्रेस्, गोरखपुर-273005
10. तैत्तिरीयोपनिषद्, गीताप्रेस्, गोरखपुर- 273005


ISSN : 2249-538X

11. कठोपनिषद्, गीताप्रेस्, गोरखपुर- 273005.
12. उच्चतरमाध्यमिक पाठ्यपुस्तक, मनोविज्ञान, (एन्.सी.ई.आर्.टी.पब्लिकेशन), राष्ट्रीय शैक्षिक और अनुसन्धान परिषद्, नई दिल्ली.
13. शिक्षक-शिक्षा विभाग, शिक्षाशास्त्र विद्याशाखा, अधिगम एवं शिक्षण, उत्तराखण्ड मुक्त विश्वविद्यालय, हल्द्वानी.
14. श्रीवास्तव, डी.एन्., वर्मा, डा.प्रीति, (1997), बालमनोविज्ञान, बालविकास, विनोद पुस्तक मन्दिर, आगरा
15. गूगलान्तर्जालाधारितानि विविधस्थानानि.

# संस्कारसम्पादने कालस्य महत्त्वम्

डा. विनोदकुमारशर्मा*

**शोधसारः –**

सर्वेऽपि संस्काराः कालानुसारं कथिताः सन्ति । कालानुसारं विहिताश्च यज्ञाः । कालशास्त्रानुसारन्तु सर्वविधकर्मानुष्ठाने कालः विचारणीय एव । चाणक्योऽपि "नीतिज्ञः देशकालौ परीक्षेत" इत्युक्त्वा कालप्रभावं सूचयति । कालबलं जानन्त एव ऋषय षड्बलेषु कालबलं स्वीकुर्वन्ति । अकाले वा अनुचिते काले कृतो संस्कारः वैलक्षण्यमुत्पादयति । संस्काराणां सम्पादने ऋषिभिः, आचार्यैश्च स्वीयानुसन्धानेन सुपरीक्षितः काल एव शास्त्रेषु मुहूर्त्तत्वेन निबद्धः । गर्भाधानादयः संस्काराः निषिद्धसमये सम्पादिताः संततौ विकलतां जनयन्त्येव । कश्यपादित्यौ सन्ध्यायां गर्भाधानं कुरुतः फलतस्तु हिरण्यकशिपुसदृशो राक्षसः सम्बभूव । अत एवैतत् सन्ततिजन्यदूषणमपनेतुं कालस्य बलं मत्वैव समुचितकाले संस्काराः सम्पादनीयाः ।

**प्रमुखशब्दाः** – संस्कारः, गर्भाधानम्, पुंसवनसंस्कारः, कालबलम्, मेधाजननं ।

**प्रस्तावना -**

विश्वस्यान्यदेशानां भारतस्य च मध्ये संस्कृतेरेवान्तरं मुख्यतया दृश्यते । भारते यत्किमपि भोजन-वस्त्र-भवन-यन्त्र-चाकचिक्यादिकं दृष्टिपथमायाति, तत्तत्सर्वमपि वैदेशिकदेशेष्वपि अस्त्येव । परन्तु तत्र संस्कृतिर्नास्ति भारतसदृशी । संस्कृतेः कारणादेव भारतमस्ति विशिष्टं भुवि । भारतस्य संस्कृतिस्तावत् सनातनी, प्रकृतिपोषिका, प्रकृतिसंरक्षिका, पञ्चमहाभूतादिभौतिकपदार्थेष्वपि कल्पयति देवत्वबुद्धिम् । विना देवत्वबुद्धिं न रक्षितुमशक्यानि पञ्चमहाभूतानि । भौतिकपदार्थेष्वपि देवत्वस्य कल्पनमस्ति भारतीया संस्कृतिः । संस्कृतिरियं संस्कारैः रक्ष्यते, संस्कृतो जन एव मूलं जानाति संस्कृतेः, संस्कृत एवं जनः प्रकृतिनियमान् पालयति, संस्कृत एव नारीजनेषु मातृत्वबुद्धिं स्थापयति । संस्कारसम्पादनावसरे सूर्यचन्द्रजलादिषु देवत्वपरिकल्पनमुपदिश्यते वैदिकैः मन्त्रैश्च । अत एव संस्काराः सन्त्यावश्यकाः । संस्काराणां सम्बन्धः देहशुद्धतां तथा देहविकासं चापि प्रशस्थं करोति । महानिर्वाणतन्त्रे संस्काराणाम् अनिवार्यत्वमुक्तम्, यथा-

**संस्कारेण विना देवि देहशुद्धिर्न जायते । नासंस्कृतोऽधिकारी स्याद्दैवे पैत्र्ये च कर्मणि ॥**
**अतो विप्रादिभिर्वर्णैः स्वस्ववर्णोक्तसंस्क्रिया । कर्तव्या सर्वथा यत्नैरिहामुत्रहितेप्सुभिः ॥**[१]

**विषयप्रवेशः-**

संस्काराणामनिवार्यत्वमवलोक्यैव भारतीयधर्मग्रन्थेषु, स्मृतिग्रन्थेषु, आश्वलायन-वैखानस-पारस्करादिगृह्यसूत्रेषु च संस्काराणां क्रमः, सम्पादनविधिश्चास्ति निरूपितः । संस्काराणां संख्याप्रमाणं तावदस्ति सर्वत्र भिन्नमेव । इयं भिन्नता वेदशाखाभेदकारणादेवास्ति ।

---

*सहायकाचार्यः, संस्कृतप्राच्यविद्यासंस्थानम्, कुरुक्षेत्रविश्वविद्यालयः, कुरुक्षेत्रम्

[१] महानिर्वाणतन्त्रे,उल्लासः-09, श्लो.-2-3

१. आश्वलायनगृह्यसूत्रे ११ संस्काराः

२. वैखानसगृह्यसूत्रे १८ संस्काराः

३. पारस्करगृहसूत्रे १३ संस्काराः

४. अंगिरसो मते २५ संस्काराः

५. मनुमते १६ संस्काराः

संस्काराणां संख्याविषये सर्वमान्यं प्रामाण्यं मनोः स्वीक्रियते । तदनुसारं १६ संस्काराः प्रसिद्धाः सन्ति ।

षोडशसंस्कारेष्वपि त्रयः संस्काराः जन्मनः प्रागेव गर्भस्थशिशोरेव विधीयन्ते, एकः मृतदेहस्यान्तिमाख्यः संस्कारः, तथाऽन्यैकादशसंस्काराः जातकर्म-नामकर्म-नामकरण-मुण्डनादयो यथाकालं सम्पादनीयाः । इमे संस्काराः मानवजीवने गर्भाधानादन्तिमक्रियां यावदपि क्रियन्ते एव । अर्थात् संस्कारसम्पादनन्तु जीवनस्य प्रत्येकस्मिन् स्तरे आवश्यकमिति कथितमाचार्यैः ।

संस्कारसम्पादने कालस्यास्ति प्राधान्यम् । वस्तुतः काल एव संस्करोति बालम् । सम्प्राप्ते यथोचितकाले सम्पादिताः समन्त्रकाः क्रियाः संस्कारत्वेन परिणाम्यन्ते । यथा समुचितकाले (प्रातः कालेऽर्कोदयकाले च) कृतमीशध्यानमात्मबलवर्धनाय भवति, न मध्याह्ने कृतं ध्यानं तथा शान्तये भवति । अर्थात् कालमाहात्म्यं तु अस्त्येव । कालस्य देवस्तु स्वयं महाकालः एव । कालेन सम्पादिताः क्रियाः मनुष्यं "कालजयी" "कालवेत्ता" इत्यादिगुणैः परिवर्तयन्ति । अत एव सर्वाणि कर्माणि कालानुसारमेव करणीयानि । आचार्यैः यज्ञा अपि कालानुसारमेव कथिताः यथा-

**वेदाः तावत् यज्ञकर्मप्रवृता यज्ञाः प्रोक्ताः ते तु कालाश्रयेण ।** [1]

एवं कालमाहात्म्यमनुभूयैव ज्योतिश्शास्त्रस्य मुहूर्तग्रन्थेषु सर्वेषामपि संस्काराणां कालः निबद्धः मुहूर्तकैः । विना कालं मुहूर्तं वा संस्कारः नैव सम्भाव्यते । एवं संस्कारकालयोरविनाभावसम्बन्धः वक्तुं शक्यते । विना कालं संस्कारः न सम्पादनीय इति विषये मुहूर्तग्रन्थान् स्मृतिग्रन्थान् च प्रमाणत्वेन वदन्ति । प्रत्येकं संस्काराय तिथिः, वासरः, नक्षत्राणि, लग्नानि च कालबलानुगुणं महताऽनुसन्धानेन स्वीयानुभवैश्च संस्कारमुहूर्ताः प्रतिपादिताः सन्ति ।

**गर्भाधाने कालस्य महत्त्वम्-**

"गर्भः सन्धार्यते येन कर्मणा"[2] तद् गर्भाधानम्, जायाभिगमनं च इत्यनयोः विधिः कात्यायनेन नस्तविधिरिति नाम्ना उक्तः । एष संस्कारः सर्वेषामपि संस्काराणां बीजं योनिर्वास्ति । एतद्विनाऽन्यसंस्कारास्तु सर्वथाऽसम्भवा एव, जन्माभावात् । अत एवास्य संस्कारस्य सम्पादने शास्त्रीयविधिरवलोकनीय एव । तथा

[1] सिद्धान्तशिरोमणिः,मध्यमाधिकारः, श्लो., 09

[2] पूर्वमीमांसायां जैमिनिः

समुचितकालश्च विमर्शणीयः । अनुचितकाले, अशुभतिथ्यादिषु, पर्वणि (अमावस्यां पूर्णिमायां वा), ग्रहणसमये, सन्ध्याकाले, ब्रह्ममुहूर्ते च कदापि गर्भाधानः न करणीयः, एवम् अनुचिते कृते सति सन्ततिषु वैकल्यं वैलक्षण्यं च दृश्यते । प्रसिद्धमुदाहरणं तावत् कश्यपादित्योरेवास्ति अस्मत्समक्षम् । उभाभ्यामपि कामवेगेन सन्ध्याकाल एव सहवासः कृतः । एतस्माज्जातः गर्भाधानसंस्कारस्तु महादुष्टं हिरण्यकशिपुमजनयत् ।

अतः पूर्वोक्ताशुभसमयेषु गर्भाधानसम्पादनेन सन्ततिषु वैकल्यमपि शास्त्रेषु सूचितम् । एष गर्भाधानसंस्कारस्तु जगतः महान् उपकारकः भवितुमर्हति । अद्यत्वे सर्वैरपि सन्ततिद्वयमिष्यते केवलम्, तत्रापि एकः पुत्रो भवतु पुत्री चैका भवेत् । सर्वकारकर्मकारिणां कृते तु नियम एवास्ति सन्ततिद्वयस्य । अतः सर्वेषामपि एतदाकांक्षितं भवति यत् एकः पुत्रः एका च पुत्री स्यात्, परन्तु बहूनां केवलं पुत्रद्वयं पुत्रीद्वयं वा दृश्यते, एतदुपायस्तु गर्भाधानाय शास्त्रविहितरात्र्यः भवितुमर्हन्ति । तदनुसारं यथा[१] -

**रात्रौ चतुर्थ्यां पुत्रः स्यादल्पायुधनवर्जितः । पञ्चम्यां पुत्रिणी नारी षष्ठ्यां पुत्रः तु मध्यमः ॥**
**सप्तम्यामप्रजा योषिदष्टम्यामीश्वरः पुमान् । नवम्यां सुभगा नारी दशम्यां प्रवरः सुतः ॥**
**एकादश्यामधर्मा स्त्री द्वादश्यां पुरुषोत्तमः । त्रयोदश्यां सुता पापा वर्णसंकरकारिणी ॥**
**धर्मज्ञश्च कृतज्ञश्च आत्मवेदी दृढव्रतः । प्रजायते चतुर्दश्यां पञ्चदश्यां पतिव्रता ॥**
**आश्रयः सर्वभूतानां षोडश्यां जायते पुमान् ।**

इत्थमुक्तरात्र्यः पुंस्त्रीप्रसूतिकारणानि सन्ति । अतः कालस्य गर्भाधाने महदस्ति वैशिष्ट्यम् । गर्भाधानसंस्कारस्य एतादृक्वैशिष्ट्यं ज्ञात्वा संस्कारसम्पादनेन सन्ततिषु समापतन्तं दोषं संस्कृतिविकृतिं चापाकर्तुं शक्नुमो वयम् ।

**पुंसवनसंस्कारे कालमाहात्म्यम् -**

गर्भे सन्धारितः रजवीर्यमिश्रणरूपपिण्डः पुमान् भवतु, अर्थात् अयं गर्भः पुमान् भवतु" इति धिया क्रियमाणोऽयं संस्कारः पुरुषसंज्ञकनक्षत्रेण युक्ते चन्द्रमसि एव संस्कार्यः यथा-

**"तदहः पुंसा नक्षत्रेण चन्द्रमा युज्येत्"**[२] ।

चन्द्रमा पुन्नक्षत्रेण युक्तो न वेति केवलं ज्योतिश्शास्त्रद्वारा एव ज्ञायते, नान्येन केनाप्युपायेन । पारस्करसूत्रानुसारेण पुन्नक्षत्रे चन्द्रे सति गर्भिण्याः दक्षिणनासापुटे वटवृक्षस्य रसः निपात्यते ।

**सीमन्तोन्नयने कालमहत्त्वम् -**

सीमानि उन्नीयन्तेऽस्मिन् इति । अस्मिन् संस्कारे गर्भिण्याः स्वास्थ्यलाभः तदात्मबलवृद्धिश्चास्ति

[१]गदाधरपद्धतिः,प्रकाशन- ए.सो.बं., पृ.454
[२]पारस्करगृह्यसूत्रे, 1.14.03

 ISSN : 2249-538X

प्रयोजनम् । एष संस्कारः पुंसवनवदेव पुंसंज्ञकनक्षत्रेषु विधीयते । यथा

**॥ पुंसवनवत् ॥**[१]

**"प्रथमगर्भे मासे षष्ठेऽष्टमे वा"जातकर्मसंस्कारः तत्कालश्च**[२]

जातस्य कुमारस्य नालछेदनात् प्राक् जातकर्मसंस्कारः सम्पाद्यते । अस्यैवापरं नाम मेधाजननसंस्कारोऽपि विद्यते । अस्मिन् संस्कारे हिरण्यमधुसर्पिषां योगं बालकं लेहयति पिता । अनेन रक्तशुद्धिः, मेधाजननं च संजायते । "जातस्य कुमारस्याच्छिन्नायां नाड्यां मेधाजननायुष्ये करोति"[३] एतत्सम्पादनानन्तरं पिता बालस्य मातरमभिमन्त्रयन् वदति-

**इडासि मैत्रावरूणी वीरे वीरमजीजनथाः ।सा त्वं वीरवती भव याऽस्मान् वीरवतोऽकरोदिति ॥**[४]

मित्रवरुणयोरंशभूता त्वमसि वीरमाते, वीरं प्रसूतवती, वीरं च प्रसविष्यति । इदमेवं मैत्रवरुणयोरंशत्वभावनासम्पादनेन सन्ततिषु जलादीन् प्रति देवत्वमुत्पद्यते स्वत्तः । अन्यसंस्कारः जन्मन एकादशे वा द्वादशे वा दिवसे मृदुध्रुवक्षिप्रचरसंज्ञकनत्रेषु क्रियते, यथा-

**एकादशे द्वादशकेऽपि घस्त्रेमृदुध्रुवक्षिप्रचरोडुषु स्यात् ।** [५]

एतेषु नक्षत्रेषु नामकरणसंस्कारः कार्यः । नाम विना लोके व्यवहारः न सम्भवति, अतः बहुविचार्य द्यक्षरं वा चतुरक्षरं वा नाम स्थापयेत् । आयुषः वृद्ध्यर्थं रोगशमनार्थञ्च चौलकर्म (चूडाकर्म, केशकर्तनम् उपर्युक्तग्रहनक्षत्रादिस्थितावेव क्रियते । एतदर्थं विषमवर्षाण्येव कथितानि । यथा-

**चूडावर्षात्तृतीयात् प्रभवति विषमेऽष्टारिक्ताद्यषष्ठी**[६]

**यज्ञोपवीतसंस्कारे कालस्य महत्त्वम् –**

यज्ञोपवीते वर्णानुसारं त्रिविधकालः कथितः । तत्र नित्यकाम्यगौणाश्च कालाः यज्ञोपवीतसंस्काराय भणिताः । त्रिष्वपि कालेषु मुहूर्तग्रन्थेषु कथनानुसारमेव संस्कारः सम्पादनीयः ।

**विवाहसंस्कारे कालस्य महत्त्वम् –**

षोडशसंस्कारेषु पञ्चदशतमः संस्कारः विवाहसंस्कार एव । एतदर्थं कन्यायाः चन्द्रबलमवश्यमवलोकनीयं भवेत् । एतच्चन्द्रबलं विना ज्योतिषं न ज्ञातुं शक्यते । विवाहसंस्कारेऽपि बहुविधसंस्काराः गुणाः, दोषाः, मासाः,

[१]पारस्करगृह्यसूत्रे, 1.15.02
[२]पारस्करगृच्छ्यसूत्रे, 1.15.03
[३]पारस्करगृह्यसूत्रे, 1.16.03
[४]पारस्करगृह्यसूत्रे, 1.16.19
[५]मुहूर्तचिन्तामणिः, संस्कारप्रकरणे, श्लो. 11
[६]तत्रैव, संस्कारप्रकरणे श्लो.-29

नक्षत्राणि, लग्नानि च सन्ति येषां ज्ञानमन्तरेण कालशास्त्रमसम्भवमेव । कन्यायाः लग्नशुद्धिविषये रामदैवज्ञः वदति यत् विवाहे चन्द्रबलस्यानिवार्यता, यतोहि-

**भार्यात्रिवर्गकरणं शुभशीलयुक्ता शीलं शुभं भवति लग्नवशेन तस्याः ।**
**तस्माद्विवाहसमयः परिचिन्त्यते हि, तन्निघ्नतामुपगताः सुतशीलधर्माः ॥**[1]
**स्त्रीणां विधोर्बलमुशन्तिविवाहगर्भ संस्कारयोरितरकर्मसु भर्तुरेव" ।**[2]

विवाहसंस्कारे तु कालशास्त्रस्याद्भुतमेवास्ति योगदानम् । द्वौ अनभिज्ञौ जनौ सहवसितुं सन्नद्धौ, नान्योन्यं जानीतः, एतत्समये कालशास्त्रमेव करोति बलाबलम् । एतद्विना नान्यः पन्थाः विद्यते क्वचिदपरिचितं ज्ञातुम् । विज्ञानेऽपि नास्ति एतादृशः मार्गः, अतः ज्योतिषमस्ति विज्ञानस्यापि विज्ञानम् ।

**उपसंहारः-**

एवमुपर्युक्तप्रमाणैः शास्त्रीयतथ्यैश्च स्पष्टतया वक्तुं शक्यते यत् संस्काराः कालं विना न सम्पाद्यन्ते । प्रत्येकं संस्काराय कालः निर्दिष्टोऽस्ति । सत्यमेव ज्योतिषशास्त्रसदृशं जगदुपकारकं शास्त्रं नास्त्येव, तथा न हि कश्चन शक्नोति स्थातुं विना ज्योतिषस्य प्रयोगं जीवने । अतः शास्त्रानुगुणप्रमाणेषु श्रद्धधानाः सन्तो वयमस्य प्रयोगं कुर्वन्तः सुखिनो भवेम ।

---

[1]तत्रैव, विवाहप्रकरणे, श्लो. 01
[2]तत्रैव, संस्कारप्रकरणे, श्लो.09


ISSN : 2249-538X

# रघुनाथशिरोमणिदिशा तत्त्वचिन्तामणिस्थतर्कप्रकरणविमर्शः

डा. सुव्रतगायेनः*

**शोधसारः –**

प्रकृते शोधप्रबन्धे तत्त्वचिन्तामणिस्थतर्कप्रकरणं रघुनाथशिरोमणिदिशा समीक्षितम् । रघुनाथशिरोमणिना तत्त्वचिन्तामणेः पङ्क्तिः साक्षात् तट्टीकायां दीधित्यां व्याख्याता । तदनुसारं प्रबन्धे तत्त्वचिन्तामणिस्थतर्कशरीरस्य प्रत्येकपदव्यावृत्तिः रघुनाथदिशा निरूपिता । किञ्च, मण्युक्तानां शङ्कानां प्रतिबध्यप्रतिबन्धकभावः दीधितिमाश्रित्य प्रतिपादितः । दीधितिस्थमतान्तराणि अपि यथामति निरूपितानि । अन्ततश्च रघुनाथशिरोमणेः मतस्य तत्त्वचिन्तामणेः साक्षाट्टीकाकारस्य मथुरानाथस्य मतेन सादृश्यवैसादृश्यप्रदर्शनेन समीक्षणं विहितम् ।

**प्रमुखशब्दाः –** कार्यम्, कारणम्, तर्कः, आपादकम्, आपाद्यम्, वह्निसमवहितजन्यम्, वह्न्यसमवहिताजन्यम्, प्रतिबन्धकम्, प्रतिबध्यः, शङ्का ।

**उपोद्घातः -**

गङ्गेशोपाध्यायप्रणीतस्य तत्त्वचिन्तामणेः प्रसिद्धासु साक्षाट्टीकासु अन्यतमा पण्डितशिरोमणिरघुनाथशिरोमणिप्रणीता तत्त्वचिन्तामणिदीधितिटीका । सेयं विचारबहुला गम्भीरतत्त्वोपेतापि लघ्वी । शब्दसंक्षिप्तापि दीधितिरियमर्थभूयिष्ठेति विदां वादः । अतो संक्षिप्तायामपि दीधितौ तर्कप्रकरणमाश्रित्य शिरोमणिना नैके विचारा दर्शिताः । अधस्तात् नामग्राहं ते विचाराः प्रथमं निर्दिश्यन्ते –

1. मण्युक्ततर्कस्य कार्यकारणभावग्राहकत्वोपपादनम्
2. तर्कशरीरस्थपदव्यावृत्तिप्रदर्शनम्
3. रघुनाथमतानुसारं मण्युक्तायाः प्रथमशङ्काया मण्युक्ततर्कप्रतिबन्धकत्व-निरूपणम्
4. रघुनाथमतानुसारं मण्युक्ताया द्वितीयशङ्कायाः मण्युक्ततर्कप्रतिबन्धकत्व-निरूपणम्
5. रघुनाथमतानुसारं मण्युक्तायास्तृतीयशङ्कायाः मण्युक्ततर्कप्रतिबन्धकत्व-निरूपणम्
6. मणिस्थतदुपादानपदार्थनिरूपणम्
7. मिश्रमतप्रदर्शनम्
8. धूमत्वावच्छिन्नधूमे वह्निजन्यत्वविचारः

अधस्तात् दीधितिमाश्रित्य यथामति तत्रस्था विषया उपस्थाप्यन्ते -

### 1. मण्युक्ततर्कस्य कार्यकारणभावग्राहकत्वोपपादनम्

गङ्गेशमते तर्को हि व्याप्तिज्ञानसहायः । 'पर्वतो वह्निमान् धूमाद्' इत्यनुमितौ धूमो वह्निव्याप्य इति व्याप्तिज्ञाने 'धूमो वह्निव्यभिचारी' (धूमः अस्तु वह्निर्मास्तु) इत्युक्त-व्याप्तिग्रहप्रतिबन्धकीभूतव्यभिचारशङ्कायां सत्यां न व्याप्तिज्ञानोत्पत्तिः । अस्यां चावस्थायां 'धूमो यदि वह्निव्यभिचारी स्याद् वह्निजन्यो न स्यादि'त्यादिरूपस्तर्कः व्याप्तिज्ञान-प्रतिबन्धकीभूतव्यभिचारशङ्कानिवर्तकः । ननु व्याप्तिज्ञानप्रतिबन्धकीभूतव्यभिचारनिवर्तके 'धूमो

*सहायकाचार्यः, संस्कृतविभागस्य, चन्दननगरमहाविद्यालयस्य, पश्चिमवङ्गस्थस्य

यदि वह्निव्यभिचारी स्याद् वह्निजन्यो न स्यादि'त्यादिरूपे तर्के धूमोऽस्तु वह्निर्मास्तु इति व्यभिचारशङ्कायां सत्यां गङ्गेशोपाध्यायेन तत्त्वचिन्तामणौ "धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यात्तर्हि नोत्पन्नः स्याद्" इति तर्कः प्रदर्शितः । ननु धूमो वह्निव्यभिचारी न वेति संशये 'धूमो यदि वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यादि'ति तर्कस्यैव वह्निधूमव्याप्तिग्रहोपयोगित्वात् मण्युक्तः "धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यात्तर्हि नोत्पन्नः स्यादि"ति तर्कः कथमपि न वह्निधूमव्याप्तिग्रहोपयोगीति तदुपपदानमर्थान्तरदोषदुष्टम् इति शङ्कायामुच्यते यद् 'धूमो वह्निव्याप्य' इत्याकारकव्याप्तिग्रहे धूमो वह्निव्यभिचारी न वेति संशयः प्रतिबन्धकः, तादृशसंशयरूपप्रतिबन्धकनिवर्तकः 'धूमो यदि वह्निव्यभिचारी स्यात्तर्हि वह्निजन्यो न स्यादि'त्याकारकस्तर्कः । तस्मिंश्च तर्के 'धूमो वह्निजन्यो न वे'त्यादिशङ्कायां कृतायां "वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहितजन्यः स्यात्तर्हि नोत्पन्नः स्यादि"ति मूलोक्ततर्को भवति उक्तशङ्कानिवर्तकः । अयं च तर्कः धूमवह्न्योः कार्यकारणभावग्राहकतया 'धूमो वह्निजन्यो न वे'त्यादशङ्काया निवारकः । ननु कथं धूमवह्न्योः कार्यकारणनिश्चय इति प्रदर्शितं दीधितिकारेण मणिव्याख्यायां दीधितौ । तथाहि हुताशनरासभादिपदार्थ-समूहस्य धूमेन अन्वयव्यतिरेकाभ्यां ज्ञायते हुताशनाद्यन्यतमं धूमकारणम् इति । सामान्यतया हुताशनरासभाद्यन्यतमं धूमकारणमित्यवधारणादनन्तरं संशयो जायते - किं हुताशनादीनि सर्वाण्येव धूमं प्रति कारणानि इत्येकः पक्षः, हुताशनादीनि कानिचन एव कारणानीत्यपरः पक्षः, हुताशनादीनि कानिचन न कारणानीत्यन्यः कश्चन पक्षः । ततश्च यस्याभावे अपि अन्येभ्यः धूमोत्पत्तिर्दृश्यते तस्य धूमं प्रत्यहेतुत्वं सिद्धं भवति । किञ्च, यस्याभावे सत्स्वप्यन्येषु न धूमोत्पत्तिर्दृश्यते तस्यैव धूमं प्रति कारणत्वं सुनिश्चितं भवति । यथा वह्न्यभावे सत्स्वपि रासभादिषु न धूमोत्पत्तिर्दृश्यते इति वह्नेरेव धूमं प्रति कारणत्वम् । अत्र धूमवह्न्योरकारणत्वसन्देहे समापन्ने तन्निवृत्त्यर्थं तर्कशरीरमुक्तं गङ्गेशैः – "धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यान्नोत्पन्नः स्यादित्यत्र किं धूमः अवह्नेरेव भविष्यति, क्वचिद्वह्निं विनापि भविष्यति, अहेतुक एव वोत्पत्स्यते इति शङ्का स्यात् । "[१] इति । अयमेव दीधितेराशयः । तथाहि दीधितौ उक्तम् – "हुताशनरासभादिपदार्थ-सार्थस्यान्वयव्यतिरेकयोरन्वयव्यतिरेकौ धूमस्योपलभमानः अवश्यमेतेषामन्यतमं कारणं धूमस्येत्यवधार्य सन्दिग्धे – किमेतानि सर्वाण्येव कारणानि, किं वा कानिचित्तथा कानिचिच्च नेति ।"[२] इति ।

### 2.तर्कशरीरस्थपदव्यावृत्तिप्रदर्शनम्

तत्त्वचिन्तामणिकारैः "धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्याद् नोत्पन्नः स्यादि"ति यस्तर्क उक्तस्तस्य पदव्यावृत्तिः प्रदर्शिता दीधितिकारैः दीधितौ ।

[१]तत्त्वचिन्तामणौ, कालीपदतर्काचार्यसम्पादिते, पृ 577

[२]तत्रैव

 ISSN : 2249-538X

अत्र तर्कशरीरे वह्निसमवहिताजन्यत्वम् आपादकम्, तथा अनुत्पन्नत्वम् आपाद्यम् इति बोध्यम् । अत्र च तर्कशरीरे वह्न्यसमवहिताजन्यः इत्यत्र वह्निसमवहितजन्यत्वं वह्निजन्यत्वमेव वक्तव्यम् । किञ्च, तर्कशरीरे वह्न्यसमवहिताजन्यत्वे सतीति सत्यन्तम् आपाद्यकोटिप्रतियोगिविशेषणम् । तेन रघुनाथनये तर्काकारो भवति - "धूमो यदि वह्निजन्यत्वाभाववान् स्यात् वहन्यसमवहिताजन्यत्व-विशिष्टोत्पन्नत्वाभाववान् स्यात्" इति । अत्र आपाद्यं भवति अनुत्पन्नत्वं नाम उत्पन्नत्वाभाव इति पूर्वमेवोक्तम् । तेन आपाद्यस्य उत्पन्नत्वाभावस्य प्रतियोगि उत्पन्नत्वम्, तस्य उत्पन्नत्वस्य विशेषणं भवति वह्न्यसमवहिताजन्यत्वे सतीति सत्यन्तम् । तच्च वह्न्यसमवहिताजन्यत्वे सतीति सत्यन्तं यदि आपाद्यस्य उत्पन्नत्वाभावस्य प्रतियोगिनि उत्पन्नत्वे विशेषणत्वेन न स्वीक्रियते तर्हि वह्निमद्देशोत्पन्नघटादौ व्यभिचारः । तथाहि "धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्याद् नोत्पन्नः स्यादि"ति तर्कशरीरे यत्र यत्र उत्पन्नत्वाभावः तत्र तत्र वह्निसमवहिताजन्यत्वं नाम वह्निजन्यत्वाभाव इति । तथा च, वह्निमद्देशोत्पन्नघटादौ वह्निजन्यत्वाभावस्य आपादकस्य सत्त्वे अपि तत्रापाद्यस्य उत्पन्नत्वाभावस्य विरह इति आपादकवति आपाद्याभावरूपो व्यभिचारः । उक्तव्यभिचारदोषवारणाय तर्कशरीरे आपाद्य-प्रतियोगिनि उत्पन्नत्वे वह्न्यसमवहिताजन्यत्वं विशेषणत्वेन देयमेव । तेन न तादृशघटादौ व्यभिचारः । तथाहि वह्निमद्देशोत्पन्नघटादौ यथा वह्निजन्यत्वाभावो वर्तते तथा केवलस्य उत्पन्नत्वाभावस्य असत्त्वे अपि वह्न्यसमवहिताजन्यत्वविशिष्टोत्पन्नत्वाभावो वर्तते । अत आपादकवति आपाद्यसत्तेति न व्यभिचारः । तेन न क्षतिः । अत्र कारणं आपादकवति आपाद्याभावस्यैव व्यभिचारत्वम् । आपादकाभाववति आपाद्याभावस्तु न दोषाय इति बोध्यम् । तथाहि दीधितौ उक्तम् – "वस्तुतो वह्न्यजन्यमपि वह्निसमवहितजन्यं वह्न्यसमवहिताजन्यश्च सम्भवतीति वह्निजन्यत्वपर्यवसितं वह्निसमवहितजन्यत्वं वाच्यम् । तथा च, घटादौ व्यभिचारवारणाय आपाद्यकोटिप्रतियोगिविशेषणार्थकं सत्यन्तम् ।"[१]इति ।

इदानीमियं शङ्का जायते यद् "धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्नि-समवहिताजन्यः स्याद् नोत्पन्नः स्यादि"ति तर्कशरीरे उत्पन्नत्वाभावरूपस्य आपाद्यस्यैव वह्न्यसमवहिताजन्यत्वं विशेषणमस्तु, किमर्थमापाद्यस्य उत्पन्नत्वाभावस्य यत् प्रतियोगि उत्पन्नत्वं तद्विशेषणमिति शिरोमणिना स्वीकृतम् ।

उक्ताया आशङ्कायाः समाधानत्वेन इदं वक्तव्यं यद्, यदि वह्न्यसमवहिताजन्यत्वम् उत्पन्नत्वाभावस्य विशेषणत्वेन स्वीक्रियते तर्हि वह्निशून्यतादशायां वह्निमद्देशोत्पन्नघटादौ व्यभिचारो भवेत् । तथाहि स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितपूर्वक्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वविशेषणविशिष्टस्योत्पन्नत्वाभावस्य नित्यवस्तुनिष्ठस्य वह्निमद्देशोत्पन्नघटादौ असत्त्वात् व्यभिचारः । किन्तु यदि वह्न्यसमवहिताजन्यत्वम् आपाद्यस्य उत्पन्नत्वाभावस्य प्रतियोगिन उत्पन्नत्वस्यैव विशेषणत्वेन स्वीक्रियते तदा तादृशविशेषणविशिष्टोत्पन्नत्वस्य अभावस्यापि ता-

[१]तत्त्वचिन्तामणौ, कालीपदतर्काचार्यसम्पादिते, पृ 584

दृशघटादौ सत्त्वान्न व्यभिचारापत्तिरिति बोध्यम् ।

**3.रघुनाथमतानुसारं मण्युक्तायाः प्रथमशङ्काया मण्युक्ततर्कप्रतिबन्धकत्वनिरूपणम् -**

पूर्वमेव निरूपितं यद् दीधितिकारस्य रघुनाथशिरोमणेर्नये वह्न्यसमवहिताजन्यत्वे सतीति सत्यन्तम् उत्पन्नत्वाभावस्यापाद्यस्य यत्प्रतियोगि उत्पन्नत्वं तद्विशेषणमिति । एवं च मण्युक्ततर्कशरीरे वह्न्यसमवहिताजन्यत्वविशिष्टोत्पन्नत्वाभाव इति तादृशविशेषणविशिष्टोत्पन्नत्वाभाव एवापाद्यः इति रघुनाथनयः । आपाद्यशरीरे च विशेषणीभूतं वह्न्यसमवहिताजन्यत्वं नाम स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्व-रूपम् । तेन रघुनाथनये तर्कशरीरं भवति - 'धूमो यदि वह्निजन्यत्वाभाववान् स्यात् स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वविशिष्टोत्पन्नत्वाभाववान् स्यात् । पूर्वं हि निरूपितं यत् तर्कं प्रति आपाद्याभावनिश्चयः कारणमिति । तेन 'धूमो यदि वह्निजन्यत्वाभाववान् स्यात् स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वविशिष्टोत्पन्नत्वाभाववान् स्यात्' इति तर्कं प्रति स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वविशिष्टतादृशपारिभाषिकोत्पन्नत्वाभावस्य आपाद्यस्य अभावः स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वविशिष्टतादृशपारिभाषिकोत्पन्नत्वनिश्चयः कारणम् इति रघुनाथाशयः । किञ्च, उक्ततर्ककारणीभूतं स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वविशिष्टतादृशपारिभाषिकोत्पन्नत्वनिश्चयं प्रति स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वाभावज्ञानं प्रतिबन्धकम् । ननु स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वविशिष्टतादृशपारिभाषिकोत्पन्नत्वनिश्चयं प्रति स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वाभावज्ञानस्य कथं प्रतिबन्धकत्वमिति शङ्कायामुच्यते विशेषणाभावविषयकज्ञानविधयात्र प्रतिबध्यप्रतिबन्धकभावो बोध्यः । तथाहि विशिष्टतादृशपारिभाषिकोत्पन्नत्वाभावस्य आपाद्यस्य अभावः स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वविशिष्टतादृशपारिभाषिकोत्पन्नत्वनिश्चयः एकं विशिष्टं ज्ञानम्, तत्र स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वस्य विशेषणस्य सत्त्वात् । एवञ्च, स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वाभावज्ञानं विशेषणाभावज्ञानम् । अत्र विशिष्टज्ञानविषयीभूतं विशेषणज्ञानं विशेषणाभावविषयकज्ञानं प्रतिबध्नातीत्येवं प्रतिबध्यप्रतिबन्धकभावो बोध्यः । तथा च, तादृशं यत् प्रतिबन्धकीभूतं स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वाभावज्ञानं तद् 'धूमः स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यो न वा' इत्याकारकसंशयः । एवञ्च, प्रतिबन्धकीभूतायां स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वाभावज्ञानात्मकायां 'धूमः स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यो न वा' इति शङ्कायां सत्यां स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षण-

कान्यत्वरूपवह्न्यसमवहिताजन्यत्वविशिष्टतादृशपारिभाषिकोत्पन्नत्वनिश्चयः आपाद्याभावनिश्चय एव न भवति । तादृशनिश्चयाभावाच्च कारणाभावान्मूलोक्ततर्क एव नोत्पद्यते इति तर्कं प्रति परम्परया 'धूमः स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यो न वा' इत्याकारकः वह्न्यसमवहिताजन्यत्वसंशयः प्रतिबन्धकः । स च 'धूमः स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यो न वा' इत्याकारको 'धूमः अवह्नेरेव भविष्यति' इत्यनेन मणिकृद्भिरुक्तम् ।

ननु 'धूमः अवह्नेरेव भविष्यति' इति मण्युक्तेः कथं 'धूमः स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यो न वा' इत्याकारकसंशयलाभ इति जिज्ञासायामुच्यते यद् 'धूमः अवह्नेरेव भविष्यति' इति प्रथमशङ्कायां धूमपदस्य धूमत्वावच्छिन्नार्थकत्वेन, अवह्निपदस्य च वह्निशून्यार्थकत्वेन, जन्यत्वस्य तदुत्तरपञ्चम्यर्थत्वेन धूमत्वावच्छेदेन स्वसमानाधिकरणवह्निमदन्य-स्वाव्यवहितप्राक्क्षणको न वेति शङ्कायां पर्यवसितम् ।

**4. रघुनाथमतानुसारं मण्युक्ताया द्वितीयशङ्कायाः मण्युक्ततर्कप्रतिबन्धकत्वनिरूपणम् -**

किञ्च, मण्युक्तः "क्वचिद्वह्निं विनापि भविष्यती"ति संशयः धूमत्वजात्याश्रय-यत्किञ्चिद्व्यक्तिवाचित्वेन धूमत्वसामानाधिकरण्येन स्वसमानाधिकरणवह्निमदन्य-स्वाव्यवहितप्राक्क्षणको न वेति शङ्कायां पर्यवसितो भवति । तेन पूर्ववत् "क्वचिद्वह्निं विनापि भविष्यती"त्यतः पर्यवसितायाः धूमत्वजात्याश्रययत्किञ्चिद्व्यक्तिवाचित्वेन धूमत्वसामानाधिकरण्येन स्वमानाधिकरणवह्निमदन्य-स्वाव्यवहितप्राक्क्षणको न वेति शङ्कायाः मण्युक्तं रघुनाथशिरोमणिसम्मतं धूमो यदि वह्निजन्यत्वाभाववान् स्यात् स्वसमानाधिकरणवह्निमदन्यस्वाव्यवहितप्राक्क्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वविशिष्टोत्पन्नत्वाभाववान् स्यात् इति तर्कं प्रति प्रतिबन्धकत्वं सुस्पष्टम् । एतत्सर्वं मनसि निधायैव दीधितिकृता उक्तम् – "अत्र आद्या द्वयी शङ्का इष्टापत्तिपर्यवसायिनी ।"[1]इति । आक्षरिकाशयो हि अत्र नाम आपाद्यकोटिप्रतियोगिविशेषणतया सत्यन्तरार्थघटिते धूमो यदि वह्निजन्यत्वाभाववान् स्याद् वह्न्यसमवहिताजन्यत्वविशिष्टस्य जन्यत्वस्याभाववान् स्यादित्याद्याकारे तर्के इति बोध्यम् । तथा च, 'किं धूमः अवह्नेरेव भविष्यति', 'क्वचिद् वह्निं विनापि भविष्यति' इति शङ्के द्वे इष्टापत्तिपर्यवसायिनी । तत्र च प्रथमशङ्का धूमत्वावच्छेदेन, द्वितीयशङ्का च धूमत्वसामानाधिकरण्येन वह्न्यसमवहित-जन्यत्वावगाहिनीत्येव द्वयोर्विशेषो बोध्यः ।

**5. रघुनाथमतानुसारं मण्युक्तायास्तृतीयशङ्कायाः मण्युक्ततर्कप्रतिबन्धकत्वनिरूपणम् -**

रघुनाथशिरोमणिनये "धूमः अहेतुको न वे"त्याकारकः संशयो हेतुजन्यत्व-सामान्याभावविषयकतया धूमधर्मिकविशिष्टोत्पन्नत्वरूपापाद्यस्य अभावनिश्चयं प्रति प्रतिबन्धकः । अत्र कारणं हि सामान्याभावज्ञानं विशिष्टबुद्धिं प्रति प्रतिबन्धकम् । एवं हि तर्कजनकीभूतो य आपाद्यव्यतिरेकनिश्चयस्तस्य विघटकत्वेन मूलोक्तायाः "धूमः अहेतुक एव उत्पत्स्यत" इति तृतीयशङ्कायाः तर्कविरोधित्वम् । अतो दीधितौ उक्तम् – "तृतीया

[1]तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 693

पुनरापादकाद्यप्रसिद्धिपर्यवसायिनी ।[१] इति ।

**6. मणिस्थतदुपादानपदार्थनिरूपणम् -**

तत्त्वचिन्तामणिकारेण 'धूमो वह्निजन्यो न वे'ति शङ्कायां सत्यां तन्निराकरणार्थं 'धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यो स्यात् नोत्पन्नः स्यादि'ति तर्को दर्शितः । पुनश्च तत्र तस्य प्रतिबन्धकत्वेन तिस्रः शङ्का उपस्थापिताः । ताश्च शङ्काः स्वक्रियाव्याघाताद् नावतरन्तीति तेनैव स्वग्रन्थे उक्तम् । ननु तत्र शङ्कायां कृतायां कथं स्वक्रियाव्याघातो भवतीति विषये गङ्गेशोपाध्यायेन उक्तम् – "यदि हि गृहीतान्वयव्यतिरेकं हेतुं विना कार्योत्पत्तिं शङ्केत, तदा स्वयमेव धूमार्थं वह्नेः, तृप्त्यर्थं भोजनस्य, परप्रतिपत्त्यर्थं शब्दस्य चोपादानं नियमतः कथं कुर्यात् तेन विनापि तत्सम्भवात् । तस्मात्तत्तदुपादानमेव तादृशशङ्काप्रतिबन्धकम् । शङ्कायां न नियतोपादानं, नियतोपादाने च न शङ्का । तदिदमुक्तम् - तदेव ह्याशङ्क्यते यस्मिन्नाशङ्क्यमाने स्वक्रियाव्याघातो न भवतीति न हि सम्भवति स्वयं वह्न्यदिकं धूमादिकार्यार्थं नियमत उपादत्ते, तत्कारणं तन्नेत्याङ्कते चेति ।"[२] इति । मूलकारोक्तस्य तस्मात्तदुपादानमेव तादृशशङ्काप्रतिबन्धकम् इत्यत्र तदुपादानम् इत्यस्यार्थनिरूपणे टीकाकृतां वैमत्यं सुलभम् । तत्र उपादनमिति पदमुभयथा निष्पद्यते । उपादीयते इत्युपादानम् इति भाववाच्ये निष्पद्यते । कृतिरिति तदर्थः । तथा च, उपादीयते अनेनेति व्युत्पत्त्या करणवाच्ये अपि उपादानम् इति शब्दो निष्पद्यते । अत्र रघुनाथ-शिरोमणिना करणवाच्यनिष्पन्नम् उपादानपदमेव गृहीतम् । करणवाच्यनिष्पन्नस्य उपादान-पदस्यार्थः कृतो दीधितिकृता - तदीयकार्यप्रयोजकताज्ञानपरम्, तादृशन्वयव्यतिरेकानुविधानबोधपरं वा । तदीयेत्यत्र तत्पदेन वह्न्यादेर्ग्रहणं कार्यम् । तत्कार्यं च धूमादि । तेन तदीयकार्यप्रयोजकताज्ञानपरमित्यस्यार्थो हि वह्न्यादिविषयकं यद्धूमादिप्रयोजकताज्ञानं तत्परमिति । किञ्च, तादृशान्वय-व्यतिरेकानुविधानबोधपरमित्यस्यार्थो हि वह्न्यादौ तत्तद्धूमादेर्यो नियतान्वयव्यतिरेकबोधस्तत्परमिति । रघुनाथनये उपादानपदस्य कृतिरूपार्थो न ग्राह्यः । अत्र कारणं कृतिः शङ्काप्रतिबन्धिका न भवति । तेन अत्र स्थले करणवाच्य-निष्पन्नम् उपादानपदं ग्राह्यं, न तु भाववाच्यनिष्पन्नं पदम् इति रघुनाथनयः । तथाहि दीधितिकृता उक्तम् – "तदुपादानमिति करणव्युत्पत्त्या तदीयकार्यप्रयोजकताज्ञानपरम्, तादृशान्वयव्यतिरेकानुविधानबोधपरं वा । अग्रेतनमपि स्वक्रियापदं तत्परमेव । कृत्यादेः शङ्काप्रतिबन्धकत्वे मानाभावात् ।"[३] इति ।

**7. मिश्रमतप्रदर्शनम् -**

तत्त्वचिन्तामणिकारैर्गङ्गेशैरुक्तं यद् धूमादिकार्यार्थं वह्न्यादिकं नियमतः अर्थात् धूमादीष्टपदार्थकारणं वह्न्यादिकमिति निश्चित्य तन्निश्चयवशात् प्रयत्नस्य विषयीकरोति तथा वह्न्यादिकं धूमादिकारणं न वा इति शङ्कामपि

---

[१] तत्त्वचिन्तामणौ, कीर्त्यानन्दझासम्पादिते, पृ 693

[२] तत्त्वचिन्तामणौ, कालीपदतर्काचार्यसम्पादिते, पृ 594

[३] तत्त्वचिन्तामणौ, कालीपदतर्काचार्यसम्पादिते, पृ 59

 ISSN : 2249-538X

विषयीकरोति इति न सम्भवं मिथो विरुद्धत्वात् । अत्र व्याख्याप्रसङ्गे दीधितौ मिश्रमतं निरूपितं रघुनाथशिरोमणिना । किञ्च, मिश्रमतमनूद्य शिरोमणिना 'प्राहु'रित्यनेन प्रकर्षत्वमपि तन्मतस्य सूचितम् । तथाहि मिश्राणां नये चार्वाकं प्रति व्याप्तिग्रहोपाये निरूपिते तत्र च शङ्कानिवर्तके तर्के दर्शिते चार्वाकाश्चेत्तत्रापि शङ्कामुद्भावयति तदा एवं व्याघाताः दर्शनीयाः यत्, मैवं शङ्किष्ठाः, यतो हि मृषैव भाषसे । वस्तुतः तवापि नैवं संशयो जायते । सति तादृशे संशये धूमादितत्तत्कार्यार्थं वह्न्यादितत्तत्कारणे तवैव प्रवृत्तिर्व्याहता स्यात् । धूमादिकार्यं प्रति वह्न्यादीनां कारणत्वेन निश्चयाभावे ते तन्मूलिका विशिष्टप्रवृत्तिरप्यसम्भाविनीति मिश्राशय इति रघुनाथमतम् । तथाहि तैः उक्तम् – "मिश्रास्तु पंर प्रति व्याप्तिग्रहोपाये प्रदर्श्यमाने व्यभिचारशङ्कानिरासहेतुत्वेनोपदर्शिते तर्के मूलशैथिल्यादिशङ्कोद्भावकं तं प्रति व्याघातः अयमुपदर्श्यते, मैवं शङ्किष्ठाः, तथा सति तत्तत्कार्यार्थितया तत्र तत्र कारणे तवैव प्रवृत्तयो व्याहन्येरन् । यदाह, न हि सम्भवति स्वयं वह्न्यादिकमितीति प्राहुः ।"[१] इति ।

**8. धूमत्वावच्छिन्नधूमे वह्निजन्यत्वविचारः -**

ननु धूमविशेषं प्रति वह्निः कारणं, न तु धूमत्वावच्छिन्नधूमं प्रति कारणम् । यथा विजातीयकारणाद्धि विजातीयवह्निर्जन्यते तथा विजातीयकारणाद्धि विजातीयधूमः अपि जायते । वह्निं विनापि कश्चन धूमो जायते इति धूमत्वावच्छिन्नधूमो वह्निजन्य इति संशयः सुलभ एव । एतादृशे च संशये सति धूमो यदि वह्निव्यभिचारी तदा वह्निजन्यो न स्यादिति तर्कः अपि अनुत्पन्नः स्यात् । एवं धूमत्वावच्छिन्नधूमे वह्निजन्यत्वनिश्चयाभावात्तर्के अनागते धूमे वह्निव्यभिचारशङ्कानिवृत्तिरसम्भाविनीति चार्वाकाभिप्रायः । रघुनाथशिरोमणिनापि विषयमिममुपस्थाप्य स निराकृतः । तथाहि बहवो हि धूमाः वह्निजन्या इति प्रत्यक्षेण निर्णये सति धूमत्वावच्छिन्नधूमा हि वह्निजन्या इति निश्चयो जायते । तेन सामान्यतया कार्यकारणभावनिश्चयो भवति । एवं हि सामान्यतया कार्यकारणभावकल्पनायां लाघवम् । अन्यथा गौरवम् । कल्पनागौरवे च मानाभावः । लाघवपक्षो हि लोकैराश्रियते । तथा च लाघवसहकृतान्वयव्यतिरेकौ हि प्रामाणिकौ । तस्माद् धूमत्वावच्छिन्नधूमं प्रति वह्नित्वावच्छिन्नवह्निर्हि कारणम् । अन्यथा धूमार्थं न वह्निमनुसरेत् । तथाहि दीधितौ उक्तम् – "यद्यपि चैतावता धूमत्वावच्छिन्नं प्रति वह्नेर्जनकत्वं नायाति । तृणारणिमणिन्यायेन वैकल्पिककारणतायामपि तथात्वसम्भवात् तथापि विशेषाणां कार्यकारणभावग्रहस्तर्केण तद्विरोधिशङ्कायामपनीतायां जायमानः सामान्यव्यभिचारानिर्णयानुगतागुरुविशेषरूपान्तरानुपस्थितिलाघवप्रतिबन्धनादिवशात् सामान्यत एव तं परिच्छिनत्ति । प्रामाणिकौ च तथैवान्वयव्यतिरेकौ । फलबलेन लाघवादिज्ञानशून्याया एव सामान्यव्यभिचारशङ्कायाः प्रतिबन्धकत्वं कल्प्यते ।"[२] इति । एवमेतावता रघुनाथशिरोमणिग्रथितदीधितिस्थगूहितविचारा यथामति समीक्ष्य उपस्थापिताः ।

[१]तत्त्वचिन्तामणौ, कालीपदतर्काचार्यसम्पादिते, पृ 604

[२]तत्त्वचिन्तामणौ, सोमनाथनेनेसम्पादिते, पृ 399-400

**उपसंहारः –**

प्रकृते प्रबन्धे तत्त्वचिन्तामणिस्थतर्कप्रकरणे रघुनाथकृतदीधितिमतं समीक्षितम् । यथा रघुनाथस्तथा मथुरानाथः अपि साक्षाच्चिन्तामणिं व्याख्यातवान् । परम् अनयोर्वैलक्षण्यं सुलभमेव । तथाहि रघुनाथेन चिन्तामण्युक्ततर्कः कार्यकारणभावग्राहकः सन् धूमो वह्निजन्यो न वेति शङ्कां निराकरोतीति प्रतिपिपादयिषुणा धूमवह्न्योः कार्यकारणभावः कथं वर्तते इत्यन्वयव्यतिरेकाभ्यां प्रदर्शितम् । परं मथुरानाथेन केवलं धूमो वह्निजन्यो न वेति शङ्काविघटकः कार्यकारणभावग्राहकस्तर्क इत्येवं व्याख्यातम् । अपि च, मथुरानाथेन मण्युक्ततर्कशरीरस्थाभावपदम् अत्यन्ताभावत्वेन न व्याख्यातम् । किन्तु मथुरानाथेन अभावपदं तत्रस्थम् अन्योन्याभावत्वेन एव गृहीतम् इति मथुरानाथमते विशेषः । किञ्च, रघुनाथेन वह्न्यसमवहिताजन्यत्वे सतीति सत्यन्तदलम् उत्पन्नत्वाभावीय-प्रतियोगिनि विशेषणम् । किन्तु मथुरानाथनये वह्न्यसमवहिताजन्यत्वे सतीति सत्यन्तदलम् वह्निसमवहिताजन्यत्वरूपविशेष्यप्रतियोगिनि विशेषणम् इत्युभयोर्मतभेद इति शिवम् ।

**सहायका ग्रन्थाः**


- तत्त्वचिन्तामणिः । सम्पादकः कामाख्यानाथतर्कवागीशः । देहली ः मोतिलाल-वनारसीदासः, १८९७ (प्रथमं संस्करणम्) । अमुद्रितम् (pdf)।
- तत्त्वचिन्तामणिः (दीधिति-प्रकाशोपेतः) । सम्पादकः महामहोपाध्यायः कालीपदतर्काचार्यः । कलिकाता द्य-एशियाटिक्-सोसाइटिः । अमुद्रितम् (pdf) ।
- तत्त्वचिन्तामणिः (दीधिति-गादाधरीसहितः) । सम्पादकः कीर्त्यानन्दझाः सात्करिशर्मा च । वाराणसी चौखम्बा-संस्कृत-सिरिज्-आफिस्, १९७० (द्वितीयं संस्करणम्) । अमुद्रितम् (pdf) ।
- तत्त्वचिन्तामणिः (दीधिति-जागदीशीसहितः) । सम्पादकः सोमनाथ-नेने-उपाध्यायः । वाराणसी चौखम्बा-संस्कृत-वुक्-डिपो, १९०८ । अमुद्रितम् (pdf) ।
- तत्त्वचिन्तामणिः (तर्कप्रकरणम्) (तर्करहस्य-विवृतिसहितः) । सम्पादकः श्रीवामाचरणभट्टाचार्य्यः । वाराणसी ः चौखम्बा-संस्कृत-सिरिज्-आफिस्, १९४४ । अमुद्रितम् (pdf) ।
- तत्त्वचिन्तामणिः (वङ्गानुवादसहितः) । सम्पादकः ब्रह्मचारी मेधाचैतन्यः । कलिकाता ः आद्यापीठम्, १४१७-वङ्गाब्दः । मुद्रितम् ।



ISSN : 2249-538X

#163

# रघुनाथशिरोमणिदिशा आख्यातार्थविषये मण्डन-प्रभाकरमतविमर्शः

डा. सन्तुसिंहः*

**शोधसारः –**

प्रकृते प्रबन्धे नव्यनैयायिकशिरोमणिना रघुनाथशिरोणिना कृतमाख्यातावादमाश्रित्य आख्यातार्थविषये मण्डनमिश्र-प्रभाकरयोः मीमांसकयोः मतसमीक्षणं कृतम् । तत्राख्यातवादे स्वीयमतनिरूपणावसरे ग्रन्थकृता मण्डनप्रभाकरयोर्मतं प्रतिपादितम् । मण्डममिश्रमते फलं धात्वर्थः, व्यापारश्च आख्यातार्थः । एतन्निरूप्य कस्तत्र दोष इति ग्रन्थकारानुसारं निरूपितम् । किञ्च, प्रभाकरमतानुसारम् आख्यातार्थः प्रतिपादितः । अन्ततश्च ग्रन्थकारदिशा मतयोस्तयोः खण्डनं विधाय कस्मिन् मते मदीयं स्वारस्यं तदपि सयुक्ति विचारितम् । ततश्च ग्रन्थकर्तुः स्वीयः सिद्धान्तोऽपि गदितः ।

**प्रमुखशब्दाः** – आख्यातम्, कृतिः, व्यापारः, धातुः, फलम्, कर्मत्वम्, अधिकरणत्वम्, संसर्गमर्यादा, जन्यजनकभावः ।

**उपोद्घातः** – महर्षिगौतमप्रणीतं न्यायशास्त्रं कालक्रमेण कृतिभिः बहुभिः महतीं वृद्धिं प्रापितं विराजतेतमां सकलदर्शनसम्प्रदायविच्चेतस्सु । तदिदं सकलशास्त्रोपकारकं तर्कशास्त्रं न्यायशास्त्रं आन्वीक्षिकी वा प्राचीन-नवीनभेदेन द्वेधाधुनातनैर्व्यपदिष्टम् । तत्र गङ्गेशोपाध्यायप्रणीतस्तत्त्वचिन्तामणिग्रन्थ एव नव्यन्यायस्य आकरग्रन्थत्वेन सर्वैराद्रियते । आयतनेन विषयगाम्भीर्येण च महतः तत्त्वचिन्तामणेः व्याख्यासु एकैव व्याख्या षड्शतं वर्षेभ्यः जगति सर्वैराद्रियमाणा अधीयमाना चास्ति, यया व्याख्यया एव वङ्गदेशे नव्यन्यायस्य प्राणप्रतिष्ठा, यया च विद्वत्तल्लजेषु भारतव्यापिषु वङ्गदेशस्य स्थानं अनुपमं महदुच्चैर्वरीवर्त्ति सा हि व्याख्या दीधित्याख्या सुप्रसिद्धा भवे । वङ्गदेशवास्तव्यः श्रीवासुदेवसार्वभौम-पक्षधरमिश्रान्तेवासी श्रीरघुनाथशिरोमणिभट्टाचार्यः तार्किकसम्प्रदायशिरोमणिः तत्त्वचिन्तामणिदीधितिनाम्नीमेनां तत्त्वचिन्तामणेष्टीकां वितेने । न केवलं तत्त्वचिन्तामणिदीधितिः, रघुनाथशिरोमणिभिः पदार्थखण्डनम्, नानार्थवादः, क्षणभङ्गुरवादः, आख्यातवादः, नञ्वाद इत्यादयो नैके ग्रन्था अपि रघुनाथेन विरचिताः । तत्राख्यातवादग्रन्थे न्यायनयानुसारम् आख्यातार्थो निरूपितः । तत्रैव ग्रन्थे प्रसङ्गसङ्गत्या मण्डनमिश्र-प्रभाकरयोः मीमांसकयोः मतानुसारमाख्यातार्थं प्रतिपाद्य स्वीयः सिद्धान्तो निरूपितः । अध एतत्सर्वं यथाग्रन्थं यथामति प्रतिपाद्यते -

**शिरोमणिदिशा आख्यातार्थविषये मण्डनमतनिरूपणम् -**

मण्डनमिश्राणां मतानुसारं फलं धात्वर्थः । तन्नये अनुकूलव्यापारः व्यापारो वा आख्यातार्थः । आख्यातस्य व्यापारवाचित्वे धात्वर्थ-आख्यातार्थयोः जन्यजनकभावसंसर्गः संसर्गमर्यादया भासते । किञ्च, वर्तमानत्वं, भविष्यत्त्वं, भूतत्वं च लट्-लृट्-लङादीनां तिबादीनामाख्यातानाम् अर्थाः तथा इष्टसाधनत्वं कृतिसाध्यत्वं च लट्-लृट्-लङादीनां तिबादीनामाख्यातानाम् अर्थाः । ननु वर्तमानत्वादीनां तथा इष्टसाधनत्वादीनाम् आख्यातार्थानां

*सहायकाचार्यः, संस्कृतविभागस्य, बाँकुडाविश्वविद्यालयस्य, पश्चिमवङ्गस्थस्य

कुत्रान्वय इति चेदुच्यते एकपदोपात्तत्वाद् वर्तमानत्वादीनां तथा इष्टसाधनत्वादीनाम् आख्यातार्थानां व्यापाररूपे आख्यातार्थे एवान्वयः । एवञ्च, वर्तमानत्वादिभिः इष्टसाधनत्वादिभिश्चाख्यातार्थैः व्यापाररूपाख्यातार्थस्य एकपदोत्तरत्वसम्बन्धसत्त्वात् नाम धातूत्तरप्रत्ययार्थत्वसम्बन्धसत्त्वात् उभयोरन्वयो युक्तः । तथाहि उक्तम् – धातोरर्थः फलम्, अनुकूलव्यापारो व्यापारमात्रं वा आख्यातस्य जन्यजनकभावः संसर्गमर्यादया लभ्यः । लडादिलिङाद्यर्थो वर्तमानत्वादीष्टसाधनत्वादिकमेकपदोपात्तत्वप्रत्यासत्त्या तत्रैवान्वेति ।[१] इति ।

पाक इत्यादिभावप्रत्ययप्रयोगस्थले घञादिप्रत्ययस्यार्थो ह्यनुकूलव्यापार इति मण्डनमतम् । घञ्-प्रत्ययस्यानुकूलव्यापारार्थकत्वे हि व्यापारस्य वर्तमानत्वे फलस्य च भविष्यत्कालीनत्वे पाको भविष्यतीति न प्रयोगापत्तिः । तथाहि उक्तम् – भावप्रत्ययस्य घञादेरनुकूलव्यापार एवार्थः । तेन व्यापारसत्त्वे फलानुत्पाददशायां पाको भविष्यतीति न प्रयोगः[२] इति । घञ्-प्रत्ययप्रयोगः साधुत्वप्रयोजकश्चेत्तत्काले धात्वर्थफलस्य सत्त्वात् पाको भविष्यतीति प्रयोगापत्तिर्ध्रुवा । अतो हि व्यापारस्य विनश्यदवस्थायां फलस्य च वर्तमानत्वावस्थायां पाको विद्यते इति न प्रयोगः । किञ्च, घञः साधुत्वार्थकत्वे तत्काले फलस्य सत्त्वात् पाको विद्यते इति प्रयोगापत्तिः स्यात् ।

कर्मत्वं हि ततद्धातुसमभिव्याहृतप्रत्ययोपनीतपरसमवेतव्यापारजन्यधात्वर्थफलशालित्वं तत्तद्धातुकर्मत्वम् । द्वितीयाविभक्तेरर्थः कृद्योगषष्ठीविभक्तेर्वा फलनिष्ठमाधेयत्वं वाच्यं भवति । एवञ्च, तृतीयाविभक्तेः कृद्योगायाः कर्तृषष्ठीविभक्तेः वा व्यापारनिष्ठमाधेयत्वं वाच्यम् । तथा च, तण्डुलं पचति चैत्रः इत्यस्मात् तण्डुलनिष्ठाधेयत्ववद्विक्लित्ति-जनकव्यापारवान् चैत्र इति बोधो जायते । अपि च, चैत्रेण पच्यते तण्डुलः इत्यस्मात् मैत्रनिरूपिताधेयत्ववद्व्यापार-जन्यविक्लित्तिशाली तण्डुल इति बोधः ।

अत्रेदं बोध्यम् तण्डुलं पचति चैत्र इत्यत्र धात्वर्थफलमाख्यातार्थे विशेषणम् । चैत्रेण पच्यते तण्डुल इत्यत्र चाख्यातार्थो व्यापारो हि धात्वर्थस्य फलस्य विशेषणम् । एतादृशविशेष्यविशेषणभावव्यत्यासाद्धि कर्तृ-कर्मप्रत्ययविभेदः । तथा च आख्यातवादे उक्तम् – प्रत्ययोपनीतपरसमवेतव्यापारजन्यधात्वर्थफलशालित्वं च कर्मत्वम्, फलनिष्ठाधेयत्वं द्वितीयादिना, व्यापारनिष्ठं च तृतीयादिनाभिधीयते । एवं च, तण्डुलं पचति चैत्रः इत्यस्य तण्डुलवृत्तिफलविशेषजनकव्यापारवाँश्चैत्रः, मैत्रेण पच्यते तण्डुलः इत्यस्य मैत्रनिष्ठव्यापारजन्यफलविशेषशाली तण्डुल इत्यर्थः । फलव्यापारयोर्विशेषणविशेष्यभावभेदादेव कर्तृकर्मप्रत्ययव्यवहारः ।[३] इति ।

**शिरोमणिदिशा आख्यातार्थविषये मण्डनमिश्राणां मतान्तरनिरूपणम् –**

तण्डुलं पचति चैत्र इत्यादै कर्तृविहिताख्यातस्थले आख्यातार्थो हि व्यापारो तथा कर्मविहिताख्यातस्थले चैत्रेण पच्यते इत्यादौ चैत्रपदोत्तरतृतीयाविभक्तेरर्थो हि व्यापारः । कर्मविहिताख्यातस्थले आख्यातेन

[१] टिप्पणीसहितः आख्यातवादः नञ्वादः च इति ग्रन्थे 5पृष्ठाङ्के

[२] तत्रैव

[३] तत्रैव


ISSN : 2249-538X

धात्वर्थफलाधिकरणत्वमभिधीयते न तु व्यापारः । तथाहि निरुक्तम् – वस्तुतस्तु आख्यातस्येव तृतीयाया अपि व्यापार एवार्थः, कर्माख्यातस्य च धात्वर्थफलनिरूपितम् अधिकरणत्वम्, कर्मकृतफलस्य आश्रयः, कर्तृकृतश्च व्यापाराश्रयः । कर्मकर्तृसामानाधिकरण्यानुरोधात् ।[1] इति । चैत्रेण पच्यते तण्डुलः इति कर्माख्यातस्थले व्यापारस्य आख्यातवाच्यत्वे स्वीकृते अनुपपत्त्यभावे अपि चैत्रेण पक्वः तण्डुलः इत्यादौ कर्मकृत्प्रत्ययघटितवाक्यस्थले कर्तृबोधकचैत्रादिपदोत्तरं विहितायाः तृतीयाविभक्तेरर्थो व्यापारः स्वीकर्तव्यः । अत्र कारणं कृत्प्रत्ययस्य अर्थः व्यापारः आश्रयश्च इति न तयोः तण्डुलादिकर्मणान्वयः स्यात् । तथा च, चैत्रेण पच्यते तण्डुलः इत्यत्र व्यापारस्य आख्यातवाच्यत्वे तु संख्या, कालः, इष्टसाधनत्वं, कृतिसाध्यत्वातिरिक्तत्वम् इत्याद्याख्यातार्थानां धात्वर्थापेक्षया विशेष्यनियमात् तण्डुलं पचति चैत्रः इत्यादिस्थले अनुभवविरोधापत्तिः । अत्र कारणं चैत्रेण पच्यते तण्डुलः इत्यादिस्थलीयबोधे व्यापारः धात्वर्थं प्रति न विशेष्यम्, किन्तु विशेषणम् एव ।

चैत्रेण पच्यते तण्डुलः इत्यादिकर्मकृत्प्रत्ययघटितवाक्यस्थलीयबोधे कर्मकृदर्थ आश्रयः । व्यापारस्तु तत्र तृतीयाविभक्तेरर्थः । पक्ता, पाचकः चैत्रः इत्यादिस्थले कर्तृविहितस्य कृतः अर्थः व्यापाराश्रयः, न तु केवलम् आश्रयः । कर्मकृतः अर्थः आश्रयः फलाश्रय इति यावत् । ननु किमर्थं कर्तृकृदर्थः व्यापाराश्रय इति जिज्ञासायामुच्यते चैत्रेण पक्वः तण्डुलः इत्यादिस्थले पक्व इत्यादेः तण्डुलः इत्यादिभिः तथा पक्ता, पाचक इत्यादेः चैत्रप्रभृतिभिः सह सामानाधिकरण्यादभेदेन अन्वयः ।

ज्ञा-इष्-कृञ्-प्रभृतिधातुघटितेषु कर्तृवाच्य-कर्मवाच्यवाक्यस्थलेषु घटं जानाति, इच्छति कुरुते चैत्र इत्यादिषु तथा चैत्रेण ज्ञायते, इष्यते क्रियते घट इत्यादिवाक्यस्थलेषु धात्वर्थौ हि क्रमशः ज्ञानम्, इच्छा, यत्नश्च तथा प्रत्ययार्थौ हि आश्रयत्वं विषयत्वम् इत्यादि ।

चैत्रेण पच्यते तण्डुलः चैत्रेण पक्वः तण्डुलः इत्यादिषु कर्माख्यातघटितवाक्येषु कर्मकृद्घटितवाक्येषु च तृतीयाविभक्तेरर्थे व्यापारे वर्तमानत्व-भूतत्वादीनामन्वयः तथा पचमानः पक्वान् चैत्र इत्यादिस्थलेषु यत्र व्यापाराश्रयार्थकः कर्तृकृत्प्रत्ययस्तत्र वर्तमानत्वादीनामन्वयः कृदर्थैकदेशे व्यापारे स्यात् ।

ननु पचमानः पक्वान् इत्यादिस्थलेषु कृदर्थैकदेशेन व्यापारेण वर्तमानत्वादीनामन्वयासम्भवे सति तत्र व्यापारविशिष्टाश्रयो न कृदर्थः, किन्तु खण्डशः व्यापाराश्रयौ पृथक् पृथक् कृदर्थौ स्वीकर्तव्यौ । तत्र च व्यापारविशिष्टाश्रयस्य भानम् आकाङ्क्षया बोध्यम् । संसर्गे शक्त्यभावादत्र पक्षे लाघवम् । किञ्च, पदार्थैकदेशेन पदार्थस्य व्युत्पत्तिविरुद्धान्वयः अपि नाङ्गीकार्य इत्ययं पक्ष एव बलवान् ।

मिश्रैः क्वचित् चैत्रेण पच्यते तण्डुलः, चैत्रेण पक्वः तण्डुलः इत्यादिकर्माख्यातस्थलेषु कर्मकृत्स्थलेषु च व्यापारः तृतीयाविभक्त्यर्थः, तत्र च तृतीयार्थे व्यापारे वर्तमानत्वादीनामन्वयः इति स्वीकृतम् । पुनश्च

[1] टिप्पणीसहितः आख्यातवादः नञ्वादः च इति ग्रन्थे 6पृष्ठाङ्के

वस्तुतस्त्वित्यादिना शिरोमणिना मिश्राणां मतान्तरमपि दर्शितम् । तथाहि पच्यमानः, पक्व इत्यादिषु कर्मकृत्प्रत्ययस्थलेषु व्यापारः न तृतीयाविभक्त्यर्थः, किन्तु पचमानः, पक्ववान् इत्यादिकर्तृकृत्प्रत्ययप्रयोगस्थलेष्विव कर्मकृत्प्रत्ययप्रयोगस्थलेष्वपि पृथक् पृथक् व्यापारः आश्रयश्चार्थौ । एवञ्च, कर्मप्रत्ययस्थले तृतीयार्थः आधेयत्वम् । एवञ्च, कर्मकृदर्थो व्यापारः तृतीयार्थेन आधेयत्वेन तद्विशेष्यत्वेन धात्वर्थेन विक्लित्त्यादिफलेन तद्विशेषणत्वेन चान्वेति । किञ्च, तत्र फलमाश्रये अन्वेति, आश्रयश्चाभेदेन सम्बन्धेन तण्डुलादिकर्मणि अन्वेति । तथा च, चैत्रेण पच्यमानः, पक्वः तण्डुलः चैत्रेण इत्यादिस्थलेषु चैत्रनिरूपिताधेयत्ववद्व्यापारजन्यविक्लित्त्याश्रयाभिन्नः तण्डुलः इति बोधः स्वीकार्यः । तथाहि शिरोमणिना आख्यातवादे उक्तम् – चैत्रेण पच्यते पक्व इत्यादौ सुबर्थ एव व्यापारे वर्तमानत्वाद्यन्वयः, पचमानः पक्ववान् इत्यादौ पुनरनायत्या पदार्थतावच्छेदके एव व्यापारे तदन्वयः । स्तांवा व्यापाराश्रयौ शक्यौ विशिष्टमन्वयबललभ्यम् ।[1] इति ।

**मण्डनमते दोषशङ्का -**

मण्डनमते चैत्रेण पच्यते तण्डुल इत्यादिषु कर्मप्रत्ययस्थलेषु तृतीयाविभक्त्यर्थे व्यापारे आख्यातार्थानां वर्तमानत्वादीनाम् अन्वयो दुष्टस्तथा पचमानश्चैत्रः इत्यादिस्थलेषु कर्तृकृदर्थैकदेशे व्यापारे वर्तमानत्वादीनामन्वयो दुष्टः । एवञ्च, व्यापाराश्रयौ पृथक् पृथक् कर्तृकृच्छक्यौ इति स्वीकारे शक्तिद्वयस्वीकारदोषः तथा एकपदोपात्तयोः व्यापाराश्रययोः विशेषणविशेष्यभावान्वयदोषः समापततीति शङ्का ।

**शङ्कायाः समाधानम् –**

उक्तशङ्काया निराकरणार्थं मण्डनमिश्रैरुक्तं यदुक्तदोषा नैयायिकानामपि समाना एव – समानं चेदं कृतौ कालान्वयवादिनाम्[2] इति । तथाहि चैत्रेण पच्यते तण्डुलः इत्यादिस्थलेषु तृतीयाविभक्त्यर्थे कृतौ वर्तमानत्वादीनामन्वयः नैयायिकैरपि स्वीक्रियते । किञ्च, पचमानः, पक्ववान् चैत्र इत्यादिस्थलेषु कर्तृकृदर्थैकदेशे कृतौ वर्तमानत्वादीनामन्वयः अङ्गीक्रियते नैयायिकैः । अपि च, कृत्प्रत्ययस्य शक्यौ पृथक् पृथक् कृत्याश्रयौ इति स्वीक्रियते प्रामाणिकैरपि इति तत्रापि शक्तिद्वयस्वीकारदोषः तथा एकपदोपात्तयोः अर्थद्वयोः विशेष्यविशेषणभावेन अन्वयस्वीकारदोषः । एवं मण्डनमिश्राणां यत्र यत्र दोषस्तत्र तत्र नैयायिकानामपीति न मण्डनमिश्रमते दोषो दर्शनीयो नैयायिकैरिति मिश्राणां समाधिः ।

**रघुनाथशिरोमणिदिशा मण्डनमतसमीक्षणम् –**

आख्यातवादान्ते शिरोमणिना मण्डनमतं निरूप्य तत्खण्डनं विहितम् । तथा च, तण्डुलं पचति चैत्रः इत्यादिस्थलेषु धात्वर्थ-पाकादिः, तदनुकूलः वर्तमानकालीनो यत्नो हि अनुभवविषयो भवति । यत्नस्य

[1] टिप्पणीसहितः आख्यातवादः नञ्वादः च इति ग्रन्थे 6पृष्ठाङ्के
[2] टिप्पणीसहितः आख्यातवादः नञ्वादः च इति ग्रन्थे 6पृष्ठाङ्के


ISSN : 2249-538X

आख्यातार्थाङ्गीकारे सः अनुभवो हि असम्भवः । धात्वर्थपाकाद् अनुमितयत्नस्य अनुभवे स्वीकृते अपि तदनुमितयत्ने आख्यातार्थानां वर्तमानत्वादीनाम् अन्वयः असम्भवः । अत्र कारणं हि पदोपस्थाप्ये अर्थे हि पदोपस्थाप्यस्यार्थस्य अन्वयो युक्तः, न तु पदानुपस्थाप्ये अर्थे ।

किञ्च, फलमात्रस्य धात्वर्थत्वे तथा व्यापारस्य आख्यातार्थत्वे अपरः अपि दोषः सम्भवति । तथाहि व्यापारस्य आख्यातार्थत्वे यो हि पुरुषः पाकं न करोति परं तत्काले तस्य पुरुषस्य पाकजनकादृष्टसत्त्वात् तस्मिन् पुरुषे पचतीति प्रयोगापत्तिः स्यात् ।

अपि च, मिश्रमतस्वीकारे निश्चले विहगे अपि विहगस्त्यजति इति अनिष्टप्रयोगापत्तिः स्यात्, निश्चले अपि विहगे त्यज्-धात्वर्थस्य विभागरूपफलस्य तथा तदनुकूलपूर्वदेशसंयोगस्य सत्त्वात् । तथाहि शिरोमणिभणितिः – तन्न, पचतीत्यादौ पाकानुकूलवर्तमानयत्नानुभवप्रसङ्गात् फलानुकूलादृष्टवत्यपि पचतीत्यादेर्विभागाद्यनुकूलपूर्वसंयो-गादिमति निश्चलादावपि विहगे त्यजतीत्यादेः प्रयोगस्य प्रसङ्गाच्च ।[१] इति ।

**शिरोमणिदिशा आख्यातार्थविषये प्रभाकरमतनिरूपणम् –**

मण्डनमतं निरूप्य शिरोमणिना गुरोः प्रभाकस्य मतमपि प्रतिपादितम् । शिरोमणिमतानुसारं प्रभाकरमते गच्छति, पचति इत्यादिस्थलेषु गम्-पच्-प्रभृतीनां धातूनाम् अर्था हि संयोग-विक्लित्त्यादितत्तत्फलविशे-षानुकूलतत्तद्व्यापारविशेषाः । किञ्च, संख्या, वर्तमानत्वादिकालः, पचतीत्यादौ आश्रयत्वं, नश्यतीत्यादौ प्रतियोगित्वं चाख्यातार्थः ।

**शिरोमणिदिशा प्रभाकरमतसमीक्षणम् –**

शिरोमणिमते आख्यातार्थविषेय गुरुमतं न युक्तम् । तथाहि गुरुमतानुसारं संख्याकालादीनाम् आख्याता-र्थत्वेन स्वीकारे गुरुमतानुसारं पचति, गच्छति इत्यादिस्थलेषु पाकादेः वर्तमानकालिकयत्नस्याननुभवप्रसङ्गः । अत्र कारणं हि गुरुमते न यत्नः धात्वर्थः, न वाख्यातार्थः । एवञ्च, प्रामाणिकानुभवापलापनिराकरणाय यत्नस्यैवाख्याता-र्थत्वम् अङ्गीकार्यम् इति शिरोमणिमतम् । तथाहि उक्तम् – तत्र तत्र तत्तत्फलानुकूलतत्तद्व्यापारविशेष एव धात्वर्थः, सर्वत्र धात्वर्थाश्रयत्वमेव कर्तृत्वम्, संख्यावर्तमानत्वादिकं क्वचिदाश्रयत्वादिकमपि वा आख्यातार्थ इति गुरुमतमपि तत्र तत्र तादृशयत्नाननुभवप्रसङ्गादनुपादेयम्[२] इति ।

**उपसंहारः -**

प्रकृते प्रबन्धे रघुनाथशिरोमणिकृताख्यातवादमाश्रित्य मण्डनमिश्रमतानुसारं प्रभाकमतानुसारं च आख्यातार्थं निरूप्य तत्तन्मतसमीक्षणं विहितम् । तत्र मण्डनमतानुसारं व्यापारः अनुकूलव्यापारो वा आख्यातार्थः ।

[१] तत्रैव

[२] टिप्पणीसहितः आख्यातवादः नञ्वादः च इति ग्रन्थे 6पृष्ठाङ्के

तेन च तण्डुलं पचति चैत्र इत्यत्र धात्वर्थफलमाख्यातार्थे विशेषणम् । चैत्रेण पच्यते तण्डुल इत्यत्र चाख्यातार्थो व्यापारो हि धात्वर्थस्य फलस्य विशेषणम् । शिरोमणिना मण्डनमिश्रस्य आख्यातार्थविषये मतान्तरमप्युपस्थापितम् । तथा च, तण्डुलं पचति चैत्र इत्यादौ कर्तृविहिताख्यातस्थले आख्यातार्थो हि व्यापारो तथा कर्मविहिताख्यातस्थले चैत्रेण पच्यते इत्यादौ चैत्रपदोत्तरतृतीयाविभक्तेरर्थो हि व्यापारः । कर्मविहिताख्यातस्थले आख्यातेन धात्वर्थफलाधिकरणत्वमभिधीयते न तु व्यापारः । शिरोमणिना मण्डनमतं सयुक्ति तिरस्कृतम् । तथा च, फलमात्रस्य धात्वर्थत्वे तथा व्यापारस्य आख्यातार्थत्वे यो हि पुरुषः पाकं न करोति परं तत्काले तस्य पुरुषस्य पाकजनकादृष्टसत्त्वात् तस्मिन् पुरुषे पचतीति प्रयोगापत्तिः स्यात् । मन्मते अपि मण्डनमतं न युक्तम् । तथाहि पच्यादिधातूनां फलावच्छिन्नव्यापारवाचित्वात् शक्त्यैव व्यापारस्य धातुत उपस्थितेरनुभवसिद्धत्वात् फलमात्रस्य धात्वर्थत्वे व्यापारस्याख्यातार्थत्वे अनुभवविरोधः । किञ्च, फलानुकूलव्यापारो धात्वर्थः, संख्या, वर्तमानत्वादिकालः, पचतीत्यादौ आश्रयत्वं, नश्यतीत्यादौ प्रतियोगित्वं चाख्यातार्थ इति प्रभाकरमतम् । शिरोमणिभिरनुभवविरुद्धत्वात् प्रभाकरमतमपि तिरस्कृतम् । एवञ्च, शिरोमणिभिः मतान्तराणि निराकृत्य स्वकीयः सिद्धान्तः सयुक्ति सिद्धान्तितः । तथा च तन्नये आख्यातार्थो हि यत्नः इति दिक् ।

**सहायकग्रन्थाः**

1. आख्यातवादः
2. टिप्पणीसहितः आख्यातवादः नञ्वादः च
3. तत्त्वचिन्तामणिः (चतुर्थभागः, द्वितीयपरिच्छेदः)
4. भाट्टतन्त्ररहस्यम्



#169

# तत्त्वचिन्तामणेर्व्याप्तिपञ्चकस्य चतुर्थलक्षणे जगदीशमतविमर्शः

डा. रिया पाल*

**शोधसारः –**

प्रकृते प्रबन्धे तत्त्वचिन्तामणौ संगृहीतस्य प्राचीननैयायिकसम्मतस्य सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वम्[1] इति चतुर्थलक्षणस्थस्य साकल्यविशेषणस्य सार्थक्यं जगदीशदिशा निरूपितम् । लक्षणमिदं व्याख्यातुकामैः टीकाकारैः सर्वैः साकल्यविशेषणप्रयोजनविचारः विहितः । तत्र च अस्मिन् विषये माथुरी-गादाधरीटीकयोः मतसाम्यं दृश्यते । परं जगदीशतर्कालङ्कारः भिन्नमतं प्रकाशितवान् अस्मिन् विषये । अत्रायं विशेषो यद् दीधितिव्याख्यानपरैरपि जगदीशैः गदाधरैः भिन्नं भिन्नं मतमस्मिन् प्रसङ्गे उपस्थापितम् । प्रकृते जगदीशमतमेव सविशदम् आलोचितम् । अन्ततश्च उपसंहृतौ जगदीशमतं गदाधरमतेन सह कुत्र विसदृशं किमर्थं च तद्वैसादृश्यमिति निरूप्य उभयोः कतरन्मतं श्रेय इति सयुक्ति प्रतिपादितम् ।

**प्रमुखशब्दाः** – व्याप्तिः, साध्यम्, हेतुः, प्रतियोगित्वम्, अभावः, अव्याप्तिः, अतिव्याप्तिः, व्यभिचारः, असम्भवः, लक्षणम्, साध्यतावच्छेदकम् ।

**उपोद्घातः -**

समेषां हि मनुजनूनां चरमं परमं च लक्ष्यमपवर्गप्राप्तिः । अपवर्गस्य निर्वाणस्य कैवल्यस्य वा प्रापणार्थमेव भारतीयदर्शनपरम्परा प्रवृत्ता । तेषु भारतीयदर्शनेषु अनन्यम् अनितरसाधारणम् अक्षपाददर्शनम् । न्यायनये प्रमाणादिनिग्रहस्थानान्तानां षोडशपदार्थानां तत्त्वज्ञानान्निःश्रेयसाधिगमः । षोडशपदार्थेषु प्रमाणस्य प्राथम्यं पारम्यञ्च । प्रमाणेष्वनन्यमनुमानप्रमाणम् । अनुमितिकरणमनुमानम् । फलायोगव्यवच्छिन्नं कारणं करणम् इति व्यापारवत्कारणं करणम् इति च यथाक्रमं प्राचीनार्वाचीननयानुसारं करणस्वरूपवैलक्षण्यादनुमितिकरणस्यानुमानस्यापि द्वैविध्यम् । तथाहि प्राचां नये परामर्शस्यैवानुमितिकरणत्वम्, तदव्यवहितोत्तरत्वेनानुमितेर्जायमानत्वात् । किञ्च, नव्यनये व्याप्तिज्ञानस्यैवानुमितिकरणत्वम्, तस्य परामर्शरूपव्यापारवत्त्वात् । यद्वा भवतु, अनुमितिकरणे परामर्शे तथा व्याप्तिज्ञाने उभयत्रैव व्याप्तेरुपयोगित्वं स्वीकार्यम् । तथाहि व्याप्तिविशिष्टपक्षधर्मताज्ञानस्य परामर्शरूपत्वात् परामर्शघटकीभूततया परामर्शे व्याप्तेरुपयोगित्वं स्फुटम् । तथा च अनुमितिकरणस्य व्याप्तिज्ञानस्य घटकतया व्याप्तेरुपयोगित्वमपि सुलभ्यमेव । तेनानुमानप्रमाणे व्याप्तेर्महान् उपयोगः । अतो का नाम व्याप्तिरिति जिज्ञासाशमनाय सर्वे नैयायिकाः व्याप्तिस्वरूपप्रतिपादनपराः दृश्यन्ते । तथाहि तत्त्वचिन्तामणौ प्राचां व्याप्तिलक्षणानि निरुच्य तत्र दोषं प्रदर्श्य च सिद्धान्तलक्षणं सिद्धान्तितम् । परमतमविदित्वा स्वसिद्धान्तस्थापनमयुक्तमिति पूर्वपक्षमतानि उपस्थापितानि । स्वल्पाक्षरग्रथितं दुर्बोधपूर्वपक्षमतं सविशदं प्रकाशयितुमाचार्यरघुनाथशिरोमणिः दीधितिं तथाचार्यमथुरानाथो रहस्यं प्रणिनाय । पुनस्तत्तद्ग्रन्थानां जटिलतत्त्वोपनिबद्धत्वात्तत्तत्तत्त्वानां सुकुमारमतीनां समक्षं समुप-

*संस्कृतविभागः, छातना-चण्डीदास-महाविद्यालयस्य, पश्चिमवङ्गस्थस्य

[1] चित्तनारायणपाठकसम्पादितस्य व्याप्तिपञ्चकस्य 418-संख्याके पृष्ठे

स्थापनार्थं दीधितिमाश्रित्य जागदीशी गादाधरी च विनिर्मिता जगदीशेन गदाधरेण च । अधस्तात् व्याप्तिपञ्चकस्य चतुर्थलक्षणं जगदीशमतमाश्रित्य समीक्ष्यते -

**साकल्यविशेषणविमर्शः -**

सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वम् इति व्याप्तेश्चतुर्थलक्षणम् । ननु साकल्यं कस्य विशेषणम् इति निरूपयद्भिः दीधितिकृद्भिः उक्तम् – साकल्यं साध्याभाववति साध्ये च बोध्यम्[1] इति । दीधितिकृतां मतं व्याख्यातुकामेन जगदीशेन आदौ दीधितिकृतां मतस्य अनुचितत्वम् आशङ्क्य तस्य सार्थकता व्याख्याता । तथाहि रघुनाथेन धूमवान् वह्नेरित्याद्यसद्धेतुस्थले अतिव्याप्तिवारणाय साकल्यं साध्याभाववतो विशेषणमिति निर्दिष्टम् । तथा च, साध्याभाववतः साकल्यविशेषणाभावे साध्याभाववद्यत्किञ्चिन्निष्ठाभावप्रतियोगित्वम् इति व्याप्तेश्चतुर्थलक्षणस्वरूपं भवति । तेन धूमवान् वह्नेः इत्यत्र अतिव्याप्त्यापत्तिः भवति । तथाहि धूमवान् वह्नेः इत्यत्र

साध्यः - धूमः

साध्याभावः – धूमाभावः

साध्याभावस्य यत्किञ्चिदधिकरणम् – जलह्रदादिकम्

साध्याभावस्य यत्किञ्चिदधिकरणनिष्ठाभावः – जलह्रादादिनिष्ठवह्न्यभावः, तादृशाभावीयतियोगित्वस्य वह्नौ हेतौ सत्त्वाद् धूमवान् वह्नेरिति असद्धेतुस्थले व्याप्तिलक्षणस्य सङ्गत्या भवति अतिव्याप्तिः ।

एतादृश्या अतिव्याप्तेः दूरीकरणार्थं व्याप्तिलक्षणे साध्याभावस्य विशेषणत्वेन साकल्यपदं निवेशनीयम् इति दीधितिकाराः । तेन लक्षणशरीरं – सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वं व्याप्तिरिति । साध्याभावास्य सकलेषु अधिकरणेषु हेत्वभावो वर्तते चेद्धेतुनिष्ठं व्याप्तिलक्षणं सङ्गतं भवतीति बोध्यम् । तेन धूमवान् वह्नेरिति असद्धेतुस्थले न अतिव्याप्तिः । तथाहि धूमवान् वह्नेः इत्यत्र

साध्यः - धूमः

साध्याभावः – धूमाभावः

साध्याभावस्य सकलानि अधिकरणानि – अयोगोलक-जलह्रदादीनि

साध्याभावस्य सकलाधिकरणान्तर्गते अयोगोलके हेतोः वह्नेः सत्त्वेन तदभावस्य असत्त्वेन च सकलसाध्याभावव-न्निष्ठाभावप्रतियोगित्वस्य हेतौ असत्त्वाद् लक्षणासङ्गत्या न अतिव्याप्तिः । एवं साध्याभाववति साकल्यविशेषणदाने धूमवान् वह्नेरित्यादौ असद्धेतुस्थले न अतिव्याप्तिरिति दीधितिकाराः ।

अत्रेयम् आशङ्का यदुक्तमतम् अनुचितम् । अत्र कारणं हि प्रथमोपस्थितसाध्याभावस्य विशेषणं साकल्य-मित्युक्तावपि उक्तातिव्याप्तिरूपदोषवारणं कर्तुं शक्यते । अतः साध्याभावपदं परित्यज्य पश्चादुपस्थितसाध्याभाववतो

[1]चित्तनारायणपाठकसम्पादितस्य व्याप्तिपञ्चकस्य 420-संख्याके पृष्ठे


ISSN : 2249-538X

विशेषणकथनम् अयुक्तम् इति ।

ननु साध्याभाववति साकल्यविशेषणोपादाने यथा अतिव्याप्तिः वार्यते तथा साध्याभावे साकल्यविशेषणोपादाने अपि कथं धूमवान् वह्नेरित्याद्यसद्धेतौ अतिव्याप्तिः वार्यते इति चेत् तद् दर्श्यते धूमवान् वह्नेः इत्यत्र

साध्यः - धूमः

सकलसाध्याभावः – तत्तद्घटावृत्तिधूमाभावः, तत्तत्पटावृत्तिधूमाभावः, तत्तत्पर्वताद्यवृत्तिधूमाभावः चेत्यादयः साध्याभावः, तेषां सकलसाध्याभावान्तर्गतत्वात् ।

तथा च, तत्तद्घटाद्यवृत्तिधूमाभावानां सर्वेषामेकस्मिन् अधिकरणे सत्त्वासम्भवेन तादृशसकलसाध्याभावाधिकरणाप्रसिद्ध्या तद्घटितलक्षणस्याप्यप्रसिद्धत्वम् इति नातिव्यातिः । एवं साध्याभावे अपि साकल्यविशेषणोपादाने अपि धूमवान् वह्नेः इत्यादौ असद्धेतौ अतिव्याप्तिः दूरीभूता भवति ।

किन्तु, साध्याभावे साकल्यविशेषणोपादेन यद्यपि अतिव्याप्तिः दूरीभूता भवति तथापि तुल्ययुक्त्या वह्निमान् धूमादित्यादिसद्धेतौ अव्याप्तिः अपि भवति । तथाहि वह्निमान् धूमाद् इत्यत्र

साध्यः - वह्निः

सकलसाध्याभावः - तत्तद्ध्रदावृत्तिवह्न्यभावः, तत्तत्पर्वतावृत्तिवह्न्यभावः, तत्तद्घटावृत्तिवह्न्यभावश्चेत्यादयः तेषां सकलसाध्याभावान्तर्गतत्वेन लक्षणघटकत्वात् ।

तथा च, तेषां सर्वेषाम् अभावानाम् एकस्य अधिकरणस्य अप्रसिद्ध्या तद्घटितलक्षणस्यापि अप्रसिद्ध्या अव्याप्तिः भवति ।

पुनश्च, अव्याप्तेः वारणार्थं साध्याभावे न साकल्यविशेषणं देयं, किन्तु साध्याभाववति एव साकल्यविशेषणं देयम् इति दीधितिकारा इति जागदीशमतम् । तेन च साध्याभावस्य अधिकरणानि यावन्ति तत्तद्वृत्तित्वाभावकूटस्य तद्व्यक्तित्वेन तत्तत्साध्याभावाधिकरणानां प्रसिद्धत्वेन नाव्याप्तिः, न वा अतिव्याप्तिः । किञ्च, धूमावान् वह्नेः इत्यत्र असद्धेतुस्थले धूमाभावाधिकरणानां यावतां मध्ये अयोगोलकस्यापि प्रविष्टत्वात् तन्निरूपितवृत्तित्वस्य एव वह्नौ सत्त्वेन तदभावस्य वह्नौ असत्त्वात् न लक्षणसङ्गतिरिति नातिव्याप्त्यापत्तिः । तथाहि जागदीशी – "ननु सकलस्य साध्यप्रतियोगिकाभावस्याधिकरणाप्रसिद्ध्या व्यभिचारिण्यतिव्याप्तिवारणाय यदि साध्याभावस्य विशेषणं साकल्यं तदा वह्निमान् धूमादित्यादिसद्धेतौ अव्याप्तिः, तत्रापि तत्तत्सपक्षावृत्तित्वावच्छिन्नाभावरूपस्य तत्तद्विपक्षावृत्तित्वावच्छिन्नाभावरूपस्य च साध्यप्रतियोगिकाभावस्तोमस्याधिकरणाप्रसिद्धेरत आह साध्याभाववतीति, तथा च साकल्यं न साध्याभावविशेषणम् अतो नाप्रसिद्धिरिति भावः ।"[१] इति ।

**केचित्तुकाराणां मतविमर्शः**

[१] चित्तनारायणपाठकसम्पादितस्य व्याप्तिपञ्चकस्य 420-संख्याके पृष्ठे

साकल्यं साध्याभाववति साध्ये च बोध्यमिति दीधितिं व्याख्यातृणां केषाञ्चिद् व्याख्यानमपि जगदीशतर्कालङ्कारैः जागदीश्याम् उपस्थापितम् । सकलपदानुपादाने साध्याभाववन्निष्ठाभावप्रतियोगित्वम् इति लक्षणं पर्यवस्यति । तेने धूमवान् वह्नेः इत्यादौ अतिव्याप्तिः । तथाहि साध्याभाववति धूमाभाववति जलह्रदादौ वह्न्याभावस्य सत्त्वेन तत्प्रतियोगित्वस्य वह्नौ सत्त्वाद् अतिव्याप्तिः । तस्याश्च अतिव्याप्तेः वारणार्थं साध्याभाववति साकल्यविशेषणं देयम् ।

एवञ्च, साध्याभाववति साकल्यविशेषणदानेन यथा धूमवान् वह्नेः इत्यादौ अतिव्याप्तिर्वारिता तथा साध्ये साकल्यविशेषणदानेन वह्निमान् धूमाद् इत्यादौ अव्याप्तिर्वारिता । अन्यथा साध्ये साकल्यविशेषणं यदि न दीयते तर्हि वह्निमान् धूमाद् इत्यादौ सद्धेतुस्थले अव्याप्तिः स्यात् । तथाहि वह्निमान् धूमाद् इत्यादौ साध्याभावपदेन तत्तद्वह्न्यभावस्य अपि ग्रहीतुं शक्यत्वेन तदधिकरणं महानसादिकम् अपि, यावत्साध्याभावाधिकरणान्तर्गततत्वात् । तथा च, साध्याभावाधिकरणमहानसादि-निष्ठाभावप्रतियोगित्वस्य धूमे असत्त्वाद् अव्याप्तिः । तादृश्याश्च अव्याप्तेः वारणार्थं साध्ये अपि साकल्यविशेषणं देयम् ।

तेन सकलानि यानि साध्यानि तेषाम् अभावस्य यद्यदधिकरणं तत्तन्निष्ठाभावप्रतियोगित्वं व्याप्तिरिति फलितम् । तथा च, सकलसाध्याभावानाम् अधिकरणं न महनसचत्वरादयः सपक्षाः, तेषु सकलसाध्याभावान्तर्गतमहानसीयादिवह्न्याद्यभावस्य असत्त्वात् । एवं च, सकलसाध्याभावाधिकरणं जलह्रदादिकम् एव, तत्र धूमादिरूपहेत्वभावस्य सत्त्वेन तत्प्रतियोगित्वस्य धूमादौ अव्याहतत्वाद् नाव्याप्तिः । तथाहि जागदीश्याम् उक्तम् – "केचित्तु धूमवान् वह्नेरित्यादिव्यभिचारिण्यतिव्याप्तिः साध्याभाववद्यत्किञ्चिन्निष्ठाभावप्रतियोगित्वादित्यत आह साकल्यं साध्याभाववतीति । नन्वेवमपि साध्याभाववन्निखिलान्तर्गते महानसादौ वर्तमानस्याभावस्य प्रतियोगित्वं धूमादौ नास्तीति अव्याप्तितादवस्थ्यम् अत उक्तं साध्ये चेति तथा च सपक्षो महानसादिः न सकलसाध्याभाववानित्यदोषः ।"[१] इति

**प्राचां मतविमर्शः**

प्राचीनसम्प्रदायाः दीधितिकारवाक्यम् अन्यथा व्याख्यान्ति । तेषां मतमनूद्य तस्य खण्डनं कृतं जगदीशतर्कालङ्कारैः । तेषां मतं तु इत्थं यद् यदि साध्याभाववति साकल्यविशेषणं न निवेश्यते तदैव साध्ये साकल्यविशेषणं निरर्थकम् । किन्तु यदि साध्याभाववति साकल्यविशेषणं निवेश्यते तदा साध्ये साकल्यविशेषणं सार्थकं भवति । तथाहि – साध्ये साध्याभाववति च साकल्यविशेषणाभावे व्याप्तिलक्षणं स्यात् - साध्याभाववन्निष्ठाभावप्रतियोगित्वं व्याप्तिरिति । तथा च, वह्निमान् धूमादित्यादौ

साध्यः - वह्निः

[१] चित्तनारायणपाठकसम्पादितस्य व्याप्तिपञ्चकस्य 420-संख्याके पृष्ठे


ISSN : 2249-538X

साध्याभाववान् – वह्न्यभाववान् – ह्रदादिः,

तत्र ह्रदादौ हेत्वभावस्य धूमाभावस्य सत्त्वेन तत्प्रतियोगित्वस्य धूमे सत्त्वाल्लक्षणसमन्वयः । एवमुभयत्र साकल्यविशेषणाभावे वह्निमान् धूमादित्यादौ सद्धेतुस्थले नाव्याप्तिः ।

किन्तु उक्तलक्षणस्वीकारे यद्यपि नाव्याप्तिः तथापि धूमवान् वह्नेः इत्यादौ असद्धेतुस्थले नितरामतिव्याप्तिः । तथाहि धूमवान् वह्नेः इत्यादौ साध्यः – धूमः

साध्याभाववान् – धूमाभाववान् – ह्रदादिः

तत्र ह्रदादौ हेत्वभावस्य वह्न्यभावस्य सत्त्वेन तत्प्रतियोगित्वस्य वह्नौ हेतौ सत्त्वाल्लक्षणसमन्वय इत्यतिव्याप्तिः । एवमुभयत्र साकल्यविशेषणाभावे धूमवान् वह्नेः इत्यादौ असद्धेतुस्थले अतिव्याप्तिः ।

उक्ताया अतिव्याप्तेर्वारणाय साध्याभाववति साकल्यविशेषणं देयम् । तथा सति लक्षणं स्यात् - सकल-साध्याभाववन्निष्ठाभावप्रतियोगित्वं व्याप्तिरिति । तेन न धूमवान् वह्नेः इत्यादौ असद्धेतुस्थले अतिव्याप्तिः । तथाहि धूमवान् वह्नेः इत्यादौ

साध्यः – धूमः

साध्याभावः – धूमाभावः

सकलसाध्याभाववान् – यथा ह्रदादिः तथा अयोगोलकादिः

तत्र सकलसाध्याभावान्तर्गते अयोगोलके हेतोर्वह्नेः सत्त्वेन हेतौ वह्नौ सकलसाध्याभाववन्निष्ठाभावप्रतियोत्वस्यास-त्त्वात् लक्षणासङ्गत्या नातिव्याप्तिः ।

साध्याभाववति साकल्यनिवेशे धूमवान् वह्नेः इत्यादौ असद्धेतुस्थले अतिव्याप्तिवारणे सम्भवे अपि वह्निमान् धूमाद् इत्यादौ लक्षणासङ्गत्या अव्याप्तिः । तथाहि वह्निमान् धूमाद् इत्यादौ

साध्यः – पर्वतीयवह्निः

साध्याभावः – पर्वतीयवह्न्यभावः

सकलसाध्याभाववान् – महानसादिः, पर्वतीयवह्न्यभावस्य महानसादावपि सत्त्वात्

साध्याभाववत्सकलान्तर्गतमहानसादौ धूमाभावस्य असत्त्वेन तन्निष्ठाभावप्रतियोगित्वस्य धूमेऽसत्त्वात् लक्षणासङ्ग-त्या अव्याप्तिः । तस्या अव्याप्तेः वारणाय अवश्यमेव साध्ये साकल्यविशेषणं देयम् । तेन न अव्याप्तिः ।

साध्याभाववति इव साध्ये अपि साकल्यविशेषणनिवेशे लक्षणं स्यात् सकलसाध्याभाववन्निष्ठाभावप्रतियो-गित्वं व्याप्तिरिति । तेन वह्निमान् धूमाद् इत्यादौ महानसीयवह्न्यभावस्यापि सकलसाध्याभान्तर्गततत्वेन तदधिकरण-त्वस्य महानसादौ असत्त्वात् ह्रदादावेव सत्त्वात् सकलसाध्यानाम् अभावस्य सकलाधिकरणं ह्रदादिकम् एव, न तु महानसम् । तथा च ह्रदादिनिष्ठधूमाभावप्रतियोगित्वस्य धूमे सत्त्वेन न अव्याप्तिशङ्का ।

एवं चतुर्थलक्षणस्य व्यभिचारिण्यतिव्याप्तिवारणार्थं साध्याभाववति साकल्यनिवेशे साध्ये साकल्यनिवेशः सार्थको भवति इति प्राचां नैयायिकानां नयः ।

**जागदीशीदिशा प्राचीननैयायिकमतखण्डनम्**

प्राचीननैयायिकोक्तमतं न सहते जगदीशः । अतस्तेन तन्मतं खण्डितम् । तथाहि साध्याभावाधिकरणे साध्ये च साकल्यविशेषणस्य अनिवेशे लक्षणं भवति - साध्याभाववन्निष्ठाभावप्रतियोगित्वमेव व्याप्तिरिति । तथा च, गगनावृत्तिधर्मवान् द्रव्यत्वादित्यादौ असद्धेतुस्थले व्याप्तिलक्षणस्य अतिव्याप्तिः । तथाहि गगनावृत्तिधर्मवान् द्रव्यत्वाद् इत्यादौ

साध्यः – गगनावृत्तिधर्मः - पटत्वादिधर्मः

साध्याभावः – पटत्वादिरूपयक्तिञ्चित्साध्यस्याभावः

साध्याभावाधिकरणम् – गुणादिकम्

तत्र गुणादौ द्रव्यत्वरूपहेत्वभावस्य सत्त्वेन तत्प्रतियोगित्वस्य द्रव्यत्वे हेतौ सत्त्वात् लक्षणसङ्गत्या अतिव्याप्तिः भवति ।

उक्ताया अतिव्याप्तेः वारणार्थं साध्ये साकल्यविशेषणं निवेश्यते । तथा च, साध्ये साकल्यविशेषणोपादाने यावतां साध्यानामभावस्य यदधिकरणं तन्निष्ठाभावप्रतियोगित्वं व्याप्तिरिति लक्षणं पर्यवस्यति । तथा चोक्तस्थले गगनावृत्तिधर्माणां सर्वेषां साध्यत्वेन तन्निष्ठाभावप्रतियोगित्वं व्याप्तिरिति पर्यवस्यति । तेन न गगनावृत्तिधर्मवान् द्रव्यत्वाद् इत्यादौ अतिव्याप्त्यापत्तिः । तथाहि गगनावृत्तिधर्मवान् द्रव्यत्वाद् इत्यादौ

सकलसाध्याः – सर्वे गगनावृत्तिधर्माः

सकलसाध्यानाम् अभावस्य अधिकरणम् – गगनमेव, न तु गुणादिकम्, गुणत्वादेरपि गगनावृत्तिधर्मतया साध्यत्वेन गुणत्वाद्यभावस्य गुणादौ असत्त्वात् ।

एवं चात्र सकलसाध्याभावाधिकरणं गगनमेवेति तत्र द्रव्यत्वाभावस्य असत्त्वेन तन्निष्ठाभावप्रतियोगित्वस्य द्रव्यत्वे असत्त्वाद् न अतिव्याप्तिः । तथाहि जगदीशतर्कालङ्कारैरुक्तम् – “प्राञ्चस्तु व्यभिचारिण्यतिव्याप्तिवारणार्थं साध्याभाववति यावत्त्वविशेषणो दत्त एव साध्ये यावत्त्वविशेषणमव्याप्तिवारकतया सार्थकं भवति, अतः साध्याभाववत्येव साकल्यं प्राक् प्रयोजयति-साकल्यमित्यादिना – इत्येवमवधारयन्ति । इति तन्मन्दम् । साध्याभाववति साकल्यानुक्तावतिव्याप्तिवारकतयैव साध्ये साकल्यविशेषणस्य प्रथमतः सार्थकत्वसम्भवात्, अन्यथा गगनावृत्तिधर्मवान् द्रव्यत्वादित्यादौ पटत्वादिलक्षणतत्तत्साध्यव्यक्त्यभाववद्गुणादिनिष्ठाभावप्रतियोगिनि द्रव्यत्वादौ अतिप्रसङ्गादिति ध्येयम् । इत्थं च, प्रथमतः साध्ये साकल्यविशेषणोपादाने गुणत्वादेरपि सङ्ग्रहात् तदभाववान् न


ISSN : 2249-538X

गुणादिः किन्तु गगनमात्रं तत्र हेतोर्वृत्तित्वान्नातिव्याप्तिः"[1] इति ।

अतः साध्याभाववति साकल्यविशेषणाभावदशायां साध्ये साकल्यविशेषणप्रवेशस्य प्रयोजनं नास्तीति प्राचीनानां मतमनुपादेयमेवेति जगदीशमतम् ।

**उपसंहारः -**

व्याप्तिपञ्चकस्य चतुर्थलक्षणनिरूपणावसरे सर्वे एव टीकाकाराः लक्षणस्थसाकल्यविशेषणं कथं सार्थक्यं गच्छतीति सयुक्ति निरूपितवन्तः । प्रकृते प्रबन्धे जगदीशदिशा साकल्यविशेषणप्रयोजनविचार उपस्थापितः । अस्मिन् प्रसङ्गे माथुरी-गादाधरीटीकयोः मतसाम्यं दृश्यते । परं जगदीशतर्कालङ्कारः भिन्नमतं प्रकाशितवान् अस्मिन् विषये । तत्सर्वमत्र पर्यालोच्यते -

अत्र गदाधरभट्टाचार्याणां मते साध्याभाववति साकल्यविशेषणसत्त्वे एव साध्ये साकल्यविशेषणं सार्थकं भवति । तथाहि साध्याभाववति साध्ये च साकल्याभावे लक्षणार्थः स्यात् - यत्किञ्चित्साध्याभाववद्यत्किञ्चिन्निष्ठाभावप्रतियोगित्वमिति । तथा च, वह्निमान् धूमाद् इत्यत्र

यत्किञ्चित्साध्याभावः - महानसीयवह्न्यभावः

यत्किञ्चित्साध्याभावस्य यत्किञ्चिदधिकरणं - ह्रदः

यत्किञ्चित्साध्याभाववद्यत्किञ्चिन्निष्ठाभावः – ह्रदनिष्ठः धूमाभावः

यत्किञ्चित्साध्याभाववद्यत्किञ्चिन्निष्ठाभावप्रतियोगित्वं धूमे अस्तीति लक्षणसमन्वयसम्भवात् न अव्याप्तिः ।

किन्तु उभयत्र साकल्याभावे यत्किञ्चित्साध्याभाववद्यत्किञ्चिन्निष्ठाभावप्रतियोगित्वमिति खलु लक्षणार्थे स्वीकृते यद्यपि वह्निमान् धूमाद् इत्यत्र न अव्याप्तिः तथापि धूमवान् वह्नेः इत्यत्र अतिव्याप्तिः । तथाहि धूमवान् वह्नेः इत्यत्र

यत्किञ्चित्साध्यः - धूमः

यत्किञ्चित्साध्याभावस्य यत्किञ्चिदधिकरणं - ह्रदः तद्वृत्त्यभावप्रतियोगित्वस्य वह्नौ सत्त्वादतिव्याप्तिः ।

उक्ताया अतिव्याप्तेः दूरीकरणार्थं लक्षणे साध्याभावाधिकरणे साकल्यविशेषणं निवेशनीयम् । तेन धूमवान् वह्नेः इत्यत्र

यत्किञ्चित्साध्यः - धूमः

यत्किञ्चित्साध्याभावः - धूमाभावः

यत्किञ्चित्साध्याभावस्य यावत्साध्याभावाधिकरणेषु तप्तायोगोलकस्याप्यन्तर्गतत्वेन अयोगोलकनिष्ठाभावप्रतियोगित्वं वह्नौ नास्ति, तत्र वह्नेः सत्त्वात् । तेन साध्याभावाधिकरणे साकल्यग्रहणे धूमवान् वह्नेः इत्यत्र न अतिव्याप्तिः ।

[1] चित्तनारायणपाठकसम्पादितस्य व्याप्तिपञ्चकस्य 420-संख्याके पृष्ठे

किन्तु धूमवान् वह्नेः इत्यत्र अतिव्याप्तिवारणार्थं साध्याभावाधिकरणे साकल्यनिवेशे वह्निमान् धूमात् इत्यत्राव्याप्तिः । तथाहि वह्निमान् धूमाद् इत्यत्र

यत्किञ्चित्साध्यः - महानसीयवह्निः

यत्किञ्चित्साध्याभावः - महानसीयवह्न्यभावः

यत्किञ्चित्साध्याभावस्य यावदधिकरणान्तर्गतः पर्वतः, तद्वृत्त्यभावप्रतियोगित्वं धूमे नास्ति, पर्वते धूमस्य सत्त्वात् । अतः वह्निमान् धूमाद् इत्यत्र लक्षणासङ्गत्या अव्याप्तिः ।

उक्ताव्याप्तिवारणार्थं पुनः लक्षणे साध्ये साकल्यविशेषणं ग्राह्यम् । तेन वह्निमान् धूमाद् इत्यत्र न अव्याप्तिः । तथाहि वह्निमान् धूमाद् इत्यत्र

यावन्तः साध्याः - निखिलवह्नयः

यावत्साध्याभावः – निखिलवह्न्यभावः

यावतां साध्याभावानां यावन्ति अधिकरणानि – ह्रदादि एव, न तु पर्वतादीनि । अत्र कारणं हि पर्वतीयवह्नेरपि निखिलसाध्यान्तर्गतत्वेन तदभावाधिकरणं न पर्वतः, किन्तु ह्रदादि एव ।

यावत्साध्याभावानां यावदधिकरणेषु ह्रदादिषु विद्यमानः अभावः – धूमाभावः

तादृशाभावप्रतियोगित्वं धूमे वर्तते इति लक्षणसमन्वयात् न अव्याप्तिः ।

एवञ्च, साध्याभाववति साकल्यसत्त्वे एव साध्ये साकल्यविशेषणं सार्थकं भवति नान्यथा इति गदाधरमतम् । अत एव साकल्यं साध्याभाववति साध्ये च बोध्यम् इति वदन्ति दीधितिकाराः इति गदाधराः ।

जगदीशतर्कालङ्कारास्तु साध्याभाववति यावत्त्वानुपादानेऽपि साध्ये साकल्यविशेषणं सार्थकं भवति । तन्नये अतिव्याप्तिवारकतयैव साध्ये साकल्यविशेषणस्य सार्थक्यसम्पादनं सम्भवति । तथाहि गगनावृत्तिधर्मवान् द्रव्यत्वादित्यत्र गगनावृत्तिधर्माभाववति गगने द्रव्यत्वसत्त्वादयं हेतुः व्यभिचारी । तत्र साध्ये साकल्याभावे पटत्वादिलक्षणतत्तत्साध्यव्यक्त्यभावाधिकरणगुणवृत्त्यभावप्रतियोगित्वस्य द्रव्यत्वे सत्त्वादतिव्याप्तिः । साध्ये साकल्यविशेषणोपादाने गुणत्वादेरपि गगनावृत्तिधर्मत्वेन सकलसाध्यान्तर्गतत्वेन तदभावाधिकरणं गगनमेव तद्वृत्त्यभावप्रतियोगित्वस्य द्रव्यत्वे अभावान्नातिव्याप्तिः इति वदन्ति ।

एवं चानयोर्मतभेद इत्थं पर्यालोचितः यत् साध्याभाववति साकल्याभावेऽपि साध्ये साकल्यविशेषणं सार्थकं भवति इति तर्कालङ्काराः । साध्याभाववति साकल्यसत्त्व एव साध्ये साकल्यविशेषणं सार्थकं भवति नान्यथा इति भट्टाचार्याः ।

अत्रेदं मदीयं समीक्षणं यत् जगदीशगदाधरयोर्मध्ये गदाधरमतमेव अत्र युक्तियुक्तम् । तथाहि साध्याभाववति यावत्त्वानुपादानेऽपि अतिव्याप्तिवारकतयैव साध्ये साकल्यविशेषणस्य सार्थक्यसम्पादनं सम्भवति । जगदीशैः


ISSN : 2249-538X

स्थलमेकमत्र प्रदर्शितम् । तत्स्थलं हि गगनावृत्तिधर्मवान् द्रव्यत्वाद् इति । तेन जगदीशनये चतुर्थव्याप्तिलक्षणशरीरं स्यात् यावत्साध्याभाववद्यत्किञ्चिदधिकरणनिष्ठाभावप्रतियोगित्वं व्याप्तिः इति । जगदीशलक्षणे स्वीकृते यद्यपि गगनावृत्तिधर्मवान् द्रव्यत्वाद् 'इति विशेषस्थले अतिव्याप्तिवारणं सम्भवति । परन्तु नेदम् अतिव्याप्तिवारणम् अत्र वास्तवप्रयोजनम् । परमत्र नानाव्यक्तिसाध्यकस्थले अव्याप्तिवारणं हि साध्ये साकल्यनिवेशस्य वास्तवप्रयोजनम् । अतः गदाधरैः उक्तम् – साध्याभाववति साकल्यविशेषणासत्त्वे अपि साध्ये साकल्यविशेषणस्योक्तरीत्या अतिव्याप्तिवारणप्रयोजनकत्वसम्भवे अपि वक्ष्यमाणप्रयोजनस्यैव वास्तवतया तस्य साध्याभाववति साकल्यविशेषणसत्त्व एव सङ्गतेः आदौ तत्प्रदर्शनस्योचिततत्वाद् इति । अत्र वक्ष्यमाणप्रयोजनं नाम यद्दीधितिकारैः उक्तम् - न वा नानाव्यक्तिसाध्यकसद्धेतावव्याप्तिः इति । तेन नानाव्यक्तिसाध्यकसद्धेतावव्याप्तिवारणं साध्ये साकल्यविशेषणस्य प्रयोजनमुक्तं तदेव वास्तवम् । अतः नानाव्यक्तिसाध्यकसद्धेतावव्याप्तिवारणप्रयोजनं वक्तव्यं न तु अतिव्याप्तिवारणप्रयोजनमिति गदाधरमतमेव युक्तियुक्तम् ।

**सहायका ग्रन्थाः**


- गङ्गेशोपाध्यायः । तत्त्वचिन्तामणिः । सम्पादकः कामाख्यानाथतर्कवागीशः । तत्त्वचिन्तामणौ ईश्वरानुमानम् । कलिकाता : द्य-एसियाटिक्-सोसाइटि, १८९३ ।
- गङ्गेशोपाध्यायः । तत्त्वचिन्तामणिः (प्रत्यक्षखण्डात्मकः) । सम्पादकः कामाख्या-नाथतर्कवागीशः, देहली : मोतिलाल-वनारसीदासः, १८९७ (प्रथमं संस्करणम्) ।
- गङ्गेशोपाध्यायः । पञ्चलक्षणी (गादाधरीव्याप्तिपञ्चकप्रकरणसमेता) । सम्पादकः वीरनारायणपाण्डुरङ्गी । देहली : न्यू-भारतीय-वुक-कार्पोरेशन्, २०२० प्रथमप्रकाशः ।
- गङ्गेशोपाध्यायः । व्याप्तिपञ्चकम् (गादाधरीसहितम्) । सम्पादकः एन्. एस्. रामानुजताताचार्य्यः । तिरुपति : केन्द्रिय-संस्कृत-विद्यापीठम्, २००० ।
- गङ्गेशोपाध्यायः । व्याप्तिपञ्चकम् (माथुरीसहितम्) । सम्पादकः शिवादित्यमिश्रः । वाराणसी : चौखम्बा-संस्कृत-प्रतिष्ठानम्, १९८४ (द्वितीयसंस्करणम्) ।
- गङ्गेशोपाध्यायः । व्याप्तिपञ्चकम् (सुबोधिनीटीकासहितम्) । सम्पादकः ढुण्डिराज-शास्त्री । वाराणसी : चौखम्बा-संस्कृत-प्रतिष्ठानम्, १९२८ ।
- गङ्गेशोपाध्यायः । व्याप्तिपञ्चकम् । सम्पादकः चित्तरञ्जनपाठकः । वाराणसी : चौखम्बा-विद्याभवनम्, २०१० ।




#178

# शिक्षायां शोधस्य आधारः

डा. दयानिधिशर्मा*

**शोधसारः –**

राष्ट्रस्य विकासार्थं सर्वत्र गुणवत्तापूर्णं शोधकार्यं परमावश्यकम् । उत्तमशोधकार्याणां बलेन राष्ट्रम् अग्रे सरति । विविधविषयाणां सम्प्रत्ययैः नागरिकाः प्रबुद्धाः भवन्ति । शिक्षाक्षेत्रे अध्ययनरताः शोधार्थिनः प्रस्तुतक्षेत्रे तत्पराः वर्तन्ते । बहुविधरीत्या ते शोधकार्याणि सम्पाद्य राष्ट्रस्य विकासाय महत् योगदानं कुर्वन्ति । शिक्षितं राष्ट्रं विलोक्य सामाजिकाः हर्षम् अनुभवन्ति । एतस्य मूले केवलं महत्त्वपूर्णं शोधकार्यं वर्तते । सम्प्रति बहुषु विषयेषु शोधकार्याणाम् बहवः अवसराः सन्ति । तथैव शिक्षायाः प्रगतिरपि दृश्यते । अन्ततश्च किमपि शोधकार्यं कर्तुं कश्चन आधारः स्वीक्रियते । तदाधारेण शोधकार्यं गतिं प्राप्नोति । शोधार्थिनः प्रामुख्येन इमाम् आधारस्य प्रक्रियाम् अवश्यं जानीयुः ।

**प्रमुखशब्दाः** – शोधः, समस्या, प्रक्रिया, समाधानम् , परिभाषा ।

उच्चशिक्षायाः क्षेत्रे विश्वविद्यालयेषु शीघ्रं नूतनानि परिवर्तनानि सर्वत्र दृश्यन्ते । कक्षायाः स्वरूपे सञ्चार-साधनानां प्रभावः प्रामुख्येन अङ्गीकृतः । प्रतिदिनं नवाचाराणां प्रयोगः, शिक्षणविधीनां व्यवहारः प्राविधिकं ज्ञानं च सर्वेषां पारम्परिकक्षेत्राणां जायमानं परिवर्तनं सूचयन्ति । विश्वस्तरे डिज़िटलमाध्यमं विश्वविद्यालयानां परस्परं समन्वयने महत्त्वपूर्णां भूमिकां सोढुम् उपयुक्तं विद्यते । आभासीयकार्यक्रमाणां शोधपरियोजनानां च लाभः शोधार्थिनां कृते सुन्दरं प्रतिभासते । सम्प्रति शिक्षासम्बद्धासु सर्वास्वपि चेष्टासु यथा अस्माकं चिन्तने जीवनयापने कार्यसाधने च कृत्रिमबुद्धिमत्तायाः (AI) महान् प्रभावः समुत्पन्नः । 'कृत्रिमबुद्धिमत्ता इति शब्दस्य प्रयोगः सर्वप्रथमं 1956 तमे वर्षे अमेरिकादेशे डार्टमाउथ् महाविद्यालये (शर्मा,चौरसिया 2023) एकस्यां कार्यशालायां सञ्जातः । इत्थं विश्वसमुदाये प्राध्यापकानां छात्राणां च परस्परं कश्चन सांस्कृतिकः प्रवाहः सम्प्रति शोभते । अधुना लोकाः पुरातनकालात् संस्कारसंस्कृतिसम्पन्नाः सम्भूय अपि नूतनगतिशीले शैक्षिकवातावरणे समायोजनं कर्तुं यत्नशीलाः वर्तन्ते । उच्चशिक्षासंस्थानेषु अद्यत्वे 'गिग् इकॉनमी' कश्चन विशिष्टः, प्रकल्पः (कौर, 2024) समागतः यः कौशलविकासे (Skill Development) आजीवनम् अधिगमे (Life Long Learning) च बलं प्रददाति । आपणे वास्तविकं जीवनं भिन्नं विद्यते । उद्योगानाम् अवसरेषु सर्वत्र न्यूनताः समुद्भूताः । शिक्षायाः विशिष्टक्षेत्रेषु एव अवसराः दृश्यन्ते । इयं कालस्य गतिः मन्यते । यः सर्वत्र आक्रान्तः भवति । शोधकार्याणामपि सम्पादने अनुप्रयोगे च एतानि नूतनानि परिवर्तनानि जातानि एव । अस्मिन् सन्दर्भे शोधकार्यस्य महत्त्वपूर्णं ज्ञानम् अवश्यमेव करणीयम् । तत्फलेन ' शोधस्य आधारः' इति विषये छात्रैः ज्ञानं प्राप्तव्यम् ।

शिक्षाजगति जनाः किं चिन्तयन्ति ? वास्तविकं याथार्थ्यं जगति किमस्ति ? द्वयोर्मध्ये साक्षात् भेदः दृश्यते । अतः अभिप्रायेषु तत्त्वेषु च भिन्नता (opinions and facts both are different) वर्तते । एतस्याः

*सहायकाचार्यः, शिक्षाशास्त्रविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः शृङ्गेरी

भिन्नतायाः विषये एवं शोधकार्याणि करणीयानि ।

**शोधस्य तात्पर्यम्** (Meaning of Research)

'शोधः' (शुध्+घञ् , आप्टे, पृ. 933) पर्यायरूपेण बहूनि पदानि सङ्केतयति । यथोक्तम् ; संशोधनं, समाधानं, शुद्धिः पर्यवेक्षणं, संस्कारः अन्वेषणं शोधकरणञ्च वर्तन्ते । मोनियर् विलियमशब्दकोशे (पृ. 681) शोधस्य तात्पर्यं निम्नलिखितरूपेण वर्तते ।

* जिज्ञासा
* गवेषणम्
* गवेषणा
* संवीक्षणम्
* मीमांसा
* विचारणा
* अनुसन्धानम्
* निरूपणम्
* विचारणा
* तत्त्वानुसन्धानम्
* विचयः
* विचयनम्

आङ्ग्लभाषायां शोधस्य कृते 'रिसर्च' (Research) इति पदं वर्तते । विच्छेदं कुर्मश्चेत् 'Re+Search' इति रूपं भवति । पदस्य अस्य तात्पर्यं विद्यते 'पुनः शोधः' (Re= Again, Search Again) शोधकार्यं वा । सम्प्रति क्रमशः शोधस्य तत्त्वं सोपानं प्रति वा सरामः ।

**किम् अन्वेषणीयम् ?**

शोधकार्येषु अन्वेषणबुद्धिः परमावश्यकी वर्तते । अनया अन्वेषणबुद्ध्या शोधकर्म सफलं भवति । एतत् अन्वेषणं निश्चितं लक्ष्यं प्रति स्यात् । आदिनं कठोरं परिश्रमं कृत्वा अपि बहवः शोधकर्तारः निश्चितं लक्ष्यं प्रति नैव सरन्ति । ते वृथा श्रमं सम्पाद्य किमपि विलिख्य शोधकर्म सम्पादयन्ति । एतत् नोपयुक्तम् । शिक्षाक्षेत्रे अद्यत्वे शोधकर्मणि यत् शैथिल्यं वर्धते तस्य कारणम् एतदेव वर्तते । अतः लक्ष्यं विहाय कार्यं कृत्वा अपि ते शोधकर्तारः वदन्ति 'श्रान्ता वयं श्रान्ता वयमिति ' । तदानीं प्रायशः एतादृशशोधकार्यं समाजाय नोपयुक्तं भवति । अन्ततश्च शोधार्थिनः परिमाणं विज्ञाय निरुत्साहतां निराशतां श्रान्ततां च प्राप्नुवन्ति । शिक्षाजगति शोधकार्याणां सम्पादने शोधार्थिनः सर्वदा अन्वेषणरताः भवेयुः । यथा वयं विचारयामः यत् कश्चन रुग्णः वर्तते । सः तस्मिन् स्थाने नगरे च नूतनः विद्यते । तदानीं सः वैद्यम् अन्वेष्टुं यत्नशीलो भवति । तदा सः अन्तर्जाले गूगलमध्ये वा अन्विष्यति ।

कदाचित् कमपि पृष्ट्वा सः इतस्ततः अपि अन्वेष्टुं पश्यति । कथनस्य तात्पर्यमिदमस्ति यत् अन्वेषणं तदा एव भवति यदा वस्तुनः आवश्यकता प्रतीयते, वस्तुनः प्राप्तौ च काठिन्यम् अनुभूयते । फलतः यदि वयं समस्याम् अनुभवामः तर्हि वयम् अन्वेषणं कुर्मः ।

**समस्यायाः किं तात्पर्यम् ?**

शोधविद्वांसः वदन्ति यत् समाधानस्य मुख्याधारः समस्या एव वर्तते । समस्यां विना शोधकर्म कर्तुं न शक्यते । यदि समस्याः सन्ति तर्हि समाधानानि अपि भवन्ति । समाधानस्य कृते वारं वारं प्रयत्नाः करणीयाः । अस्मिन् विषये प्रो० दयानन्दसनसनवालवर्येण (सनसनवाल, 2023) बहूनि उदाहरणानि प्रोक्तानि । अत्र कानिचन उदाहरणानि चिन्तयामः ।

* बहुकालपर्यन्तं वयम् एकस्यां स्थितौ उपवेशने कष्टम् अनुभवामः ।
* यदि अस्माकं कारयानस्य कुञ्चिका कुत्रापि मार्गे विलुप्ता च्युता वा सा नैव प्राप्ता । तदा वारं वारं कुञ्चिकायाः अन्वेषणं करणीयम् ।
* बहुकष्टेन रामः सीतायाः अन्वेषणं करोति ।
* छात्रः परीक्षायाम् अनुत्तीर्णः सन् उत्तीर्णतायै पुनः यत्नान् आचरति ।

उक्तेषु उदाहरणेषु इदम् अनुभूयते यत् समस्या कष्टं जनयति । तत् कष्टमेव समाधानं प्रति नयति । तदर्थं आवश्यकान् यत्नान् कर्तुमपि तदेव प्रेरयति ।

**समाधानं नाम किम् ?** शोधकर्मणः लक्ष्यं साधयितुं प्राप्तुं वा समाधानं महत्त्वपूर्णं भवति । एतत् समाधानमेव गतिविधीन् (Activities) दिशति । सनसनवालवर्याः कथयन्ति यत् अत्र वयम् अधोलिखितेषु उदाहरणेषु पश्यामः यत् गतिविधियः के भवन्ति ? क्रमशः उदाहरणानि द्रष्टव्यानि वर्तन्ते; * आतुरः (रोगार्त्तः) वैद्यालयं प्रति गच्छति । * वैद्यालये वैद्यः परीक्षणं करोति । * वैद्यः परीक्षणानन्तरम् औषधं लिखति । * सः आतुरः औषधं स्वीकर्तुम् आपणं गच्छति । * सः आतुरः आपणात् औषधम् आनयति । * वैद्यः औषधं पश्यति । * वैद्यः औषधं स्वीकर्तुं कञ्चन क्रमं सूचयति । * आतुरः प्रदत्तनिर्देशानुसारम् औषधं स्वीकरोति । उपर्युक्तरीत्या गतिविधयः शोधकर्मणः कृते सर्वदा आवश्यकाः सन्ति । गतिविधीनां स्वरूपं किम् ? गतिविधयः शोधकर्मसु सदा महत्त्वपूर्णाः वर्तन्ते । एते गतिविधयः तेषां स्वरूपे व्यवस्थिताः (systematic) वैज्ञानिकाश्च (Scientific) भवन्ति । अत्र व्यवस्थितं नाम कश्चन विशिष्टः अनुक्रमः वर्तते । अयं विशिष्टः अनुक्रमः एव । प्रक्रिया (Process) उच्यते । मोनियरविलियमशब्दकोशे (मोनियर् विलियम् 1976,पृ. 627) 'प्रोसेस' इत्यस्य पर्यायपदानि निम्नलिखितानि सन्ति; * काचित् रीतिः * काचित् धारा * कश्चन मार्गः * काचित् परिपाटिः * काचित् पद्धतिः * कश्चन प्रक्रमः * काचित् क्रमिकगतिः * कश्चन व्यवहारमार्गः प्रक्रिया कार्याणां गतिशीलतासम्पादने उपयोगिनी मन्यते । प्रक्रियां

विना कार्यसिद्धिः व्यवस्थितरूपेण नैव भवति । अतः प्रक्रियानुसारं कार्यं शोधकार्यं वा अवश्यमेव करणीयम् । प्रक्रियया प्रत्येकं शोधकार्यं गुणवत्तापूर्णं क्रियते । प्रक्रियापूर्वकं कार्यसाधनस्य बहूनि उदाहरणानि वर्तन्ते । कानिचन उदाहरणानि अत्र प्रस्तूयन्ते ; * पत्रलेखनस्य प्रक्रिया * एम. ए. परीक्षायाः आवदेनपत्रस्य प्रक्रिया * कारचालनस्य प्रक्रिया * चायनिर्माणस्य प्रक्रिया * सन्दर्भग्रन्थलेखनस्य प्रक्रिया * शिक्षकाणां चयनस्य प्रक्रिया * मानवजीवनस्य अवस्थानां प्रक्रिया अधुना गतिविधेः विषये वक्तुं शक्यते यत् "यत्र सफलतायाः सम्भावना अधिका भवति ते एव व्यवस्थिताः गतिविधयः कथ्यन्ते" ।

**आविष्कार** : (Invention)

अयं वस्तुतः व्यवस्थितः भवति । कार्यस्य सम्पादने सर्वदा व्यवस्थितं रूपं दर्शनीयम् । एतत् रूपं तु गतिविधिमाध्यमेन एव स्पष्टं विद्यते । प्रक्रियानुसारं कर्तुमेव गतिविधयः सूचयन्ति । एतादृशं नूतनकार्यं सर्वेषामुपकाराय भवति । शोधकर्तारः अस्मिन् विषये प्रतिक्षणं चिन्तयेयुः ।

**गवेषणा** (Discovery)

गवेषणकार्यं तु केवलं गवेषणाविषये एव चिन्तयति । एतत् व्यवस्थितं नैव भवति । कारणमिदं वर्तते यदत्र गतिविधयः नैव स्वीक्रियन्ते । अन्ततः कार्यमपि सफलतां न एति । तत्फलेन गवेषणायाः कश्चन आधारः रचनीयः । आधारभूता गवेषणा एवं उपयुक्ता प्रतीयते । शोधार्थिनः अस्मिन् विषये अवश्यमेव चिन्तयेयुः ।

**शोधस्य परिभाषा** (Defenition of Research)

शोधकार्यं काचित् रीतिः वर्तते यत्र समस्यायाः समाधानाय गतिविधयः सञ्चालिताः भवन्ति । कदाचित् समस्या काचित् एकैव भवति,परन्तु समाधानानि बहूनि दृश्यन्ते । समस्यायाः समाधानानि अन्वेष्टुम् सर्वदा यत्नशीलता अपेक्ष्यते ।

**जार्ज जी. मोनलीवर्यः** वदति यत् "वैज्ञानिकरीत्या व्यवस्थितरूपेण च कृतं कार्यमेव शोधकार्यं भवति यत्र विविधविधीनां प्रयोगः, शैक्षिकसमस्यायाः समाधानस्य अन्वेषणं प्रक्रियायाः पालनं च उपयुक्तप्रारूपेण सह क्रियन्ते । "

**पी. एम कुक्महोदयः** भणति यत् "शोधकार्यं सत्यनिष्ठापूर्वकं कृतं कार्यं वर्तते यत्र तत्त्वान्वेषणं समस्यायाः समाधानार्थम् अनुप्रयोगाश्च भवन्ति । "

उक्ताः परिभाषासम्बद्धाः विचाराः बहूनां विदुषां परस्परं भिन्नाः भवन्ति । परन्तु शिक्षायाः क्षेत्रे सम्प्रति उत्तमानाम् अनुसन्धानानामावश्यकता सर्वत्र वर्तते । परिवर्तनशीलसंसारे शिक्षाजगति मानव-समुदायसम्बद्धानि उपयुक्तानि च शोधकार्याणि प्रामुख्येन करणीयानि । नूतनाः शोधकर्तारः अपि सुतरां प्रेरणीयाः । सर्वकारीयाः नीतयः(रा. शि. नीतिः 2020) निर्देशाश्च सर्वदा पालनीयाः ।

**सन्दर्भाः (References) –**


1. के. सिमरन (2024) : फ्यूचर फोरवार्ड : यूनिवर्सिटीज़ ऑफ़ 2047. 62 (17),पृ. 12-13
2. खान, एम. एस. (1990) : एजुकेशनल रिसर्च. नई दिल्ली : आशीष पब्लिशिंग हाउस, पृ. 1-7
3. महावर, पी. (2024)ः फोस्टरिंग ए प्रीविंग रिसर्च एण्ड इनोवेशन इको सिस्टम इन इण्डिया. यूनिवर्सिटी न्यूज़, 62 (16), पृ. 99
4. विलियम्, एम. एम. (1976) : ए डिक्शनरी इंग्लिश एण्ड संस्कृत. दिल्लीः मोतीलाल बनारसी दास, पृ. 627
5. शर्मा, एस., चौरसिया, पी. (2023) : आर्टिफिशियल इंटेलीजेंस इन एजूकेशन : रिट्रोस्पेक्ट एण्ड प्रोस्पेक्ट. यूनिवर्सिटी न्यूज़, 61 (43), पृ. 24-27
6. सरीन, एस., सरीन, ए. (1998) : शैक्षिक अनुसन्धान विधियाँ, आगरा : विनोद पुस्तक मंदिर.
7. सनसनवाल, डी. एन. (2023) : रिसर्च मेथडालॉजी एण्ड अप्लाइड स्टेटिक्स, दिल्ली : शिप्रा प्रकाशन, पृ.1-8
8. साहू, एन. के., दिलीप के स्वाई (2013) : रिसर्च मेथडालॉजी, नई दिल्ली : एस.एस.डी.एन. पब्लिशर्स एण्ड डिस्ट्रीब्यूटर्स.



ISSN : 2249-538X

#183

# पुराणदृष्ट्या नियमयोगाङ्गविमर्शः

डा. अरविन्दकुमारपाण्डेयः*

**शोधसारः-**

पुराणानि दर्शनानि च भारतीयज्ञानपरम्परायाः प्रमुखानि स्रोतांसि वर्तन्ते । वेदानां प्राचीनं ज्ञानमाख्यानरूपेण इतिहासरूपेण च पुराणेषु तर्कप्रधानरूपेण च दर्शनेषु प्रतिपादितमस्ति । इत्थञ्च पुराणानि दर्शनानि च समानमेव विषयं भिन्नशैल्यां विवृण्वन्ति । इदमेव कारणं यद् योगाङ्गानां चर्चा पुराणेषु बहुत्र विस्तरेण क्वचिच्च सङ्क्षेपेण दृश्यते । योगाङ्गेषु नियमः पञ्चविधोऽस्ति शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानभेदेन । एतेषु शौचं कायिकमानसिकशुद्धिं, सन्तोषः सीमितसाधनेषु एव सन्तोषभावं, तपः शीतोष्णादिद्विन्द्वसहिष्णुतां, स्वाध्यायः तत्प्रतिपादकग्रन्थाध्ययनम्, ईश्वरप्रणिधानञ्च परमात्मनि सर्वकर्मणां समर्पणं परिलक्षयति । एतेषां बृहद् विवेचनं कूर्मगरुडपुराणादिषु दृश्यते । पुराणदृष्ट्या नियमयोगविषये कश्चन विमर्शोऽत्र कृतो वर्तते ।

**प्रमुखशब्दाः** – पुराणानि, कूर्मपुराणं, गुरुडपुराणं, दर्शनम्, आस्तिकदर्शनं, नास्तिकदर्शनं, नियमः, शौचं, सन्तोषः, तपः, स्वाध्यायः, ईश्वरप्रणिधानम् ।

**भूमिका -**

अयं संसारो दुःखात्मको वर्तते इति सर्वेषां भारतीयदर्शनानाम् आस्तिकानां नास्तिकानाञ्च मुख्यः सिद्धान्तो विद्यते । बौद्धदर्शनस्य चतुर्षु आर्यसत्येषु प्रथमं सत्यम् एव दुःखमस्ति । दुःखस्य सत्तास्वीकारादेव वेदानां वेदाङ्गानां पुराणानाञ्च प्रवृत्तिर्भवति । संस्कृतवाङ्मयस्य मुख्या आधारा वेदा एव सन्ति । वेदानामेव तत्त्वान्याधृत्य धाराद्वयं प्रचालितं महर्षिभिः । सामान्यजनानां कृते आख्यानानि ऐतिहासिकीं कथाञ्चाश्रित्य अष्टादश पुराणानि रचयामास महर्षिः व्यासः । शास्त्रार्थावगन्तॄणां विप्रतिपन्नबुद्धीनाञ्च कृते तर्कप्रधानानि दर्शनानि विरचितानि महर्षिभिः । इत्थञ्च वेदस्य एव तत्त्वानि भिन्नया भिन्नया शैल्या पुराणेषु दर्शनेषु च प्रतिपादितानि सन्ति । दर्शनानि न्यायवैशेषिकसाङ्ख्ययोगमीमांसावेदान्ताः आस्तिकानि जैनबौद्धचार्वाकदर्शनानि नास्तिकानि निगद्यन्ते । आस्तिकानि वेदस्य प्रमाणत्वमामनन्ति । आस्तिकेषु योगदर्शनं साङ्ख्यस्य प्रतितन्त्रं निगद्यतेऽस्मिन् साङ्ख्याद् ईश्वराभिधानमेकमधिकं तत्त्वमभिमतं वर्तते येन दर्शनेऽस्मिन् षड्विंशतितत्त्वानि सन्ति । योगदर्शनस्य प्रवर्तकः यद्यपि हिरण्यगर्भ इत्येव मन्यन्ते, तथापि अस्य मूलग्रन्थः पतञ्जलिविरचितः सूत्रात्मक एव ग्रन्थोऽस्ति । अस्मिन् ग्रन्थे चत्वारः पादाः सन्ति समाधिपादः साधनपादः विभूतिपादः कैवल्यपादश्च । एषु चतुर्षु पादेषु साधनपादे योगाङ्गानां प्रतिपादनं सूत्रकारेणाकारि । यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टौ योगाङ्गानि भवन्ति । तत्र प्रथमं यमयोगाङ्गम् अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहरूपात्मकं वर्तते । द्वितीयं योगाङ्गं नियमयोगाङ्गमस्ति । नियमस्यापि पञ्चप्रकाराणि शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि सन्ति । अस्मिन् शोधपत्रे नियमानां पुराणदृशा विमर्शो विधास्यते ।

---

*प्रवक्ता (संस्कृतम्), राजा हरपालसिंह इण्टरकॉलेज, सिंगरामऊ जौनपुर उ.प्र.

पुराणानि दुरूहतत्त्वानां सहजतया प्रतिपादकानि सन्ति । इमानि प्राचीनज्ञानस्य ऐतिहासिकतत्त्वानाञ्च प्रमुखस्रोतांसि वर्तते । प्राचीनज्ञानेन सह आधुनिकज्ञानस्यापि बोधकत्वात् पुरा नवं भवतीति पुराणमिति व्युत्पत्तिः सङ्गच्छते । पुराणानां सङ्ख्या अष्टादश स्वीक्रियते प्रायः । उच्यते यद् भगवता विष्णुना भिन्नभिन्नकालेषु व्यासरूपेण नैकवारमवतीर्य पुराणानि व्यरचिषत[1] । इमानि अष्टादशपुराणानि सात्त्विकराजसतामसभेदेन त्रिधा विभज्यन्ते । सात्त्विकानि विष्णुभक्तिसम्बद्धानि राजसानि ब्रह्मविषयकानि तामसानि अग्निविषयकानि भवन्तीति पुराणेषूपलभ्यते । पुराणेषु सृष्टेरुत्पद्यादयो विषयाः वर्णितास्सन्ति तथा च मोक्षस्य मार्गा अपि दर्शिता विद्यन्ते । तत्रैव योगदर्शनस्य बह्वी चर्चा दरीदृश्यते । योगाङ्गानां चर्चासन्दर्भे नियमस्यापि बहुत्र वर्णनमवलोक्यते । अतो नैकपुराणेषु नियमयोगाङ्गस्य कीदृशं महत्त्वमस्तीति ध्येयांशमवलम्ब्य शोधपत्रमिदमुपस्थाप्यते ।

**शोधोद्देश्यानि -**

- भारतीयदर्शनानां सामान्यज्ञानेन सह योगदर्शनस्य विशिष्टज्ञानप्रतिपादनम् ।
- पुराणानां सामान्यज्ञानेन सह पुराणविवेचितविषयाणां प्रतिपादनम् ।
- पुराणानां दर्शनानाञ्च सम्बन्धस्य प्रतिपादनम् ।
- पुराणेषु वर्णितानां नियमयोगसम्बन्धिविषयाणां विशिष्टमध्ययनम् ।
- योगदर्शनस्य प्राचीनकाले आधुनिककाले च उभयत्रैव प्रासङ्गिकतानिरूपणम् ।

**शोधविधयः -**

कस्मैचिदपि शोधकार्याय नैका विधयः प्रयुज्यन्ते । अस्मिन् शोधपत्रे पुराणेषु यमनिरूपणाय विवरणात्मकविधेः प्रयोगऽस्ति । यमानां विभिन्नग्रन्थानामालोके सति तुलनायै तुलनात्मकविधेस्तथा च विश्लेषणाय विषयविश्लेषणविधेः प्रयोगो विद्यते इति अवगम्यते ।

**प्रदत्तसङ्कलनं तथ्यविश्लेषणञ्च -**

पातञ्जलयोगसूत्रे साधनपादे नियमाः प्रत्यपादिषत महर्षिभिः । नियम्यन्ते क्रियन्ते नितरां यम्यन्ते इति नियमाः इति व्युत्पत्तिः नियमस्य । अनया व्युत्पत्त्यावगम्यते यद् यासां क्रियाणामाचरणमनिवार्यमस्ति ता एव नियमत्वेन कथ्यन्ते । एतासां सङ्ख्या शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानीति पञ्चोपदिष्टा अस्ति योगसूत्रेषु ।[2] गरुडपुराणे अपि पञ्च नियमानां सत्यादीनां वर्णनं मिलति तत्रैतेषाम् आभ्यन्तरं बाह्यञ्चेति भेदद्वयं विहितं वर्तते -

**नियमाः पञ्च सत्याद्या बाह्यमाभ्यन्तरं द्विधा ।**

[1]व्यासरूपं विभुं कृत्वा संहरेत् स युगे युगे । तदाष्टादशधा कृत्वा भूर्लोके । स्मिन् प्रकाशते ॥

[2]पा.यो.32

 ISSN : 2249-538X

#185

**शौचं सत्यञ्च सन्तोषस्तपश्चेन्द्रियनिग्रहः ॥**[१]

इत्थमेव विष्णुपुराणानुसारेण चित्तेन शौचसन्तोषतपःस्वाध्यायानामाचरणमेव नियम उच्यते । एतेषां सकामभावनया आचरणेन पृथक्पृथक्फलानि लभ्यन्ते परञ्च निष्कामभावनया मोक्षस्य प्राप्तिर्जायते[२] । इत्थमेव वर्णनं कूर्मपुराणेऽपि दृश्यते । यथा- तपः स्वाध्यायसन्तोषौ शौचमीश्वरपूजनम् । समान्नियमाः प्रोक्ता योगसिद्धिप्रदायिनः[३] ॥ एतेषां क्रमेण विवरणं योगभाष्यानुसारं पुराणानुसारञ्च प्रस्तूयते-

**शौचः -**

नियमेषु प्रथमः क्रमः शौचस्य विद्यते । शुचेः पवित्रतायाः भावं शौचम् । पवित्रतेयं द्विधा आन्तरिकी बाह्या च । उभयविधस्य शौचस्य प्रतिपादनं कुर्वन् भाष्यकार आह तत्र शौचं मृज्जलादिजनितं मेध्याभ्यवहरणादि च बाह्यम्, आभ्यन्तरं चित्तमलानामाक्षालनम् ।[४] ईश्वरगीतायामपि अस्य द्वैविध्यं निगदितमस्ति -

**बाह्याभ्यन्तरं शौचं द्विधा प्रोक्तं द्विजोत्तमाः ।**
**मृज्जलाभ्यां भवेद् बाह्यं मनःशुद्धिरथान्तरम् ॥**[५]

अयमेव श्लोकः कूर्मपुराणे अपि समानरूपेणैव अवलोक्यते[६] । तत्रादौ बाह्यशौचस्य फलमुक्तं - शौचाद् स्वाङ्गजुगुप्सा परैरसंसर्गः[७] इति । शरीरस्य जलादिभिः शुद्धिक्रियया मलस्य शोधनेन स्वशरीरं प्रति घृणाभाव उदेति तथा च परशरीरं प्रति विरक्तिः सञ्जायते । आभ्यन्तरशौचस्य फलं प्रत्यपादि सत्त्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च[८] । आभ्यन्तरशौचन सत्त्वशुद्धिः बुद्धिशुद्धिर्भवति । शोभनं मनः सुमनः तस्य भावं सौमनस्यम् । मनसो नैर्मल्यं जायते । एकाग्रता, इन्द्रियेषु विजयः आत्मसाक्षात्कारे च सामर्थ्यं जायते ।

**सन्तोषः -**

शौचानन्तरं द्वितीयो नियमः सन्तोषो वर्तते । सन्तोषं परिभाषयन् भाष्यकार आह- सन्तोषः सन्निहितसाधनादधिकस्यानुपादित्सा[९] । जीवनयापनाय निकटस्थसाधनानि अतिरिच्य अन्येषां साधनानां

[१]गरुडपुराणं प्रथमखण्डः श्लो.31,32
[२]विष्णुपुराणं सम्पादकः श्रीरामजी शर्मा, पृ.53
[३]कूर्मपुराणं श्लो. सं 20
[४]व्या.भा.पा.यो.32
[५]ईश्वरगीता
[६]कूर्मपुराणं श्लो.28, पृ.100
[७]पा.यो.40
[८]पा.यो.41
[९]व्या.भा.पा.यो.32

सङ्ग्रहणस्य अनिच्छैव सन्तोष उच्यते । ईश्वरगीतायामुल्लिखितमस्ति -

**यदृच्छालाभतो नित्यमलं पुंसो भवेदिति ।**

**तां निष्ठाम् ऋषयः प्राहुः सन्तोषं सुखलक्षणम्[१] ॥**

इत्थमेव वर्णनं सन्तोषस्य कूर्मपुराणेऽपि दृश्यते । सन्तोषस्य फलमाह भाष्यकारः - सन्तोषादनुत्तमसुखलाभः[२] इति । सन्तोषाद् सर्वोत्तमसुखस्य प्राप्तिर्भवतीत्यर्थः ।

**तपः -**

नियमेषु तृतीयो नियमः तपोऽस्ति । तपसो लक्षणमाह तपो द्वन्द्वसहनम्[३] । स्वकीयं वचनं स्पष्टीकुर्वता भाष्यकारेणावोचि द्वन्द्वश्च जिघत्सापिपासे, शीतोष्णे, स्थानासने, काष्ठमौनाकारमौने च[४] इति । अत्र मौनं द्विविधमुक्तमस्ति काष्ठमौनम् आकारमौनञ्च । काष्टमौने सङ्केतेष्वपि वार्तालापो वर्ज्यते परञ्च आकारमौने तत्प्रतिषेधो नास्तीति भेदः । कूर्मपुराणे तु उपवासचान्द्रायणादिभिः शरीरस्य शोषणमेव तप उक्तमस्ति ।

**उपवासपराकादिकृच्छ्रचान्द्रायणादिभिः ।**

**शरीरशोषणम्प्राहुस्तापसस्तप उत्तमम्[५] ॥**

तपसः किं फलमिति जिज्ञासायां पतञ्जलिराह- कायेन्द्रियसिद्धिरशुद्धिक्षयात् तपसः[६] इति । तपस आचरणेन मनसः शुद्धिः कायसिद्धिः इन्द्रियसिद्धिश्च भवति । अष्टविधसिद्धिषु अणिमादिषु अणिमामहिमालघिमाप्राप्तयः कायसिद्धय उच्यन्ते । इन्द्रियाणां दूरश्रवणं दूरदर्शनमित्यादयः सिद्धय इन्द्रियसिद्धयः सन्ति ।

**स्वाध्यायः -**

नियमेषु चतुर्थे क्रमे स्वाध्यायः समागच्छति । स्वाध्यायस्य लक्षणं व्यासभाष्ये विद्यते – स्वाध्यायो मोक्षशास्त्राणामध्ययनं प्रणवजपो वा[७] इति । मोक्षप्रतिपादकानां ग्रन्थानामध्ययनमोङ्कारस्य जपश्च स्वाध्याय उच्यते । वेदान्तशतरुद्रीयप्रणवादीनां जप एव स्वाध्याय इति कूर्मपुराणम् । स्वाध्यायोऽयं त्रिविधो वाचिक उपांशुः मानसश्च । एतेषु उत्तरोत्तरं वैशिष्ट्यं भजते । यः परश्रवणगोचरः सः वाचिकः स्वाध्यायः । उक्तञ्च कूर्मपुराणे -

**यः शब्दबोधजननः परेषां श्रृण्वतां स्फुटम् ।स्वाध्यायो वाचिकः प्रोक्त उपांशोरथ लक्षणम्[८] ॥**

---

[१]ईश्वरगीता

[२]पा.यो.42

[३]व्या.भा.32

[४]द्वन्द्वश्च जिघत्सापिपासे शीतोष्णे स्थानासने काष्ठमौनाकारमौने च । व्या.भा.पा.यो.32

[५]कूर्मपुराणं पं श्रीराम शर्मा-सम्पादकः,श्लो.21

[६]पा.यो.41

[७]व्या.भा.पा.यो.32

[८]कूर्मपुराणं सम्पादकः श्रीरामशर्मा, पृ.100


ISSN : 2249-538X

ओष्ठयोः स्पन्दनमात्रः परश्रवणागोचर उपांशुः स्वाध्यायो भवति । पदानामक्षरैः परिस्पन्दनरहितः शब्दचिन्तनप्रधानश्च मानसः स्वाध्यायो भवतीत्थञ्च स्वाध्यायस्य त्रैविध्यं कूर्मपुराणे विवेचितं विद्यते । अस्य फलमस्ति अभीष्टदेवतया सह सम्पर्कस्थापनम् । उक्तञ्च पतञ्जलिना स्वाध्यायादिष्टदेवतासम्प्रयोगः[१] इति । भाष्यकारस्तु एवमपि आह यद् स्वाध्यायाद् साधकः देवर्षिसिद्धानां दर्शनसामर्थ्यं प्राप्नोति । एते साधकस्य कार्याण्यपि साधयन्ति[२] ।

**ईश्वरप्रणिधानम् -**

पञ्चसु यमेष्वन्तिमम् ईश्वरप्रणिधानं वर्तते । एनं नियमं परिभाषयता भाष्यकारेणाभाणि यद् ईश्वरप्रणिधानं नाम तस्मिन् परमगुरौ सर्वकर्मार्पणम्[३] इति । परमगुरौ परमात्मनि स्वकीयानां सर्वकर्मणां समर्पणमेव ईश्वरप्रणिधानमित्यभिप्रायः । वाङ्मनःशरीरैः स्तवनस्मरणपूजाद्वारा परमात्मनि शिवे भक्तिभावनैव ईश्वरप्रणिधानमिति कूर्मपुराणे उल्लेखः । तत्र उक्तञ्च -

**स्तुतिस्मरणपूजाभिर्वाङ्मनःकायकर्मभिः ।सुनिश्चला शिवे भक्तिरेतदीश्वरपूजनम्[४] ॥**

अस्य फलं किमिति शङ्कायामाह- समाधिसिद्धिरीश्वरप्रणिधानाद्[५] इति । ईश्वरप्रणिधानाद् साधकस्य समाधिः सिध्यति । भाष्यकार आह यद् कर्माणि परमात्मने समर्प्य साधकः अन्येषु देशेषु शरीरेषु कालेषु च स्थितान् पदार्थान् यथार्थरूपेण ज्ञातुमर्हतीति[६] ।

**निष्कर्षः -**

- पुराणेषु योगस्य योगाङ्गानां वर्णनम् आख्यानानामैतिहासिककथानां माध्यमेन विहितं विद्यते ।
- योगाङ्गेषु नियमः कूर्मगरुडपुराणादिषु विवेचितो दृश्यते । शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानभेदेन नियमस्य पञ्चविधत्वमस्ति ।
- शौचस्य आभ्यन्तरबाह्यभेदेन द्वैविध्यं वर्तते तत्र उभयोः भिन्नभिन्नफलानि सन्ति ।
- पञ्चनियमाः समाधिसिद्धौ निश्चयेन उपकारका भवन्ति ।

**सन्दर्भग्रन्थसूची -**


- श्रीवास्तवः, डा. सुरेशचन्द्रः, पातञ्जलयोगदर्शनम्, चौखम्बा- सुरभारती- प्रकाशनम्, वाराणसी, 1988
- भट्टाचार्यः डा. रमाशंकर-, सिंहः डा. अमलधारी, पातञ्जलयोगसूत्रम्, भारतीय- विद्या- प्रकाशनं वाराणसी, 1997


[१]पा.यो.44
[२]देवा ऋषयः सिद्धाश्च स्वाध्यायशीलस्य दर्शनं गच्छन्ति कार्ये चास्य प्रवर्तन्ते ।
[३]व्या.भा.पा.यो.32
[४]कूर्मपुराणं श्लो. 29 पृ.100
[५]पा.यो.45
[६]ईश्वरार्पितसर्वभावस्य समाधिसिद्धिर्यया सर्वमीप्सितमवितथं जानाति देशान्तरे देहान्तरे कालान्तरे च ।

- पतञ्जलिः, योगदर्शनं, गीताप्रेस, गोरखपुरम्,
- आर्य- सतीशः, पातञ्जलयोगदर्शनं, वेद-विश्वायतनम्, 2010
- गोयन्दका, हरिकृष्णदासः, योग-दर्शनं, गोविन्दभवन-कार्यालयः, गीताप्रेस, गोरखपुरम्, 2007
- स्वामी, श्री विज्ञानाश्रमः, योग-दर्शनम्, आर्ष- गुरुकुल -महाविद्यालयः, 2020
- चतुर्वेदी, गिरिधरशर्मा. पुराणपरिशीलनम्,1970, बिहार- राष्ट्रभाषा- परिषद् पटना ।
- महर्षिव्यासः, श्रीमद्भागवतमहापुराणम्, गीताप्रेस-गोरखपुरम् ।
- भट्टाचार्यः रामशङ्करः (सम्पादकः), पातञ्जलयोगदर्शनम्, व्यासभाष्यतत्त्ववैशारदीसहितम्, भारतीयविद्या-प्रकाशनं वाराणसी ।


**कोशग्रन्थाः -**


- आप्टे -वामन- शिवरामः, संस्कृत-हिंदी -कोशः, मोतीलाल- बनारसीदास- प्रकाशनं, देहली, 1969
- आचार्यः यास्कः, निरुक्त-पंचाध्यायी, शास्त्री म.म. श्री पं. छज्जूराम- विद्यासागरः (व्याख्याकार) मेहरचंद-लछमनदासः, दरियागंज, नवदेहली, 2015
- सिंहः श्री -अमरः, अमरकोशः, शास्त्रि-वासुदेवः (सं.), चौखम्बा -संस्कृत -सीरीज -आफिस, वाराणसी, 2003


**इंटरनेट स्रोत -**


- विकिस्रोतःविषय/संस्कृत - विकिस्रोत (wikisource.org)
- https://sanskritdictionary.com/?iencoding=iast&q=%E0%A4%97%E0%A5%8D%E0%A4%B0%E0%A4%B9%E0%A4%A3+&lang=sans&action=%E0%A4%96%E0%A5%8B%E0%A4%9C
- http://iloveindia.com/literature/sanskrit/index.html
- http://questia.com/search/sanskrit-literature



ISSN : 2249-538X

# 189

# अद्वैतसिद्धौ तृतीयमिथ्यात्वविमर्शः

श्री मञ्जेशः एम्*

**भूमिका**

श्रीमधुसूदनसरस्वतिस्वामिभिः विरचित- अद्वैतसिद्धिः नामकग्रन्थः अद्वैतवेदान्ते प्रसिद्धपञ्चसिद्धिग्रन्थेषु शिखरप्रायः विराजते । अद्वैतेन सिद्धिः प्राप्तव्या चेत् द्वैतं मिथ्या इति साधयितव्यम् । द्वैतमेव सत्यं यदि तर्हि अद्वैतं मिथ्यात्वे पर्यवस्यति । तदर्थं द्वैतस्य सत्यत्वपरीक्षा आवश्यिकी । तस्य मिथ्यात्वं प्रदर्शनीयं भवति । तदुपायः तु स्वपक्षसाधनं तथा परपक्षनिराकरणम् । तत्प्रतिपादने वादजल्पवितण्डेषु अन्यतमस्य आश्रयणम् अनिवार्यम् । अत एव ग्रन्थकारः प्रथमपरिच्छेदे आदितः श्रीव्यासतीर्थैः जगन्मिथ्यात्वविषये ये आक्षेपाः उत्थापिताः तेषां समाधानं कथितम् । श्रीव्यासतीर्थाः तेषां न्यायामृतग्रन्थे मिथ्यात्वं नाम किम् इति पृच्छन् अद्वैतिनः मिथ्यात्वे यानि लक्षणानि वदन्ति तानि आक्षिपन्ति । पञ्च लक्षणानि विचार्य तेषाम् असङ्गतां निरूपयन्ति । इह शोधपत्रे तावत् यत् तृतीयमिथ्यात्वं वर्तते तस्य न्यायामृतग्रन्थानुसारेण ।

**मुख्यप्रतिपाद्यविषयः**

द्वैतमिथ्यात्वपूर्वकत्वात् अद्वैतसिद्धेः आदौ ब्रह्मव्यतिरिक्तस्य सकलस्यापि प्रपञ्चजातस्य मिथ्यात्वं वक्तव्यम् इत्यतः पूर्वाचार्यैः अनुमानं प्रदर्शितं विमतं मिथ्या दृश्यत्वात् जडत्वात् परिच्छिन्नत्वात् शुक्तिरूप्यवत् इति । अत्रानुमाने यत् साध्यभूतं मिथ्यात्वं तस्य किं स्वरूपम् इति पूर्वाचार्यैः श्रुतिसम्मतानि मिथ्यात्वलक्षणानि प्रणीतानि । तेषु सदसत्वानधिकरणत्वम्[१] इति प्रथममिथ्यात्वलक्षणम् । प्रतिपन्नोपाधौत्रैकालिकनिषेधप्रतियोगित्वम्[२] इति नेह नानास्ति किञ्चन[३] इति श्रुतिस्वारस्येन विवरणाचार्यप्रणीतं द्वितीयमिथ्यात्वलक्षणम् । तृतीयमिथ्यात्वलक्षणम् अपि विवरणाचार्यैः प्रणीतम्, तच्च ज्ञाननिवर्त्यत्वं मिथ्यात्वम् इति ।

इदं लक्षणं विद्वान्नामरूपाद्विमुक्तः, तरति शोकमात्मवित्[४] इति श्रुतिस्वारस्येन प्रीणीतम् । विद्वान्नामरूपाद्विमुक्तः[५] इत्यत्र विद्वान् इति पदेन ज्ञानवान् इत्यर्थः विवक्षितः, सः नामरूपात्मकात् प्रपञ्चात् विमुच्यते । अत्र उद्देश्यतावच्छेदकव्यापकत्वं नियमेन विधेये भासते इति नियमानुरोधन, विद्वान्नामरूपाद्विमुक्तः इति श्रुतेः, ज्ञानम् उद्दिश्य नामरूपप्रपञ्चात् विमुक्तिः विधीयते इत्यर्थः फलति । यदि प्रपञ्चः अज्ञानकल्पितः न स्यात् तदा ज्ञानेन न बाध्येत अतः ज्ञानबाध्यत्व-अन्यथानुपपत्या प्रपञ्चस्य अज्ञानाधिष्ठितत्वं श्रुतार्थ्यापत्या कल्प्यते । समानेनैव नियमेन तरति शोकमात्मवित् इति श्रुतेः अर्थः अपि दृष्टव्यः । तथा च ज्ञाननिवर्त्यत्वं मिथ्यात्वमिथ्यात्वमित्यपि लक्षणं श्रुतिसम्मतमवास्ति । ज्ञाननिवर्त्यत्वम् इत्यत्र निवृत्तिः इत्यस्य नाशः इत्यर्थः ।

---

*शोधच्छात्रः, कर्णाटकसंस्कृतविश्वविद्यालयः बेंगळूरू

[१]अद्वैतसिद्धि १

[२]अद्वैतसिद्धि

[३]बृहदारण्यकोपनिषद् १९

[४]छान्दोग्योपनिषद् ७/१/३

[५]मुण्डकोपनिषद् ८

तथा च ज्ञाननिष्ठजनकतानिरूपितजन्यतावन्नाशप्रतियोगित्वं ज्ञाननिवर्त्यत्वम् । नाशकं ज्ञानं नाश्यं मिथ्यावस्तु । एतदुपरि आशंक्यते- ननु यदि ज्ञाननिवर्त्यत्वमिति मिथ्यात्वलक्षणं क्रियेत तदा सिद्धसाधनम् । कथमिति चेत्- योग्य-विभुविशेषगुणानां स्वोत्तरवर्तिगुणनाश्यत्वम् इति नियमानुरोधेन उत्तरज्ञाननिवर्त्ये पूर्वज्ञाने पक्षैकदेशे ज्ञाननिवर्त्यत्वं सिद्धम्, अर्थात् ज्ञाननिष्ठजनकतानिरूपितजन्यतावन्नाशप्रतियोगित्वं वर्तते एव इत्यतः सिद्धसाधनम् । तत्परिहाराय ज्ञानत्वेन ज्ञाननिवर्त्यत्वम् इति लक्षणं परिष्क्रियते । ज्ञाननिष्ठजनकतायां ज्ञानत्वम्, अवच्छेदकं निवेश्यते । तथा च लक्षणस्वरूपम् ज्ञानत्वावच्छिन्नजनकतानिरूपितजन्यतावन्नाशप्रतियोगित्वम् इति मिथ्यात्वलक्षणं पर्यवसन्नम् । तथा च पक्षैकदेशे न सिद्धसाधनम् । अर्थात् पूर्वज्ञानस्य न ज्ञानत्वेन ज्ञाननिवर्त्यत्वम् अपितु तत्र ज्ञाननिष्ठजनकता-वच्छेदकं योग्यविभुविशेषगुणत्वं न ज्ञानत्वम् अतः न सिद्धसाधनम् ।

ननु ज्ञाननिष्ठजनकतावच्छेदकस्य परिष्कारेपि यद्यपि न स्यान्नाम सिद्धसाधनं किन्तु मुद्गरपातेन निवृत्ते घटे अव्या-प्तिः । यतः घटादीनां पदार्थानां मिथ्यात्वेन इष्टेपि तन्निवृत्तिमुद्गरपातेन भवति न तु ज्ञानेन अतः अव्याप्तिः, किञ्च ज्ञानत्वावच्छिन्नजनकतानिरूपितजन्यतावन्नाशप्रतियोगित्वम् इति मिथ्यात्वलक्षणस्वीकारे साध्यवैकल्यम् इत्यपरो दोषः । साध्यवैकल्यम् इत्यस्य दृष्टान्ते साध्याभावः । प्रकृते विमतं मिथ्या दृश्यत्वात् जडत्वात् परिच्छिन्नत्वात् शुक्तिरूप्यवत् इति अनुमाने दृष्टान्तीकृतं यत् शुक्तिरूप्यम्, अर्थात् शुक्तौ प्रतीयमानं प्रातिभासिकं रजतं, तत् अधिष्ठा-नतत्वसाक्षात्कारेण निवर्तते न तु येन केनचित् ज्ञानेन । तथा च शुक्तिरूप्यनिवृत्तौ ज्ञाननिष्ठजनकतावच्छेदकस्य न ज्ञानत्वम् अपितु अधिष्ठानतत्वसाक्षात्कारत्वम् । तथा च अधिष्ठानतत्वसाक्षात्कारत्वावच्छिन्नजनकतानिरूपितजन्य-तावन्नाशप्रतियोगित्वम् न तु ज्ञानत्वावच्छिन्नजनकतानिरूपितजन्यतावन्नाशप्रतियोगित्वम् इत्यतः साध्यवैकल्यम् । तस्मात् साध्यवैकल्यवारणाय ज्ञाननिष्ठजनकतावच्छेदकं न ज्ञानत्वम् अपितु ज्ञानत्वव्याप्यधर्मः । तथा च लक्षण-स्वरूपम् ज्ञानत्वव्याप्यधर्मावच्छिन्नजनकतानिरूपितजन्यतावन्नाशप्रतियोगित्वम् इति मिथ्यात्वलक्षणं पर्यवसन्नम् । तथा च न साध्यवैकल्यम् । शुक्त्यादिभ्रमनिवृत्तिं प्रति यद्यपि अधिष्ठानतत्वसाक्षात्कारः कारणं, किन्तु सोपि अधिष्ठा-नतत्वसाक्षात्कारः ज्ञानत्वव्याप्यधर्मः एव इति कृत्वा न साध्यवैकल्यम् ।

ननु ज्ञानत्वव्याप्यधर्मावच्छिन्नजनकतानिरूपितजन्यतावन्नाशप्रतियोगित्वम् इति मिथ्यात्वलक्षणस्वीकारे नास्ति सा-ध्यवैकल्यम् । किन्तु संस्कारे अतिव्याप्तिः । यथा च अधिष्ठानतत्वसाक्षात्कारः ज्ञानत्वव्याप्यधर्मः तथैव स्मृतित्वम्, अनुभवत्वं, प्रत्यक्षत्वम् इत्यादयः नैके धर्माः ज्ञानत्वव्याप्यधर्माः एव, तथा च स्मृतित्वेन ज्ञाननिवर्त्ये संस्कारे अति-व्याप्तिः । कस्मिन् चित् पक्षे स्मृतेः संस्कारनाशकत्वनियमाङ्गीकारात् । स्मृतौ जातायां संस्कारो नश्यति इत्यर्थः । स्मृतित्वस्य च ज्ञानत्वव्याप्यधर्मत्वात् ज्ञानत्वव्याप्यधर्मावच्छिन्नजनकतानिरूपितजन्यतावन्नाशप्रतियोगित्वम् इति लक्षणस्य संस्कारे सत्वात् तस्य च व्यवहारे मिथ्यात्वाभावात् अतिव्याप्तिः । तथा च एतावता परिष्काराः प्रदर्शिताः तेषु सर्वेषु अपि कश्चित् दोषः वर्तत एव इति कृत्वा ज्ञाननिवर्त्यत्वं मिथ्यात्वम् इति इदं लक्षणं भवितुं नार्हति इति

 ISSN : 2249-538X

पूर्वपक्षः,

तदेतन्निराक्रियते- ज्ञाननिवर्त्यत्वं मिथ्यात्वम् इत्यस्य यादृशः अर्थः व्याख्यातः, ये च परिष्काराः प्रदर्शिताः न तत् वेदान्तरहस्यम् । अतः ज्ञाननिवर्त्यत्वम् इत्यस्य ज्ञानत्वव्याप्यधर्मावच्छिन्नजनकतानिरूपितजन्यतावन्नाशप्रतियोगित्वम् इत्ययं नार्थः अपितु ज्ञानप्रयुक्त-अवस्थितिसामान्यविरहप्रतियोगित्वम् ज्ञाननिवर्त्यत्वम् । ज्ञानमित्यस्य अधिष्ठानतत्वसाक्षात्कारः, अवस्थितिसामान्यमित्यस्य स्वस्वीयसंस्कार-अन्यतरत्वम्, निवृत्तिः इत्यस्य अत्यन्ताभावः । तथा च अधिष्ठानतत्वसाक्षात्कारव्यापकः यः अज्ञानादेः स्वस्वीयसंस्कार-अन्यतराभावप्रतियोगित्वं तत् मिथ्यात्वलक्षणम् । तथा च अज्ञादीनां तत्वज्ञाननिवर्त्यत्वमित्यस्य तत्वज्ञाननिष्ठजनकतानिरूपितजन्यतावन्नाशप्रतियोगित्वम् इति न अर्थः अपितु तत्वज्ञाननिष्ठव्याप्यतानिरूपितव्यापकतावत् अत्यन्ताभावप्रतियोगित्वम् अज्ञानादेः मिथ्यात्वम् । अयम् अर्थः ज्ञाननिवर्त्यत्वम् इत्यस्य ज्ञानप्रयुक्त-अवस्थितिसामान्यविरहप्रतियोगित्वम् इति परिष्कारेण लभ्यते । तत्र च अवस्थितिसामान्यविरहप्रतियोगित्वम् इत्यस्य अभिप्रायं स्पष्टीकर्तुं पुनः ग्रन्थकारः व्याख्याति- अवस्थितिः द्वेधा स्वरूपेण कारणात्मना च । तथा च यदा मुद्गरपातेन घटस्य स्वरूपेण नाशः जातश्चेदपि कारणात्मना तस्य अवस्थितिः अस्त्येव इति कृत्वा न ज्ञानप्रयुक्त-अवस्थितिसामान्यविरहप्रतियोगित्वरूपं ज्ञाननिवर्त्यत्वमित्यतः न अव्याप्तिः । ज्ञानप्रयुक्त-अवस्थितिसामान्यविरहप्रतियोगित्वरूपं ज्ञाननिवर्त्यत्वं तु ब्रह्मज्ञानेन भवति ।

यतः ज्ञानजन्यनाशप्रतियोगित्वं न मिथ्यात्वं साध्यत्वेन विवक्षितम् अत एव उत्तरज्ञाननिवर्त्ये पूर्वज्ञाने न सिद्धसाधनम् । पूर्वज्ञानस्य उत्तरज्ञानाधीना या निवृत्तिः सा न अधिष्ठानतत्वसाक्षात्कारप्रयुक्ता अपितु योग्यविभुविशेषगुणप्रयुक्ता इति पूर्वं निरूपितम् । अतः अद्यपि उत्तरज्ञानेन पूर्वज्ञानं निवर्तते तथापि सा निवृत्तिः स्वरूपेण, कारणात्मना तु अवस्थानम् अस्त्येव । अतो न अर्थान्तरस्य अवकाशः ।

ज्ञाननिवर्त्यत्वरूपमिथ्यात्वलक्षणस्य ज्ञानप्रयुक्त इति पदं यदि न स्यात् तदा शशविषाणादौ असत्पदार्थे अतिव्याप्तिः, असत्पदार्थानामपि अवस्थितिसामान्यविरहप्रतियोगित्वरूपत्वात् । अतस्तद्वारणाय ज्ञानप्रयुक्त इति पदम् । यद्यपि शशविषाणादीनां त्रैकालिकनिषेधप्रतियोगित्वं वर्तते, अवस्थितिसामान्यविरहप्रतियोगित्वं वर्तते तथापि तत् न ज्ञानप्रयुक्तम्, अधिष्ठानतत्वसाक्षात्कारप्रयुक्तं वा । अतः ज्ञानप्रयुक्तपदसत्वे न अतिव्याप्तिः ।

ननु कथं तर्हि दृष्टान्तीकृते शुक्तिरजतादौ साध्यवैकल्यनिवृत्तिः, इति चेत् शुक्तिरजतादीनां प्रातिभासिकानां पदार्थानां यतः प्रातिभासिककाले अपरोक्षप्रतीत्यन्यथानुपपत्या अवस्थितिः अङ्गीक्रियते अत एव न शशविषाणवत् अवस्थितिसामान्यविरहप्रतियोगित्वरूपत्वम् किन्तु प्रातिभासिकी अवस्थितिः वर्तत एव । तथा च प्रातिभासिकावस्थापन्नस्य शुक्तिरूप्यस्य या निवृत्तिः सा अधिष्ठानतत्वसाक्षात्कारप्रयुक्ता एव इति कृत्वा न साध्यवैकल्यम् ।

अवस्थितेः द्वैविध्यम्, तस्य च यः अधिष्ठानतत्वसाक्षात्कारप्रयुक्तः विरहः तत्प्रति विवरणपङ्क्तिः अपि प्रमाणम् । तथा च अज्ञानस्य स्वकार्येण प्रविलीनेन वर्तमानेन वा सह ज्ञानेन निवृत्तिः बाधः इति । तथा शुक्तिरजतादीनां

यदुपादानभूतम् अज्ञानं तस्य स्वकार्येण वर्तमानेन या अवस्थितिः, तस्याः ज्ञानेन अधिष्ठानतत्वसाक्षात्कारेण निवृत्तिः बाधः । यथा मुद्गरपातानन्तरं घटो नास्ति इति लौकिकप्रतीतिः, तथैव अधिष्ठानतत्वसाक्षात्कारेण शुक्तौ प्रतीयमानरजतनिवृत्तिः । शुक्तिविषयकम् अज्ञानं तद्गतं रूप्यं च नास्ति इति सर्वसम्मतम् । तस्मात् ज्ञाननिवर्त्यत्वं मिथ्यात्वम् इत्यपि लक्षणं साधु । किञ्च ज्ञानत्वव्याप्यधर्मावच्छिन्नजनकतानिरूपितजन्यतावन्नाशप्रतियोगित्वम् इत्यपि लक्षणं साधु इति उत्तरग्रन्थेन निरूप्यते ।

**परिशीलितग्रन्थसूचिः**

१. ब्रह्मसूत्रशांकरभाष्यम्, स्वामी सत्यानन्दसरस्वती, चौखम्बा संस्कृत प्रतिष्ठान दिल्ली
२. ईशादि नौ उपनिषद्, गीताप्रेस गोरखपुर
३. ब्रह्मसूत्रशांकरभाष्यम् भामती चौखम्बा संस्कृत प्रतिष्ठान दिल्ली
४. न्यामृत- अद्वैतसिद्धि, चौखम्बा संस्कृत प्रतिष्ठान दिल्ली
५. अद्वैतसिद्धिः, बालबोधिनी,
६. अर्थसंग्रहः, चौखम्बा संस्कृत प्रतिष्ठान दिल्ली
७. भारतीयदर्शन चौखम्बा संस्कृत प्रतिष्ठान दिल्ली


ISSN : 2249-538X

# दण्डिवामनयोः रीतिमीमांसा

श्रेयान् ब्यानार्जी*

**शोधसारः-**

रीतिवादस्य प्रवक्ता आचार्यो वामनः । काव्यसंज्ञानिरूपणावसरे तेनोक्तम्- "रीतिरात्मा काव्यस्ये"ति । रीतिरियं परिस्फुटा भवत्यलंकारेण । पुनरयमलंकारो हि गुणयुक्तः । अन्यालंकारिकैः रीतिविषये नैकानि मतान्युच्यन्ते । तैस्तु सर्वैः रीतिशब्दस्य साक्षात् प्रयोगो न कृतः । यथा-

- **रीतिः(वामनः)**
- **मार्गो वर्त्म वा (दण्डी)**
- **पद्धतिः (दण्डी)**

रीतेः पर्यायवाचकरूपेण दण्डिना मार्गः पद्धतिश्चेति शब्दद्वयमुल्लिखितम् । मार्गशब्दोऽयं तेन रीत्यर्थं प्रयुक्तः । साहित्यरचनाप्रसङ्गे स इमं शब्दं प्रयुक्तवान् । मार्गशब्दो मृज्धातोर्मृग्धातोर्वा घञ्प्रत्यये निष्पन्नो भवति । अस्यार्थः पथिप्रदर्शकः, काव्यक्षेत्रे रचनाशैलीगतस्य पथः प्रदर्शकः । मार्गोऽयमेव रीतिः । मनुष्याणां मनोभावो यथा प्रकाशमाप्नोति, तथैव साहित्यक्षेत्रे विशिष्टभङ्ग्या सज्जीकरणमेव रीतिः ।

पद्धतिरित्ययं शब्दोऽपि रीत्यर्थं प्रयुक्तः । दण्डिना मार्गविषये नैके प्रसङ्गा उत्थापिताः । परवर्तिकाले आलंकारिकैः यो मार्गो गुणत्वेनाभिधीयते । दण्डिनये, वैदर्भीगौडीभेदाद्रीतिद्वयमस्ति । रीतिद्वयमध्ये वैदर्भीरीतिमेव समधिकतया प्रशंसति सः, समस्तगुणोपेतत्वात् ।

इत्थं दृश्यते, रीतिमीमांसायां द्वावेवाचार्यौ भिन्नमतं पोषयतः । एकः प्रयुङ्क्ते रीतिरिति शब्दमन्यश्च मार्ग इति शब्दम् । मार्गद्वय एव सर्वगुणानामाविर्भावः । एवं प्रबन्धस्यास्यालोचनमग्रे सारितं भविष्यति ।

**कुञ्चिकापदानि-** रीतिमीमांसा, दण्डी, वामनः, गुणः, मार्गः, वैदर्भी, गौडीया, पाञ्चाली

**पीठिका**

"शब्दार्थौ सहितौ काव्यं गद्यं पद्यञ्च तद्विधे"ति प्राचीनाचार्यभामहकृतं काव्यलक्षणम् । ततो बहुकालात् परमर्वाचीनाचार्यः पण्डितराजो जगन्नाथः काव्यलक्षणमाह- "रमणीयार्थप्रतिपादकः शब्दः काव्यमि"ति । तत्पूर्वं साहित्यदर्पणकाराचार्यविश्वनाथकृतं सरलं काव्यलक्षणं नाम- "वाक्यं रसात्मकं काव्यमि"ति । सर्वलक्षणेष्वेव शब्दार्थयोः साहित्यं गुरुत्ववहं स्थानमधिकरोति । एतदेवाभिप्रेत्याचार्यः कुन्तकस्तदीये वक्रोक्तिजीविते आह-

**"समसर्वगुणौ सन्तौ सुहृदाविव सङ्गतौ ।परस्परस्य शोभायै शब्दार्थौ भवतो यथे"ति ॥**

**"एतौ शब्दार्थौ ते शरीरं संस्कृतं मुखं प्राकृतं बाहुः............ रस आत्मा"**............ इति काव्यमीमांसायामाचार्यो राजशेखरः सरस्वतीमुखात् काव्यपुरुषमुद्दिश्योक्तिं चकार । अनयोक्त्या सूच्यते यत्- काव्ये रस एवात्मा, किन्तु स

*शोधच्छात्रः, केन्द्रीयसंस्कृतविश्वविद्यालयः, मुख्यालयः, जनकपुरी, नई दिल्ली

आत्मा शब्दार्थशरीरेऽवतिष्ठते । शब्दो वाचकोऽर्थश्च वाच्यः । तौ काव्यस्य भित्तिभूमिस्वरूपौ । कविप्रतिभास्पर्शेन तद्भित्तिभूमौ रसे सञ्चारिते शब्दो व्यञ्जकतां चार्थश्च व्यङ्ग्यतां व्रजतः । तदा व्यङ्ग्यार्थस्याधारत्वेन कार्यं करोति शब्दः । शब्द आधारो व्यङ्ग्यार्थ आधेयः । आधारं विहायाधेय आश्रयशून्यत्वादवान्तरत्वं याति । अत एव काव्यक्षेत्रे शब्दानां महत्त्वं सहजबोध्यमेव । तत्रैतदपि बुध्यते यत्, विशृङ्खलशब्देषु तथा असज्जीकृतपदेषु कविकृतव्यङ्ग्यार्थनिवेशना न सम्भवति । अत एव सुनिर्दिष्टा पदसङ्घटना काव्यनिर्माणे गुरुत्वपूर्णां भूमिकां गृह्णाति । पदसंघटनेयमालंकारिकैः रीतिरुच्यते । यथाह विश्वनाथाचार्यस्तदीये साहित्यदर्पणे नवमपरिच्छेदे-

**"पदसङ्घटना रीतिरङ्गसंस्थाविशेषवत् ।**
**उपकर्त्री रसादीनां सा पुनः स्याच्चतुर्विधा"** ॥ इति ।[१]

**का नाम रीतिः**

रीतिशब्दस्य व्युत्पत्तिगतार्थो विन्यासः सज्जीकरणमिति । रीङ् क्षरणे स्रवणे वा धातुः । रीयते, रीयेते रीयन्ते चेत्यादीनि रूपाणि । तस्माद्रीधातोस्क्तिन्प्रत्यये रीतिशब्दो निष्पद्यते । साहित्यमीमांसायां व्यवहृतो रीतिशब्द एतद्रीधातुतो निष्पन्नः सन् यौगिकार्थातिरिक्तं पारिभाषिकार्थमेकमर्जितवान् । साहित्यशास्त्री वामनस्तदाह- **"विशिष्टा पदरचना रीति"**रिति । काव्यमीमांसाकारेणोक्तम्- **"वचनविन्यासक्रमो रीति"**रिति । पदसंघटना रीतिश्चोक्तं साहित्यदर्पणकारेण ।

काव्यालंकारसूत्रवृत्तिग्रन्थस्य कामधेनुटीकानुसारमुच्यते- **"रीणन्ति गच्छन्त्यस्यां गुणा इति, रीयते क्षरत्यस्यां वाङ्मधुधारेति वा रीति"**रिति । अर्थादोजःप्रसादादयो गुणा यत्रानुगतास्तिष्ठन्ति काव्यवाणीरूपमधुधारा यत्र क्षरति सैव रीतिः । अन्यतश्च साहित्यदर्पणस्य टीकाकारो हरिदाससिद्धान्तवागीशमहोदयो व्याख्याति यत्- रीयते ज्ञायते गुणविशेषोऽनया रीतिः । गत्यर्थकरीधातोः करणे क्तिः । रीतिः प्रथा व्यवहार इति पर्यायः । अस्याः साहाय्येन साहित्यस्य विशेषगुणा ज्ञायन्त इति रीतिशब्दस्यार्थः । काव्ये विविधपदानां वैशिष्ट्यपूर्णसन्निवेश एव रीतिरिति कथ्यते । एतत्सन्निवेशघटितचारुताया मूले वर्तन्ते गुणाः- इति वामनाचार्यस्य सिद्धान्तः । तेनोक्तं काव्यालंकारसूत्रवृत्तौ- **"विशिष्टा पदरचना रीतिरिति । विशेषवतीपदानां रचना रीतिः । कोऽसौ विशेष इत्यत आह- विशेषो गुणात्मे"ति** । अर्थाद्रीतौ गुणा आत्मरूपेण वर्तन्ते[२] । अस्या रीतेः प्रास्थानिकः प्रवक्ता वामनाचार्यः । तस्य विख्यातोऽलंकारग्रन्थः 'काव्यालंकारसूत्रवृत्ति'रिति । वामनाचार्यः ख्रीष्टीयाष्टमनवमशतकीयालंकारिकः । तस्मात् प्राग्वर्ती सप्तमशतकीयाचार्यो दण्डी । तस्य विख्यातोऽलंकारग्रन्थः 'काव्यादर्शः' । तत्र स रीतिशब्दस्थले मार्गः, वर्त्म पद्धतिश्चेति शब्दत्रयं प्रयुक्तवान् । सर्वे शब्दा एव पर्यायवाचकाः । एतेषु मार्गशब्दो मृज्धातोर्मृग्धातोर्वा

[१]सा.द । पृः-१९०
[२]काव्यजिज्ञासार रूपरेखा । पृः-४५

 ISSN : 2249-538X

घञ्प्रत्यये निष्पन्नो भवति । अस्यार्थः पथिप्रदर्शकः, काव्यक्षेत्रे रचनाशैलीगतस्य पथः प्रदर्शकः । मार्गोऽयमेव रीतिः । मनुष्याणां मनोभावो यथा प्रकाशमाप्नोति, तथैव साहित्यक्षेत्रे विशिष्टभङ्ग्या सज्जीकरणमेव रीतिः[1] ।

काव्यादर्शस्य 'मालिन्यप्रोञ्छिनी'टीकाकारः प्रेमचन्द्रतर्कवागीशमहाशय आह- **"मार्गः पदविन्यासप्रणाली रीति**"रित्यर्थः । सरलगिरा प्रकाशभङ्गीति । अस्मिन् दण्ड्याचार्यो वदति-

**"अस्त्यनेको गिरां मार्गः सूक्ष्मभेदः परस्परम् ।**
**तत्र वैदर्भीगौडीयौ वर्ण्येते प्रस्फुटान्तरौ"** ॥ इति ।

अर्थात् वाक्प्रयोगस्य बहुविधा पद्धतिरस्ति । तेषु सूक्ष्मभेदो वर्तते । तस्मात्तेषां सर्वेषामालोचनं बाहुल्यमात्रम् । तत्र केवलं द्वौ भेदौ स्पष्टौ- वैदर्भीरीतिर्गौडीया रीतिश्चेति । विदर्भदेशोद्भवानां महाकवीनामियमिति वैदर्भी । गौडदेशोद्भवानां महाकवीनामियमिति गौडी । पाञ्चालादीनामन्यासां रीतीनां स्वातन्त्र्यं नास्ति मिश्ररीतित्वात् । **"तथाहि पाञ्चालीवैदर्भीगौड्योरन्तरालवर्तिनीति तदुभयरूपैव, एवं लाटी वैदर्भीपाञ्चाल्योरिति तद्रूपैव, एवमन्यापि बोध्याः । अतश्च किञ्चिद्भेदवतां प्रदर्शनेन ग्रन्थपल्लवनमप्रयोजनमि**"ति । ततः केवलं प्रस्फुटान्तरौ सुकुमारविकटात्मकत्वेन अत्यन्तविसदृशौ वैदर्भगौडमार्गौ आलोचनीयाविति मत्त्वा दण्ड्याचार्यः प्रवृत्तो भवति[2] ।

**को नाम गुणः-**

गुणसंज्ञानिरूपणावसरे साहित्यदर्पणकारो विश्वनाथस्तदीये साहित्यदर्पणे आह-

**"रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो यथे"ति**[3]

वृत्तावुक्तम्- **"खल्वङ्गित्वमाप्तस्यात्मन उत्कर्षहेतुत्वाच्छौर्यादयो गुणशब्दवाच्याः, तथा काव्येऽङ्गित्वमाप्तस्य रसस्य धर्माः स्वरूपविशेषा माधुर्यादयोऽपि स्वसमर्पकपदसन्दर्भस्य काव्यव्यपदेशस्यौपयिकानुगुण्यभाज इत्यर्थः"** । अर्थात् शरीरिणः आत्मन उत्कर्षसाधनत्वाद्यथा शौर्यादयो गुणत्वेन विविच्यन्ते, तथैव काव्येऽङ्गिरूपरसस्य स्वरूपप्रकाशकमाधुर्य्यादयो धर्मा अपि तद्रसव्यञ्जकवाक्यस्य काव्यत्वेन व्यवहारोपयोगिसाधनत्वाद्गुणत्वेनाभिधीयन्ते । मम्मटेन तूक्तम्-

**"ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।**
**उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ॥**[4]" इति ।

वामनेनोक्तम्- **"काव्यशोभायाः कर्तारो धर्मा गुणाः"**- इति । तेन गुणालंकारयोर्भेदः स्वीकृतः । एते गुणाः ओजःप्रसादादयः । तन्मते, यमकोपमादयः सर्वेऽलंकाराः काव्यशोभाया नोत्पादकाः । तदर्थमेते न गुणाः । यतः,

[1]संस्कृत अलंकारशास्त्रेर समालोचनार धारा । पृः- ८१
[2]का.द (प्रथमपरिच्छेदः) । पृः- ६५
[3]सा.द । पृः- ४२३
[4]का.प्र । पृः- ३८०

ओजःप्रसादादिगुणानामभावात् यमकोपमाद्यलंकाराः काव्यस्य न शोभाधायकाः । किन्तु, ओजःप्रसादादिगुणा यमकोपमादीन् विनापि काव्यशोभाधायका भवितुमर्हन्ति । दण्डिनये, गुणा वैदर्भीमार्गस्य प्राणभूता वर्तन्ते । ततस्तेन पृथग्रूपेण गुणलक्षणं न कृतम् । केवलं द्वयोर्मार्गयोः परिचयमभिधाय तदनन्तरं श्लेषादिदशगुणानां नामान्यभिधाय एते दशगुणा वैदर्भीमार्गस्य प्राणाः, एषां गुणानां वैपरीत्यं गौडमार्गे दृश्यत इति स्वमतं स्थापितम् ।

**उभययोर्मार्गयोः साम्यवैषम्ये**

गौडीयमार्गो विकट उद्धतश्च । वैदर्भमार्गः सुकुमारः सुललितश्च । वैदर्भमार्गो दण्डिनये आदर्शभूतः सर्वोत्तमः सर्वेषां गुणानामाधार एव । महाकविः कालिदास इमं मार्गमवलम्ब्य श्रेष्ठत्वमर्जितवान् । तदुच्यते- "**वैदर्भीरीतिसन्दर्भे कालिदासः प्रगल्भते**"- इति । वैदर्भीरीतिर्दोषरहिता, सर्वगुणैर्भूषिता, वीणायाः स्वर इव श्रुतिमधुरा । तदुच्यते-

"**अस्पृष्टा दोषमात्राभिः समग्रगुणगुम्फिता ।**
**विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते**" ॥[1] इति ।

विषयेऽस्मिन् वामनाचार्यस्य स्पष्टं सूत्रमस्ति- समस्तगुणोपेता वैदर्भी रीतिरन्यतश्च ओजःकान्तिमती गौडीयेति । तदुच्यते-

"**समस्तात्युद्भटपदामोजः कान्तिगुणान्विताम् । गौडीयामिति गायन्ति रीतिं रीतिविचक्षणाः**"[2] ॥ इति ।

अग्निपुराणे उक्तम्- "**अनवस्थितसन्दर्भा गौडीया दीर्घविग्रहा । नातिकोमलसन्दर्भा वैदर्भी मुक्तविग्रहेति**" । साहित्यदर्पणकारेणोक्तम्-

"**माधुर्यव्यञ्जकैर्वर्णैः रचना ललितात्मिका । अवृत्तिरल्पवृत्तिर्वा वैदर्भीरीतिरिष्यते**" ॥ इति ।

अर्थान्माधुर्यम्- माधुर्याख्यं गुणं व्यञ्जयन्ति ये वर्णाः- अक्षराणि, तैः कृता ललितात्मिका- लालित्यस्वरूपिणी, अवृत्तिः- समासरहिता अथवा अल्पवृत्तिः- अल्पसमासवती रचना वैदर्भीरीत्या रचना भवति ।

**अन्यतश्च, "ओजःप्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः ।**
**समासबहुला गौडी"ति**[3] ॥

अर्थादोजोनामकस्य गुणस्य प्रकाशकैर्वर्णैर्या रचना कृता भवति, यत्र आडम्बरः- उद्भटो बन्धो भवति, एतादृशी समासबहुला – बहुतरसमासयुक्ता, दीर्घसमासवतीति यावदेतादृशी रचना गौडीरीतेः रचना भवति ।

**अथ दण्डिवामनोक्ता रीतिमीमांसा**

---

[1]काव्यालंकारसूत्रवृत्ति । पृः- ३
[2]तदेव ।
[3]सा.द । पृः- १९६- १९७


ISSN : 2249-538X

अलंकारशास्त्रीयरीतिवादे रीतिर्गुणात्मिकेति मन्यते । **"सा दण्डिनये वैदर्भीगौडीभेदाद्विविधा । वामनाचार्योऽपरामेकां रीतिं स्वीकरोति । सा पाञ्चाली । तदुक्तम्- सा त्रिधा वैदर्भी गौडीया पाञ्चाली च**"तीति । काव्यमीमांसाकारो राजशेखरोऽप्येतद्रीतित्रैविध्ये विश्वसिति- **"तदाहुः वैदर्भी गौडीया पाञ्चाली चेति रीतयस्तिस्रः"**- इति । काव्यप्रकाशे उपनागरिका, परुषी कोमला चेति वृत्तित्रयं यथाक्रमं वैदर्भी गौडी पाञ्चाली चेत्येतद्रीतित्रयस्य नामान्तरम् । ध्वन्यालोकेऽप्येतत्त्रयं स्वीकृतम् । केवलं साहित्यदर्पणकारोऽतिरिक्तामेकां रीतिं स्वीकरोति । सा लाटीति । भोजराजश्च सरस्वतीकण्ठाभरणेऽधिकं रीतित्रयं स्वीकृत्य तासां नामानि करोति- आवन्तिका, लाटीया मागधी चेति ।

**वैदर्भीरीतिस्वरूपम्**

अलंकारशास्त्रे वैदर्भी साधारणतः श्रेष्ठा रीतिः । महाकविकालिदासेनानुसृताऽभवदियं रीतिः । तदुच्यते- **"वैदर्भीरीतिसन्दर्भे कालिदासः प्रगल्भत"** इति । राजशेखरकल्पितः काव्यपुरुषो दक्षिणां दिशमागत्य साहित्यविद्यावध्वा वशंवदीकृतः **"सन् स्थानानुप्रासवदसमासं योगवृत्तिगर्भञ्च जगाद सा वैदर्भीरीति**"रिति । दण्डिनये, श्लेषादयो दश गुणा वैदर्भीरीत्याः प्राणस्वरूपाः । इति वैदर्भीमार्गस्य प्राणा दशगुणाः स्मृता इति । तमनुसृत्यैवाचार्यो वामन आह- समस्तगुणोपेता वैदर्भीति । समग्रैरोजःप्रसादप्रमुखैर्गुणैरुपेता वैदर्भी नाम रीतिर्दोषमात्रस्पर्शरहिता, सर्वगुणैर्विभूषिता, वीणास्वरवच्छ्रुतिसुखकारिणी । कवय एतां रीतिमाधिक्येन वाञ्छन्ति । तदुच्यते-

**"अस्पृष्टदोषमात्राभिः समग्रगुणगुम्फिता ।**
**विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते"** ॥ इति ।

कवय एतां रीतिं प्रशस्याहुः-

**"सति वक्तरि सत्यर्थे सति शब्दानुशासने ।**
**अस्ति तन्न विना येन परिस्रवति वाङ्मधु"** ॥ इति ।[1]

अथाचार्यो वामनः कालिदासकृतशाकुन्तलनाटकस्य द्वितीयाध्यायाद्गाहन्तामिति श्लोकमुद्धृत्य वैदर्भीरीत्या उदाहरणं दत्तवान्-

**"गाहन्तां महिषा निपानसलिलं श्रृङ्गैर्मुहुस्ताडितम्छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु ।**
**विस्रब्धं क्रियतां वराहततिभिर्मुस्ताक्षतिः पल्वलेविश्रान्तिं लभतामिदं च शिथिलज्याबद्धमस्मद्धनु"**रिति ॥

कामधेनुटीकायामस्य सर्वगुणोपेतत्वमेवं व्याख्यातम् । यथा- 'छायाबद्धकदम्बकम्', 'शिथिलज्याबन्धमि'त्यत्र ब-न्धस्य गाढत्वादोजः । 'छायाबद्धकदम्बकम्', 'मृगकुलमित्यत्र' बन्धस्य गाढशैथिल्ययोः संप्लवात् प्रसादः । 'म-

[1]काव्यालंकारसूत्रवृत्ति । पृः- ६९

हिषानिपानसलिलमि'त्यत्र मसृणत्वाच्छ्लेषः । 'गाहन्तामि'त्यारभ्य येनैव मार्गेण प्रक्रमस्तेनैव मार्गेणोपसंहार इति मार्गाभेदात् समता । 'गाहन्तामि'त्यत्रारोहः, 'महिषा' इत्यत्रावरोहः, अतएव समाधिः । 'श्रृङ्गैर्मुहुस्ताडितमि'ति पृथकपदत्वान्माधुर्यम् । 'रोमन्थमभ्यस्यतु'- इत्यत्र बन्धस्याजरठत्वात् सौकुमार्यम् । 'शिथिलज्याबद्धमस्मद्धनु'रित्यत्र बन्धस्य विकटत्वादुदारता । पदानामुज्वलत्वात् कान्तिः । अर्थस्य स्पष्टप्रतीतत्वाच्चार्थव्यक्तिरित्येवं दश गुणा लक्ष्यन्ते । अतोऽत्र वैदर्भी रीतिरनुसृता ।[1]

साहित्यदर्पणे वैदर्भीलक्षणमेवं निरूपितम्-

**"माधुर्यव्यञ्जकैर्वर्णैः रचना ललितात्मिका ।**
**अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते"** ॥ इति ।

अर्थात्, वैदर्भीरीतिसम्मता रचना भवेन्माधुर्यगुणयुक्ता, लालित्यस्वरूपिणी, समासरहिताऽथवाऽल्पसमासवती । रुद्रटेनाप्युक्तम्-

**"असमस्तैकसमस्ता युक्ता दशभिर्गुणैश्च वैदर्भी ।वर्गद्वितीयबहुला स्वल्पप्राणाक्षरा च सुविधेयेति"** ॥[2]

काव्यप्रकाशे नवमोल्लासे तु वैदर्भीरीतिरिति शब्दस्य स्थले उपनागरिकावृत्तिरुच्यते । तल्लक्षणमुक्तम्- **"माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकोच्यत"** इति । वक्तव्यं प्रायः सर्वत्रैकमेव ।

**गौडीयरीतिस्वरूपम्**

राजशेखरस्य काव्यपुरुषो देशभ्रमणाय बहिर्गतः सन् प्राचीं दिशं गतः, यत्राङ्गवङ्गसुह्मब्रह्मपुण्ड्राद्या जनपदा आसन् । साहित्यविद्यावधूरपि तमनुसृत्य गत्वा तं सन्तोषयितुं समासवदनुप्रासवद्योगवृत्तिपरम्परागर्भम् । आचार्यो दण्डी आह- एषां वैदर्भीसम्मतदशगुणानां विपर्ययः प्रायो दृश्यते गौडवर्त्मनीति । अर्थाद्वैदर्भमार्गे ये दशगुणाः स्थातुमर्हन्ति, तेषां कैश्चिद्विपर्ययैः सहान्ये गुणा गौडमार्गे वर्तन्ते । आचार्यो वामनोऽस्या रीत्या लक्षणमाह- **"ओजःकान्तिमती गौडीये"**ति । वृत्त्यनुसारं व्याख्यानमेतत्- **"माधुर्यसौकुमार्ययोरभावात् समासात्युल्वणपदा अर्थादुग्रपदयुक्ता रीतिर्नाम गौडीयरीतिः"** । अस्मिन् विषये एकः श्लोकोऽप्युद्धृतस्तेन-

**"समस्तात्युद्भटपदामोजःकान्तिगुणान्विताम् ।**
**गौडीयामिति गायन्ति रीतिं रीतिविचक्षणा" इति ॥**

उदाहरणत्वेन तेनोद्धृत एकः श्लोको महाकविभवभूतिरचितमहावीरचरितात्-

**"दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दत्तावभङ्गोद्योत**
**ष्टंकारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिमः ।**

[1]तदेव । पृः- ७०-७१
[2]सा.द । पृः- १९६

**प्राक्पर्यस्तकपालसम्पुटमितब्रह्माण्डभाण्डोदर**
**भ्राम्यत्पिण्डितचण्डिमा कथमहो नाद्यापि विश्राम्यती"ति ॥**

अतःपरं कामधेनुटीकाकारः श्रीगोपेन्द्रत्रिपुरहर उपसंहरति- **"अत्र बन्धस्य गाढौज्ज्वल्ययोरुत्कटत्वादुल्वणावोजः कान्तिगुणौ । समासभूयस्त्वोल्वणपदत्वे चातिस्फुटे"**- इति । अतोऽत्र गौडीया रीतिरनुसृतेति वुध्यते । साहित्यदर्पणेऽस्या लक्षणमुच्यते- **"ओजःप्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः समासबहुला गौडी"ति ।** काव्यप्रकाशे उक्तम्- **"ओजःप्रकाशकैस्तैस्तु परुषा अर्थाद्गौडीया रीतिः"** । सर्वत्र फलमेकमेव ।[१]

**पाञ्चालीरीतिस्वरुपम्**

इतःपूर्वं राजशेखरस्य काव्यपुरुषः पाञ्चालान् जगाम यत्र पाञ्चालशूरसेनहस्तिनापुरकाश्मीरादयो जनपदा आसन् । तत्र साहित्यविद्यावध्वा ईषद्वशंवदीकृतः सन् काव्यपुरुषः ईषदसमासमीषदनुप्रासमुपचारगर्भञ्च (वाक्यं) जगाद सा पाञ्चाली रीतिरिति । दण्डी पाञ्चालीरीतिविषये तुष्णीं बभूव । वामनस्तु पाञ्चालीरीतिस्वरुपमाह- माधुर्यसौकुमार्योपपन्ना पाञ्चालीति । अर्थाद्या रीतिर्माधुर्येण सौकुमार्येण च गुणेन युक्ता सा पाञ्चाली रीतिः । यथा-

**"ग्रामेऽस्मिन् पथिकाय पान्थ वसतिर्नैवाधुना दीयतेरात्रावत्र विहारमण्डपतले पान्थः प्रसुप्तो युवेति ।**
**तेनोत्थाय खलेन गर्जति घने स्मृत्वा प्रियां तत्कृतंयेनाद्यापि करङ्कदण्डपतनाशङ्की जनस्तिष्ठती"ति ॥**[२]

अत्र **"ग्रामेऽस्मिन् पथिकाय पान्थः"**- इत्यत्र पृथकपदत्वान्माधुर्यगुणः । तत्कृतं- मरणं कृतम् । अतएव मरणमित्यशुभपदस्थले तदित्यकठोरपदप्रयोगेन सौकुमार्यगुणः । अतोऽत्र पाञ्चाली रीतिरनुसृता ।

**उपसंहारः**

इयं रीतित्रय्येव दण्डिवामनसम्मतरीतिमीमांसायामन्तर्भवति । तासु तिसृषु प्राधान्येन स्वीकृते वैदर्भी च गौडीया च दण्ड्याचार्येण । ताभ्यां सहैकां युक्तां करोति वामनाचार्यः । सा नाम पाञ्चाली- उक्तरीतिद्वयस्य संमिश्रणस्वरूपम् । एतत्त्रयीमन्तरेण भोजेनाधिकं रीतित्रयं स्वीकृतम् । यथा- आवन्तिका, लाटिका मागधी चेति । **"एतासु वैदर्भीगौडीये एव प्रस्फुटान्तरे । अन्यासु मिश्रिताः । तत्र पाञ्चालीगौड्योरन्तरालवर्तिनी । लाटी समस्तरीतिव्यामिश्रा । मागधी तु खण्डरीति"**रेवेनि ।[३] पाञ्चालीवैदर्भीमिश्रा आवन्तिका । अतएव मिश्रातिमिश्रणात्तासां मध्ये सूक्ष्मभेदत्वात्ता रीतय आलोचनाबहिर्भूता इति दण्डिमतम् । पाञ्चाल्या योगश्च वामनेन स्वीकृतः ।

---
[१]काव्यालंकारसूत्रवृत्तिः । पृः- ७१-७२
[२]तदेव । पृः- ७२-७३
[३]का.द (१म) । पृः- १२३

इतोमध्ये आचार्यो भामहस्तस्य काव्यालंकारग्रन्थे विशिष्टमन्तव्यं कृतवान् । तेनोक्तम्-

**"गौडीयमिदमेतत्तु वैदर्भमति किं पृथक् । गतानुगतिकन्यायान्नानाख्येयममेधसामि"ति ॥**

अर्थाद्भामहेन न रीतिप्रस्थानं स्वीकृतम् । तन्नये, गतानुगतिकतावशादेव लोकैः रीतिगता विभिन्नता स्वीक्रियते । इयं गौडीया रीतिरियञ्च वैदर्भीत्येवं देशगतनामकरणेन किम् । कस्यचिद्देशस्य कविर्यया रीत्या लिखति सा रीतिरपरदेशस्य कविनाप्यनुसृता भवितुमर्हति । वस्तुतो रीतिर्निर्भरं करोति कविव्यक्तित्वोपरि । तेन सह युक्ता भवन्ति कति विषयाः । यथा- कथावस्तु, पाठकानां रुचिरित्यादयः । तत्तदनुसारेण तस्य पदसंघटना पृथक्तया जन्म लभते । सैव रीतित्वेन स्वीक्रियते आलंकारिकैः ।

दण्डिवामनसम्मता रीतिमीमांसा अलंकारशास्त्रेतिहासेऽत्यन्तं गुरुत्वमावहति । ध्वनिवादिनये रीतिः रसपरतन्त्रा रसधर्मश्च । अतो रसपर्यवसायी । आसां स्वकीयं चमत्कारित्वं वाच्यवाचकचारुत्वहेतौ वर्तते । तच्चमत्कारित्वं व्यङ्ग्यव्यञ्जकतामूलकचमत्कारित्वे उत्तरणस्य सोपानतां व्रजति । ध्वन्यालोककार उक्तवान्-

**"अस्फुटस्फुरितं काव्यतत्त्वमेतद् यथोदितम् । अशक्नुवदभिर्व्याकर्तुं रीतयः सम्प्रवर्तिनः"** ॥ इति ।[1]

अर्थात् काव्यतत्त्वम्- रसध्वनितत्त्वं रीतिवादेऽस्फुटं- मनाक् स्फुरितमासीत् । किन्तु रीतिवादिन आलंकारिकास्त-द्व्याख्यातुमसमर्थाः सन् वैदर्भी, गौडी पाञ्चाली चेति रीतित्रयं प्रवर्तितवन्तः । अत्रैवास्य महत्त्वमिति शम् ।

**परिशीलितग्रन्थसूची**


- द्विवेदी, त्रिलोकीनाथ, आचार्य दाहाल लोकमणि । (२०१५) । साहित्यदर्पणः । चौखाम्बा सूरभारती । वेनारस
- दास, करुणासिन्धु । (२०१२) । काव्यजिज्ञासार रूपरेखा । रत्नावली । कलकाता
- वन्द्योपाध्याय, सत्यरञ्जन । (२०१३) । संस्कृत अलंकारशास्त्रेर समालोचनार धारा । सं. पु. भा. । कलकाता
- गोप, युधिष्ठिर । (२००९) । काव्यादर्शः । सदेश । कलकाता
- डः वसु, अनिलचन्द्र । (२०१३) । काव्यालंकारसूत्रवृत्तिः । सं वुः डिपो । कलकाता
- डः वसु, अनिलचन्द्र । (२०१८) । काव्यादर्शः । सं वुः डिपो । कलकाता
- आचार्य, सीतानाथ ओ राधानाथ । (२०१४) । कुन्तकस्य काव्यदर्शनम् । सं. पु. भा. । कलकाता
- द्विवेदी ,शिवप्रसाद । (२०१५) । ध्वन्यालोकः । चौखाम्बा सूरभारती । वेनारस
- भादुडि सन्ध्या । (१३९८) । RASAGANGADHARA OF PANDITARAJA JAGGA-NATHA । सं. पु. भा. । कलकाता


[1]ध्वन्यालोकः । पृः- ६१२


ISSN : 2249-538X

# 201

- आचार्य, रामजीवन ओ निरुपम । (२०१४) । नन्दनेर आलोकरेखा काव्यजिज्ञासा । वामा पुस्तकालय । कलकाता
- चट्टोपाध्याय, जयश्री । (१४२०) । अलंकार साहित्येर समृद्ध इतिहास । सं. पु. भा. । कलकाता
- झाँ, मदनमोहन । (२०१२) । रसगङ्गाधरः । चौ. विद्याभवन । वेनारस
- वन्द्योपाध्याय उदयचन्द्र । (२०१०) । काव्यमीमांसा । सं वुः डिपो । कलकाता
- काने,पि. भि. । (२०१९) । HISTORY OF SANSKRIT POETICS । मोतीलाल बनारसी दास । वेनारस
- साहित्यवारिधि डः, शर्मा रामानन्द् । (२०१३) । काव्यालंकारः । चौखाम्बा सूरभारती । वेनारस
- डः, शास्त्री विश्वमूर्ति । (२००४) । संस्कृतसाहित्यशास्त्रे गुणविवेचनम् । अमर ग्रन्थ । दिल्ली

# श्रीद्भगवद्गीतायां परमपदप्राप्तौ अधिकारित्वनिरूपणम्

देवज्योतिकुण्डुः*

**शोधसारः**

भारतीयसंस्कृतौ महाभारतस्य धर्मग्रन्थत्वेन परिचयो लभ्यते । महाभारतस्यैव भीष्मपर्वणः अंशविशेषः श्रीमद्भगवद्गीता । अत्र भगवतः श्रीकृष्णस्य अर्जुनं प्रति उपदेशप्रदानं प्रधानतया दृश्यते । विविधोपदेशप्रदानपुरःसरं संसारबीजमुक्तं भगवता श्रीकृष्णेन । प्रवृत्तिनिवृत्तिलक्षणं धर्मं व्याख्याय संसारस्य वास्तविकं स्वरूपं तत्र वर्णितम् । एवञ्चाद्यत्वे आध्यात्मिकमार्गं प्रति प्रवेशाय श्रीमद्भगवद्गीतायाः भूमिका प्राधान्येन वरीवर्ति । न केवलमिदमपि च, मनुष्याणां कर्तव्याकर्तव्यविचारोऽपि तदध्ययनेनैव सम्यग् जायते । नैके महर्षयोऽपि गीतात एव प्रभाविताः । श्रीमद्भगवद्गीतां व्यतिरिच्य अन्यासु गीतास्वपि विविधतत्त्वानि सुवर्णितानि सन्ति यैः स्वोन्नत्यै वयं प्रभाविताः भवामः । अत एव त्रिविधप्रस्थानेष्वपि गीतादिशास्त्राणामुल्लेखो विद्यते । सर्वास्वपि गीतासु सर्वापेक्षया प्रसिद्धा श्रीमद्भगवद्गीता । विविधाः महर्षयः तत्तत्त्वानि स्वस्वमतानुसारं व्याख्यातवन्तः । तेष्वपि श्रीशङ्करभगवत्पादविरचितम् अद्वैतपरकव्याख्यानम् अतिप्रसिद्धम् । भाष्यकारो भगवान् श्रीशङ्कराचार्यः तद्रचितेन भाष्येण गीताशास्त्रे उक्तान् विचारान् सम्यक् प्रतिपादितवान् । भगवद्गीतायाः अष्टादशाध्यायेष्वन्यतमोऽस्ति पुरुषोत्तमयोगाख्यः पञ्चदशाध्यायः । तत्र संसारस्वरूपं भगवता अर्जुनाय सम्यगुपदिष्टम् । संसार एव प्रकृतं बन्धनम् । कामनावासनादित्यागेन संसारत्यागोऽस्माभिरवश्यं कर्तव्यः । तदैव परमपुरुषार्थप्राप्तिः सम्भवेत् । भगवता श्रीकृष्णेन संसारोऽयमश्वत्थवृक्षरूपेण वर्णितः, तत्र पर्णमूलाद्यवयवानामवस्थितिरप्युक्ता । एतादृशवृत्तान्ताः उपनिषत्सु पुराणेषु चोपलभ्यन्ते । संसाररूपबन्धनत्यागेनैव वैष्णवपदप्राप्तिः सम्भवति । तत्पदमेव वस्तुतः मोक्षस्वरूपम् । तद्धि कथं प्राप्यते, कस्तत्राधिकारीति सर्वं भाष्यकारेण श्रीमता शङ्कराचार्येण विस्तारेण प्रतिपादितम् । अस्मिन् शोधप्रबन्धे ते एव विचाराः आलोचिताः ।

**प्रमुखशब्दाः** – श्रीमद्भगवद्गीता, संसारः, परमपुरुषार्थः, मोक्षः, परमपदम्, संसारवृक्षः, त्यागः, स्थितप्रज्ञः, संन्यासी, अधिकारी ।

**उपक्रमः**

परमपुरुषार्थस्य मोक्षस्य प्राप्तये विविधानि साधनानि शास्त्रेषु उक्तानि । संसारत्यागेन स्वस्वरूपम् अवगम्य ब्रह्मणि लयः आवश्यकः । किन्तु मायायाः आवरणकारणात् साधारणाः स्वस्वरूम् अवगन्तुं न पारयन्ति । धीरपुरुषाः तु मोहं त्यक्त्वा ब्रह्मतत्त्वं ज्ञात्वा अमृतत्वं भजन्ते । कर्मयोगेन देवलोकप्राप्तिः भवति । ज्ञानयोगेन ब्रह्मलोकः प्राप्यते । अतः कर्म कर्मफलं च त्यक्त्वा ब्रह्मविद्याप्राप्तये सदा प्रयत्नः करणीयः । भारतीयधर्मग्रन्थेषु महाभारतम् अतिप्रसिद्धम् । महाभारतस्य एव अंशविशेषः श्रीमद्भगवद्गीता । अत्र श्रीकृष्णस्य अर्जुनं प्रति उपदेशप्रदानं प्रधानतया दृश्यते । कर्मस्वरूपं मोक्षस्वरूपं च उक्त्वा भगवान् श्रीकृष्णः अर्जुनाय विविधोपदेशपुरःसरं

*शोधच्छात्रः, वैदिकदर्शनविभागः, संस्कृतविद्याधर्मविज्ञानसङ्कायः, काशी-हिन्दू-विश्वविद्यालयः, वाराणसी, उत्तरप्रदेशः

संसारबीजम् उक्तवान् । भाष्यकारः श्रीशङ्कराचार्यः गीताशास्त्रस्य व्याख्यानसमये एतं समस्तवेदार्थसारसंग्रहभूतं कथयति । अत्र अष्टादशाध्यायैः समस्तानामपि वेदानां सारः वर्णितोऽस्ति । अष्टादशाध्यायेषु पुरुषोत्तमयोगाख्यः नाम पञ्चदशोऽध्यायः अन्यतमः । अत्र संसारस्वरूपवर्णनेन कथं स निवारणीयः, कश्च तत्र अधिकारी, किं च आचरणीयम् इत्येतत्सर्वं वर्णितमस्ति । अयं पुरुषोत्तमयोगाध्यायः गीताशास्त्रसार इति अनेकेषाम् आचार्याणां मतम् । संसारोऽत्र भगवता श्रीकृष्णेन अश्वत्थवृक्षरूपेण वर्णितः, तस्य किं स्वरूपं, कीदृशाः अवयवाः, तत्त्यागोपायः इत्यादिविषयाः श्रीशङ्कराचार्येण स्वभाष्ये विस्तरेण प्रतिपादिताः । संसाररूपबन्धनं त्यक्त्वा एव खलु परमपदप्राप्तिर्भवति । तच्च परमपदं ब्रह्मस्वरूपमेव । सर्वविधकामनारहितः संन्यासी एव तत्प्राप्तौ अधिकारी भवति । सम्प्रति तदेवात्रालोच्यते ।

**संसारवृक्षस्य स्वरूपम्**

संसाराद् वैराग्यम् आवश्यकम् । भगवान् श्रीकृष्णः अत्र वृक्षरूपककल्पनया वैराग्यहेतोः संसारस्वरूपं वर्णयति । भगवत्तत्त्वज्ञाने कस्य अधिकार इत्युच्यते शङ्कराचार्येण – "विरक्तस्य हि संसाराद् भगवत्तत्त्वज्ञाने अधिकारो नान्यस्य"[१] इति । संसारवृक्षस्य स्वरूपविषयकः श्लोको हि –

**ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।**
**छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥**[२] इति ।

अस्य संसारवृक्षस्य मूलम् ऊर्ध्वम् अस्ति, शाखा च अधः अस्ति । अश्वत्थवृक्षेण साकम् अस्य सामञ्जस्यं विहितम् अस्ति । एतम् अव्ययं वदन्ति ज्ञानिनः । ऊर्ध्वमूलम् अधःशाखम् अश्वत्थम् अव्ययं प्राहुः इति अन्वयः । ऊर्ध्वं मूलं यस्य स ऊर्ध्वमूलः, तम् ऊर्ध्वमूलम् । एवम् एव अधः शाखाः यस्य स अधःशाखः, तम् अधःशाखम् ।

वृक्षस्य अस्य उपरिभागे ब्रह्म तिष्ठति, ब्रह्म एव मूलम् अस्ति । तत् कालस्य अपेक्षया अपि सूक्ष्मम् अस्ति, सर्वेषां कारणभूतम् अस्ति । किञ्च तत् नित्यं महत् । पुनश्च अव्यक्तमायाशक्तिमत् तत् मूलम् । तद् एव श्रेष्ठः पुरुषोत्तमः । अतः स उपरि तिष्ठति । एवं महदहङ्कारतन्मात्रादयः शाखाः इव अस्य अधो भवन्ति इति सोऽयम् अधःशाखः । महदादि सर्वम् अस्य संसारवृक्षस्य शाखात्वेन उच्यते । ब्रह्मापेक्षया तत्सर्वम् उत्कृष्टं नास्ति इत्यतः अधोभागे तिष्ठति । अत्र अश्वत्थशब्दस्य व्युत्पत्तिः एवम् अस्ति – न श्वः अपि स्थाता इति अश्वत्थः इति । अर्थात् अश्वत्थो नाम क्षणप्रध्वंसी । तन्नाम संसारः नश्यति । संसारनाशे खलु ब्रह्मतत्त्वज्ञानलाभो जायते । एतादृशम् अश्वत्थं संसारम् अव्ययम् इति कथयन्ति पण्डिताः । अयं संसारः अनादिकालात् प्रवृत्तः अस्ति । अतः अयम् अव्ययः इत्युच्यते । तदुक्तम् – "संसारमायामयम् अनादिकालाप्रवृत्तत्वात् सः अयं

[१] शाङ्करभाष्यम्
[२] श्रीमद्भगवद्गीता (15.1)

संसारवृक्षः अव्ययः अनाद्यनन्तदेहादिसन्तानाश्रयो हि सुप्रसिद्धः तमव्ययम्"[१] इति । पुनश्च उच्यते मन्त्रे - "छन्दांसि यस्य पर्णानि"[२] इति । अस्य संसारवृक्षस्य पर्णानि छन्दांसि भवन्ति । छन्दांसि छादनाद् ऋग्यजुःसामलक्षणानि संसारवृक्षस्य पर्णानि इव । यथा वृक्षस्य परिरक्षणार्थं पर्णानि भवन्ति, तथैव संसारवृक्षस्य परिरक्षणार्थं वेदाः भवन्ति धर्माधर्मतद्धेतुफलप्रकाशनार्थत्वात् ।

एवं संसारवृक्षस्य सामान्यस्वरूपम् उक्तम् । एतं संसारवृक्षं समूलं यो जानाति स एव वेदविद् भवति । यतो हि मूलसहितात् संसारवृक्षाद् भिन्नं किमपि ज्ञातव्यम् एव न तिष्ठति । अतः मूलसहितज्ञानवान् एव वेदार्थविद् उच्यते । श्रीशङ्करः विषयमिमं सम्यग् वर्णयति – "न हि संसारवृक्षाद् अस्मात् समूलाद् ज्ञेयः अन्यः अणुमात्रः अपि अवशिष्टः अस्ति अतः सर्वज्ञः स यो वेदार्थविद् इति समूलवृक्षज्ञानं स्तौति"5 इति ।

कठोपनिषदि अपि संसारवृक्षविषये वर्णितम् अस्ति - "ऊर्ध्वमूलोऽवाक्शाखः"[३] इति । अन्यत्र चोच्यते –

**अव्यक्तमूलप्रभवस्तस्यैवानुग्रहोत्थितः ।**
**बुद्धिस्कन्धमयश्चैव इन्द्रियान्तरकोटरः ॥**
**महाभूतविशाखश्च विषयैः पत्रवांस्तथा ।**
**धर्माधर्मसुपुष्पश्च सुखदुःखफलोदयः ॥**
**आजीव्यः सर्वभूतानां ब्रह्मवृक्षः सनातनः ।**
**एतद्ब्रह्मवनं चैव ब्रह्माचरति नित्यशः ॥**
**एतच्छित्त्वा च भित्त्वा च ज्ञानेन परमासिना ।**
**ततश्चात्मरतिं प्राप्य तस्मान्नावर्तते पुनः ॥**[४]

इति ।

एवं संसारवृक्षविषये वृत्तान्ताः प्राप्यन्ते ।

**संसारवृक्षस्य अवयवकल्पना** संसाररूपस्य अश्वत्थस्य गुणैः वृद्धिप्राप्ताः विषयरूपपल्लवविशिष्टाः शाखाः अधः ऊर्ध्वं च विस्तृताः । अधः मनुष्यलोके कर्मानुबन्धीनि मूलानि विस्तृतानि सन्ति । अत्र श्लोकः इत्थम् अस्ति –

**अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ।**
**अधश्च मूलान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके ॥**[५]

---

[१]शाङ्करभाष्यम्
[२]श्रीमद्भगवद्गीता (15.1)
[३]शाङ्करभाष्यम्
[४]कठोपनिषद् (2.6.1)
[५]पुराणम्


ISSN : 2249-538X

इति ।

संसारवृक्षस्य शाखाः सत्त्वरजस्तमोगुणैः वृद्धिं प्राप्नुवन्ति । शाखाः अधः ऊर्ध्वं च प्रसृताः । अधः नाम मनुष्यादिभ्य आरभ्य वृक्षतृणादिपर्यन्तं ये प्राणिनः सन्ति । किञ्च ऊर्ध्वं नाम ब्रह्मा विश्वसृट् । अत एव अधः स्थावरपर्यन्तम्, उपरि ब्रह्मपर्यन्तम् अस्य संसारवृक्षस्य शाखाः विस्तृताः सन्ति । लोके यथा वृक्षस्य शाखाः दृश्यन्ते, तथा संसारवृक्षस्य शाखाः अपि प्रवृद्धाः इति अवगन्तव्यम् । गुणाः एव अस्य उपादानकारणभूताः सन्ति । तस्मात् तैः शाखाः वृद्धिं प्राप्नुवन्ति । वृक्षशाखासु यथा नूतनपल्लवाः अङ्कुरीभवन्ति, तद्वद् अत्र विषयाः देहादिकर्मफलेभ्य उत्पद्यन्ते ।

लोके यथा कदाचिद् वृक्षशाखाभ्यः मूलोत्पत्तिः दृश्यते, तद्वद् अत्रापि परिकल्प्य सम्प्रति उच्यते । अस्माकं याः कर्मफलजनितरागद्वेषादिवासनाः सन्ति, ताः एव मूलानि इव । यतो हि तानि धर्माधर्मकारणभूतानि । तानि देवाद्यपेक्षया अधोवर्तीनि । तानि मूलानि अधः अधः अनुप्रविष्टानि । पुनश्च एतानि अवान्तरावयवभूतानि । धर्माधर्मलक्षणं कर्म एव अनुबन्धः । पापपुण्यात्मकं कर्म एव अस्य पुनः पुनः आविर्भावे कारणम् । कर्मानुबन्धीनि तानि रागद्वेषवासनारूपाणि मूलानि मनुष्यलोके सन्ति । मनुष्याणाम् एव विशेषतः कर्माधिकारः प्रसिद्ध इति कृत्वा अत्र मनुष्यलोके इति उक्तम् । एवम् अत्र श्लोकद्वयेन संसारवृक्षस्य मूल-शाखा-पर्णादिविषये विवरणं कृतम् ।

**संसारत्यागोपायः**

संसारः तु वस्तुतः मिथ्याभूतः । संसारस्य त्यागेन एव ब्रह्मस्वरूपं ज्ञातुं शक्यते । वर्णितस्य संसारवृक्षस्य मूलम् उपरि अस्ति । तत् च ब्रह्म । इदम् ऊर्ध्वमूलत्वादिकं संसारे न उपलभ्यते । वैराग्ये सति संसारत्यागः सम्भवति । अत एव संन्यासिनाम् एव ब्रह्मतत्त्वज्ञाने अधिकारित्वं भवति । ब्रह्म एव सर्वेषां नियन्तृ । ततः एव सर्वं प्रसृतम् अस्ति । अतः तद् आदिपुरुष उच्यते । स एव सदा आश्रयणीयः । मन्त्रे उच्यते –

**न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा ।**
**अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्त्वा ॥**[१]
**ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तन्ति भूयः ।**
**तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥**[२]

इति ।

यथाव्याख्यातं संसारवृक्षस्वरूपं संसारे न उपलभ्यते इति उच्यते । अयं स्वप्नवद् इति भाष्यकारेण उच्यते । न केवलम् इदम्, अपि च मरीच्युदकवद् अपि । किञ्च गन्धर्वनगरसमः अयं दृष्टनष्टस्वरूपः । अतः अस्य परिसमाप्तिः

[१]श्रीमद्भगवद्गीता (15.3)
[२]श्रीमद्भगवद्गीता (15.4)

भवितुं नार्हति । अस्य आदिः नास्ति, स्थितिः अपि नास्ति । "नासतो विद्यते भावो"[१] इत्यस्मिन् श्लोके भाष्यकारः श्रीशङ्कराचार्यः ब्रह्मणः अनादित्वम् अनन्तत्वं च प्रतिपादितवान् । प्रकृते श्लोके अयं सुविरूढमूलः अश्वत्थः दृढेन असङ्गशस्त्रेण छेत्तव्य इति उक्तम् । न सङ्गः असङ्गः । तन्नाम पुत्रवित्तलोकैषणादिभ्यो व्युत्थानम् । अर्थात् पुत्रैषणा वित्तैषणा लोकैषणा इति एषणात्रयत्यागपुरःसरं सुविरूढमूलः अयम् अश्वत्थः छेत्तव्यः । असङ्ग एव अत्र शस्त्रम् उच्यते । भाष्यकारः सरलभाषया पदार्थप्रतिपादनपुरःसरं सम्यग् वर्णयति – "अश्वत्थम् एनं यथोक्तं सुविरूढमूलं सुष्ठु विरूढानि विरोहं गतानि सुदृढानि मूलानि यस्य तम् एनं सुविरूढमूलम्, असङ्गशस्त्रेण असङ्गः पुत्रवित्तलोकैषणाभ्यः व्युत्थानं तेन असङ्गशस्त्रेण दृढेन परमात्माभिमुख्यनिश्चयदृढीकृतेन पुनः पुनः विवेकाभ्यासाश्मनिशितेन च्छित्वा संसारवृक्षं सबीजम् उद्धृत्य"[२] इति । ततः तत् वैष्णवं पदं ज्ञातव्यम् इति उच्यते । वैष्णवपदप्राप्तेः अनन्तरं संसाराय आवर्तनं न भवति । अत्र पदशब्देन आदिपुरुषः ब्रह्म एव उच्यते । तच्छरणतया भवितव्यम् इत्यर्थः । तस्माद् एव आदिपुरुषात् संसारमायावृक्षप्रवृत्तिः प्रसृतः अस्ति । अतः तत्त्वज्ञानेन संसारत्यागः सम्भवति । यदि ब्रह्मतत्त्वं ज्ञायते, तर्हि पुनरपि संसारावर्तनं न भवति इत्यर्थः । 'अहं तम् आदिपुरुषम् आश्रयामि' इति भक्तिपूर्विका शरणागतिः आवश्यकी ।

**परमपदप्राप्तौ अधिकारी**

कथंभूताः तत्पदं गच्छन्ति इत्युच्यते –

**निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः ।**
**द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत् ॥**[३]

इति । मानश्च मोहश्च मानमोहौ, तौ निर्गतौ येभ्यः ते निर्मानमोहाः मानमोहवर्जिताः, सङ्ग एव दोषः सङ्गदोषः, जितः सङ्गदोषो यैः ते जितसङ्गदोषाः, परमात्मस्वरूपालोचननित्याः तत्पराः अध्यात्मनित्याः, विशेषतो निर्लेपेन निवृत्ताः कामाः येषां ते विनिवृत्तकामाः, संन्यासिनः, प्रियाप्रियादिभिः विमुक्ताः मोहवर्जिताः परमपदं गच्छन्ति । अत एव सर्वविधकामनारहितः संन्यासी एव अधिकारी भवति इति उच्यते । कठोपनिषदि रथरूपककल्पनसमयेऽपि परमपदविषये उच्यते –

**यस्त्वविज्ञानवान् भवत्यमनस्कः सदाशुचिः ।**
**न स तत्पदमाप्नोति संसारं चाधिगच्छति ॥**[४]
**यस्तु विज्ञानवान् भवति समनस्कः सदाशुचिः ।**

[१] श्रीमद्भगवद्गीता (2.16)
[२] शाङ्करभाष्यम्
[३] श्रीमद्भगवद्गीता (15.5)
[४] कठोपनिषद् (3.1.7)


ISSN : 2249-538X

**स तु तत्पदमाप्नोति यस्माद्भूयो न जायते ॥**[१]

**विज्ञानसारथिर्यस्तु मनःप्रग्रहवान् नरः ।**

**सोऽध्वनः पारमाप्नोति तद् विष्णोः परमं पदम् ॥**[२]

इति । एवमत्र संसारवृक्षस्य मूलभूतस्य ब्रह्मतत्त्वस्य आदिपुरुषस्य प्राप्तिः एतैः एव भवति इति स्पष्टम् उक्तम् । सांख्ययोगाख्ये द्वितीयाध्याये स्थितप्रज्ञलक्षणानि उक्तानि । यदा मनुष्यस्य सर्वे कामाः नश्यन्ति, तदा तुष्टेः कारणस्य अभावो भवति । तदा कस्यापि बाह्यविषयस्य अपेक्षा न भवति । स स्वयमेव तुष्टस्तिष्ठति । परमार्थदर्शनामृतलाभेन अन्यत् किमपि तदा स न वाञ्छति । सर्वत्यागेन ब्रह्मानन्दलाभेन च आत्मारामो भवति सः । अतोऽस्मिन् समये आत्मनात्मविवेकप्रज्ञा जायते । तदा एव स स्थितप्रज्ञो भवति । तादृशभावेन सर्वविधकामनाराहित्येन भवितव्यमिति भावः । एवमन्यत्रापि ग्रन्थेषु बन्धनकारणं बहुधा महर्षिभिः प्रतिपादितम् । कामनावासनादित्यागः करणीय एव, तेनैव परमपदप्राप्तिः सम्भवतीति तात्पर्यम् ।

**उपसंहारः**

महाभारतस्य भीष्मपर्वणि वर्णितः अंशः एव श्रीमद्भगवद्गीतारूपेण ज्ञायते । अत्र विशेषतः अर्जुनं प्रति भगवान् श्रीकृष्णः उपदेशं प्रायच्छत् । द्विविधो हि वेदस्य धर्मः उक्तः – प्रवृत्तिलक्षणः निवृत्तिलक्षणश्च । तद्धर्मद्वयम् एव भगवान् श्रीकृष्णः शोकसागरे निमग्नाय अर्जुनाय उपदिदेश । श्रीमद्भगवद्गीतायाः पुरुषोत्तमयोगाख्ये पञ्चदशाध्याये भगवता श्रीकृष्णेन अर्जुनं प्रति संसारस्वरूम् उक्तम् । किञ्च संसारवृक्षस्य अवयवाः के, किं तत्र मूलतत्त्वं, कथं ब्रह्म ज्ञातव्यं, के च तत्र अधिकारिणः इति सर्वम् अपि तत्र उक्त्वा ब्रह्मस्वरूपं प्रतिपादितम् । भगवता श्रीकृष्णेन श्लोकद्वयेन संसारवृक्षस्य स्वरूपं वर्णितम् –

**ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।**

**छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥**[३]

**अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ।**

**अधश्च मूलान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके ॥**[४]

इति । कठोपनिषदि पुराणे चापि एवं संसारवृक्षस्य वर्णनं समुपलभ्यते । वृक्षोऽयम् ऊर्ध्वमूलः अधःशाखश्च । छन्दांसि एव अस्य पर्णानि, गुणप्रवृद्धाः विषयप्रवालाः शाखाः । कर्मानुबन्धीनि मूलानि अधः मनुष्यलोके अनुसन्ततानि इति उक्तम् । एवं संसारवृक्षस्वरूपम् उक्त्वा संसारत्यागोपायविषये परमपदप्राप्तौ अधिकारीविषये च अत्र भाष्यकारदिशा

[१]कठोपनिषद् (3.1.8)
[२]कठोपनिषद् (3.1.9)
[३]श्रीमद्भगवद्गीता (15.1)
[४]श्रीमद्भगवद्गीता (15.2)

भगवद्गीतायाः भगवद्वचनं समासेन प्रतिपादितम् इति शम् ।

**आश्रितग्रन्थतालिका –**


1. श्रीमद्भगवद्गीता (शांकरभाष्य हिन्दी-अनुवादसहित) । गीताप्रेस । गोरखपुर ।
2. रामसुखदास, स्वामी । गीता-दर्पण । गीताप्रेस । गोरखपुर ।
3. ईशादि नौ उपनिषद् (शाङ्करभाष्यार्थ) । गीताप्रेस । गोरखपुर ।
4. सर्वज्ञभूषण । भारतीयदर्शनसार । संस्कृतगङ्गा । दारागञ्ज, प्रयाग । 21 जून, 2021 (द्वितीय संस्करण) । जनवरी 2019 (प्रथम संस्करण) ।
5. मिश्रः, आचार्यः श्रीरामचन्द्रः । संस्कृतसाहित्येतिहासः । चौखम्बा विद्याभवन । वाराणसी । 2017 ।
6. पाण्डेयः, मिथिलेशः । यू.जी.सी. नेट, जे.आर.एफ., सेट संस्कृत । उपकार प्रकाशन । आगरा ।
7. भट्टः, नागराजः । स्वामि-वेदतत्त्वानन्दः । (सम्पादकौ) । भारतीयदर्शनम् । (1 भागः) । राष्ट्रीय-मुक्त-विद्यालयी-शिक्षा-संस्थानम् । नोएडा । 2017 (प्रथमं संस्करणम्) ।
8. Advaita Sharada (https://advaitasharada.sringeri.net/)


 ISSN : 2249-538X

# उच्चस्तरे/उच्चशिक्षायाम् सरलमानकसंस्कृतस्य उपादेयता

विनय कुमार शुक्लः*

**शोधसारः –**

संस्कृतवाङ्मये सुमहान्तः कवयः विद्वांसः च अस्यां भारतभूमौ जन्म अलभन् । तेषां सर्वेषां या भाषा सा प्रौढा आसीत् । येन जनानां मनसि संस्कृतस्य निमित्तं हीनभावना समागता अतः जनाः एनां भाषां पण्डितानां भाषा इति मत्वा दूरं गताः । छात्राः अपि विद्यालयस्तरे संस्कृतं न स्वीकुर्वन्ति, अतः परिवर्त्यमाने काले संस्कृतं पुनः जनानां भाषा भवेत्, छात्राः सुखेन संस्कृतं भाषात्वेन स्वीकुर्युः इति धिया नवशिक्षानीतौ 2020 मध्ये SSS सरलमानकसंस्कृतम् इत्यस्य संकल्पना समुद्भूता । अनेन सरलमानकसंस्कृतेन एषा सत्संकल्पना सिद्धा भविष्यति इति धिया इदं शोधपत्रं प्रस्तूयते ।

**प्रमुखशब्दाः** – उच्चस्तरः , सरलम्, मानकम्, संस्कृतम्, उपादेयता ।

**प्रस्तावना-**

भारतस्य परिकल्पना संस्कृतेन विना कर्तुमेव नैव शक्यते । एकवाक्येन वदामश्चेत् संस्कृतं भारतस्य आत्मा अस्ति । उच्यते विद्वद्भिः - भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा इति । एषा भाषा दिव्या, सरला, सरसा, सुबोधा च अस्ति । किञ्च गच्छता कालेन जनानां मनसि एषा हीनभावना समागता यत् संस्कृतं कठिना भाषा, केवलं पण्डितानां भाषा वेति ।

**सरससुबोधा विश्वमनोज्ञा ललिता हृद्या रमणीया ।अमृतवाणी संस्कृतभाषा नैव क्लिष्टा न च कठिना[१] ॥**

पं वसन्त गाडगीलमहोदयस्य अनया पङ्क्त्या ज्ञायते यत् एषा सर्वेषां भाषा, एषा कठिना न अपि तु एषा अमृतवाणी इति ।

**अमृतं संस्कृतं मित्र सरसं सरलं वचः ।भाषासु महनीयं यत् ज्ञानविज्ञानपोषकम्[२] ॥**

ज्ञान-विज्ञान पोषयित्री, सर्वासु भाषासु महनीया, नवरसोन्मेषजा दिव्या गीर्वाणभारती इत्येवं संस्कृतभाषा सुनिबद्धा । संस्कृते सर्वविधं ज्ञानं विद्यते । अस्य मूलस्रोतोरूपेण वेदाः सुप्रसिद्धाः सन्ति । संस्कृतं प्रत्येकं जनस्य जीवनं प्रभावयति । सर्वेषां मनुष्याणां जीवने कानिचन मूल्यानि तु अवश्यमेव भवन्ति । तेषां मूल्यानां स्रोतः संस्कृते एवास्ति । यथोक्तम्- संस्कृतं संस्कृतेर्मूलं ज्ञान-विज्ञानवारिधिः इति[३] । अधुना नवशिक्षानीतौ याः भारतीयज्ञानपरम्पराः उल्लिखिताः दृश्यन्ते सा नूतना न अपि तु सा परम्परया पुरातना एव । वेदेषु उल्लिखितमपि- नवो-नवो भवति जायमानः[४] । ताम् अनुसृत्यैव भगवान् कृष्णद्वैपायनः वेदः इत्यस्य सरलमानकत्वेन

*शोधच्छात्रः, शिक्षाशास्त्रविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

[१]गेयगीतम् संस्कृतभारती

[२]रुचिरा NCERT

[३]निबन्धशतकम् पृ.२३

[४]ऋग्वेद १०.८५.१९

ऋग्यजुस्सामाऽथर्वेति चतुर्धा विभागं कृत्वा वेदव्यासत्वेन प्रसिद्धः अभवत् । अनेन ज्ञायते यत् सरलं मानकं केवलं संस्कृते एव न अपि तु या सर्वासु विद्यासु गरीयस्यां श्रुतौ अपि द्रष्टुं शक्यते । **उच्चस्तरः-** भारते इतः पूर्वं शिक्षायाः स्तरत्रयं विद्यते तद्यथा- प्राथमिकस्तरः,( वर्ग1 तः वर्ग 5 पर्यन्तम् अथवा वर्ग1 तः वर्ग 8 पर्यन्तम्) माध्यमिकस्तरः, (वर्ग 6 तः वर्ग 9 पर्यन्तम् अथवा वर्ग 6 तः वर्ग 10 पर्यन्तम्) उच्चमाध्यमिकस्तरः (वर्ग 11 तः वर्ग 12 पर्यन्तम्) । स्तरत्रयेऽपि बालाः पठन्ति । परन्तु तेषां ग्रहणक्षमता,चिन्तन-क्षमता च भिन्ना भवति । अतः एव नवशिक्षानीतौ नवशैक्षिकसंरचना (5+3+3+4) समागता यथोक्तम्-

**ज्ञानं पञ्चाक्षराणां हि व्यञ्जनानां करोत्ययम् ।बालकः पञ्चमे वर्षे भारतस्य हि संस्कृतौ**[१] ॥

अनेन श्लोकेन ज्ञायते यत् पञ्चमे वर्षे बालकस्य कः स्तरः भवति इति । क्रमशः बालाः प्रतिस्तरं शनैः शनैः विकासं सम्प्राप्य उच्चस्तरे सर्वान् भावान् प्रकाशयितुं निर्णयं च कर्तुं समर्थाः भवन्ति ।

**सरलम्-** कठिनात् भिन्नं सरलम् । सरलं नाम महद्दुष्करम् कार्यम् अल्पप्रयासेन कथं वा सिध्येत् इति विधेयः कश्चन प्रयत्नः । सरलता सर्वत्र अपेक्षिता वर्तते । यतो हि अनया एव मनुष्यः स्वजीवने उन्नतपदं प्राप्नोति । तथैव भाषादृष्ट्याऽपि सरलता अपेक्ष्यते । यदि भाषा सरला नास्ति चेत् जनाः नाधिगच्छन्ति, ततः दूरमपि गच्छन्ति । संस्कृतं तु सरला,सरसा च भाषा अस्ति । परन्तु जनमनसि एषा भ्रान्तिः समुद्भूता यत् संस्कृतं कठिना, क्लिष्टा च भाषा । फलस्वरूपं जनानां वाचि स्खालित्यं दृश्यते । प्रसङ्गेऽस्मिन् भक्तशिरोमणिः हनूमानपि सीतान्वेषणवेलायां संस्कृतेन भाषमाणः चिन्ताक्रान्तः अभवत् । यथोक्तं वाल्मीकिरामायणे-

**यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् ।रावणं मन्यमाना मां सीता भीता भविष्यति**[२] ॥

कस्यापि भाषायाः मुखद्वयं भवति- प्रौढत्वं, सरलत्वं च । अत्र सरलत्वं नाम साधारणजनैः अवगन्तुं व्यवहर्तुं च शक्यम् इति । सरलं विद्यमानस्य किञ्चन मुखमेव निरूपयति सरलीकृतम् इति कदापि न मन्तव्यम् ।

**मानकम्-** मानकम् इति शब्दः स्तरं सूचयति । भाषायाः सन्दर्भे मानकभाषा नाम परिनिष्ठिता भाषा अथवा व्याकरणबद्धा भाषा इत्यर्थः । सरलमानकसंस्कृतभाषा इत्युक्ते पाणिनिसम्मतैः व्याकरणांशैः संयुक्ता इत्यर्थः । मानकस्वरूपनिर्धारणावसरे ध्वनेः स्तरः, शब्दस्य स्तरः, वाक्यस्य स्तरः, रूपस्य स्तरः इत्यादयः पूर्वनिर्धारिताः भवन्ति । एवं मानकशब्दः भाषा प्रसङ्गे स्तरनिर्धारकः वर्तते ।

**संस्कृतम्-** प्रपञ्चेऽस्मिन् याः भाषाः विद्यन्ते तासु सर्वासु भाषासु संस्कृतं मुख्या वर्तते । संस्कृतादेव सर्वाः

[१] वेदविज्ञानामृतम् पृ.४९
[२] वाल्मीकिरामायणम् सुन्दरकाण्डः ३०/१८


ISSN : 2249-538X

भाषाः प्रभाविताः, पुष्टाः, समृद्धाश्च सन्ति इत्यतः एषा सर्वासां भाषाणां जननी इति कथ्यते । यथोक्तं-

**भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती**[1] ।

एषा भाषा भारतीयतायाः परिचायिका अस्ति । भारतीया संस्कृतिः अस्याम् आधारिता एवास्ति- **संस्कृतिः संस्कृताश्रिता** इति । संस्कृतं भारतीयज्ञानपरम्परायाः संवाहिका । एवं रत्नाकरवत् अस्याः भाषायाः गर्भे अनेकानि वेद-शास्त्राणि, पुराणानि, काव्यानि च निक्षिप्तानि सन्ति । अस्याः अङ्के इतर- भारतीयभाषाः लसन्ति क्रीडन्ति च । विश्ववाङ्मये तादृशं ज्ञानं नास्ति यत् संस्कृते न दृश्यते । तद्यथा-

**न तच्छिल्पं न तच्छास्त्रं न सा विद्या न सा कला ।नासौ योगो न तत्कर्म संस्कृते यन्न दृश्यते**[2] ॥

**उपादेयता-** कस्याऽपि कार्यस्य कापि उपादेयता तु अवश्यं भवत्येव । यथोक्तमपि-

**प्रयोजनं संप्रवृत्तेः कारणं फललक्षणम् ।प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते**[3] ॥ **इति**

जनानां मनसि या हीनभावना समुद्भूता तस्याः भावनायाः नाशः **सरलमानकसंस्कृतम्** अनेनैव भवितुं शक्नोति । युवक-युवतयः कस्याऽपि देशस्य भवितव्यस्य कारणं भवन्ति तर्हि तेषां सर्वाङ्गीणविकासाय सरलमानकसंस्कृतमाध्यमेन शिक्षणं भवेत् । अनेन ते संस्कृतोन्मुखाः भविष्यन्ति इति । उच्चशिक्षायां सरलमानकसंस्कृतद्वारा शिक्षणेन बहुविधलाभाः भवन्ति । यथोक्तं सरलमानकसंस्कृतस्वरूप-निर्धारणसमितौ - **१.७ भाषायाः व्यवहारे सरलतायाः आवश्यकता-** सामान्यतः भाषायाः प्रयोगे सारल्यस्य प्रयोजनानि प्रायः इत्थम्भूतानि भवन्ति- **१.७.१ मुख्यं प्रयोजनं** - १.१ लोकव्यवहारः । १.२ शिक्षणे माध्यमम् । **१.७.२ गौणं प्रयोजनम्** - २.१ प्रसारः २.२ पाठ्यपुस्तकनिर्माणम् २.३ भाषानुवादः २.४ साहित्यसमृद्धिः संस्कृतभाषा गणतन्त्रभारतस्य संविधानस्य अष्टम्याम् अनुसूच्यां विधिबद्धरूपेण अन्तर्भूता अस्तीत्यतः इतरासां भारतीयभाषाणाम् इव अस्याः अपि एतानि प्रयोजनानि सन्त्येव इति ज्ञेयम् ।

**१.७.१.१ लोकव्यवहारः** लोके सरलतया शुद्धतया च संस्कृतभाषया व्यवहारेण संस्कृतविषये जनानां संस्कृतं कठिनम् इति भ्रान्तिः अपगच्छति । तदर्थं केचन परिमिताः शब्दाः, परिमिताः क्रियाः (त्रिषु कालेषु), परिमितानि कानिचन वाक्यानि च चित्वा तैः परस्परं भावविनिगमकरूपेण संस्कृतस्य सामान्यः व्यवहारः आरम्भणीयः । अत्रेदं ज्ञातव्यं यत् आङ्ग्लाः भारतवर्षे आङ्गलभाषायाः प्रचारं यदा आरब्धवन्तः तदवसरे (१९३० तमवर्षसम्बद्धे दशके) केवलानाम् अष्टशतशब्दानां प्रयोगेण आङ्ग्लभाषया सहजतया व्यवहर्तुं शक्यते इति जनमनसि एतस्याः वैदेशिकभाषायाः सुखबोध्यतां सारल्यं च प्रदर्शितवन्तः आसन् । संस्कृतं तु अस्माकं

[1]सुभाषितरत्नभाण्डागारम्
[2]अन्तर्जालम्
[3]सर्ववेदान्तसिद्धान्तसारसंग्रहः

देशस्य मौलिकी भाषा । विविधेषु प्रान्तेषु साक्षात् संस्कृतशब्दाः (तत्सम-पदवाच्याः), संस्कृतात् उत्पन्नाः (तद्भव-पदवाच्याः) च शब्दाः प्रायः ७०-७५

**१.७.१.२ शिक्षणे माध्यमम्** विशेषरूपेण संस्कृतभाषाशिक्षणे एतावत्पर्यन्तं व्याकरणानुवादपद्धतेः प्रयोगः आधिक्येन भवति स्म । एषा पद्धतिः भाषाशिक्षणाय उपयुक्ता न इति इदानीं सर्वेषां मतं विद्यते । केवलं संस्कृताद् भाषान्तरेण अनुवादाय कदाचिद् एषा पद्धतिः उपयोगिनी स्यात् चेदपि जीवद्भाषायाः अध्ययने तु सर्वथा अनुपयोगिनी एव । संस्कृतम् अपि जीवद्भाषा एव इत्यतः तस्याः शिक्षणं तया एव भाषया स्यात् । तेन न केवलं संस्कृतवाङ्मये प्रवेशः भवति, अपि तु संस्कृतेन आधुनिकसाहित्यनिर्माणम् अपि शक्यं भवति ।

संस्कृतमाध्यमेन शिक्षणाभावात् एम्.ए., आचार्यः इत्याद्युपाधिधारिणोऽपि अधीतं विषयं संस्कृतेन प्रकटयितुम् असमर्थाः भवन्ति । एतादृशम् अनर्थकरम् उत्साहहीनं चित्रम् अपाकृत्य सार्थकम् उत्साहजनकं च पक्षं पोषयितुं सरलसंस्कृतेन शिक्षणविधिः अङ्गीकर्तव्यः एव । 'इतराभिः आधुनिकभाषाभिः शिक्षणम् अदत्त्वा यदि संस्कृतेन शिक्षणं दीयेत तर्हि संस्कृतच्छात्राणां संख्यायां न्यूनता आगमिष्यति इति केचन भीतिं प्राप्नुवन्ति । अस्थाने भीतिः एषा । वस्तुतः तु संस्कृतच्छात्राणां संख्यायां न्यूनता अपरेण कारणद्वयेन भवितुम् अर्हति । तच्च इत्थम्भूतम् -

१. निष्ठापूर्वकम्, निरन्तरतया, सर्वान्तर्भावेण, सरलतया च संस्कृतेत शिक्षणक्रियायाः अभावः ।

• निष्ठापूर्वकम्- आधुनिकभाषान्तरम् अस्वीकृत्य सर्वथा शिक्षणमाध्यमरूपेण संस्कृतस्य एव प्रयोगः ।

• निरन्तरतया- कतिपयदिनानि किञ्चित्कालं यावत् संस्कृतमाध्यमम् आश्रित्य अनन्तरं पुनः इतरभाषायाः प्रयोगः इति न ।

• सर्वान्तर्भावेण- एकस्यां संस्थायां द्वित्रविषयाणां व्याकरणन्यायादीनां शिक्षाणमाध्यमं संस्कृतम् । इतरेषा साहित्येतिहासादीनां शिक्षणभाषा प्रान्तीया भाषा अन्या वा आङ्ग्लादिः इति न ।

• सरलतया – विभिन्नविषयाणां सम्प्रेषणभाषाभावरीतयः सर्वथा परस्परम् अभिन्नाः अभूत्वा भिद्यन्ते इत्यतः तत्तद्विषयविशेषज्ञस्य स्वसम्बद्धविषये पाठनकौशलं सरलसंस्कृतेन यथा स्यात् तथा अपेक्षितं यत्नम् अभ्यासं च विधाय प्रवर्तनम् ।

२. व्याकरणानुवादपद्धत्याः स्थाने संस्कृतभाषाप्रयोगमाध्यमेन (न तु ग्रन्थपङ्क्तीनाम् अनुवादमुखेन) पाठन- कौशलस्य तदनुसारं स्तरानुगुणं (विद्यालय-महाविद्यालय-विश्वविद्यालय-संस्कृतपाठशालादिसम्बद्ध) प्रशिक्षणस्य अभावः । एतदभावद्वयस्य निरसनं भवति चेत् सम्पूर्णेऽपि देशे सर्वेषु इतरेषु पाठनक्रमेषु यथा हिन्दी-मराठी-कन्नड-आङ्ग्लादिषु स्वस्वमाध्यमेन शिक्षणं सफलतया प्रचलति तथा संस्कृतमाध्यमेन संस्कृतशिक्षणम् अपि सफलतया प्रचलेत् । एतदर्थं विश्वविद्यालयानुदानायोगः, केन्द्रियसंस्कृतविश्वविद्यालयः, इतरे संस्कृतविश्वविद्यालयाः, विश्वविद्यालयमहाविद्यालयानां संस्कृतविभागाः, केन्द्रीयमाध्यमिकशिक्षासमितिः, प्रान्तीयमाध्यमिकशिक्षासमितयः,


ISSN : 2249-538X

#213

संस्कृत- माध्यमिकशिक्षासमितयः, इत्यादिभिः "संस्कृतं संस्कृतेन" इति लक्ष्यम् उद्दिश्य आगामिषु पञ्चसु वर्षेषु एतस्य पूर्तये संस्कृतशिक्षकाणां तत्तत्स्तरानुगुणं प्रशिक्षणं, पक्षात्मिका कार्यशाला, प्रत्येकं पाठ्यक्रमे नवप्रवेष्टृणां छात्राणां कृते सरलसंस्कृतसेतुपाठ्यक्रमः च आयोजनीयाः इति सरलमानकसंस्कृतस्य प्रतिवेदनेऽपि लिखितम् अस्ति ।

१.७.२.१ **प्रसारः** सामान्यतः संस्कृतस्य उपयोगः केवलं बी.ए., एम्.ए., शास्त्री, आचार्यः, तीर्थः इत्यादीनाम् उपाधीनां प्राप्तिः, तन्मुखेन संस्कृताध्यापकरूपेण जीविकाप्राप्तिः इति अस्ति । किन्तु इदानीं कालः परिवृत्तः दृश्यते । सम्पूर्णे अपि देशे विदेशेषु च एतस्याः भाषायाः अध्ययनविषये, एतन्निहितानां वेदादिशास्त्राणां, रामायणादिकाव्यानां, वेदान्तादिदर्शनानां, मनु-याज्ञवल्क्यादिस्मृतीनाम् इतरेषां च कौटिल्यादिग्रन्थानाम्, आयुर्वेदादीनां च विषये महती श्रद्धा जिज्ञासा अनुसन्धित्सा च विद्यते । अतः संस्कृतनिबद्धानां विविधानां शास्त्राणां लोकेन सह सम्बन्धस्थापनाय माध्यमभाषारूपेण सरलसंस्कृतस्य प्रयोगः करणीयः । अनुवादिकायाः भाषायाः अनूद्यमानविषयप्रकाशने असामर्थ्यम्, अनुवादकस्य व्यक्तिविशेषस्य असामर्थ्यम् इत्यादीनां कारणतः परिवर्तितमूलभावार्थानाम् एव ग्रन्थानां बहुधा प्रचलनं दृश्यते । अतः सरलसंस्कृतेन संस्कृतभाषानिहितानां ज्ञानविज्ञानसम्बद्धानां तत्त्वानां प्रसारः करणीयः । तेषाम् अनुवादिका च भाषा सरलसंस्कृतं भवेत्, येन सर्वे अनायासेन तत्तत्-तत्त्वानि जानीयुः इति चिन्तनम् सर्वदा श्लाघ्यमेव ।

१.७.२.२ **पाठ्यपुस्तकनिर्माणम्-** वस्तुतः संस्कृतग्रन्थानां पाठनं संस्कृतेन करणीयं चेत्तदर्थं सरलसंस्कृतेन तेषां व्याख्यानात्मकानां पुस्तकानां निर्माणं करणीयम् । न्याय-व्याकरण-मीमांसादिग्रन्थाः विषयदृष्ट्या यथा गम्भीराः तथा तत्तद्ग्रन्थप्रयुक्तायाः प्रौढसंस्कृतभाषायाः कारणेनापि दुरूहाः सन्ति इत्यतः तत्र प्रवेष्टुकामानां कृते तेषां पाठ्यग्रन्थानां पुनः सरलसंस्कृतभाषया लेखनं प्रकाशनं च अपेक्ष्यते । संस्कृतभाषानिबद्धानां वाल्मीकि-व्यास-भास-कालिदासादीनां काव्यरचनानां सम्प्रेषणक्रमः सरलया संस्कृतभाषया लिखितैः पुस्तकैः पुनरपि प्रसरेत् । एतदतिरिच्य भूगोलेतिहासगणितविज्ञानादीनाम् आधुनिकानां पाठ्यविषयाणां पुस्तकानि अपि सरलसंस्कृतेन निर्मातव्यानि सन्ति, येन संस्कृतभाषायाः सर्वव्यापकत्वं, सर्वविषयाणाम् अवबोधनाय योग्यता सामर्थ्यवत्वं च सिद्धं भवेत् ।

१.७.२.३ **संस्कृतभाषानुवादः** अथ अन्याभिः भारतीयाभिः वैदेशिकीभिश्च भाषाभिः रचितानाम् उत्तमानां ग्रन्थानां संस्कृतेन अनुवादकरणेन संस्कृतसाहित्यम् आधुनिकतमं, सुसमृद्धं च भवेत् इति धिया प्रभूतानाम् अपरभाषानिबद्धानां ज्ञानविज्ञानसम्बद्धानां काव्य-कथा-नाट्यानां च संस्कृतानुवादः करणीयः । तदर्थं केवलं सरलं प्रामाणिकं च प्रवाहमयं संस्कृतम् एव उपयोक्तव्यम् । आधुनिककाले एतादृशः व्यवहारः बहुभिः जनैः विविधैः संघटनैः च क्रियमाणः दृश्यते । एतस्मिन् श्लाघ्ये कर्मणि सरलसंस्कृतस्य एव प्रयोगे कृते, इष्टसिद्धौ अधिका

व्यापकता, प्रामाणिकता च आगमिष्यति ।

**१.७.२.४ साहित्यसमृद्धिः** जगतीतले सर्वाभिः आधुनिकभारतीयभाषाभिः, आङ्ग्लादिवैदेशिकभाषाभिः च सह आत्मनः समानता स्वरूपयोग्यतासिद्धिः च करणीया चेत् तदर्थं संख्यात्मकदृष्ट्या, गुणात्मकदृष्ट्या च संस्कृतेन नवीनसाहित्यसृष्टिः अवश्यं करणीया । साहित्यस्य सर्वासु विधासु सर्वेषु आधुनिकविषयेषु च संस्कृतरचनाः स्युः । यद्यपि आधुनिके काले संस्कृतरचनायाः नव्यः कालः समायातः, तथापि सर्वथा लेखकैः सरलसंस्कृतस्य एव प्रयोगः कृतः इति नास्ति । यदि इदानीन्तनसंस्कृतरचनानां भाषा पूर्वरचनानाम् इव प्रौढा स्यात् तर्हि आधुनिकभाषाभिः सह समभावं समानगतिं च विनिश्चित्य बहुदूरं गमने महत् काठिन्यम् आपतिष्यति । अतः सहजा सकलजनैः ग्राह्या हृद्या रम्या प्रामाणिकी संस्कृतभाषा एव प्रयोक्तव्या । तेन जनमनसि 'संस्कृतं कठिनम्' इति यः भावः विद्यते सः स्वयमेव अपसृतः भवष्यति । किं च संस्कृतं पुनरपि स्वस्य सर्वजनभाषास्वरूपम् आश्रित्य सुप्रतिष्ठितं भविष्यति उच्चस्तरे तु संस्कृतभाषा या उपयुज्यते सा सरलमानकसंस्कृतभाषा भवतु इति सर्वेषां सारस्वतानां मनीषा ।

**सन्दर्भग्रन्थाः-**


1. राष्ट्रीय संस्कृत परिषद्, सरलमानकसंस्कृतस्वरूपनिर्धारणसमितिः,नवदेहली
2. शास्त्री चमूकृष्णः, संस्कृतकक्ष्या, संस्कृतसंवर्धनप्रतिष्ठानम्,नवदेहली
3. डॉ.नरेन्द्रः,संस्कृतस्य व्यावहारिकस्वरूपम्,श्री अरविन्दाश्रमः,पुदुच्चेरी
4. वाल्मीकि रामायणम्,सुन्दरकाण्डम्,गीताप्रेस गोरखपुर
5. सुभाषितरत्नभाण्डागारम्
6. रुचिरा NCERT
7. निबन्धशतकम् पृ.२३
8. वेदविज्ञानामृतम् पृ.४९
9. सर्ववेदान्तसिद्धान्तसारसंग्रहः
10. गीतमञ्जरी,संस्कृतभारती,अक्षरं बैङ्गलूरु
11. ऋग्वेद १०.८५.१९


 ISSN : 2249-538X

# 215

# आध्यात्मिकबुद्धौ सहसम्बन्धात्मकाध्ययनानि

(Correlational studies in Spiritual Intelligence)

श्रीश समीर के. एस्.*

**शोधसारः –**

सहसम्बन्धात्मकाध्ययनेन आध्यात्मिकबुद्धेः विविधानां मनोवैज्ञानिकानाम्, सांवेगिकानाम्, व्यावहारिकाणाञ्च अभिवृत्तिभिः सह सम्बन्धः कीदृशः अस्तीति ज्ञातुं शक्यते । आध्यात्मिकबुद्धेः प्रमुखायामानाम् निश्चयः भवति तथैव आध्यात्मिकबुद्धेः अन्यैः बुद्धिसिद्धान्तैः सह ज्ञानसिद्धान्तैः सह वा सम्बन्धनिरूपणेन अन्तर्विषयकशोधाः तुलनात्मकाध्ययनानि च कर्तुं शक्यते । सहसम्बन्धात्मकाध्ययनेन आध्यात्मिकबुद्धेः विकासे प्रतिपादितानां सिद्धान्तानां क्रमे प्रभावकारितत्वानां निरूपणमपि प्रदर्शयितुं शक्यते । अस्मिन् सर्वेक्षणे धनात्मकाः सार्थकसहसम्बन्धाः बहुषु चरेषु दृष्टाः यथा मानसिकस्वास्थ्यम्, दुष्चिन्तानिवारणम्, नियन्त्रिताभावः, आततिशक्तिः, विशिष्टच्छात्राणां जीवनसन्तुष्टिः, धनात्मकसंवेगः, भागग्रहणम्, सम्बन्धः, तात्पर्यः, सम्पूर्तिश्च पञ्च PERMA उपागमाः, सन्तोषः, शोध-आत्मप्रभाविता, अभिवर्धनात्मकं नेतृत्वं च ।

**प्रमुखशब्दाः** – आध्यात्मिकबुद्धिः, सहसम्बन्धः, धनात्मकसहसम्बन्धः, नकारात्मकसहसम्बन्धः, बुद्धिः, SISRI-24, PERMA.

**पीठिका -**

आध्यात्मिकबुद्धिः (Spiritual Intelligence) – आध्यात्मिकबुद्धिः नाम उद्देश्यार्थपरमर्थादीनां मानवानुभवानां गहनायामानां परिचितिः अन्तःसम्बन्धकल्पनक्षमता च अस्ति । आध्यात्मिकबुद्धिरिति पदप्रयोगः बहुभिः दार्शनिकैः मनोवैज्ञानिकैः विकाससिद्धान्तप्रतिपादकैश्च बुद्धिलब्धेः सहवर्तिषु आध्यात्मिकसम्बन्धान् सूचयितुं कृतः अस्ति । प्रथमतः आध्यात्मिकबुद्धिरिति पदस्य प्रतिपादिकया Danah Johar महोदयया अस्याम् आत्मजागर्या, सक्रियता, उद्देश्यनिष्ठता, समग्रता, अमानितादयः गुणाः अन्तर्भवन्तीति उक्तमस्ति । अनन्तरकालेषु बहुभिः वैज्ञानिकैः यथा Ken o'Donnell, Robert Emmons, Frances Vaughan, Cindy Wigglesworth, Yosi Amram, David B. King, Vineeth V. Kumar, Manju Mehta इत्यादिभिः आध्यात्मिकबुद्धेः स्वस्वपरिभाषाणां निर्माणेन मापनं परीक्षणञ्च कृतमस्ति ।

सहसम्बन्धात्मकाध्ययनानि (Correlational Studies) - वैज्ञानिकानां मतमस्ति यत् केवलम् एकस्यैव चरस्य मूल्याकलनापेक्षया उभयोः चरयोः मध्ये विद्यमानस्य सम्बन्धस्य अध्ययनं प्रासङ्गिकं लाभकरञ्च वर्तते इति । सहसम्बन्धस्य अङ्केषु यदि अनुसन्धात्रा '1' इति प्राप्यते चेत् उभयोः चरयोः मध्ये 100 प्रतिशतं समानता अस्तीति ज्ञायते । यदि परिणामः '-1' इति प्राप्यते चेत् उभयोः चरयोः मध्ये 100 प्रतिशतं वैपरीत्यमस्तीति ज्ञायते । अतः वक्तुं शक्यते यत् सहसम्बन्धस्य परिणामाः -1 तः 1 मध्ये एव तिष्ठति इति । 0 इति

*शोधच्छात्रः, केन्द्रीयसंस्कृतविश्वविद्यालयः, मुख्यालयः, नवदेहली

प्राप्ते सति सम्बन्धः नास्तीति । उदाहरणार्थं शान्तेः अनुशासनस्य च सहसम्बन्धकल्पनावसरे 0 तः 1 पर्यन्तसीमायां परिणामः तिष्ठति चेत् यावत् अनुशासनस्य वृद्धिः भवति तावात् शान्तेश्च वृद्धिः भवतीति । यदि परिणामः 0 तः -1 पर्यन्तसीमायां तिष्ठति चेत् यावत् अनुशासने वृद्धिः भवति तावत् शान्तिः क्षीणा भवतीति । एवम् उभयत्र 0.5 तः एवं -0.5 तः सहसम्बन्धाङ्कः अधिकः भवति चेत् तत् उभयोः चरयोः मध्ये उत्तमसहसम्बन्धं सूचयति ।

आध्यात्मिकबुद्धौ सहसम्बन्धात्मकाध्ययनस्य आवश्यकता -

सहसम्बन्धात्मकाध्ययनेन आध्यात्मिकबुद्धेः विविधानां मनोवैज्ञानिकानाम्, सांवेगिकानाम्, व्यावहारिकाणाञ्च अभिवृत्तिभिः सह सम्बन्धः कीदृशः अस्तीति ज्ञातुं शक्यते ।

सहसम्बन्धपरीक्षणेन आध्यात्मिकबुद्धेः विविधजीवनसन्दर्भेषु सम्भावितप्रभावस्य आकलनं भवितुं शक्यते ।

अध्यात्मिकबुद्धेः उच्चनिम्नस्तराभ्यां सह विविधाभिकरणानां सम्बन्धः कथमस्तीति अनेन अध्ययनेन ज्ञायते ।

सूक्तसहसम्बन्धानां ज्ञानेन आध्यात्मिकबुद्धेः प्रमुखायामानाम् निश्चयः भवति येन मापनोपकरणानां सृजनं वैधतानिरूपणञ्च भवितुं शक्यते ।

सहसम्बन्धनिरूपणे आध्यात्मिकबुद्धेः प्रत्येकाभिकरणानां कियत् योगदानमस्तीति सहसम्बन्धात्मकप्रविधिभिः एव ज्ञायते ।

आध्यात्मिकबुद्धेः अन्यैः बुद्धिसिद्धान्तैः सह ज्ञानसिद्धान्तैः सह वा सम्बन्धनिरूपणेन अन्तर्विषयकशोधाः तुलनात्मकाध्ययनानि च कर्तुं शक्यते ।

सहसम्बन्धात्मकाध्ययनेन आध्यात्मिकबुद्धेः विकासे प्रतिपादितानां सिद्धान्तानां क्रमे प्रभावकारितत्वानां निरूपणमपि प्रदर्शयितुं शक्यते ।

**सहसम्बन्धात्मकाध्ययनानां सारः अत्र क्रमशः निरूप्यते –**

1. Spiritual Intelligence and Thinking Style as Determinants of Well Being A Comparative Study Between Two Regions **अस्य शोधस्य उद्देश्यमासीत् यत् किशोराणां शारीरकस्वास्थ्यैः** (Physical Well Being), **आध्यात्मिकजीविकाभिः** (Spiritual Well Being), **मानसिकस्वास्थ्यैः** (Mental Health), **आत्मविश्वासेन** (Hopefulness), **दुष्चिन्तानिवारणेन** (Lack of Anxiety), **नियन्त्रिताभावैः** (Feeling of Control), **सन्तोषेण** (Happiness) **च सह आध्यात्मिकबुद्धेः चिन्तनशैलीनाम्** (Thinking Style), **लिङ्गस्य** (Gender) **च सहसम्बन्धानाम् अध्ययनम् । अत्र उत्तमजीविकायाः** (Well Being) **उपागमत्वेन शारीरिकस्वास्थ्य-आध्यात्मिकजीविकादयः सप्त अंशाः स्वीकृताः सन्ति । किञ्च महोदयेन निर्मितम् आध्यात्मिकबुद्धेः**


ISSN : 2249-538X

# 217

34 पदात्मकम्, राव् एवं सिङ्ग् महोदयाभ्यां निर्मितम् उत्तमजीविकायाः 32 पदात्मकम्, जान, सिङ्ग् एवं वर्मा महोदयैः चिन्तनशैल्याः 30 पदात्मकञ्च तिस्रः मापन्यः उपयुक्ताः सन्ति। आध्यात्मिकबुद्धेः मानसिकस्वास्थ्यैः दुष्चिन्तानिवारणेन नियन्त्रिताभावैः च सह धनात्मकसहसम्बन्धः वर्तते इति परिणामः निष्कर्षरूपेण प्राप्तः अस्ति।

2. Spiritual Intelligence from languishing to flourishing and mediating effect of mindfulness इत्यस्मिन् अनुसन्धाने नवानां यूनाम् आध्यात्मिकबुद्ध्या सह धनात्मकसंवेगस्य (Positive Emotion), भागग्रहणस्य (Engagement), सम्बन्धानां (Relationship), तात्पर्याणां (Meaning), सम्पूर्तेश्च (Accomplishment) पञ्च PERMA उपागमानां सहसम्बन्धे चित्तपरिपूर्तये मध्यस्थीकरणप्रभावाणाम् अध्ययनं करोति। PERMA उपागमेषु धनात्मकसंवेगेषु भागग्रहणे सम्पूर्तौ च मध्यस्थत्वेन मनःपूर्तेः प्रभावः दृष्टः अस्ति। अस्मिन् अनुसन्धाने अनुसन्धात्रा Correlation, Regression एवं Mediation सांख्यिकीयप्रविधीनां प्रयोगः कृतोऽस्ति।किङ्ग् महोदयस्य SISRI 24 मापन्याः प्रयोगेण आध्यात्मिकबुद्धेः, PERMA Profiler साहाय्येन PERMA उपागमानां एवं MAAS (Mindful attention Awareness Scale) साहाय्येन यूनां चित्तपूर्तेश्च आकलनं कृतमस्ति।

3. Impact of Spiritual Intelligence on Achievement Motivation among Indian Young Adults इत्यस्मिन् अध्ययने अनुसन्धातारौ भारतीययूनां उपलब्ध्याभिप्रेरणे आध्यात्मिकबुद्धेः सहसम्बन्धस्य निरूपणं कुरुतः। अन्तर्जालमाध्यमेन SISRI-24 एवम् Achievement Motivation Scale (AMS) उपकरणानां साहाय्येन च अत्र दत्तांशानां सङ्कलनं विधाय सहसम्बन्धपरीक्षणेन इदं ज्ञातं यत् उपलब्ध्याभिप्रेरणाध्यत्मिकबुद्ध्योः मध्ये सार्थकः सहसम्बन्धः नास्तीति। जनसंख्यायाः स्पष्टतायां न्यादर्शचयनप्रक्रियाणां चयने वा लोपात् एतस्य अनुसन्धानस्य सामान्यीकरणं सम्पूर्णभारते भवितुं न शक्यते।

4. Relationship Between Spiritual Intelligence and Academic Adjustment of Undergraduate Student with Reference to their Demographic Variables अत्र पूर्वस्नातकच्छात्राणाम् अध्ययनधाराम्, लिङ्गम्, स्थानम् च चरत्वेन स्वीकृत्य आध्यात्मिकबुद्धेः शैक्षिकसमायोजनानां च मध्ये विद्यमानसम्बन्धस्य अध्ययनम् अत्र कृतमस्ति। सरबजित् कौर महोदयेन रचितस्य Sixfold Spiritual Intelligence उपकरणस्य एवं प्रभातकुमारमहोदयेन निर्मितस्य Academic Adjustment मापन्योः प्रयोगमत्र ३० छात्राणामुपरि कृतमस्ति। अत्रापि उभयोः चरयोः

मध्ये सार्थकसहसम्बन्धः न द्रष्टुं शक्यते। अस्यांशस्य समर्थने अनुसन्धात्रा अन्येषाम् अनुसन्धानानां परिचयं कारितमस्ति यथा मेरियल् महोदयेन आध्यात्मिकबुद्धि-भागग्रहीत्रोपलब्ध्योः, रोबट् महोदयेन आध्यात्मिकबुद्धि-अध्यापकसमायोजनयोः च सार्थकसहसम्बन्धः नास्तीति ।

5. Spiritual Intelligence and its Correlation with Life Satisfaction among Gifted Students अस्मिन् शोधे विशिष्टच्छात्राणां जीवनसन्तुष्ट्या सह आध्यात्मिकबुद्धेः सहसम्बन्धस्य अध्ययने Al-Shawi महोदयेन निर्मितायाः 68 पदात्मिकायाः आध्यात्मिकबुद्धिमापन्याः तथैव Al-Dasoqi महोदयेन निर्मितायाः 30 पदात्मिकायाः जीवनसन्तुष्टिमापन्याः प्रयोगः कृतमस्ति । 0.326 स्तरे उभयोः चरयोः मध्ये सार्थकसहसम्बन्धः दृष्टोऽस्ति ।

6. A Correlational study of Spiritual Intelligence, Resilience and Percieved Stress among University Students of Peshawar इत्यस्मिन् शोधे पेशावरविश्वविद्यालयच्छात्राणां विदिततन्यतायाः, आततिशक्तेः, आध्यात्मिकबुद्धेश्च त्रयाणां मध्ये विद्यमानानां सहसम्बन्धानाम् अध्ययन-मेव उद्दिष्टमस्ति । Spiritual Intelligence Self-Report Inventory (SISRI), Brief Resilience Scale (BRS) एवं Perceived Stress Scale (PSS) इत्येतेषाम् उपकरणानां प्रयोगः अत्र कृतमस्ति । यावत् आध्यात्मिकबुद्धौ वृद्धिः भवति तावत् विदिततन्यतायां लोपः दृश्यते इति नकारात्मकस-हसम्बन्धः -0.426 दृष्टः अस्ति । एवञ्च आध्यात्मिकबुद्धि-आततिशक्त्योः मध्ये सार्थकसहसम्बन्धः 0.163 इति दृष्टः अस्ति ।

7. A Study of the Relationship between Spiritual Intelligence and its components with Happiness in Youths इत्यत्र यूनां सन्तोषे आध्यात्मिकबुद्ध्याभिकरणानां कीदृशः सहसम्बन्धः अस्तीति अस्मिन् शोधे परीक्षितमस्ति । राज्यस्थानां विश्वविद्यालयस्नातकच्छात्रेषु बहुस्तरीय-न्यादर्शचयनपद्धत्या न्यादर्शनेन प्राप्तानां 375 यूनां सर्वेक्षणं Argyle Spiritual Intelligence Questionnaire एवं Oxford Happiness Questionnaire द्वारा कृतमस्ति । अत्र निष्कर्षं प्राप्तं यत् उभयोः चरयोः मध्ये सार्थकसहसम्बन्धः अस्तीति । पुनः लिङ्गाधारेण Independent T test परिणामैः ज्ञातं यत् उक्तचरयोः सहसम्बन्धे लिङ्गाधारेण भेदः अस्तीति ।

8. A Correlation analysis of Transformational Leadership and Spiritual Intelligence आदर्शगुणांशानि (Idealised Attributes), आदर्शव्यवहारः (Idealised Behaviours), अभिप्रेरणा (Inspirational motivation), बौद्धिकानुरूपनम् (Intellectual Stimulation), वैयक्तिकस्वीकृतिः (Individual Consideration). प्रोत्साहनम् (Contingent

 ISSN : 2249-538X

# 219

Reward), प्रबन्धनम् (Management) इत्यादिभिः लक्षणैः युक्तस्य अभिवर्धनात्मकनेतृत्वस्य (Transformational Leadership) आध्यात्मिकबुद्धेश्च मध्ये सहसम्बन्धानाम् अध्ययनम् अनेन क्रियते। The Multifactor Leadership Questionnaire द्वारा transformational leadership लक्षणानां तथैव PsychoMatrix Spiritual Inventory द्वारा आध्यात्मिकबुद्धेः च आकलनं कृतमस्ति। अमेरिकादेशस्य an Armed Forces Reserve Center इत्यस्य 115 भागग्रहीतॄन् आदर्शत्वेन चित्वा कृते आकलने उभयोः चरयोः सार्थकसहसम्बन्धः अस्तीति सम्प्राप्तमस्ति।

9. Predictng Research Self Efficacy through Spiritual Intelligence and Academic stress in Medical Students वैद्यकीयच्छात्राणां शोध-आत्मप्रभावितायाः परिकल्पने आध्यात्मिकबुद्धेः शैक्षिकतन्यतायाश्च वैयक्तिकयोगदानानाम् आकलनमत्र उद्देश्यमस्ति। न्यादर्शत्वेन 301 छात्राः स्वीकृताः येषां आकलनं Research Self-Efficacy Scale, SI Questionnaire एवं Academic Stress Inventory द्वारा कृतमस्ति। आध्यात्मिकबुद्धेः अधिकयोगदानं आत्मप्रभावितायां दृष्टमस्ति यत् सार्थकसहसम्बन्धं द्योतयति।

**निष्कर्षः**

अध्ययनानाम् आधारेण प्राप्तानां सहसम्बन्धानां सूची अधोलिखितमस्ति।

1. सार्थकसहसम्बन्धाः (धनात्मकाः) – मानसिकस्वास्थ्यम् (Mental Health), दुश्चिन्तानिवारणम् (Lack of Anxiety), नियन्त्रितताभावः (Feeling of Control), आततिशक्तिः (Resilience), विशिष्टच्छात्राणां जीवनसन्तुष्टिः (Life Satisfaction of Gifted students), धनात्मकसंवेगः (Positive Emotion), भागग्रहणम् (Engagement), सम्बन्धः (Relationship), तात्पर्यम् (Meaning), सम्पूर्तिश्च (Accomplishment) पञ्च PERMA उपागमाः, सन्तोषः (Happiness), शोध-आत्मप्रभाविता (Research Self Efficacy), अभिवर्धनात्मकं नेतृत्वम् (Transformational Leadership)
2. सार्थकसहसम्बन्धः (नकारात्मकः) - विदिततन्यता (Perceived Stress)
3. सहसम्बन्धस्याभावः (Lack of Correlation) शारीरकस्वास्थ्यम् (Physical Well Being), आध्यात्मिकजीविका (Spiritual Well Being), आशंसनम् (Hopefulness), शैक्षिकसमायोजनम् (Academic Adjustment), सन्तोषः (Happiness), उपलब्ध्याभिप्रेरणा (Achievement Motivation), भागगृहीत्रोपलब्धिः (Participant's Achievement)
4. मध्यस्थीकरणप्रभावः - चित्तपूर्तिः (Mindfulness)

अत्र अध्ययनेषु अधोलिखितोपकरणानां प्रयोगः दृश्यते -

1. Spiritual Intelligence Self Report Inventory (SISRI- 24), King (2008)
2. Wellbeing Scale (32), Rao and Singh (2013)
3. Thinking Style Scale (30), John Singh and Verma (2005)
4. The PERMA Profiler (15), Butler and Kern (2016)
5. Mindful Attention Awareness Scale (15), Brown and Ryan (2003)
6. Achievement Motivation Scale (40), Beena Shah (1986)
7. Sixfold Spiritual Intelligence, Sarabjit Kaur (2017)
8. Academic Adjustment, Prabhat Kaur
9. Spiritual Intelligence test (68), Al Shawi (2012)
10. Life Satisfaction Test (30), Al Dasoqi (1998)
11. Brief Resilience Scale – Assessing the ability to bounce back (6), Smith B.W. (2008)
12. Perceived Stress Scale (10), Sheldon Cohen (1983)
13. Argyle Spiritual Intelligence Questionnaire (29), Argyle et al (1989)
14. Oxford Happiness Questionnaire (29), Michael Argyle and Peter Hills (2002)
15. PsychoMatrix Spiritual Inventory (49), Wolman (2001)
16. Multifactor Leadership Questionnaire (45), Bernald and Bruce (1995)
17. Research Self Efficacy Scale (53), Greeley (1989)
18. Academic Stress Inventory (34), Ying Ming and Farn Shing (2009)

एवं सहसम्बन्धात्मकम् अध्ययनम् एकं वैज्ञानिकं वस्तुनिष्ठं च अध्ययनम् अस्तीति अनेन ज्ञायते ।

**सम्बद्धस्रोतांसि**

Ojha, Hansita (2016), Spiritual Intelligence and Thinking Style as Determinants of Well Being A Comparative Study Between Two Regions, Pt. Ravishankar Shukla University


ISSN : 2249-538X

Jaithalia, Ritika (2023) Spiritual Intelligence from languishing to flourishing and mediating effect of mindfulness, IIS

Kumar, Aditya & L. Lokesh (2023) Impact of Spiritual Intelligence on Achievement Motivation among Indian Young Adults, IJIP-volume 11, issue 2

Suna Gopikanta, Behera Bandana (2024) Relationship Between Spiritual Intelligence and Academic Adjustment of Undergraduate Student with Reference to their Demographic Variables, IJFMR – Volume 6, issue 2

Ahmad M & Amal Alotaibi (2017) Spiritual Intelligence and its Correlation with Life Satisfaction among Gifted Students, IISTE – Volume 8, 36

Khan Sommaya & Syeda (2023) A Correlational study of Spiritual Intelligence, Resilience and Percieved Stress among University Students of Peshawar, CARC, Vol 2 No.3

Fatemeh & Uma Rangan (2014) A Study of the Relationship between Spiritual Intelligence and its components with Happiness in Youths – IJHSS, Volume 2, issue 5

Heather Christ Lakin (2010) A Correlation analysis of Transformational Leadership and Spiritual Intelligence, University of Phoenix

Parasto Hosseinabadi, Saeed Bhaktiyarpour & Parviz Azgari (2023) Predictng Research Self Efficacy through Spiritual Intelligence and Academic stress in Medical Students, Azad University, Iran (RDME Journal)

Garret, Henry (2022) Statistics in Psychology and Education, Paragon International Publishers, New Delhi

Johar, Danah & Marshall Ian (2022) Spiritual Intelligence- The Ultimate Intelligence, Thomson press India Limited.

सहसम्बन्धात्मकाध्ययनेन आध्यात्मिकबुद्धेः विविधानां मनोवैज्ञानिकानाम्, सांवेगिकानाम्, व्यावहारिकाणाञ्च अभिवृत्तिभिः सह सम्बन्धः कीदृशः अस्तीति ज्ञातुं शक्यते । आध्यात्मिकबुद्धेः प्रमुखायामानां निश्चयः भवति

तथैव आध्यात्मिकबुद्धेः अन्यैः बुद्धिसिद्धान्तैः सह ज्ञानसिद्धान्तैः सह वा सम्बन्धनिरूपणेन अन्तर्विषयकशोधाः तुलनात्मकाध्ययनानि च कर्तुं शक्यते । सहसम्बन्धात्मकाध्ययनेन आध्यात्मिकबुद्धेः विकासे प्रतिपादितानां सिद्धान्तानां क्रमे प्रभावकारितत्वानां निरूपणमपि प्रदर्शयितुं शक्यते । अस्मिन् सर्वेक्षणे धनात्मकाः सार्थकसहसम्बन्धाः बहुषु चरेषु दृष्टाः यथा मानसिकस्वास्थ्यम्, दुष्चिन्तानिवारणम्, नियन्त्रिताभावः, आततिशक्तिः, विशिष्टच्छात्राणां जीवनसन्तुष्टिः, धनात्मकसंवेगः, भागग्रहणम्, सम्बन्धः, तात्पर्यम् , सम्पूर्तिश्च पञ्च PERMA उपागमाः, सन्तोषः, शोध-आत्मप्रभाविता, अभिवर्धनात्मकं नेतृत्वं च ।


ISSN : 2249-538X

# शब्दार्थरत्ने साध्वसाधुशब्दविमर्शः

डा. अभिजित् घोषः*

**शोधसारः –**

सुविदितं यत् असाधुशब्देभ्यः साधुशब्दानां पृथक्करणं पदशास्त्रस्य हृद्यम् । तदतिरिच्य दार्शनिकतत्त्वमपि नूनं प्रतिपाद्यते शास्त्रेणानेन । तादृशः दर्शनतत्त्वप्रतिपादकः कश्चनः रत्नविशेषः ग्रन्थः शब्दार्थरत्नम् इति । प्रकृते पदशास्त्रस्य दार्शनिकमहिमानं मिताक्षरैः प्रतिपाद्य ग्रन्थकर्तुः तारानाथतर्कवाचस्पतेः सामान्यपरिचयं प्रदाय साक्षात् शब्दसाधुत्वविवेकः प्रस्तुतः । यथा असाधुशब्दैः साधुशब्दवत् अर्थावबोधस्तु क्रियते । तथापि उभयोः समानत्वेऽपि तयोः पृथक्त्वमपि परिलक्ष्यते । तत्र साधुशब्दप्रयोगेण पुण्यम्, असाधुशब्दप्रयोगेण पुण्याभावः । इत्थं समासेन यथामति साध्वसाधुशब्दविवेकः विश्लेषितः, विशेषस्तु शोधनिबन्धे ।

**प्रमुखशब्दाः** – शब्दार्थरत्नं, तारानाथतर्कवाचस्पतिः, साधुशब्दः, असाधुशब्दः, अपभ्रंशः, व्याकरणं चेति ।

**उपोद्घातः**

शब्दार्थरत्नम् इति व्याकरणदर्शनप्रतिपादकः कश्चन महान् अभिनवग्रन्थः । ग्रन्थस्यास्य प्रणेता महान् पण्डितः तारानाथभट्टाचार्यः । आचार्येण युववयसि ग्रन्थोऽयं विरचितः । तारानाथाचार्यस्य प्रथमा कृतिः 'शब्दार्थरत्नम्' इति । ग्रन्थस्यास्य अन्तिमं संस्करणं १९०२ ई. वर्षे जीवनानन्दविद्यासागरेण प्रकाशितम् । यच्च जीर्णप्रायं भङ्गुरञ्सीत् । अध्येतृणां कृते पदशास्त्रस्यार्थपक्षे प्रवेष्टुं ग्रन्थोऽयं रत्नसदृशः । वैयाकरणसिद्धान्तकौमुदीम् अष्टाध्यायीं वा अधीतवताम् अध्येतृणाम् अवगमनमिह सुगमतया भवति । पदशास्त्रे प्रक्रियाव्यापारस्य साङ्गतासिद्धिरर्थपक्षानुशीलनेनैव सम्भवेत् । यतो हि शब्दार्थौ परस्परं हि सम्पृक्तौ भवतः । एवं नव्यवैयाकरणमूर्धन्यस्य परमलघुमञ्जूषापेक्षया प्रमेयविषयाः प्रकृते ग्रन्थेऽस्मिन् अधिकाः वर्तन्ते । अत्र एकस्मिन् समूहे एव वाक्यपदीय-भूषण-मञ्जूषादीनां परिशीलनं सम्भवति । एवं दक्षिणारूपेण शिक्षाग्रन्थस्य वर्णविचारोऽपि स्पष्टीभवति । साम्प्रतं सम्पूर्णानन्द-संस्कृतविश्वविद्यालयेन प्रकाशितौ रामाज्ञापाण्डेयकृतौ व्याकरणदर्शनभूमिका-व्याकरणदर्शनपीठिकाभिधानौ द्वौ ग्रन्थौ पदशास्त्रस्य दर्शनविचारसन्दर्भे नूनं सहायकौ वर्तेते, तथैव पदशास्त्रदर्शनज्ञाने सहायकः तादृशः ग्रन्थविशेषः । ग्रन्थेऽस्मिन् आदौ 'ग्रन्थारम्भप्रयोजनादि, व्याकरणस्यार्थः, साधुशब्दलक्षणं, लक्षणेऽव्याप्तिपरिहारः, अनपभ्रंशेन टिघुभादीनां साधुत्वं, जातिविशेषस्य साधुत्वं, तार्किकमतेन शब्दः, ध्वनिनिरूपणं, वर्णोत्पत्तिनिरूपणं, मध्यमावैखरी च, वर्णविभाग, उच्चारणस्थानानि, प्रयत्नविमर्शः' इत्येतान् विषयान् सम्यक् विचार्य्य 'वाक्यर्थबोधविचारः(ब्रह्मकाण्डम्), लकारार्थप्रकरणं, कृल्लक्षणं, नामार्थनिरूपणं, वृत्ति-विवेचनं, निपातार्थः, नञर्थः, सुबर्थनिरूपणम् ' इति विषयान् प्रतिपादिवान् । अत्र केवलं ग्रन्थस्थः साध्वसाधुशब्दविमर्शः प्रस्तुयते । तारानाथाचार्येण ग्रन्थारम्भे 'अनपभ्रंशेन टिघुभादीनां साधुत्वम्'

*अनौपचारिकसंस्कृतशिक्षकः, केन्द्रीयसंस्कृतविश्वविद्यालयः, भारतीयप्रौद्यगिकीसंस्थानम्, हैदराबादः

इत्यभिधानेन सुष्टुतया सारगर्भितसाध्वसाधुशब्दविचारः समासेन प्रकटितः ।

**ग्रन्थकर्ता तारानाथतर्कवाचस्पतिः**

ग्रन्थस्यास्य कर्तुर्नाम सुप्रसिद्धः वङ्गविद्वान् तारानाथभट्टाचार्य इत्यसीत् । तर्कशास्त्रे वैदुष्यात् विलक्षणयोग्यतया कलकात्तासंस्कृतकालेजस्य आचार्यैः असौ तारानाथभट्टाचार्यः 'तर्कवाचस्पतिः' इत्युपाधिना समलङ्कृतः । तेन तारानाथभट्टाचार्यः 'तारानाथतर्कवाचस्पतिः' इति नाम्ना अपि सुप्रसिद्धः । आचार्येण सुमहान् पाण्डित्यपूर्णः शब्दकोशोऽपि प्रकाशितः, यस्तु षड्सु खण्डेषु 'वाचस्पत्यमिति' अभिधानेन अलङ्कृतः । एवं पण्डितनिकाये वाचस्पत्यकाररूपेणैव आचार्यस्य प्रसिद्धिः वरीवर्तते । आचार्यः १८१२ ई. वर्षे कालिदासभट्टाचार्यस्य सुतत्वेन पारम्पारिकविदुषां कुले वङ्गप्रदेशस्य अम्बिकाजनपदे जनिं लेभे । आचार्यस्य प्रारम्भिकी शिक्षा स्वजनपदे एव जाता । तेन बाल्यवयसि एव नैके कोशग्रन्थाः काव्यग्रन्थाश्च अधीताः । गच्छता च कालेन संस्कृतकालेजे तारानाथेन पारम्पारिकतया गुरुभ्यः नैकानि शास्त्राणि अधीतानि । तदन्तरं सः पित्रा काशीं प्रति नीतः, तत्र तेन बहुभिः वर्षैः महता प्रयत्नेन वेदान्तशास्त्रस्य पाणिनीयव्याकरणस्य च स्वाध्यायः आचरितः । नैकेषु शास्त्रेषु निष्णातः तारानाथभट्टाचार्यः कालनापाठशालायां प्राचार्यपदेन नियुक्तः । पुनः २३ जुलाई, १८४५ ई. दिवसे कलकात्तासंस्कृतकालेजे(राजकीयसेवायां) प्रथमश्रेणीप्राचार्यत्वेन योगादानं चक्रे । तारानाथस्य तत्र नियुक्तौ ईश्वरचन्द्रविद्यासागरस्य महती प्रचेष्टा आसीत् । एवं विद्यासागरस्य महता वैदुष्येण भृशं प्रभावितः तारानाथभट्टाचार्यः । तस्मिन् संस्कृतकालेजे देववाण्याः विविधैः प्रकाण्डविद्वद्भिः सह तस्य शास्त्रार्थसभा प्रचलन्ती आसीत् । तेषु मदनमोहनतर्कालङ्कार-प्रेमचन्द्रतर्कवागीश-भरतचन्द्रशिरोमणिजयनारायणतर्कपञ्चाननादयः आसन् । एवम् आचार्यस्य अध्यापनावसरे विविधानां शास्त्रग्रन्थानाम् अध्ययनेन स्वीयं व्याकरणदर्शनग्रन्थं 'शब्दार्थरत्नम्' इति विरच्य स्वयमेव १८५१ ई. वर्षे प्रकाशयामास । तद् अनुपदमेव वङ्गभाषया समानविषयकमेव 'वाक्यमञ्जरी' इति ग्रन्थं विलिख्य मुद्रयाञ्चकार ।

आचार्येण स्वकर्मजीवने प्रथमतया नैके संस्कृतग्रन्थाः प्रकाशिताः । आविश्वे इमे ग्रन्थाः सादरं ख्यातिमाप्तवन्तः । आचार्येण सम्पादितानां रचितानाञ्च ग्रन्थानां संख्या षड्विंशतिरिति सूचितं प्रफुल्लमित्रेण । ते च ग्रन्थाः – शब्दार्थरत्नम् (१८५१), वाक्यमञ्जरी (१८५१), वैयाकरणभूषणसारः (१८५९), गयामाहात्म्यम् (१८६१), गयाश्राद्धपद्धतिः (१८६१), सिद्धान्तकौमुदी (१८६२), शब्दस्तोममहानिधिः (१८६२-७०), रत्नावली (१८६४), तुलादानादिपद्धतिः (१८६६), सिद्धान्तविन्दुसारः (१८६६), कुमारसम्भवम् (१८६६), वेणीसंहारः (१८६६), आशुबोधसंस्कृतव्याकरणम् (१८६९), धातुरूपादर्शः (१८६९), धातुरूपादर्शिका (१८६९), वृत्तसंहारः (१८७०), मुद्राराक्षसम् (१८७०), अष्टाध्यायीसूत्रपाठः (१८७०), मालविकाग्निमित्रम् (१८७०), हितोपदेशः (१८७१), सांख्यतत्त्वकौमुदी (१८७१), भामिनीविलासकाव्यम् (स्वटीकासहितम्, १८७२), दशकुमारचरितम् (१८७२), कादम्बरी (स्वटीकासहिता, १८७२), वाचस्पत्यम् (१८७३-८४), राजप्रशस्तिः (१८७५) चेति ।

**शब्दसाधुत्वविमर्शः**

पण्डिततारानाथतर्कवाचस्पतिना ग्रन्थारम्भे व्याकरणस्यार्थः प्रतिपाद्यते यत् "तत्र व्याकरणं नाम शब्दानुशासनम् । 'अथ शब्दानुशासनम्' इति भाष्योक्तेः" इति । तत्र व्याकरणस्य नामान्तरं शब्दानुशासनमिति । किमिदं व्याकरणमिति चेत् व्याक्रियन्ते प्रकृतिप्रत्ययविभागपूर्वकं विविच्य असाधुशब्देभ्यः साधुशब्दाः पृथक्क्रियन्ते अनया व्युत्पत्त्या व्याकरणशब्दस्य निष्पत्तिः । भावार्थस्तु असाधुशब्दावधिकसाधुशब्दकर्मकपृथक्कृतिनियमविशेषः व्याकरणमिति । सत्यं खलु पदशास्त्रेण असाधुशब्देभ्यः विविच्य साधुशब्दाः पृथक्क्रियन्ते । तत्र किं तावात् साधुशब्दस्वरूमिति चेत् ग्रन्थकृता तारानाथेन दोषरहितं सारगर्भितं लक्षितं – "शब्दानां साधुत्वं च शक्तिवैकल्यप्रयुक्तान्यथोच्चारितरूपाऽपभ्रंशभिन्नत्वम्, अभियुक्तोपदिष्टत्वरूपानादित्वम्, अभियुक्तोपदिष्टत्वरूपानादित्वं, पुण्यसाधनप्रयोगविषयत्वं, व्याकरणव्यङ्ग्यजातिविशेषो वा बोध्यम्"[1] इति । सन्दर्भेऽस्मिन् तेन शब्दकौस्तुभस्थः कश्चन श्लोकोऽपि उद्धृतः । यथोक्तम्

"अनपभ्रंष्टताऽनादिर्यद्वाऽभ्युदययोग्यता ।
व्याक्रिया व्यञ्जनीया वा जातिः कापीह साधुता" ॥ इति

पूर्वमुक्तं हि यत् आचार्येण मञ्जूषा-शब्देन्दुशेखर-शब्दकौस्तुभ-भूषणग्रन्थानां मूलमासाद्येव शब्दार्थरत्नग्रन्थः निर्मितः । अतः स्वीये ग्रन्थे आचार्यस्य भट्टोजिदीक्षितस्य मतमुल्लेख्य सहमतमपि प्रकटयामास । श्लोकेऽस्मिन् भट्टोजिदीक्षेतेन लक्षणचतुष्टयं स्वीकृतम् । यथा अनपभ्रष्टता, अनादिः, अभ्युदययोग्यता, व्याक्रिया व्यञ्जनाया वा जातिः चेति । यद्यपि एतेषु लक्षणेषु ग्रन्थकारस्य सहमतिः अस्त्येव तथाप्येतेषां विवरणात् प्राक् शब्दार्थरत्नग्रन्थदिशा शब्दसाधुत्वं निरूप्यते ।

अत्र ग्रन्थकृता पौनःपुन्यने 'अनपभ्रंशत्वम्' इत्ययं शब्दः प्रयुज्यते । न अपभ्रंशतत्वम् अनपभ्रंशत्वमिति नञ्तत्पुरुषसमासः । तत्र अपभ्रंशत्वं तु शक्तिवैकल्यप्रयुक्तान्यथोच्चारितत्वम् । शक्तेः विकारात् अन्यथारूपेण उच्चारिताः शब्दाः अपभ्रंशाः भवन्ति । तेभ्यः अपभ्रंशेभ्यः भिन्नाः भवन्ति साधुशब्दाः । तेषां तत्त्वं साधुत्वमित्यर्थः । यथा गोरिति उक्ते सति विकारात् अज्ञानात् वा केनापि गावी, गोणी, गोता, गोपोतलिकेत्यादयशब्दाः अन्यथारूपेण प्रोच्यन्ते तदा ते भवन्ति असाधुशब्दाः । तेभ्यः गाव्यादिभ्यः अपशब्देभ्यः भिन्नः भवति गोशब्दः । अतः तस्मिन् गोशब्दे अपभ्रंशभिन्नत्वं वर्तते, तेन च तस्य स्वतः साधुत्वमिति । अतः अपभ्रंशभिन्नत्वस्य गोशब्दादीनामेव साधुत्वम् । तर्हि अधुना मनसि शंका भवति साधुशब्दानां कियती परिधिः भवतीति चेत् पाणिन्यादिप्रामाणिकाचार्यैः उक्ताः अनादयः शब्दाः साधवः इति बोध्याः । यथा पाणिन्यादिशिष्टपुरुषैः गोशब्दः व्यवहृतः इति हेतोः तस्यानादित्वं सुस्पष्टम् । अतः गोरिति शब्दस्य शिष्टोपदिष्टत्वात्, तस्यानादित्वं तेन च तस्य साधुत्वं विज्ञेयम् ।

[1]श. र. ग्रन्थारम्भः, पृ सं 3

परन्तु गावी, गोणी, गोता, गोपोतलिकेत्यादयशब्दाः न कैरपि शिष्टपुरुषैः उक्ताः, अतः न तेषामनादित्वं न वा साधुत्वम् । ननु के तावात् शिष्टाः इति जिज्ञासायामुच्यते कार्याकार्यरूपं वाच्यावाच्यरूपञ्च अनुशासनमनुपालयन्ति ये ते शिष्टाः । शिष्टलक्षणं प्रतिपादितं भगवता भाष्यकारेण "पृषोदरादीनि यथोपदिष्टम्" इत्यस्मिन् सूत्रभाष्ये – "शिष्टलक्षणभाष्यम् - के पुनः शिष्टाः ? वैयाकरणाः । कुत एतत् ? शास्त्रपूर्विका हि शिष्टिः, वैयाकरणाश्च शास्त्रज्ञाः । यदि तर्हि शास्त्रपूर्विका शिष्टिः शिष्टिपूर्वकं च शास्त्रं, तदितरेतराश्रयं भवति । इतरेतराश्रयाणि च न प्रकल्पन्ते । एवं तर्हि निवासतश्चाचारतश्च । स चाचार आर्यावर्ते एव । आर्यावर्तलक्षणभाष्यम् - कः पुनरार्यावर्तः ? प्रागादर्शात् - प्रत्यक् कालकवनात् - दक्षिणेन हिमवन्तम् - उत्तरेण पारियात्रम् । एतस्मिन् आर्यावर्ते आर्यनिवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किंचिदन्तरेण कस्याश्चिद्विद्यायाः पारं गतास्तत्र भवन्तः शिष्टाः"[१] इति ।

एवं साध्वसाधुशब्दानामपि फलमपि पृथक् भवति । यथा सास्नालाङ्गूलककुदखुरविषाण्यर्थे प्रयुक्तस्य विषयाः भवन्ति गौरिति गाव्यादयश्चेति । तर्हि अनयोः किमस्ति वैशिष्टमिति चेत् साध्वसाध्वोः वैशिष्टम् । तत्र गोरिति शब्दप्रयोगः साधुः, तस्य फलञ्च पुण्यम् । गाव्यादयः शब्दप्रयोगाः असाधवः, तस्य च फलं पापम् । एवं ग्रन्थकृता प्रोक्तं 'जातिविशेषस्य साधुत्वं, न अनपभ्रंशत्वम् ' इति । अर्थात् पदशास्त्रेण व्यङ्ग्यस्य बोध्यस्य शब्दसाधुत्वरूपजातिविषेशस्य एव साधुत्वमित्यर्थः । यथाः गोः गोत्वं जातिः । सेयं गोत्वरूपजातिः गोः आकृत्या व्यङ्ग्या भवति । तथैव शब्दसाधुत्वं साधुशब्दानां जातिः भवति । सा च शब्दसाधुत्वरूपजातिः व्याकरणेन बोध्या भवति । एवं व्याकरणव्यङ्ग्यजातिविशेषस्य साधुत्वं, यथा गोरिति । परन्तु गाव्यादीनां व्याकरणव्यङ्ग्यजातिविशेषाभावात् न तेषां साधुत्वम् । भट्टोजिदीक्षितेन शब्दसाधुत्वप्रतिपादनाय 'अनपभ्रष्टता, अनादिः, अभ्युदययोग्यता, व्याक्रिया व्यञ्जनाया वा जातिः' इति चत्वारि लक्षणानि अङ्गीकृतानि । तानि आचार्यस्तारानाथोऽपि समर्थयति । तत्रादौ अनपभ्रंष्टता नाम शक्तिवैकल्यादिप्रयुक्तमन्यथोच्चारणम् । यथा गौरित्यत्र गाव्यादीनां प्रयोगः । द्वितीयस्तु आनादिः आदिरहितः इत्यर्थः । यथा गौरिति शब्दस्य शिष्टप्रयोगत्वात् । तृतीयस्तु अभ्युदयः इष्टालाभार्थः । अयं तु पुण्याधिक्येन सिद्ध्यति । अन्तिमस्तु व्याकरणेन व्यङ्ग्या या साधुत्वजातिः, तस्याः अपि साधुत्वमित्यर्थः । एवं तारानाथस्तर्कवाचस्पतिः साध्वसाधुशब्दानां पृथक् फलं प्रदर्श्य 'अर्थबोधनमेव शब्दानां प्रथमं कार्यम्' इति विचिन्तयन् स्वसिद्धान्तं प्राह । साधुशब्दप्रयोगेणापशब्दप्रयोगेण च अर्थबोधः सुतारं भवति तत्र तार्किकाभीष्टं साधुशब्दस्मरणं न बाधकम् इति । तेन विनापि तत् सिद्ध्यति । इत्थञ्च साधुशब्दापशब्दयोः अविशेषेऽपि साधुशब्दस्मरणे धर्मः इति । सिद्धान्तममुम् इतोऽपि प्रतिष्ठापनाय ग्रन्थाकारेण भगवतः भाष्यकारस्य आचार्यस्य भर्तृहरेः वचांसि स्वीये ग्रन्थे उद्धृतानि । यथोक्तं "समानायामार्थावगतौ शब्देनापशब्देन च शास्त्रेण

[१] म. भा. पृषोदरादीनि यथोपदिष्टमिति सूत्रभाष्यम्



# 227

धर्मनियमः क्रियते"[1] इति । यथोक्तं भर्तृहरिणा "वाचकत्वाविशेषे वा नियमः पुण्यपापयोः"[2] इति । अपि च, "साधुभिस्तस्माद्वाच्यमभ्युदयार्थिभिः"[3] इति ।

नव्यवैयाकरणमूर्धन्यस्य नागेशभट्टस्य 'व्याकरणान्वाख्येयत्वं पुण्यजनकतावच्छेदकधर्मवत्त्वं वा साधुत्वम्' इति मतमपि तारानाथतर्कवाचस्पतिना अङ्गीकृतम् । ननु आचार्येण तारनाथतर्कवाचस्पतिना ग्रन्थारम्भे आदौ चत्वारि साधुत्वलक्षणानि प्रतिपादितानि । यद्यपि तेषां समेषां लक्षणत्वं न वर्तते इति तेनैव परं सूचितम् । तत्रोच्यते टिघुप्रभृतिसंज्ञाशब्दानां कृत्रिमत्वेन विधानत्वात् अनादित्वं नैव संभवति । अतः टिघुप्रभृतिसंज्ञाशब्दानां तु सादित्वमेव । एवम् अभियुक्तोपदिष्टत्वात्, सादित्वात् अपभ्रंशत्वाभावाच्च टिघुप्रभृतिसंज्ञाशब्देषु 'अभियुक्तोपदिष्टत्वरूपानादित्वम्' इति लक्षणं न सम्भवति अव्याप्तदोषात् । एवं संज्ञाशब्दानां यद्यपि प्रयोगविषयत्वं वर्तते तथापि तेषां पुण्यजनकत्वाभावात् धर्मसाधनत्वमपि न जायेत । एवं साधुत्वलक्षणे दोषसत्त्वात् अन्तिमे चरमं लक्षणमाह व्याकरणव्यङ्ग्यजातिविशेषः साधुत्वमिति ।

तथाहि एतेषां संज्ञाशब्दानां कथं साधुत्वमिति प्रश्ने साधुत्वं तु शक्तिवैकल्यप्रयुक्तान्यथोच्चारितरूपापभ्रंशभिन्नत्वेन एव विज्ञेयम् । एवमाचार्येण भर्तृहरिणा संज्ञाशब्दानां साधुत्वमाशङ्क्य तेषाम् अपभ्रंशमात्रेणैव साधुत्वं प्रतिपादितम् । यथोक्तं हरिकारिकायाम्

"यास्त्वेताः स्वेच्छया संज्ञाः क्रियन्ते टिघुभादयः ।
कथं तु तासां साधुत्वं नैव ताः साधवो मताः"[4] ॥ इति

एवं टिघुप्रभृतिसंज्ञाशब्दानां शक्तिवैकल्यप्रयुक्तान्यथोच्चारणाभावाद् अनभ्रंशत्वरूपं साधुत्वं स्पष्टीकृतम् । इत्थं सति असाधुशब्दानां प्रयोगेण यथा पापं सम्भवति तथैव टिघुप्रभृतिसंज्ञाशब्दानामपि इति चेत् न, तत्र प्रमाणं हरिकारिका । यथोक्तं हरिणा

"अनभ्रंशरूपत्वं नाप्यासामपशब्दता ।
असाधूनां प्रयोगे वा प्रत्यवायोऽपि नो तथेति"[5] ॥ इति

इदानीं शंका स्यात् यत् साधुत्वलक्षणाय चतुर्धा प्रदर्शनं किमर्थमिति चेत् चतुर्धाप्रदर्शनं तु विस्तारार्थं पूर्वपूर्वनिरासेन उत्तरोत्तरव्यवस्थापनार्थमिति ।

**उपसंहृतिः**

[1] म. भा. पस्प.
[2] ४ वा. पा. पदकाण्डे सम्बन्धसमुद्देशे, का. 30
[3] ५ वा. पा. ब्रह्मकाण्डे का. 139
[4] श. र. ग्रन्थारम्भः, पृ सं 3, परन्तु इयं कारिका वाक्यपदीये नास्ति इति मन्ये । प्रायः नाशितेयं कारिका ।
[5] तथैव

इत्थं साध्वसाधुशब्दयोः समानार्थावबोधे सति उपयोः मध्ये को वा विशेषः इति शंकायां समाधानं प्राह "समानायामार्थावगतौ शब्देनापशब्देन च शास्त्रेण धर्मनियमः क्रियते" इति । प्रकृते एकेनैव पदेन उभयोः पृथकत्वं प्रदर्शितम् । साध्वसाधुशब्दयोः अर्थावबोधे समानत्वेऽपि साधुशब्दानामुच्चारणेन धर्मनियमः क्रियते इत्यर्थः । परन्तु असाधशब्दोच्चारणेन न तथा । तस्मात् अभ्युदयनिःश्रेयरूपधर्मस्य प्राप्तये ज्ञानपूर्वकं साधुशब्दाः एव प्रयोक्तव्याः न त्वसाधुशब्दाः । एवं भगवता भाष्यकारेणापि भाषितं "शास्त्रपूर्वके प्रयोगेऽभ्युदयः" इति । इत्थं "शब्दार्थरत्ने साध्वसाधुशब्दविमर्शः" इति शीर्षकान्वितं शोधप्रबन्धं यथाशक्ति प्रतिपाद्य विरमामि विस्तरात् इति शिवम् ।

**संकेतपञ्जिः**

का. = कारिका, पृ सं = पृष्टसंख्या, म. भा. = महाभाष्यम् , म. भा. पस्प. = महाभाष्यपस्पशाह्निकम्
श. र. = शब्दार्थरत्नम्

**उल्लेखपञ्जिः**

१ श. र. ग्रन्थारम्भः, पृ सं 3
२ म. भा. पृषोदरादीनि यथोपदिष्टमिति सूत्रभाष्यम्
३ म. भा. पस्प.
४ वा. प. पदकाण्डे सम्बन्धसमुद्देशे, का. 30
५ वा. प. ब्रह्मकाण्डे का. 139
६ श. र. ग्रन्थारम्भः, पृ सं 3, परन्तु इयं कारिका वाक्यपदीये नास्ति इति मन्ये । प्रायः नाशितेयं कारिका ।
७ तथैव

**सहायकग्रन्थपञ्जिः**

१. तारानाथतर्कवाचस्पतिः । शब्दार्थरत्नम् । वाराणसी चौखम्भा भारती आकादमी, २०१५ ।
२. तारानाथतर्कवाचस्पतिः । वाचस्पत्यम् । नई दिल्ली राष्ट्रिय संस्कृत संस्थानम्, २००६ ।
३. हालदार गुरुपद । व्याकरण दर्शनेर इतिहास । कलकाताः कालीघाट, १३५० वङ्गाब्दः ।
४. कर न्यायाचार्य श्रीगङ्गाधर । शब्दार्थ-सम्बन्ध-समीक्षा । कलकाताः महाबोधि वुक एजेन्सि, २०२० ।
५. पाणिनिः । अष्टाध्यायी । सम्पा गोपालदत्तपाण्डेयः । वाराणसीः चौखम्बा सुरभारती प्रकाशन, २०१७ (चौखम्बा सुरभारती ग्रन्थमाला १९) ।
६. रामानुजताताचार्याः एन्. एस् । शाब्दबोधमीमांसा (सुबन्तपदार्थविचारात्मकः तृतीयः भागः) । पाण्डिच्चेरी फ्रेञ्च् इन्स्टिट्यूट् , २००६ ।
७. कौण्डभट्टः । वैयाकरणभूषणसारः (श्रीहरिवल्लभकृत दर्पण-व्याखा संवलितः तथैव सुबोधिनी हिन्दीव्याख्योपेतश्च) । दिल्ली चौखाम्बा संस्कृत प्रतिष्ठान, २०१८ ।

८. नागेशभट्टः । वैयाकरणसिद्धान्तलघुमञ्जूषा (श्रीमद्दुर्बलाचार्यविरचित 'कुञ्चिका' श्रीमद्बालभट्टविरचित 'कला' टीकाद्वयेन संवलिता) । सम्पा.पण्डितमाधवशास्त्रिभण्डारी-पण्डितनरहरिशास्त्रिपेण्डसे-प्रभृतयः । नई दिल्ली राष्ट्रिय संस्कृत संस्थान, २०१२ ।
९. राजाराधाकान्तदेवः । शब्दकल्पद्रुमः । नइ दिल्लीः राष्ट्रिय संस्कृत-संस्थानम्, २००२ ।
१०. मिश्रः राममनोहरः । भूषणसार-परमलघुमञ्जूषयोः सिद्धान्तानां समीक्षा । वाराणस्याम् सम्पूर्णानन्दसंस्कृ-तविश्वविद्यालयः, १९०५ तमे शकाब्दे ।
११. पतञ्जलिः । व्याकरण-महाभाष्यम् (महामहोपाध्यायेन माधव-शास्त्रिणा भाण्टारिणा निर्मितया 'स्फोटविम-र्शिनी' संस्कृत-व्याख्यया सहितम्) । सम्पा. प्रो. वेदप्रकाशः विद्यावाचस्पतिः । नई दिल्ली मेहरचन्द लछ-मनदास पब्लिकेशंस, २०१९ ।
१२. पाण्डेय श्रीरामाज्ञा । व्याकरणदर्शनभूमिका । काशी राजकीयसंस्कृतपुस्तकालयः सरस्वतीभवनम् , १९५४ ।
१३. उपाध्यायः बलदेवः । संस्कृत-वाङ्मय का वृहद् इतिहास । सम्पा. गोपालदत्त पाण्डेयः । उत्तर प्रदेश संस्कृत संस्थान, २००१ ।
१४. शुक्लः कालिकाप्रसादः । वैयाकरणानामन्येषां च मतेन शब्दस्वरूपतच्छक्तिविचारः । वाराणसी सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, १९७९ ।
१५. मिश्रः देवस्वरूप । महाभाष्यनिगूढाकूतयः । वाराणस्याम् सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, १९०० तमे शकाब्दे ।

# ज्योतिश्शास्त्रदृष्ट्या अध्यापनवृत्तिचिन्तनं तथा विशिष्टतया अध्यापनवृत्तेः विमर्शः

कृष्णमूर्तिः एन्*

**शोधसारः** –

वेदं स्पष्टतया सुगमतया च अवगन्तुं वेदाङ्गानि प्रादुर्भूतानि । शिक्षाव्याकरणच्छन्दोनिरुक्तकल्पज्यौतिषाख्यानि भवन्ति वेदस्य षडङ्गानि । एतेषु अन्यतमं कालविधानात्मकं भवति ज्यौतिष्शास्त्रम् । इदं वेदाङ्गं वेदपुरुषस्य नेत्रत्वेन स्वीकृतं विद्वत्तल्लजैः । एवं अस्य शास्त्रस्य सिद्धान्तः संहिता होरा चेति स्कन्धत्रयं विद्यते इति विदुषां मतम् । त्रिषु स्कन्धेषु तावत् मानवानां व्यक्तिगतफलनिरूपणं यत्र विधीयते सः होरास्कन्धः भवति । लौकिकव्यवहारे तु होरास्कन्धस्य अधिकाधिकचिन्तनं क्रियते एवं तस्य प्रचारः आधिक्येन लक्ष्यते । होरायां आयुर्दायादि नानायोगाः कथिताः, येषां साहाय्येन फलचिन्तनं सुगमतया कर्तुं पार्यते । तेषु आजिवीकायाः चिन्तनं बहुप्रधानतया कर्तव्यं भवति यतोहि मनुष्याः जीवननिर्वहणार्थं, उदरपोषणार्थं,स्वकुटुम्बस्य परिपालनार्थं तथा लौकिकभोगप्राप्त्यर्थं सर्वदा यतमाना दृश्यन्ते । यतोहि धनेन एव मानवः स्वीय-इच्छायाः पूर्तिं कृत्वा जीवनं यापयति । गृहस्थाश्रमे धनस्य/-वृत्तेः प्राधान्यं वर्तते, यतोहि मानवस्य कृते स्वकीय-कुटुम्बस्य परिपालनार्थनं तथा तेषां अभिवृद्ध्यर्थम् आजीवकायाः अपेक्षा नितान्तं वर्तते । तथा हि आधुनिकदृष्ट्या धनं विना किमपि कार्यं साधयितुं सुकरं न भवति । अतः आजीविकायाः चिन्तनं नितान्तमावश्यकम् ।

**प्रमुखशब्दाः** – कारकः, भावः, नवांशः, आजीविका, वेदाङ्गम् , ग्रहाः ।

आजीविकायाः चिन्तनं कुण्डल्यां दशमभावात् क्रियते तथा हि भावस्य अवलोकनावसरे बहूनां अंशानां अवलोकनं कर्तव्यं येन भावस्य बलाबलस्य निर्णयार्थं सुकरं भवति । अंशेषु भावस्थग्रहाः, भावकारकाः, भावोपरि ग्रहदृष्टिः इत्यादयः मुख्याः भवन्ति । तेषु अन्यतमः मुख्यश्च भावकारकः । प्रत्येकस्य भावस्य कारकाः विद्यन्ते, तत्र दशमभावस्य कारकः फलदीपिकानुसारं इत्थम् उक्तम् – **"जीवभानुज्ञमन्दाः"**[१] इति । अस्याशयः एवं ज्ञेयः यत् दशमभावस्य चत्वारः कारकाः विद्यन्ते – गुरुरविबुधशनयः चेति । भावस्य फलचिन्तनावसरे भावकारकाणां चिन्तनं नितान्तम् आवश्यकम् । इत्थं आजीविकासम्बद्ध भावचिन्तनं प्रतिपादितम् । सम्प्रति आजीविकायाः चिन्तनं कथं विधातव्यं दैवज्ञैः, इति उक्तं विद्यते जातकाभरणे –

**"रवीन्दुलग्नास्पदसंस्थितांशे पतेस्तु वृत्त्या परिकल्पयेत्ताम्"**[२] इति । अस्यायं अभिप्रायः विद्यते यत् रविचन्द्रलग्नेषु बली यः विद्यते तस्मात् ग्रहात्/लग्नात् दशमभावाधिपस्य नवांशाधिपवशात् जातकस्य वृत्तिचिन्तनं कर्तव्यं इति । उदाहरणार्थम् – कस्यचित् जातके रविः स्वगृहे सिंहे भूत्वा सर्वाधिकबलवान् इति कल्पयामः, तर्हि सिंहात् दशमः वृषभराशिः भवति । तथा वृषस्य ईशः शुक्रः इति विदितमेव । तस्य शुक्रस्य स्फुटः १$^{s}$-२६°-३०' - ०० ॥ इति स्वीक्रियते चेत्, शुक्रः रवेः नवांशेः स्थितः विद्यते, एवं रविनवांशोक्तानां

*शोधच्छात्रः, ज्यौतिषविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः शृङ्गेरी

[१]मन्त्रेश्वररचिता फलदीपिका, अ-१५, श्लो-१७

[२]जातकाभरणम्, अ. दशमभावविचारः, श्लो-१२, पृ.सं-५९

आजीविकाद्वारा धनार्जनं जातकः करोति । उपर्युक्तप्रकारः प्रायः सर्वेषां दैवज्ञानां मतं भवति किन्तु प्रकारान्तरेण एवं विशिष्टरूपेण आजीविकायाः चिन्तनं मानसागर्यां उपदिष्टं विद्यते, तस्य पर्यालोचनं क्रियते । आचार्यः वदति यत् - **मित्रारिगेहोपगतैर्नभोगैस्ततस्ततोऽर्थः परिकल्पनीयः इति**[१] ॥ अर्थात् यः दशमेशः वर्तते सः यदि स्वमित्रशत्रुसमक्षेत्रेषु अन्यतमे संस्थितः चेत् तर्हि सः क्रमेण मित्रशत्रूदासीनजनानां सहयोगेन धनार्जनं करोति । **"तुङ्गे पतङ्गे"** इत्यादि श्लोकांशेन यदि सूर्यः स्वोच्चे/स्वगृहे स्थितश्चेत् तर्हि जातकः स्वस्य बाहुबलेन अर्थोपार्जनं करोति ।

इतः परं ग्रहाणां नवांशवशात् आजीविकाफलानि वक्ष्यन्ते –

**रविः - अर्कांशे तृणकनकोर्णभेषजाद्यैः इति ।** [२]

नवांशाधिपः सूर्यः चेत् तृणानां व्यापारात्, सुवर्णस्य व्यापारात्, ऊर्णनिर्मितवस्त्राणां/वस्तूनां वा उत्पादनेन एवं तेषां क्रयविक्रयणेन आजीविकां प्राप्नोति । तथा हि वैद्यवृत्त्या वा जातकः आजीविकां सम्पादयति ।

**चन्द्रः - चन्द्रांशे कृषिजलजाङ्गनाश्रयाच्च इति ।** [३]

चन्द्रस्तर्हि कृषिकर्म द्वारा धनार्जनं करोति, जले समुद्भूतानां वस्तूनां व्यापारेण वा अर्थाप्तिं प्राप्नोति तथा स्वीयकान्तायाः अर्जितधनस्य उपरि आश्रितो भवति ।

**कुजः - कुजोऽग्निसत्साहसधातुशस्त्रैः इति ।** [४]

कुजनवांशे जातकः अग्निकर्मद्वारा वृत्तेः सम्पादनं करोति, अथवा पराक्रमकार्याणि कृत्वा नोचेत् धातुशस्त्रादि निर्माणेन/उपयोगेन वा अर्थाप्तिर्जायते ।

**बुधः - सौम्यांशे लिपिगणितादिकाव्यशिल्पैः ॥**[५]

बुधः नवांशाधिपः चेत् मानवः बह्वीनां लिपीनां ज्ञाता भवति तथा तेन धनार्जनं करोति, अथवा सः गणितज्ञः भवति, नोचेत् काव्यशास्त्रेषु निपुणतां प्राप्य काव्यादिरचनाद्वारा वृत्तिं प्राप्नोति । अन्तिमः योगः सः शिल्पी (Architecture) भवति ।

**गुरुः - जीवांशके भूसुरदेवतानां समाश्रयाद्भूमिपतिप्रसादात् ।**
**पुराणशास्त्रागमनीतिमार्गाद्धर्मोपदेशेन कुसीदवृत्त्या ॥**[६]

गुरुनवांशे ब्राह्मणानां/देवानां/राज्ञां कृपा वशात् अथवा तेषां आश्रयद्वारा धनप्राप्तिर्भवति । अथवा

[१] मानसागरी, अ-४, श्लो-४७२
[२] बृहज्जातकम्. अ-१०, श्लो-२
[३] बृहज्जातकम्. अ-१०, श्लो-२
[४] जातकाभरणम्, दशमभावविचारः, पृ.सं-५९, श्लो-१३
[५] बृहज्जातकम्. अ-१०, श्लो-२
[६] मन्त्रेश्वररचिता फलदीपिका, अ-५, श्लो-६

पुराणशास्त्रागमादीनां उपदेशादिकं दत्त्वा कुसीदेन वा अर्थस्य आर्जनं करोति मानवः । कुसीद इति पदेन आधुनिक काले तस्यालोचनं कर्तव्यं चेत्, जातकः वित्तकोषे कार्यं करोति इति वक्तुं शक्यते । वित्तकोशे अथवा ऋणं अन्येषां कृते प्रदाय कालान्तरे वृद्धिसहितं धनं स्वीकरोति इति ।

**शुक्रः – काव्यांशे मणिरजतादिगोमहिष्यैः इति ॥**[१]

शुक्रनवांशे सः मणिरजतादिधातूनां तथा गोमहिष्यादीनां व्यापारेण आजीविकां प्राप्नोति इति तात्पर्यम् ।

**शनिः – सौरांशे श्रमवधभारनीचशिल्पैः इति ॥**[२]

शनिः नवांशाधिपः तर्हि जातकः परिश्रमेण कार्यं कृत्वा धनस्योपर्जनं करोति अथवा प्राणिनां वधादि क्रूरकर्माणि चरित्वा धनार्जनं करोति । एवं एतादृश नीचकर्माणि चरित्वा जातकः स्वस्य जीवनस्य यापनं करोति इति बोधव्यम् ।

आजीविकायाः चिन्तनं कृत्वा तेषु अन्यतमस्य तथा प्रमुखस्य अध्यापनस्य चिन्तनं विधास्यते । वृत्तिक्षेत्रेषु अध्यापनवृत्तेः माहात्म्यं सर्वाधिकतया वर्तते यतोहि अध्यापनक्षेत्रे अध्यापकः छात्रान् तत्त्वं बोधयति । अध्यापकानां स्थानं अस्माकं भारतीयेतिहासपरम्परायां मुख्यं स्थानं प्रकल्पितं वर्तते । अध्यापको नाम गुरुः । गुरुः सर्वज्ञानी भवति एवं हि सः सर्वदा शष्यस्य हिताय चिन्तनं कुर्वन् भवति । तदर्थं एव गुरुः परब्रह्मणः स्वरूपं इति वेदानां तथा धर्मशास्त्राणां वचनम् । **गुरुस्साक्षात् परं ब्रह्म** इत्यादिवचनैः गुरोः माहात्म्यं निरूप्यते । अतः एतादृशस्य पुण्यतमस्य वृत्तिक्षेत्रस्य चिन्तनं ज्योतिश्शास्त्ररीत्या क्रियते । जातके गुरोः प्राबल्यं वर्तते तर्हि जातकः शिक्षकः भवति । गुरुग्रहः शिक्षकस्य कारको भवति इति फलदीपिकायाम् निरूपितम् यथा - **"दैवज्ञमन्त्रिगुरुविप्रयतीशमुख्याः"**[३] इति । अस्यार्थः दैवज्ञस्य,मन्त्रिणः,गुरोः,ब्राह्मणस्य,सन्यासस्य इत्यादीनां कारकः गुरुः ज्ञेयः । गुरोः वर्गोत्तमे स्थितिः/ दशमभावाधिपगुरोः नवांशे स्थितिः, गुरोः स्वक्षेत्रे स्थितिः इत्यादयो योगाः भवन्ति चेत् जातकः अध्यापकः भवति । एतदेवोक्तं बृहज्जातकस्य कर्मयोगविचारे - "जीवांशे द्विजविबुधागमादिधर्मैः" इति । अर्थात् लग्नात्,सूर्यात् अथवा चन्द्रात् आजीविकायाः चिन्तनावसरे यदि दशमभावाधिपः जीवस्य नवांशे गतः चेत् सः द्विजोक्तकर्माणि आचरति यथा अध्ययन-अध्यापनादि षट् कर्माणि तथा देवकार्येषु द्वारा अथवा आगमशास्त्राणां अध्यापनद्वारा आजीविकां प्राप्नोति । तावदेव न, गुरुं विहाय अन्येऽपि योगाः उक्ताः येन जातकः अध्यापकः भवति । केचन योगाः प्रस्तूयन्ते -

१) उत्तराफल्गुनी नक्षत्रे जाताः अध्यापनद्वारा धनं प्राप्नुवन्ति इति । तदेवोक्तं बृहज्जातके - "सुभगो विद्याप्तधनो भोगी"[४] इत्यादि ।

---

[१]बृहज्जातकम्. अ-१०, श्लो-३
[२]बृहज्जातकम्. अ-१०, श्लो-३
[३]मन्त्रेश्वररचिता फलदीपिका, अ-२, श्लो-१९
[४]बृहज्जातकम्. अ-१६, श्लो-७


ISSN : 2249-538X

२) फलदीपिकाकारः एवं वदति - **"परार्थवेदाध्ययनाज्जपाश्च"**[१] इति । यदि दशमभवाधिपः बुधस्य नवांशे स्थितः भवति, तदा जातकः अन्येषां कृते वेदान् तथा शास्त्राणि बोधयति । तत्रैव जीवांशे दशमभावाधिपः स्थितस्तर्हि सः धर्मतत्त्वं तथा पुराणानि अध्यापयति ।

३) बुधः द्वितीयभावे संस्थितः तर्हि अध्यापनद्वारा शास्त्राणि पाठयित्वा जीवनं निर्वहति ।

एवं अनेन प्रकारेण ज्योतिश्शास्त्रे दशमभावं अधिकृत्य मनुष्यस्य आजिविकाविचारः विस्तरशः कृतो दृश्यते ।

**- इति शम् -**

**सम्बद्धग्रन्थसूची –**


१) बृहज्जातकम्, भट्टोत्पलव्याख्या सहितम्, केदारदत्त जोशि हिन्दी व्याख्या सहिता

२) फलदीपिका, मन्त्रेश्वररचिता फलदीपिका, हिन्दीव्याख्यासहिता, व्याख्याकारः – डा. हरिशङ्कर पाठक

३) जातकाभरणम्, ढुण्ढिराजदैवज्ञप्रणीतम्, पण्डित अच्युतानन्द झा शर्मणा स्वकृतया सोदाहरण – विमला नामक हिन्दीटीकया परिशिष्टेन च समलङ्कृत्य संशोधितम्

४) मानसागरी, सपरिशिष्ट-सोदाहरण तत्त्वार्थबोधिनी हिन्दिव्याख्यया विभूषिता, व्याख्याता – पं-श्री रूपनारायण झा

५) बृहत्-पाराशर होराशास्त्रम्, सोदाहरणव्याख्यया सहितम्, गणेशदत्तपाठकेन सम्पादितम्

६) कल्याणवर्मणा रचिता सारावली, सुब्रह्मण्यशास्त्रिणा सम्पादितम् च ।

७) श्रीमद्गणेशदैवज्ञप्रणीतः जातकालङ्कारः, पण्डितप्रवरहरभानुशुक्लकृतसंस्कृतटीकोपेतः, पं श्री गणेशदत्तपाठककृत टिप्पण्या- सान्वयभाषाटीकया च समलङ्कृतः ।


[१] मन्त्रेश्वररचिता फलदीपिका, अ-५, श्लो-५



#234

# भागवतपुराणे पृथ्वीसङ्कल्पः

आतिरा. सि*

**शोधसारः –**

प्राचीनभारतीयज्ञानस्याधारेणैव पाश्चात्याः भूगोलस्य वैज्ञानिकस्वरूपं कृतवन्तः । प्राचीनभारतीयसंस्कृतसाहित्यं भौगोलिकसामग्र्या परिपूर्णमस्ति । किन्तु तस्य तार्किकमध्ययनं समुचितरूपेण न प्रचलितम् । प्राचीनभारतीयभूगोलस्य परिज्ञानाय प्राचीनसंस्कृतग्रन्थानां वैज्ञानिकपद्धत्या व्याख्यानं विश्लेषणं च अनिवार्यमस्ति । द्रव्यपदार्थादिविषयेषु वेदपुराणोक्तानि तथ्यानि क्वचित् आधुनिकाः नाङ्गीकुर्वन्ति । किन्तु प्राचीनभारतीयविज्ञाने सर्वेषामपि एषां विषयाणामन्तर्धारा वर्तते इति सुविदितमेव । पुराणानि सन्ति वेदार्थस्य यथार्थदर्शकाः । व्यासप्रणीते भागवतपुराणे ब्रह्माण्डोत्पत्तिः, प्रपञ्चविवरणं,सौरमण्डलसंबन्धिविषयाः,स्थल-जल-वायुमण्डलसंबन्धिकार्याणि, जम्बुद्वीपविवरणं,भुवनकोशवर्णनम्,ज्योतिश्चक्रसूर्यमण्डलवर्णनं,ग्रहाणां स्थानचलनानि,शिशुमारसंस्थावर्णनं च विवृतमस्ति । पुराणानुसारमस्माकं देशस्य नाम भारतवर्षम् । तस्य भौगोलिको विस्तारः पुराणे उक्तः अस्ति । प्रत्येकब्रह्माण्डे विद्यमानानां चतुर्दश भुवनानां पर्यालोचनमस्ति भुवनकोशः । तत्र लोकविभागः, विविधवर्षाणि, जम्बुद्वीपविवरणम् इत्यादयः उच्यते । भूमण्डलस्य मानलक्षणादिकं प्रायेण आधुनिकशास्त्रेण सह साम्यं भजते । वेदकालीनग्रन्थैः अपि आधुनिकविज्ञानस्य पुरोगतिः जाता वर्तते ।

**प्रमुखशब्दाः** – पृथ्वी, भागवतपुराणम्, ब्रह्माण्डोत्पत्तिः, भूगोलः, भुवनकोशः, जम्बुद्वीपम् ।

भारतीयसंस्कृतेरस्माकं मूलभूताः सन्ति वेदाः ये अनादयः अनन्ताः अपौरुषेयाश्च । भारतीयैरस्माभिः इतिहासपुराणैः वेदानां यथार्थमर्थमवगन्तुं यत्नः विहितः । पौराणिककथानां मूलं तु वेदा एव । गूढार्थानां विस्तृतं वर्णनं कृतवान् वेदव्यासः पुराणेषु । तानि सनातनधर्मस्याभिवृद्धये लोककल्याणाय च मन्यन्ते । प्राचीनभारतस्य ऐतिह्यं पुराणेषु रक्षितं निहितं चास्ते । वेदोत्तरं पुराणानामेव प्रामाण्यमङ्गीकुर्वन्ति स्म । वेदोपनिषद्प्रतिपाद्यं सरलया भाषया मानवान् अवबोधयितुं पुराणानि समर्थानि सन्ति । अत एव उक्तं-

**पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।**
**अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥**[१]

वेदव्यासरचितमिति प्रसिद्धेषु अष्टादशपुराणेषु भागवतपुराणम् अतिविशिष्टं स्थानं भजते । भूगोलखगोलयोः विवेचनं, सृष्टेः सूक्ष्मं विवरणं, समस्तभूवलये स्थितानां देशानां वर्णनं च विद्यते पुराणेषु । तत्र चित्रिताः एते विषयाः भौगोलिकपरम्परायै परमोपयोगि मन्यन्ते । पौराणिकदृष्टेरभावे तस्य उपयोगितामवगन्तुं न शक्नोति ।

प्राचीनभारतीयज्ञानस्याधारेणैव नवीनाः भूगोलस्य वैज्ञानिकस्वरूपं कृतवन्तः । प्राचीनभारतीयस्य संस्कृतसाहित्यं भौगोलिकसामग्र्या परिपूर्णमस्ति । किन्तु तस्य तार्किकमध्ययनं समुचितरूपेण न प्रचलितम् ।

---

*शोधछात्रा, व्याकरणविभागः, श्री शङ्कराचार्य संस्कृतसर्वकलाशाला, कालटी

[१]मत्स्यपुराणम्-53.3

प्राचीनभारतीयभूगोलस्य परिज्ञानाय प्राचीनसंस्कृतग्रन्थानां वैज्ञानिकपद्धत्या व्याख्यानं विश्लेषणं च अनिवार्यमस्ति ।

सौरमण्डले सूर्यात् प्रायः पञ्चाशदधिकशतं मिलियन्किलोमीटर् दूरे तृतीयस्थाने वर्तते पृथ्वी । सा एका एव जीवस्य आश्रयदातृ खगोलीयवस्तु । अस्यां तु एकसप्तति प्रतिशतं जलेन पूरितं च । सार्धचतुष्कोटिवर्षेभ्यः पूर्वं भूमेः उत्पत्तिः जातेति मन्यन्ते आधुनिकाः । ततः पूर्वं जीवस्य विकासः महासागरेषु अभवच्च । पश्चात् पृथिव्यां जीवनस्य विकासकाले जैवविविधतायाः अत्यन्तं वृद्धिः अभवत् । सूर्यात् उत्तमं दूरं, जीवनाय उपयुक्तं जलं,वायुः,तापमानं च भूमौ जीवनस्य विविधतां वर्धयति स्म । भौमोपरि विशालाः पर्वताः,पठाराः, महाद्वीपाः,नद्यः, समुद्राः इत्यादयः प्राकृतिकसंरचनाः वर्तन्ते । द्रावकावस्थायां विद्यमानेन बहिर्भागेन भिन्नैः मूलकैः संयोगेन पृथिव्यां कान्तिकत्वं निर्मीयते । तेन विविधानामाभारितकणानां प्रवेशं निवारयति इति च आधुनिकशास्त्रं दर्शयति । षोडशशताब्द्यां विदेशीयः खगोलशास्त्रज्ञः निकोलस् कोपर्निकस् ब्रह्माण्डस्य सूर्यकेन्द्रितं प्रतिरूपं प्रस्तावितवान् । ततः गलीलियो इत्यनेन दूरदर्शनसाहाय्येन अन्ये विविधाः अपि ग्रहाः भूगोलमिव सन्तीति दर्शितवान् । कालानुगुणं मानवाः भौगोलिकविज्ञाने नूतनाविष्कारान् कुर्वन्ति । भूमेः प्रभावः आयुः आकारः स्वभावः इत्यादिषु विषयेषु वयं जिज्ञासां दर्शयामश्च । द्रव्यपदार्थादिविषयेषु वेदपुराणोक्तानि तथ्यानि क्वचित् आधुनिकाः नाङ्गीकुर्वन्ति । किन्तु प्राचीनभारतीयविज्ञाने सर्वेषामपि एषां विषयाणामन्तर्धारा वर्तते इति सुविदितमेव ।

ज्ञानस्वरूपस्य ब्रह्मणः महत्त्वं प्रतिपादयति इदं भागवतपुराणम् । तत्र द्वितीयस्कन्धे पञ्चमेऽध्याये प्रपञ्चोत्पत्तिविवरणं, पञ्चमस्कन्धे एकोनविंशति-विंशतितमयोः अध्याययोः जम्बुद्वीपविवरणं भुवनकोशवर्णनम्, एकविंशतितमाध्यायात् त्रयोविंशतिपर्यन्तं ज्योतिश्चक्रसूर्यमण्डलवर्णनं,ग्रहाणां स्थानचलनानि, शिशुमारसंस्थावर्णनं च विशदं विवृतमस्ति ।

प्रपञ्चसृष्टिः - तत्र अधिभूतम् अधिदैवम् अध्यात्ममिति भावत्रयस्य सत्वरजस्तमोगुणानां च बलेन जीवः आवृतः इत्युच्यते । कालकर्मस्वभावादयः स्वयं मायया भगवतः प्राप्ताः । कर्मणः आगतस्य महतः तमःप्रधानम् अहङ्कारः अभूत् । तस्य विकारेण शब्दगुणवान् आकाशः, आकाशात् स्पर्शगुणकः वायुः, तस्मात् तेजः,ततः रूपस्पर्शघोषयुक्तं रसात्मकं जलं च आविरभूत् । तस्मात् जलात् रूपरसस्पर्शशब्दयुक्ता गन्धवती पृथ्वी अभूत् । भागवतपुराणेऽस्मिन् पृथ्व्याः पर्यायवाचिनः शब्दाः भूः क्षितिः वसुधा मही अवनिः मेदिनी उर्वी क्षोणी क्ष्मा जगती इला रोदसी धरित्री भुविः भूमिः इत्यादयः उक्ताः ।

**विशेषस्तु विकुर्वाणादम्भसो गन्धवानभूत् ।**
**परान्वयाद्रसस्पर्शशब्दरूपगुणान्विता ॥**[१]

ततः सात्विकाहङ्कारात् मनोदिगिन्द्रियाणि च अभूवन् । यदा भूतेन्द्रियगुणाः ब्रह्माण्डनिर्माणे असङ्गताः

[१]भा.पु- 2.5.29

जाताः तदा भगवदशक्त्या प्रेरिताः भूत्वा ते अन्योन्यं संहृत्य सदसत्त्वमुपादाय समष्टि व्यष्टि इति द्विधा ससृजुः । कालकर्मस्वभावान् अवलम्ब्य अन्ते चेतनारहितमजीवं ब्रह्माण्डं जले शयमजीवयत् । सहस्राङ्गयुक्तः भगवान् तस्मात् अण्डात् बहिरागत्य प्रत्येकमङ्गैः चतुर्दशलोकान् अकल्पयत् । भुवनकोशो नामकः पक्षः भिन्नेषु पुराणेषु भूगोलशास्त्रं पर्यालोचयते यत्र ब्रह्माण्डस्य परिकल्पना, तत्र पृथिव्याः भारतस्य च स्थानमानादयः वर्णिताः । चतुर्दशलोकेषु मध्यः भवति भूलोकः । तस्य ऊर्ध्वभागे भुवर्लोकस्वर्लोकादयः अधः अतलवितलपातालादयश्च वर्तन्ते इति पुराणोक्तिः ।

**भुवर्लोकः स्वर्लोकः महर्लोकः जनलोकः तपोलोकः सत्यलोकः च ।**

↑

**भूलोकः ( मध्यलोकः)**

↓

**अतल-वितल-सुतल-तलातल-रसातल-महातल-पातालाः ।**

सृष्टिक्रमः- पुराणानुसारं सर्वप्रथमं सृष्टेरारम्भः जलीयजीवेभ्यः भवति । ततः जलस्थलोभयचरशीलाः, स्थलीयजीविनः, उत्पद्यन्ते । तदन्ते एव मानवानां सृष्टिरजायत । भागवतपुराणे प्राकृतवैकृतोभयात्मकरूपेण त्रिधा सर्गः प्रोक्तः । आधुनिकविज्ञानधाराप्रवक्तृभिरपि अङ्गीक्रियते यत् महाविस्फोटनादिवत् (Big bang) अस्य प्रपञ्चस्योत्पत्तिरभूदिति । ततः पूर्वतनीयकालं ते न गणयन्ति । तदेव पुराणे अण्डात् विराड्पुरुषस्य निर्गमनत्वेन उच्यते । यथा-

**स एव पुरुषस्तस्मादण्डं निर्भिद्य निर्गतः ।**
**सहस्रोर्वङ्घ्रिबाह्वक्षः सहस्राननशीर्षवान् ॥**[१]

भुवनकोशवर्णनम् - भूमेः आकारः- भागवते भूमण्डलस्य नाममानरूपलक्षणतः शुकमहर्षिः परीक्षितं महाराजं व्याख्यातवान् पञ्चमस्कन्धे षोडशाऽध्याये लोकविभागविवरणे । सप्तखण्डानां वा द्वीपानां कल्पनया पुराणेषु लोकविभागः कृतः । तत्र सप्तद्वीपेषु प्रथमं भवति भारतम् । भूमिं कमलमिव, जम्बुद्वीपं तद्गतकोशगताभ्यन्तरलोकरूपेण उपमिनोति । अयं जम्बुद्वीपः पुष्करपत्रमिव समवर्तुलाकार इत्युच्यते । यथा भुवनकोशवर्णने-

**यो वायं द्वीपः कुवलयकमलकोशाभ्यन्तरकोशो**
**नियुतयोजनविशालः समवर्तुलो यथा पुष्करपत्रम् ।**

[१]भा.पु- 2.5.35

**[1] यस्मिन्नववर्षाणि नवयोजनसहस्त्रायामान्यष्टभिः**

**मर्यादागिरिभिः सुविभक्तानि भवन्ति । [2]**

नवयोजनसहस्त्रयोजनायुक्तानि नव वर्षाणि अष्टपर्वतैः विभक्तानि सन्ति । तेषां मध्ये वर्तते इलावृतं नाम आभ्यन्तरवर्षम् । अस्य पद्माकारस्य भूलोकस्य कर्णिका मेरुपर्वतोऽस्ति । अयं भूलोकः नानाविधैः द्वीपैः नदीभिः सागरैः महासागरैः पर्वतैश्च परिव्याप्तोऽस्ति ।

**नववर्षाणि -**

रम्यकं हिरण्मयं कुरुवर्षम् (उत्तरभागे)

↑

मेरुपर्वतः

केतुमालम् ← **इलावृतवर्षः** → भद्राश्वम्

↓

हरिवर्षं किंपुरुषं भारतम् (दक्षिणभागे)

इलावृतस्य मध्ये मेरुपर्वतः सुवर्णमयः । उत्तरदिशि नीलं श्वेतं शृङ्गवनमिति त्रयःपर्वतशृङ्खलाः सन्ति । रम्यकहिरण्मयकुरुवर्षाणि, दक्षिणदिशि निषधहेमकूटहिमालयाः पर्वताः, हरिवर्षकिंपुरुषभारतवर्षं चेति द्वीपत्रयम् । पश्चिमदिशि माल्यवान् पूर्वे गन्धमादनपर्वतौ च वर्तेते ।

मेरोः आधारे विंशति पर्वताः सन्ति । चतसृषु दिक्षु द्वयम् च । मेरुपर्वतस्य शिखरे प्रजापतेः ब्रह्मणः पुरम्, तत् परितः अन्येषां देवानां नगराणि प्रत्येकं दिशं पालयन्ति । एवञ्च भूमेः विस्तार उच्यते-

**एतावाँल्लोकविन्यासो मानलक्षणसंस्थाभिर्विचिन्तितः**

**कविभिः स तु पञ्चाशत् कोटिगणितस्य**

**भूगोलस्य तुरीयभागोऽयं लोकालोकाचलः ॥ [3]**

सप्तद्वीपा वसुमती इति मतानुसारं द्वीपाः यथा-

1. जम्बुद्वीपः (क्षारसमुद्रः)
2. प्लक्षद्वीपः (इक्षुरसः)
3. शाल्मलीद्वीपः (सुरासमुद्रः)

---

[1] भा.पु- 5.16.5
[2] भा.पु- 5.16.6
[3] भा.पु- 5.20.38

4. कुशद्वीपः (घृतसमुद्रः
5. क्रौञ्चद्वीपः (दधिसमुद्रः
6. शाकद्वीपः (क्षीरसमुद्रवेष्टितः)
7. पुष्करद्वीपः (स्वादुजलसमुद्रः)

एषु जम्बुद्वीपः एव अस्माकं भारतवर्षम् । एवं प्रकारेण भुवनकोशपरिकल्पना कृताऽस्ति ।

पृथिव्याः अक्षस्य अवलंबः 23.4 अंशः भवति । अस्यामवस्थायां भूमिः स्वस्य अक्षे परिक्रामति । ध्रुवे भूमेः प्रवृत्तिः, तस्य कारणत्वेन उत्तरायण-दक्षिणायनयोः स्थितिः,अहोरात्राणां दीर्घह्रस्वसमानता च विधीयत इति पुराणे । दिनरात्रस्य कारणं भूमेः अक्षभ्रमणमस्ति । सूर्यस्य उत्तरायणदक्षिणायनगत्या सह ऋतुपरिवर्तनस्य गणनाऽपि अत्र क्रियते ।

यः वासयोग्यः द्वीपः सप्तद्वीपानां मध्ये स्थितः अस्य द्वीपस्य नववर्षाणि अष्टभिः शृङ्खलाभिः विभक्तानि सन्ति । इलावृतस्य मध्ये स्थितः मेरुपर्वतः, उत्तरभागे नीलश्वेतशृङ्गवनमिति त्रयः पर्वताः, दक्षिणदिशि निषधहेमकूटहिमालयाः, तस्य दक्षिणे वर्तते भारतवर्षम् ।




**(लोकविभागस्य रूपचित्रम्)**

अस्मिन् प्रपञ्चोत्पत्तेः सृष्टेः वा विषये बहूनां तथ्यानां, आधुनिकानां ज्ञानमिदानीं यावत् अपूर्णमेवास्ति । यतः इतःपरमपि कश्चित् सूक्ष्मस्तरः वर्तते इति तु तैः ज्ञातमस्ति । सामान्यदृष्ट्या चिन्तयति चेत् धार्मिकपक्षे


ISSN : 2249-538X

पौराणिकवादः, प्राकृतिकदृष्ट्या विज्ञानपक्षश्च युक्तिपूर्णौ प्रतीयेते । यतः उभयोरपि लक्ष्यं समानमस्ति । पुराणेषु प्रदत्तेषु भूविवरणप्रसङ्गेषु विविधपीठतीर्थक्षेत्रवनपर्वतादीनां वर्णनमस्ति, येन आधुनिकानामनुसन्धानकार्येषु महत्साहाय्यं प्राप्यते । यच्च आधुनिकभूगोलशास्त्रस्य खगोलशास्त्रस्य च कृते प्रेरणायाः सोपानमिति वक्तुं शक्यते । अनेन ज्ञायते यत् भागवतपुराणकालीनभारतीयैः ब्रह्माण्डोत्पत्तिः, सौरमण्डलक्रमः पृथिव्याः आकृतिः, गतिः तत्सम्बन्धितथ्यानि च परिचितानि आसन् । ते वैज्ञानिकप्रेक्षणविधिना कालगणनां दिशानिर्धारणं च कृतवन्तः । कालेऽस्मिन् खगोलस्य वैज्ञानिकमध्ययनमासीदिति ज्ञातुं शक्यते ।

# ब्राह्मणग्रन्थेषु ऋत्विग्वर्गविवेचनम्

सर्वेश ओझा*

**शोधसारः** –

यज्ञस्य विस्तृतत्वात् तथा च तस्मिन् नवागतानां विविधानामुपचाराणां, संस्काराणां अथ च विधानानां फलस्वरूपम् एकया व्यक्त्या यजनमसम्भवं कठिनं च इति स्थितमेव । अतएव यज्ञकर्त्रे यज्ञसम्बन्धिनां कृत्यानां सम्पादने अन्येषां सहयोगिनामावश्यकता समुद्भूता । तदर्थमेव ऋत्विक्वर्गः उदितवान् । ऋत्विक् शब्दस्य व्युत्पत्तिं कुर्वन् आह निरुक्तकारः यत् ऋग्भिर्ह्यसौ यजतीति ऋत्विक् । ऋतुयाजी भवतीति वा । स हि काले देवता यजतीति वा ऋतौ याजयतीति वा, स हि काले एव याजयते नाकाले । एष ऋत्विक् यज्ञस्य प्राणभूतः वर्त्तते । ऋत्विजः कारणेनैव यज्ञः सकुशलं निर्विघ्नं च सम्पाद्यते परञ्च ऋत्विजां संख्या यज्ञानुसारं परिवर्तते । पृथक् – पृथक् यज्ञानुसारं चत्वारः, पञ्च, षड्, सप्त वा ऋत्विजः भवन्ति । गोपथब्राह्मणे षोडशानामृत्विजां नामानि सन्ति । तेषामेव विस्तृतं विवेचनम् अस्मिन् शोधालेखे क्रियते ।

**प्रमुखशब्दाः** – वेदः, ब्राह्मणग्रन्थः, यज्ञः, ऋत्विक्, मन्त्रः, देवता, कर्मकाण्डम्, अग्निहोत्रम्, दर्शपौर्णमासौ, चातुर्मास्ययागः, पशुबन्धयागः, सोमयज्ञः ।

## आमुखम्

ऋत्विक् शब्दस्य व्युत्पत्तिः ऋतव्य ऋत्वीय शब्दाभ्यां मता । पाणिनेरनुसारं ऋत्विक् इति निपातितः ।[१] अस्मिन् पूर्वम् ऋतु शब्दः अस्ति तथा पुनः मूलधातुः यज् (देवपूजासंगतिकरणदानेषु) ततः क्विन् प्रत्ययः विद्यते । एवं ऋत्विक् शब्देनाभिप्रायं - सुनिश्चिते समये यज्ञकर्ता अथवा ऋता ऋत्वनुसारं यज्ञकर्ता अथवा कस्मै अपि विषेशऋतवे यज्ञस्य प्रयोगकर्ता वा । वेदानां स्वाध्यायेन गुणवृद्धिं प्राप्तवान् विद्वान्, मेधावी होतृकर्मणि च प्रवीणः ऋत्विक् एव श्रेष्ठोऽस्ति । ऋत्विक् पवित्रे कुले उत्पन्नः भवेत् यतोहि उत्तमकुलस्य ऋत्विजं देवाः पूर्णतया परिचिन्वन्ति ।[२] ऋत्विजां कृते परस्परसहकार्यस्य भावः अत्यन्तमावश्यको विद्यते ।

यज्ञः एकं पवित्रं कर्म अस्ति । अस्मिन् वेदमन्त्राणाम् उच्चारणं भवति । अतः मुख्यतः ऋत्विक् स एव भवितुं शक्नोति, यः वेदज्ञाता पवित्राचरणेन च सम्पन्नो भूयात् । तस्मिन् वेदानां पूर्णज्ञानं भवेत् तथा च तेन स्वसम्बन्धिते वेदे विशिष्टता प्राप्ता भवेत् । संस्कृतभाषायां तस्य पूर्णाधिकारः भवेत् । अत एव तस्य सुशिक्षितत्वं परमावश्यकम् ।

पूर्वऋग्वैदिककाले सम्भवतः ऋत्विजां संख्याल्पासीत् । ऋग्वेदोत्तरे काले नवीनानां ऋत्विजां नामानि तेषाञ्च कर्मणामुल्लेखः भवितुम् आरब्धः । उत्तरोत्तरं कर्मकाण्डस्य जटिलत्वकारणेनैव पुरोहितानाम् आवश्यकताम्

---

*शोधच्छात्रः, संस्कृतविभागः, कलासङ्कायः, काशीहिन्दूविश्वविद्यालयः, वाराणसी

[१] अष्टाध्यायी – 3/2/59

[२] काण्वशतपथब्राह्मणम् – 14/7/4/6

अन्वभवन् मानवाः । ऋत्विजां संख्या यज्ञानुसारं परिवर्तते । ऋग्वेदे सप्तानाम् ऋत्विजामुल्लेखो दृश्यते –

**तवाग्ने होत्रं तव पोत्रमृत्वियं तव नेष्ट्रं त्वमग्निदृतायतः ।**

**तव प्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे ॥**[१]

कस्मैचित् यज्ञाय सुनिश्चितानामृत्विजां संख्यायाः सन्दर्भे तैत्तिरीयब्राह्मणस्य[२] एकस्मिन् आख्याने विस्तरेण वर्णनं प्राप्यते - प्रजापतिना सर्वप्रथमं मनुष्यस्य निर्माणे हृदयं निर्मितम् । तस्य मनुष्यस्य अन्यावयवानां संरचनायै ब्रह्मणा ध्वनिः प्रदत्तः, जलेन सः श्रुतः अथ च साग्निहोत्रं प्रजापतेः अन्तिकं प्राप्तम् । तैः शिरोरहितं शरीरं तस्मै प्रजापतये प्रदत्तम् । अतएव अग्निहोत्रे यज्ञे केवलमेक एव ऋत्विक् भवति । पुनः प्रजापतिः चतुर्वारम् आहूतवान् तच्च अग्निवाय्वादित्यचन्द्रमोभिः श्रुतम् । ते दर्शपूर्णमाससहिताः समागताः । तैः प्रजापतये चत्वारः अवयवाः प्रदत्ताः । अतएव दर्शे पूर्णमासे च यज्ञे चत्वारः ऋत्विजः भवन्ति । पुनः तेन पञ्चकृत्वः आहूतम् तत् पशुभिः श्रुतम् । ते सचतुर्मास्यं प्रजापतिं प्राप्तवन्तः । तैः तस्मै केशत्वक्मांसास्थिमज्जानः प्रदत्ताः । अतएव चातुर्मास्ये पञ्च ऋत्विजः भवन्ति । तेन पुनः षड्वारं आहुतम् । तत् ऋतुभिः श्रुतम् पशुबन्धसहिताश्च ते आगताः । ते अन्यान् षड् अवयवान् तस्मै अददन् अतः पशुबन्धयागे षड् ऋत्विजः भवन्ति । अन्ततः ब्रह्मा सप्तधाह्वयत् । होतृगणैस्तत् श्रुतम् । ते ससोमयज्ञं प्राप्ताः । तैः प्रजापतये सप्तप्राणवायवाः अर्पिताः । अतएव सोमयज्ञे सप्त होतारः पूर्वाभिमुखाः ऋत्विजः भवन्ति, ये वषट् इति कथयन्ति ।

केषाञ्चन ऋत्विजां नामानि कर्माणि च परवर्त्तिकर्मकाण्डेषु लुप्तप्रायानि सञ्जातानि । यथा उद्गाभस्य ग्रावग्राभस्य च ऋत्विजः कृत्यानि विनष्टानि, तयोः कार्यमध्वर्युः सम्पादयति । प्रशास्ता मैत्रावरुणो बभूव । होतुः मन्त्रोच्चारणनिर्देशनं स्पष्टतया दरीदृश्यते –

**इष्यन्वाचमुपवक्तेव होतुः पुनान इन्दो वि ष्या मनीषाम् ।**

**इन्द्रश्च यत्क्षयथः सौभगाय सुवीर्यस्य पतयः स्याम ॥**[३]

सोमयागे ऋत्विजां संख्या सर्वाधिका मता । गोपथब्राह्मणे अस्य सम्पूर्णा सूची प्रदत्तास्ति । यस्मिन् षोडशानामृत्विजां नामानि सन्ति –

**होता** च **मैत्रावरुणश्च** पादं **अच्छावाकः** सह **ग्रावस्तुतैकम् ।**

ऋग्भि स्तुवन्तोऽहरहः पृथिव्या अग्निं पादं ब्रह्मणा धारयन्ति ॥

**अध्वर्युः प्रतिप्रस्थाता नेष्टोन्नेता** निहितं पादमेकम् ।

[१] ऋग्वेदः – 2/1/2
[२] तैत्तिरीयब्राह्मणम् – 2/3/6/1-4
[३] ऋग्वेदः – 9/95/9

समन्तरिक्षं यजुषा स्तुवन्तो वायुं पादं ब्रह्मणा धारयन्ति ॥
**साम्नोद्गाता** छादयन्नप्रमत्त औदुम्बर्यां स्तोभदेयः सगद्गदः ।
विद्वान्**प्रस्तोता** विदहाथ सुष्टुतिं **सुब्रह्मण्यः प्रतिहर्ताथ** यज्ञे ॥
साम्ना दिव्येकं निहितं स्तुवन्तः सूर्यं पादं ब्रह्मणा धारयन्ति ।
**ब्रह्मा** हैकं **ब्राह्मणाच्छंसिनः** सह **पोताग्नीध्रो** निहितं पादमेकम् ॥[१]

**ऋग्वेदस्य ऋत्विजः –**

1. **होता** – होता ऋत्विग् ऋग्वेदेन सम्बध्यते । हु (दानादानयोः) धातुना तृच्प्रत्यये कृते होतृशब्दः निष्पद्यते । वाचस्पत्यग्रन्थानुसारं होतृशब्दस्य अर्थः ऋग्वेदज्ञाता होमकर्ता च अस्ति ।[२] ऐतरेयब्राह्मणे होतृशब्दस्य वर्णनमतीव विस्तरेणाभवत् । तत्रास्य व्युत्पत्तिः आपूर्वकं वह् धातोः मता, यतोहि यज्ञे होता पुनः - पुनः देवान् आह्वयति, अतः अस्य आह्वानार्थं प्रयोगो भवति –

**'यद्वाव स तत्र यथा भाजनं देवता अमुमावहामुमावहेत्यावाहयति तदेव होतुर्होतृत्वं होता भवति ।'**[३]

होतुः ऐतरेयब्राह्मणे प्राणसंज्ञा प्रदत्तास्ति – **'प्राणो वै होता ।'**[४] अस्याभिप्रायः यत् होता यज्ञस्य प्राणभूतः वर्त्तते । काण्वशतपथे च होत्रे वाक्, अध्वर्योश्च मनसः संज्ञा[५] प्रदत्तास्ति । अत एव यत् अध्वर्युः निर्दिशति, तत् होता स्वीकरोत्येव । होता यज्ञे महत्वपूर्णमास्पदमलभत, सः यज्ञस्वरूपः मतः ।

एष एव यज्ञस्य मध्यस्थानम् । एष एव सत्यप्रतिरूपः । यज्ञे होता ऋग्वेदस्य मन्त्रानुच्चारयति । शस्त्रपाठस्य तथा च आज्याहुतिभिः सम्बन्धिनां ऋचां वषट्कारस्य च उच्चारणं होत्रा एव करणीयम् भवति । काण्वशतपथस्यानुसारं[६] दर्शपूर्णमासयज्ञे एष सामिधेनीं ऋचां पठति, अन्यदनया अग्निमुद्दीपयति । दर्शपूर्णमासस्यान्ते सः आशीर्युक्तान् मन्त्रानुच्चारयति । मैत्रावरुणः, अच्छावाकः, ग्रावस्तुत्, एते होतुः सहायकऋत्विजः सन्ति । एते ऋत्विजः यज्ञे होतृकर्मान्तर्गतानि आनुषङ्गिककृत्यानि सम्पादयन्ति तथा शस्त्रपाठादिकमपि कुर्वन्ति । इत्थं होतुः यज्ञे महत्वपूर्णं स्थानमस्ति ।

2. **मैत्रावारुणः** – मैत्रावरुणः होत्राधीनं कार्यं कुरुते अर्थात् होतुः सहायकः भवति – **'अथ होत्रे मैत्रावरुणन्दीक्षयति ।'**[७] प्रशास्ता उपवक्ता च अस्य द्वितीयमभिधानं वर्त्तते । अस्य मुख्यं कृत्यं मित्रवरुणयोः देवयोः सम्बन्धे मन्त्रपाठः

---

[१]गोपथब्राह्मणम् – पूर्वार्धः – 1/5/24
[२]वाचस्पत्यम्, पृष्ठ संख्या - 5438
[३]ऐतरेयब्राह्मणम् – 1/2
[४]ऐतरेयब्राह्मणम् – 6/14
[५]काण्वशतपथब्राह्मणम् – 5/8/4/15
[६]काण्वशतपथब्राह्मणम् – 2/3/3/1-2
[७]शतपथब्राह्मणम् – 12/1/1/6

 ISSN : 2249-538X

अस्ति । अनेनैव कारणेन एषः मैत्रावरुण इति कथ्यते । काण्वसंहितायां प्रशास्तुः नामोल्लेखः सर्वप्रथमं प्राप्यते । राजसूययज्ञान्तर्गते दशपेये एषः वन्ध्यां गां दक्षिणायां प्राप्नोति । एषः होतृणां प्रणेता मतः तथा च मनसः रूपेऽपि परिचायितः –

**'प्रणेता वा एष होत्रकाणां यन्मैत्रावरुणस्तस्मादेषा प्रणेतृमती भवति ।'**[१]

**'मनो वै यज्ञस्य मैत्रावरुणः ।'**[२]

**3. अच्छावाकः** – एषोऽपि होतृसहायकः । यज्ञे अच्छावाकस्य महत्वपूर्णं स्थानमस्ति । तस्य इन्द्राग्निभ्यां सम्बद्धता वर्त्तते । उच्यते यत् पूर्वकाले सः सोमयज्ञात् पृथक् कृतः आसीत् । इन्द्रेण अग्निना च तस्मै सोमः संरक्षितः । अत एव सः इन्द्राग्निसम्बद्धान् पाठानभिवदति । इन्द्राग्नियुगलदेवेसम्बन्धात् अच्छावाकं प्रजननकारणं मिथुनरूपम् आमनन्ति । कौषीतकिब्राह्मणस्य[३] एकस्य आख्यानस्याधारेण अच्छावाकः इति नाम्ना ऋत्विक् पदम् कालान्तरेणैव उद्भूतम् । तत्र सः अन्यान् ऋत्विजः प्रार्थयते यत् मह्यं सोमपाने भागं दद्युः । सः पूर्वस्यां दिशि उपविशति । स षडहे त्रीणि स्तोत्राणि पठति द्वादशाहे च द्वितीये दिने सः रौरव इति नाम्ना साम गायति । ऐतरेयब्राह्मणे उल्लिख्यते यत् अच्छावाकः ऋत्विक् स एव भवति यः मन्त्रपाठे निपुणः भवेत् –

**'तस्माद्यो ब्राह्मणी बह्वृचो वार्यवान्स्यात्सोऽस्याच्छावाकीयां कुर्यात् .... तेनैव साऽहीना भवति ।'**[४]

अस्य तथ्यस्य पुष्टिः गोपथब्राह्मणेनापि भवति यत् अच्छावाको मन्त्रपाठे अन्त्यन्तसशक्तः तथा कुशली भवति –

**'वीर्य्यवान् वा एष बह्वृचः, यदच्छावाकः । वहति .. तस्मादच्छावाको वह्निवदेतत् सूक्तमुभयत्र शंसति, स पराक्षु सर्वाक्षु चेति ।'**[५]

**4. ग्रावस्तुत्** – ऋग्वेदे ग्रावस्तुत् ग्रावग्राभ इति नाम्नापि उल्लिख्यते – **'होताध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उत शंस्ता सुविप्रः ।'**[६] ग्रावस्तुद् अपि होतृसहायक एव । एषः केवलं पाषाणखण्डान् स्तौति उत्थाय च तेभ्यः मन्त्रपाठं करोति । सः नेत्राणामुपरि सुबद्धम् उष्णीषं धारयति । कौषीतकिब्राह्मणे निर्दिश्यते यत् यदा देवैः यज्ञसम्पादनं कृतम् तस्मिन् समये मध्यसवने अर्बुद् काद्रवेयः तस्यान्तिकं समाययौ उवाच च यत् भवता एकस्य ऋत्विजः कार्यं यज्ञेऽस्मिन् त्यक्तम्, अतः तस्य स्थाने मां नियोजयतु । देवैः एवं स्वीकृत्य तस्मै ग्रावस्तुतः पदं

[१]ऐतरेयब्राह्मणम् – 6/6
[२]ऐतरेयब्राह्मणम् – 2/5
[३]कौषीतकीब्राह्मणम् – 28/4-5
[४]ऐतरेयब्राह्मणम् – 2/35
[५]गोपथब्राह्मणम् – 2/5/15
[६]ऋग्वेदः – 1/162/5

प्रदत्तम् ।[१]

**यजुर्वेदस्य ऋत्विजः –**

1. **अध्वर्युः** – अध्वर्युः यजुर्वेदेन सम्बद्धो वर्त्तते । अध्वर शब्दात् क्यच् प्रत्यये सति अध्वर्यु शब्दः निष्पद्यते, यस्यार्थो भवति - यजुर्वेदज्ञाता तथा होमकर्ता ऋत्विक् । यज्ञे अध्वर्योः महत्ता स्पष्टतया परिलक्ष्यते । काण्वशतपथे स यज्ञपूर्वार्द्धरूपः मतः – **'पूर्वार्धो वै यज्ञस्याध्वर्युः ।** '[२] एषः यज्ञस्य शिरोऽपि कथ्यते । एषः अध्वर्युरेव अस्ति यः यज्ञं तानयति । विभिन्नेषु ब्राह्मणग्रन्थेषु तस्य विशिष्टता प्रतिपादिता अस्ति । षड्विंशे ब्राह्मणे अयं सूर्यनेत्रम् अपानः इति संज्ञाद्वयं लभते ।[३] ताण्ड्यमहाब्राह्मणे एषः प्राण इत्युक्तः ।[४]

अध्वर्युः यज्ञे सामान्यरूपेण हस्तसम्बन्धीनि क्रियाकलापानि करोति । स यागस्य सज्जायाः पूर्णां व्यवस्थां करोति । वेदिनिर्माणम्, पुरोडाशपाचनम्, ऐन्द्रवायवादीनां प्रचारः, हव्यपदार्थानामाहुतिः इत्यादीनि कृत्यानि तेनैव सम्पाद्यन्ते । एतेषां कार्याणां पूर्त्यै एषः दक्षिणां लभते । अध्वर्युरपि कतिपयान् मन्त्रान् उच्चारयति, ये सामान्यतः गद्यात्मकाः भवन्ति । यजुष् इत्यनेन अध्वर्योः सम्बन्धः । प्रतिप्रस्थाता, नेष्टा, उन्नेता च तस्य सहायकाः ऋत्विजः सन्ति । प्रतिप्रस्थातारं अध्वर्योः अनुकर्ता इति वदन्ति – **'कृतानुकर एव प्रतिप्रस्थाता ।** '[५] विभिन्नकृत्यानि कुर्वता अध्वर्युणा तथा च अन्यैः ऋत्विग्भिः त्रुटयः भवितुं शक्नुवन्ति । तासामेव निवारणाय अध्वर्युः प्रायश्चितं करोति । यस्मात् कारणात् यज्ञः सुरक्षितो भवति । एवं अध्वर्युः श्रेष्ठं पवित्रञ्च यज्ञं कुर्वाणः श्रेष्ठतां पवित्रताञ्च प्राप्नोति ।

2. **प्रतिप्रस्थाता** – काण्वशतपथे अस्य नाम्नः उल्लेखोऽस्ति । एषः अपि अध्वर्युसहायकः । वरुणप्रघासयज्ञे एषः अध्वर्योः सहायको भवति । अस्मिन् यज्ञे सः यज्ञकर्तुः भार्यायाः परपुरुषेण साकं यौनसम्बन्धसन्दर्भे प्रश्नान् पृच्छति । यज्ञसत्रे एषः अध्वर्युः ब्राह्मणाच्छंसिनः, प्रस्तोतुः मैत्रावरुणस्य च अभिषेचनसंस्कारं करोति । सोमग्रहसम्पादनेऽपि अस्य मुख्या भूमिका अस्ति ।

3. **नेष्टा** – नेष्टा अपि अध्वर्योः सहायकः अस्ति । सोमयागे नेष्टा सोमधेनोः दर्शनाय यजमानस्य भार्याम् आदिशति । यदा शामित्रः घोषयति यत् यज्ञपशुः उपशमितः, तदा अध्वर्युः नेष्टारं यजमानस्य पत्न्याः उदानयनाय आदिशति तदनु नेष्टा आदेशं पालयति । सोमयागे एषः वैश्वदेवशस्त्रं पठति वाजपेययागे च सुराग्रहं गृह्णाति । यज्ञसत्रे एषः प्रतिप्रस्थातुः, पोतुः, प्रतिहर्त्तुः अच्छावाकस्य च अभिषेचनक्रियां करोति ।

4. **उन्नेता** – काण्वशतपथब्राह्मणे अस्य नामोल्लेखः वर्त्तते तत्र च अस्मै प्राणसंज्ञा प्रदत्तास्ति – **'प्राणो वा**

[१]कौषीतकीब्राह्मणम् – 29/1
[२]काण्वशतपथब्राह्मणम् – 2/8/3/3
[३]षड्विंशब्राह्मणम् – 2/5/3, 2/6/2, 2/7/2
[४]ताण्ड्यमहाब्राह्मणम् – 25/18/4
[५]काण्वशतपथब्राह्मणम् – 1/5/1/30

**उन्नेता प्राणमेवैष्वेतदुभयतो दधाति ।** '[१] एषः अपि अध्वर्योः सहायकः ऋत्विक् अस्ति । सोमयज्ञे उन्नेता अपि अध्वर्य्वाग्नीध्रप्रतिप्रस्थातृभिः अन्यैश्च साकं हविर्धान्यागारं प्रविशति । उद्गाता उन्नेतारं रसपानपूरणाय आदिशति । अतिरिक्तस्य हरियोजनग्रहस्य विधानकरणाय एष अन्यां श्रेष्ठतामाप्नोति । यज्ञसत्रेऽपि एषः नेष्टुः आग्नीध्रस्य, सुब्रह्मण्यस्य ग्रावस्तुतश्च अभिषेचनक्रियां करोति । एषः स्वयं ब्रह्मचारिणा अभिषिच्यते ।

**सामवेदस्य ऋत्विजः –**

1. **उद्गाता** – उद् उपसर्गपूर्वकं गै धातोः तृच् प्रत्यये सति उद्गातृ शब्दः निष्पद्यते । उच्चैर्गायति उच्चस्वरेण गायति इत्यनेन उद्गातृत्वं सिध्यति । उद्गातुः मुख्यं कार्यं यज्ञे सामगानमस्ति । यज्ञकर्ता एतस्मै अत एव दक्षिणां ददाति यत् एषः तस्य कृते गायति । अतः वक्तुं शक्यते यत् यज्ञे सरसतां सजीवतां च आनेतुं प्रयासः उद्गात्रा ऋत्विजा एव क्रियते । यथा काचित् व्यक्तिः शुचिपात्रे जलपानायेच्छति तथैव देवाः अपि पवित्रैः ब्राह्मणैः उच्चारितायाः वाचः रसं पातुं इच्छुकाः भवन्ति –

**'यथा ह वै शुद्धेन शुचिना पात्रेण पिपासन्ति एवं ह वाव देवा ब्राह्मणेन शुद्धेन शुचिना पिपासन्ति ।** '[२]

ताण्ड्यमहाब्राह्मणे[३] उद्गातुः प्रभवस्य सम्बन्धे आख्यानमस्ति यत् देवान् त्यक्त्वा वाक् गता । देवैराहूता सा । वाचोक्तं यत् सा स्वभागात् वञ्चिता अस्ति । तस्यै भागः लभ्येत । देवैः इत्थं पृष्टे सति यत् तस्यै कः भागः निर्मातुं शक्यते, तदा वाचा उद्गातृनाम उच्चारितम् । जैमिनीयब्राह्मणे[४] उद्गाता होतुः श्रेष्ठो मतः । सः तावानेव श्रेष्ठः यावान् स्वयं यज्ञः । तैत्तिरीयब्राह्मणे उद्गात्रे आयुः इति संज्ञा दत्ता – **'आयुर्वा उद्गाता ।** '[५] सः यज्ञकर्तारं मृत्योः परिरक्षति । उद्गातुः सहायकेषु प्रस्तोता, सुब्रह्मण्यः प्रतिहर्त्ता च सन्ति । ये सहायकाः ऋत्विजः वर्त्तन्ते तेऽपि सामगाने प्रवीणाः भवन्ति ।

2. **प्रस्तोता** – काण्वशतपथे अस्य नामोल्लेखेन साकमेतस्मै यज्ञवाक् इति संज्ञापि प्रदीयते – **'प्रस्तोता वाग्यज्ञस्याथोद्गातात्मेव ।** '[६] प्रस्तोता उद्गातुः सहायकः ऋत्विगस्ति । सोमयागे वहिष्पवमानं प्रति अभिसर्पणे एषः भागं नयति । अश्वमेधयज्ञे अश्वबलिसमये एषः यमसम्बद्धं सामगानं गायति । एतस्य कार्यस्य समानता अश्वस्य नासिकाजन्येन श्वासशब्देन प्रदर्शिता । अत एव राजसूययज्ञे दशपेयसमये एतस्मै एकमश्वं दानरूपेण प्रयच्छन्ति । एषः यज्ञमुखम् इति कथ्यते । एषः प्रजापतेः रूपमपि मतः ।

3. **सुब्रह्मण्यः** – काण्वसंहितायामस्य नामोल्लेखः न प्राप्यते परञ्च काण्वशतपथे परिलक्ष्यते । उन्नेता एतं

[१]काण्वशतपथब्राह्मणम् – 14/1/1/9
[२]जैमिनीयब्राह्मणम् – 1/282
[३]ताण्ड्यमहाब्राह्मणम् – 6/7/5
[४]जैमिनीयब्राह्मणम् – 1/1/18
[५]तैत्तिरीयब्राह्मणम् – 3/8/5/4
[६]काण्वशतपथब्राह्मणम् – 5/3/1/3

उद्गातृकर्महेतवे दीक्षयति । सुब्रह्मण्यः उद्गात्रधीनं यज्ञे कार्यं करोति । अस्य मुख्यं कार्यं यज्ञसमाप्तेः पूर्वं प्रातःकालीनसवनस्य प्रारम्भे सुब्रह्मण्यसूत्राणामाह्वानं विद्यते । एषः इदं कार्यम् उत्करस्थाने अपद्रव्यराशौ उत्थाय करोति । एतस्य कृत्यस्य निमित्तं ऐतरेयब्राह्मणे[१] षड्विंशब्राह्मणे[२] च पृथक् - पृथक् आख्यानानि उद्धृतानि सन्ति । एषः यज्ञकर्त्तारं ब्रह्मशक्त्या श्रीसमृध्या च परिपुष्यति । एषः दक्षिणायां वृषभमवाप्नोति ।

4. **प्रतिहर्ता** – काण्वशतपथब्राह्मणे एषः यज्ञस्य भिषग् व्यानश्च मतः – 'प्रतिहर्ताभिषग्वा व्यानो वा ।'[३] एषोऽपि उद्गातृसहायकः ऋत्विक् । उद्गात्रे प्रतिहर्तारं दीक्षयन्ति । प्रतिहर्तुः प्रमुखं कार्यं प्रतिहारस्य उच्चारणमस्ति । एषः साम्नः एकः भागः वर्त्तते । अस्मात् कार्यात् सम्भवतः तस्य नाम्नः निष्पत्तिः सञ्जाता । अस्मै सर्वान्ते दक्षिणा दीयते यतोहि एषः प्रतिहर्ता अर्थात् निरोधकः विद्यते ।

**अथर्ववेदस्य ऋत्विजः –**

1. **ब्रह्मा** – बृह् वर्धने धातोः मनिन् प्रत्यये सति ब्रह्मन् शब्दः निष्पद्यते । वाचस्पत्ये[४] ब्रह्मकर्मन् शब्दः प्रदत्तो विद्यते, यत्र अस्यार्थः ऋत्विक्-ब्रह्मणा विहितं कर्म इति निर्दिश्यते । ब्राह्मणग्रन्थैरुच्यते यत् ब्रह्मणः निमित्तं वेदत्रयस्य ज्ञानं नितान्तमावश्यकं वर्त्तते - **'ब्रह्मत्वं क्रियत इति त्रय्या विद्ययेति ब्रूयात् इति ।'**[५] गोपथब्राह्मणग्रन्थः ब्रह्मणः अस्तित्वस्य पुष्टिम् अस्य आख्यानस्य माध्यमेन करोति - देवानां असुराणां च युद्धं जातम् । तस्मिन् समये देवैः इन्द्रः यज्ञस्य सुरक्षायाः कृते प्रार्थितः । तेन क्रमशः ऋग्वेद-यजुर्वेद-सामवेदानां च माध्यमेन यज्ञस्य रक्षा कृता । किन्तु एषः यज्ञस्य रक्षणे असमर्थः अभवत् । तत्पश्चात् तेन अथर्ववेदस्य रूपे शिरसि शिरोधानं बद्धा यज्ञस्य रक्षा कृता । अतः ब्रह्मा उष्णीषं धारयति -

**'देवाश्च ह वा असुराश्चास्पर्द्धन्त ते देवा इन्द्रमब्रुवन् ... स इन्द्र उष्णीषी ब्रह्मवेदो भूत्वा दक्षिणतः परीत्योपातिष्ठत् ।'**[६]

काण्वशतपथे ब्रह्मा यज्ञस्य अभिगोप्ता मतः – **'ब्रह्मा वै दक्षिणतो यज्ञस्याभिगोप्ता ।'**[७] एषः यज्ञस्य अर्धो भागः मतः । अयमपि उल्लेखः प्राप्यते यत् यज्ञः ब्रह्मणि एव आश्रितः वर्त्तते । ब्रह्माणं विना यज्ञः अपूर्णो वर्त्तते । ब्राह्मणाच्छंसी, पोता आग्नीध्रश्च तस्य सहायकाः ऋत्विजः सन्ति । एषः यज्ञे प्रायः मौनं धारयति । एषः यज्ञस्य दक्षिणभागे उपविशति यज्ञस्य च सुरक्षां करोति । यज्ञकर्मणि आगतस्य आधिक्यस्य अनुपयुक्ततया क्रियमाणस्य च

[१] ऐतरेयब्राह्मणम् – 6/3
[२] षड्विंशब्राह्मणम् – 1/11/7
[३] काण्वशतपथब्राह्मणम् – 5/3/1/3
[४] वाचस्पत्यम्, पृष्ठ संख्या - 4292
[५] ऐतरेयब्राह्मणम् – 5/33, काण्वशतपथब्राह्मणम् – 13/5/8/8, जैमिनीयब्राह्मणम् – 1/358
[६] गोपथब्राह्मणम् – 1/2/19
[७] काण्वशतपथब्राह्मणम् – 2/7/2/12


ISSN : 2249-538X

यज्ञस्य एषः प्रायश्चित्तं विदधाति । अतः एषः यज्ञस्य चिकित्सकः कथ्यते – **'यज्ञस्य हैव भिषक् यद् ब्रह्मा ।'**[१]

**2. ब्राह्मणाच्छंसी** – ब्रह्मणः सहायतार्थं ब्राह्मणाच्छंसिनं दीक्षयन्ति । अस्य विषये काण्वशतपथब्राह्मणे[२] एकम् आख्यानमस्ति यत् देवाः यदा यज्ञस्य सम्पादनं कुर्वन्ति स्म, तस्मिन् समये ते असुरेभ्यः राक्षसेभ्यश्च भीताः सञ्जाताः । तैः चिन्तितं यत् अस्मान् दक्षिणतः कः रक्षिष्यति । तैः विचारः कृतः यत् तेषु कः शक्तिशाली अस्ति । तैः इन्द्रः प्रार्थितः । इन्द्रः दक्षिणदिशः तान् रक्षयितुम् उत्तरदायित्वम् अनयत् परन्तु तेन देवेभ्यः पुरस्कारस्य याचना कृता । तैः देवैः ब्राह्मणाच्छंसिनः कर्माणि ब्रह्मतेजसः विकल्पे पुरस्काररूपेण प्रदत्तानि । अत्र ब्राह्मणाच्छंसिनः चयने इन्द्रस्य स्वकृति मता । एतस्य मुख्यं कार्यं मन्त्राणां पाठः अस्ति । एष यज्ञस्य मध्यो भागः इति उच्यते ।

**3. आग्नीध्रः** – काण्वसहितायाम् एषः अग्निमिध् इत्यपि कथ्यते । काण्वशतपथानुसारेण[३] एषः स्वर्गस्य पृथिव्याश्च प्रतिनिधित्वं करोति । एषः अपि ब्रह्मणः सहायकः अस्ति । आग्नीध्रस्य मुख्यं कार्यं हव्याग्नेः प्रज्वालनं वर्त्तते । एषः स्रुगादीनि यज्ञीयपात्राणि शुचीकरोति । एषः यज्ञकर्तुः भार्यां तन्तुना बध्नाति । दक्षिणायमे एषः होत्रा, अध्वर्युणा यजनकर्त्रा च सह अवशिष्टवाजिनस्य (दधिमिश्रितघृतस्य) भक्षणं करोति । एषः यजमानपत्न्याः नेष्टुः पार्श्वे च उपविश्य पात्नीवतग्रहशेषस्य भक्षणं कृत्वा प्रजननस्थानं गृह्णाति । यतोहि एषः पुल्लिङ्गरूपः अभिमतः ।

**4. पोता** – संहितायाः एकस्मिन् मन्त्रे उशग् शब्दः समागतः, यस्य सायणेन काण्वशतपथाधारेण पोता इत्यर्थः कृतः ।[४] एषः ब्रह्मणः सहायकः अस्ति । ब्रह्मणः सहायतार्थं पोतारं दीक्षयन्ति – **'अथ ब्रह्मणे पोतारं दीक्षयति ।'**[५] एषः अपि मन्त्रपाठं करोति । प्रातःसवने प्रस्थितसोमयागे आहुतिसमये एषः मन्त्राणां पाठं करोति । वैदिके जीवने साहित्ये च यज्ञाः विशिष्टं स्थानम् आवहन्ति । यज्ञाः वैदिकसभ्यतायाः अविभाज्याङ्गत्वेन स्वीकृताः । ब्राह्मणग्रन्थेषु वेदमन्त्राणां व्याख्यया सहैव यज्ञादिविभिन्नविषयाणां वर्णनम् अत्यन्तं रोचकतया गहनतया च कृतं विद्यते । यज्ञसम्बद्धाः क्रियाकलापाः तेषाञ्च हेतुना निर्देशः इत्यादीनां यज्ञस्य प्रत्येकं पक्षाणाम् उल्लेखः ब्राह्मणग्रन्थेषु दृश्यते । ध्यातव्यमिदं यत् सृष्ट्यादौ प्रजापतिना इष्टकामनापूरकस्य श्रेष्ठतमकर्मणः यज्ञस्य सृष्टिः कृता । यज्ञानां सम्पादनार्थं ऋत्विजां व्यवस्था कृता विद्यते । वर्त्तमानकाले यज्ञसम्बद्धक्रियाकलापान् प्रति तेषां कर्तॄन् ऋत्विजश्च प्रति जनसमुदायस्य औदासीन्यं दरीदृश्यते । अतः जनसाधारणस्य एतद्विषये परिज्ञानाय प्रस्तुतशोधालेखे अनुब्राह्मणग्रन्थम् ऋत्विजां परिचयः विवेचनं च प्रस्तुतम् ।

---

[१] ऐतरेयब्राह्मणम् – 5/34
[२] काण्वशतपथब्राह्मणम् – 5/7/6/1-3
[३] काण्वशतपथब्राह्मणम् – 2/7/3/22
[४] काण्वसंहिता – 5/8/1, काण्वशतपथब्राह्मणम् – 4/6/2/13
[५] गोपथब्राह्मणम् – 1/4/6

**सन्दर्भग्रन्थसूचिः –**

1. अष्टाध्यायी, मुम्बय्यां खेमराज श्रीकृष्णदास इत्यनेन श्रीवेंकटेश्वर मुद्रणालये मुद्रयित्वा प्रकाशिता
2. ऐतरेयब्राह्मण, सम्पादक – अनन्तकृष्ण शास्त्री, भास्कर प्रेस, त्रिवेन्द्रम्, 1942
3. काण्व शतपथब्राह्मण, सम्पादक – गुणाकर, महर्षि सान्दीपनि राष्ट्रीय वेदविद्या प्रतिष्ठान, उज्जैन, म.प्र.
4. काण्व संहिता, सम्पादक – पं. श्री चिन्तामणी शर्मा, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी
5. कौषीतकीब्राह्मण, सम्पादक – सुदर्शन शर्मा, श्रीवेंकटेश्वर विश्वविद्यालय, तिरुपति, 2009
6. गोपथब्राह्मणभाष्य, पं. क्षेमकरणदास त्रिवेदी, चौखम्बा संस्कृत प्रतिष्ठान, नई दिल्ली, 1993
7. ताण्ड्यमहाब्राह्मण, राष्ट्रीय संस्कृत संस्थान, जनकपुरी, नई दिल्ली
8. तैत्तिरीयब्राह्मण, सम्पादक – श्रीनिवासाचार्य, मोतीलाल बनारसीदास, दिल्ली, 1985
9. वाचस्पत्यम्, श्री तारानाथ तर्कवाचस्पति, चौखम्बा संस्कृत सिरीज, वाराणसी

 ISSN : 2249-538X

# सिद्धान्तज्यौतिषशास्त्रे ज्योत्पत्तिः

गिरीशभट्टः बि*

**सारांशः –**

फलितज्यौतिषग्रन्थेषु विविधानि शुभाशुभफलानि कथितानि सन्ति । तेषां फलानाम् आदेशः ग्रहस्फुटानां लग्नादिभावस्फुटानाञ्च आधारेण एव ज्यौतिषिकैः क्रियते । ग्रहस्फुटानां लग्नादिभावस्फुटानाम् आनयनार्थं ज्यौतिषिकैः सिद्धान्तज्यौतिषम् अध्येतव्यं भवति । सिद्धान्तज्यौतिषस्य आधारेण ग्रहाणां लग्नादिभावस्फुटानाञ्च आनयनप्रक्रियायां ज्योत्पत्तेः सिद्धान्ताः प्रमुखपात्राणि वहन्ति । ग्रहस्फुटाः भावस्फुटाश्च स्फुटाः न भवन्ति चेत् फलादेशः अपि परिस्फुटः न भवति । ज्यागणितं विना स्फुटग्रहान् लग्नादिभावांश्च साधयितुं न शक्यते । अतः सिद्धान्तज्यौतिषे ज्योत्पत्तिः अत्यन्तं मुख्यः सिद्धान्तः भवति । अत एव सूर्यसिद्धान्तादारभ्य केतकीग्रहगणितपर्यन्तं सर्वेषु अपि सिद्धान्त-तन्त्र-करणग्रन्थेषु ज्योत्पत्तिविषयकाः सिद्धान्ताः प्रतिपादिताः सन्ति । अस्मिन् शोधपत्त्रे सिद्धान्तज्यौतिषे प्रतिपादितायाः ज्योत्पत्तेः स्थूलचित्रणं क्रियते ।

**प्रमुखशब्दाः** – ज्या, भुजज्या, कोटिज्या, उत्क्रमज्या, त्रिज्या ।

**ज्योत्पत्तिः –**

ज्यानाम् उत्पत्तिः ज्योत्पत्तिरिति षष्ठीतत्पुरुषसमासः । आङ्ग्लभाषायां 'ज्योत्पत्तिः' इति शब्दस्य "The Science of calculation for the construction of Sine" इति विवरणम् । वृत्तपरिधेः एकस्मात् बिन्दुतः अन्यबिन्दुपर्यन्तं कृता सरलरेखा पूर्णज्या इत्युच्यते । सा पूर्णज्या एव सरलरेखागणिते ज्याशब्देन व्यवह्रियते । यतो हि सरलरेखागणिते पूर्णज्यायाः उपयोगः अस्ति । परन्तु ग्रहगणिते अस्याः पूर्णज्यायाः अर्धरूपा अर्धज्या एव ज्याशब्देन व्यवह्रियते । यतो हि ग्रहगणिते अर्धज्यायाः एव सर्वत्र उपयोगः भवति । यथोक्तं श्रीमता भास्कराचार्येण सिद्धान्तशिरोमणौ –

**अर्धज्याग्रे खेचरो मध्यसूत्रात् तिर्यक्संस्थो जायते येन तेन ।**
**अर्धज्याभिः कर्म सर्वं ग्रहाणामर्धज्यैव ज्याभिधानात्र वेद्या ॥**[1] इति ।

ग्रहसञ्चारवृत्तस्य कोऽपि अवधिभूतः प्रदेशः मध्यबिन्दुः भवति । तस्मात् मध्यबिन्दुतः वृत्तकेन्द्रगामि यत्सूत्रं कल्प्यते तदेव मध्यसूत्रम् । ग्रहः स्वसञ्चारवृत्तपरिधौ तस्मात् मध्यसूत्रात् अर्धज्यायाः अग्रे सञ्चरति । न तु पूर्णज्यायाः अग्रे । अतः ग्रहगणिते सर्वदा अर्धज्यायाः एव उपयोगः भवति । न तु पूर्णज्यायाः । अतः ग्रहगणिते सर्वत्रापि अर्धज्या एव ज्याशब्देन व्यवह्रियते ।

पूर्णज्या अर्धज्यायाः द्विगुणितं भवति । अर्धज्या तु पूर्णज्यायाः अर्धं भवति । एतदेव पूर्णज्या-अर्धज्ययोर्मध्ये विद्यमानः सम्बन्धः । एवञ्च अभीष्टचापांशानां ज्या अर्धज्या इति यदि वयं वदामः तर्हि पूर्णज्या

---

*शोधच्छात्त्रः, ज्यौतिष-वास्तुविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

[1]सिद्धान्तशिरोमणिः – ग्रहगणिताध्यायः – स्पष्टाधिकारः – श्लोकः २

नाम द्विगुणितचापांशानां ज्या इति वक्तुं शक्नुमः । अर्धज्या एव ज्यार्धम् इत्यपि व्यवह्रियते । **"मौर्वी ज्याशिञ्जिनी गुणः"**[1] इति अमरकोशोक्तरीत्या मौर्वी, ज्या, शिञ्जिनी, गुणः – एतानि ज्याशब्दस्य पर्यायपदानि भवन्ति । जीवाशब्दोऽपि ज्याशब्दस्य समानार्थकपदमेव भवति । ज्या क्रमज्या, उत्क्रमज्या चेति द्विविधा भवति । क्रमज्या पुनः भुजज्या, कोटिज्या चेति द्विविधा भवति । उत्क्रमज्या अपि भुजोत्क्रमज्या, कोट्युत्क्रमज्या चेति द्विविधा भवति । एवं भारतीयसिद्धान्तज्यौतिषशास्त्रे चतुर्विधानां ज्यानां प्रयोगः दृश्यते ।

अधोनिर्दिष्टे रेखाचित्रे ज्यानां भेदाः चित्रिताः सन्ति –




प्रवाहचित्रम् १ : ज्यायाः भेदाः

यथा रेखा इति शब्देन सामान्यतः सरलरेखा एव गृह्यते, वक्ररेखा इति ज्ञातव्यं चेत् पृथक्तया वक्ररेखा इति उच्चारणीयं तद्वदेव ज्या इति शब्देन भुजज्या एव गृह्यते । कोटिज्या इति पृथक् उक्तं चेदेव कोटिज्या इति अवगन्तव्यम् । केवलं ज्या इति यत्र कुत्रापि उक्तं चेत् भुजज्या इत्येव अवगन्तव्यम् । एवञ्च केवलं क्रमज्या इति उच्यते चेदपि भुजज्या इत्येव अवगन्तव्यम् ।

एवं भुजज्या, कोटिज्या, भुजोत्क्रमज्या, कोट्युत्क्रमज्या – एतेषां चतुर्णां ज्यानां सम्बद्धाः सिद्धान्ताः एव ज्योत्पत्तिविषयकाः सिद्धान्ताः सन्ति । सूर्यसिद्धान्तः, आर्यभटीयं, महाभास्करीयं, ब्राह्मस्फुटसिद्धान्तः, शिष्यधीवृद्धिदं, सिद्धान्तशिरोमणिः, सिद्धान्ततत्त्वविवेकः, सिद्धान्तसम्राट्, सद्रत्नमाला, केतकीग्रहगणितम् – एवं प्रायः सर्वेषु सिद्धान्त-तन्त्र-करणग्रन्थेषु ज्योत्पत्तिविषयकाः सिद्धान्ताः प्रतिपादिताः सन्ति ।

भुजांश-कोट्यंशयोः साधनं, चापात् ज्यासाधनं, ज्यातः चापानयनं, भुजार्धांशकज्यासाधनं, चापतृतीयांशज्यासाधनं, चापपञ्चमांशज्यासाधनम्, उत्क्रमज्यासाधनं, ज्याकोष्ठकनिर्माणं, ज्यानां सङ्कलन-व्यवकलनप्रमेयाः इत्यादिविषयाः ज्योत्पत्तौ अन्तर्भवन्ति ।

**वृत्ते ज्यायाः स्वरूपम् –**

यत्क्षेत्रं स्वान्तर्गतात् समेऽन्तरे विद्यमानया परिधिसंज्ञया एकया एव रेखया वेष्टितं तद्वृत्तक्षेत्रम् इत्युच्यते ।

[1] अमरकोषः – द्वितीयकाण्डम् – क्षत्रियवर्गः – श्लोकः ८६


ISSN : 2249-538X

परिधिः, वृत्तकेन्द्रं, त्रिज्या, व्यासः, ज्या, वृत्तखण्डम् – एतानि वृत्तस्य अवयवानि भवन्ति । वृत्तं यया वक्ररेखया आवृतं भवति सैव वृत्तस्य परिधिः इत्युच्यते । वृत्तस्य मध्यबिन्दुः वृत्तकेन्द्रम् इत्युच्यते । वृत्तकेन्द्रात् परिधिपर्यन्तं कृता रेखा एव त्रिज्या । वृत्तान्तर्गता या वृत्तकेन्द्रगामिनी रेखा वृत्तस्य परिधेः बिन्दुद्वयं स्पृशति सैव व्यासः । वृत्तस्य सर्वाः त्रिज्याः अपि मिथः समानाः भवन्ति । वृत्तस्य सर्वे व्यासाः अपि मिथः समानाः भवन्ति । त्रिज्या व्यासार्धं भवति । व्यासः त्रिज्यायाः द्विगुणः भवति । एतदेव त्रिज्या-व्यासयोः सम्बन्धः । वृत्तस्य अत्यन्तं बृहती अर्धज्या एव त्रिज्या । वृत्तस्य अत्यन्तं बृहती पूर्णज्या एव व्यासः ।

वृत्ते चत्वारि पदानि भवन्ति । प्रत्येकं पदे ९० अंशाः । ० तः ९० अंशपर्यन्तं प्रथमं पदम् । ९० अंशेभ्यः १८० अंशपर्यन्तं द्वितीयं पदम् । १८० अंशेभ्यः २७० अंशपर्यन्तं तृतीयं पदम् । २७० अंशेभ्यः ३६० अंशपर्यन्तं चतुर्थं पदम् । तेषु प्रथमपदं तृतीयपदं च ओजपदे भवतः । द्वितीयपदं चतुर्थपदं च युग्मपदे भवतः । ओजपदयोः वृत्तपरिधेः निम्नता येन क्रमेण भवति तस्माद्विपरीतक्रमेण युग्मपदयोः वृत्तपरिधेः निम्नता भवति । अत एव ओजपदयोः यातांशाः भुजांशाः भवन्ति, युग्मपदयोः एष्यांशाः भुजांशाः भवन्ति । एवञ्च ओजपदयोः एष्यांशाः कोट्यंशाः भवन्ति, युग्मपदयोः यातांशाः कोट्यंशाः भवन्ति । ९० अंशेभ्यः भुजांशानां शोधनेन कोट्यंशाः लभ्यन्ते । ९० अंशेभ्यः कोट्यंशानां शोधनेन भुजांशाः लभ्यन्ते । भुजांशानां ज्या एव भुजज्या । कोट्यंशानां ज्या एव कोटिज्या ।

वृत्तस्य प्रथमपदे येन क्रमेण भुजज्याः भवन्ति ततः विपरीतक्रमेण वृत्तस्य द्वितीयपदे भुजज्याः भवन्ति । वृत्तस्य द्वितीयपदे येन क्रमेण भुजज्याः भवन्ति ततः विपरीतक्रमेण वृत्तस्य तृतीयपदे भुजज्याः भवन्ति । वृत्तस्य तृतीयपदे येन क्रमेण भुजज्याः भवन्ति ततः विपरीतक्रमेण वृत्तस्य चतुर्थपदे भुजज्याः भवन्ति । वृत्तस्य यस्मिन् कस्मिन्नपि पदे भुजज्याः येन क्रमेण भवन्ति ततः विपरीतक्रमेण कोटिज्याः भवन्ति । उदाहरणार्थं वृत्तस्य प्रथमपदे शून्यांशानां भुजज्या शून्या, कोटिज्या च परमा त्रिज्यामिता । नवत्यंशानां भुजज्या परमा त्रिज्यामिता, कोटिज्या च शून्या । त्रिंशदंशानां भुजज्या षष्ट्यंशानां कोटिज्यासमा भवति ।

एवं वृत्तस्य प्रथमपदे येन क्रमेण ज्याः भवन्ति ततः परस्परविपरीतक्रमेण वृत्तस्य द्वितीयादिपदेषु ज्याः भवन्ति । अतः वृत्तस्य प्रथमपदे सर्वाः ज्याः साधिताः चेत् द्वितीय-तृतीय-चतुर्थपदेष्वपि ज्याः ज्ञातुं शक्यते । अत एव वृत्तस्य द्वितीयादिपदेषु भुजांशानां साधनं कृत्वा ज्यासाधनं करणीयम् । वृत्तस्य यस्मिन् कस्मिन्नपि पदे अभीष्टांशानां ज्या वृत्तस्य प्रथमपदस्य येषाम् अंशानां ज्यया तुल्या भवति ते अंशाः भुजांशाः इत्युच्यन्ते । भुजांशानां साधनविधिः वेङ्कटेशकेतकर्महोदयेन अधोनिर्दिष्टेन सुन्दरश्लोकेन प्रतिपादितम् –

**त्रिभादल्पकेन्द्रं भुजः स्यात्तदेव त्रिभोर्ध्वं नवान्तं विशोष्यं रसैस्तत् ।**
**नवभ्योऽधिको द्वादशभ्यो विशोध्यं भुजोनं त्रिभं कोटिरित्युच्यते वै ॥**[1] इति ।

[1]केतकीग्रहगणितम् – मध्यमाधिकारः – श्लोकसङ्ख्या २७

अभीष्टचापांशाः नवत्यंशेभ्यः अल्पाः भवन्ति चेत् (वृत्तस्य प्रथमपदे) ते एव भुजांशाः भवन्ति । अभीष्टचापांशाः नवत्यंशेभ्यः अधिकाः, किन्तु १८० अंशेभ्यः न्यूनाः भवन्ति चेत् (वृत्तस्य द्वितीयपदे) १८० अंशेभ्यः अभीष्टचापांशाः विशोध्यन्ते चेत् भुजांशाः लभ्यन्ते । अभीष्टचापांशाः १८० अंशेभ्यः अधिकाः, २७० अंशेभ्यः न्यूनाः भवन्ति चेत् (वृत्तस्य तृतीयपदे) अभीष्टचापांशेभ्यः १८० अंशानां शोधनेन भुजांशाः लभ्यन्ते । अभीष्टचापांशाः २७० अंशेभ्यः अधिकाः, ३६० अंशेभ्यः न्यूनाः भवन्ति चेत् (वृत्तस्य चतुर्थपदे) ३६० अंशेभ्यः अभीष्टचापांशानां शोधनेन भुजांशाः लभ्यन्ते ।

अभीष्टचापांशाः ३ राशयः (९० अंशाः) भवन्ति चेत् भुजांशाः नवत्यंशमिताः भवन्ति । अभीष्टचापांशाः ६ राशयः (१८० अंशाः) भवन्ति चेत् भुजांशाः शून्यमिताः भवन्ति । अभीष्टचापांशाः ९ राशयः (२७० अंशाः) भवन्ति चेत् भुजांशाः नवत्यंशमिताः भवन्ति । अभीष्टचापांशाः १२ राशयः (३६० अंशाः) भवन्ति चेत् भुजांशाः शून्यमिताः भवन्ति ।

राशित्रयात् भुजांशानां शोधनेन कोट्यंशाः लभ्यन्ते । भुजांशानां ज्या एव भुजज्या भवति । कोट्यंशानां ज्या एव कोटिज्या भवति ।

मेषादिराशिषट्के (०°तः १८०°पर्यन्तं) भुजज्या धनं (+) भवति । तुलादिराशिषट्के (१८०°तः ३६०° पर्यन्तं) भुजज्या ऋणं (-) भवति । मकरादिराशिषट्के (२७०° तः ९०° पर्यन्तं) कोटिज्या धनं (+) भवति । कर्कटादिराशिषट्के (९०°तः २७०° पर्यन्तं) कोटिज्या ऋणं(-) भवति । यथोक्तं श्रीवेङ्कटेशकेतकर्महोदयेन केतकीग्रहगणिते त्रिप्रश्नाधिकारे –

**धनुष्यजाद्यं तु धनं भुजज्या क्षयस्तुलाद्ये रसभे भवेत्सा ।**
**कोटीज्यका स्वं मकरादिषड्भे क्षयः कुलीरादिषु षड्गृहेषु ॥**[1] इति ।

ज्या-चापयोर्मध्ये बाणरूपं यत् त्रिज्याखण्डं भवति तदेव उत्क्रमज्या भवति । यथोक्तं भास्कराचार्येण – **"ज्याचापमध्ये खलु बाणरूपा स्यादुत्क्रमज्या"**[2] इति । उत्क्रमज्यां शरः, बाणः इत्यपि कथयन्ति । सा च उत्क्रमज्या भुजोत्क्रमज्या, कोट्युत्क्रमज्या चेति द्विविधा । भुजज्या-तच्चापयोर्मध्ये विद्यमानं बाणरूपं त्रिज्याखण्डं भुजोत्क्रमज्या भवति । कोटिज्या-तच्चापयोर्मध्ये विद्यमानं बाणरूपं त्रिज्याखण्डं कोट्युत्क्रमज्या भवति । भुजोत्क्रमज्यां versine इति, कोट्युत्क्रमज्यां coversine इति च आङ्ग्लभाषायां वदन्ति । परमा उत्क्रमज्या त्रिज्यामिता भवति । भुजज्यायाः भुजोत्क्रमज्यायाः च परमस्थानं शून्यस्थानं परमप्रमाणं च समानं भवति । एवञ्च कोटिज्यायाः कोट्युत्क्रमज्यायाश्च परमप्रमाणं शून्यप्रमाणं परमस्थानं च समानं भवति । शून्यांशानां भुजज्या भुजोत्क्रमज्या च

[1] केतकीग्रहगणितम् – त्रिप्रश्नाधिकारः – श्लोकसङ्ख्या १६
[2] सिद्धान्तशिरोमणिः – गोलाध्यायः – छेद्यकाधिकारः (स्फुटगतिवासना) – श्लोकः ३


ISSN : 2249-538X

शून्या भवति । नवत्यंशानां भुजज्या भुजोत्क्रमज्या च परमा त्रिज्यामिता भवति । एवञ्च शून्यांशानां कोटिज्या कोट्युत्क्रमज्या च परमा त्रिज्यामिता भवति । नवत्यंशानां कोटिज्या कोट्युत्क्रमज्या च शून्या भवति । सर्वदा भुजज्या भुजोत्क्रमज्या च मथः लम्बरूपौ (perpendicular) भवतः । एवञ्च कोटिज्या, कोट्युत्क्रमज्या चापि मिथः लम्बरूपौ (perpendicular)भवतः ।

एवं, क्रमज्या (भुजज्या कोटिज्या वा) ज्यारूपेण भवति । उत्क्रमज्या (भुजोत्क्रमज्या कोट्युत्क्रमज्या वा) बाणरूपेण भवति । चापः धनुषः रूपेण भवति । एवं वृत्ते ज्याक्षेत्रं युद्धेषु उपयुज्यमानस्य धनुषः आकारे विद्यते । ज्याक्षेत्रे जात्यत्रिभुजस्य संस्थानमपि वयं कल्पयितुं शक्नुमः । तद्यथा – भुजज्या एव भुजः, कोटिज्या एव कोटिः, त्रिज्या एव कर्णः इति । जात्यत्रिभुजे भुजकोट्योः वर्गैक्यपदं कर्णः भवति । अतः भुजज्या-कोटिज्ययोः वर्गैक्यपदं त्रिज्या भवति । त्रिज्यातः भुजज्यायाः शोधनेन कोटिज्या लभ्यते । त्रिज्यातः कोटिज्यायाः शोधनेन भुजज्या लभ्यते । एतत्तु समीकरणरूपेण अधोनिर्दिष्टरीत्या व्यक्तीकर्तुं शक्नुमः –

$$\sqrt{\text{भुजज्या}^{२} + \text{कोटिज्या}^{२}} = \text{त्रिज्या}$$

$$\sqrt{\text{त्रिज्या}^{२} + \text{कोटिज्या}^{२}} = \text{भुजज्या}$$

$$\sqrt{\text{त्रिज्या}^{२} + \text{भुजज्या}^{२}} = \text{कोटिज्या}$$

त्रिज्यातः भुजज्यायाः शोधनेन कोट्युत्क्रमज्या लभ्यते । एवञ्च त्रिज्यातः कोटिज्याः शोधनेन भुजोत्क्रमज्या लभ्यते । एतत् समीकरणरूपेण अधोनिर्दिष्टरीत्या व्यक्तीकर्तुं शक्नुमः – त्रिज्या – भुजज्या = कोट्युत्क्रमज्या त्रिज्या – कोटिज्या = भुजोत्क्रमज्या

अधोनिर्दिष्टेण चित्रेण वृत्ते ज्यायाः स्वरूपं स्पष्टतया ज्ञातुं शक्नुमः –




**चित्रम् – १ : वृत्ते ज्यायाः स्वरूपम्**

चित्रम् – १ मध्ये,

$\overset{\frown}{DG}$ अभीष्टचापः भवति ।

GF इत्येतत् $\overset{\frown}{DG}$ चापस्य भुजज्या भवति ।

GI पूर्णज्या भवति ।

GH इत्येतत् $\overset{\frown}{DG}$ चापस्य कोटिज्या भवति ।

DF इत्येतत् $\overset{\frown}{DG}$ चापस्य भुजोत्क्रमज्या भवति ।

HC इत्येतत् $\overset{\frown}{DG}$ चापस्य कोट्युत्क्रमज्या भवति ।

AG = AC = AD = त्रिज्या

FGAH समानान्तरचतुर्भुजमस्ति । समानान्तरचतुर्भुजस्य कर्णौ समानौ भवतः । अतः,

AG = FH

अतः,

$\sqrt{GF^2 + GH^2} = FH = AC =$ त्रिज्या

$\sqrt{\mathrm{AC}^2 - \mathrm{GF}^2} = GH =$ कोटिज्या

$\sqrt{\mathrm{AC}^2 - \mathrm{GH}^2} = GH =$ भुजज्या

$AD - GH = DF =$ भुजोत्क्रमज्या

$AC - FG = HC =$ कोट्युत्क्रमज्या

**ज्योत्पत्तेः केचन विशेषसिद्धान्ताः –**

ज्योत्पत्तेः व्याप्तिः अत्यन्तं बृहती वर्तते । ज्योत्पत्तिविषयकाः बहवः सिद्धान्ताः सन्ति । तेषु केचन प्रमुखाः सिद्धान्ताः अत्र निरूप्यन्ते –

**पञ्चचत्वारिंशदंशानां ज्यासाधनम् –**

भास्कराचार्यः सिद्धान्तशिरोमणौ गोलाध्याये पञ्चचत्वारिंशदंशानां ज्यासाधनक्रमं निरूपितवान् । तद्यथा –

**..........................................त्रिभमौर्विकायाः ।**

**वर्गार्धमूलं शरवेदभागजीवा ततः कोटिगुणोऽपि तावान् ॥**[१] इति ।

त्रिज्यावर्गार्धमूलं पञ्चचत्वारिंशदंशानां भुजज्या भवति । पञ्चचत्वारिंशदंशानां कोटिज्या अपि तावती एव भवति ।

$$\sqrt{\left(\frac{\text{त्रिज्या}^{२}}{२}\right)} = \text{ज्या } ४५^\circ$$

$$\text{ज्या } ४५^\circ = \text{कोज्या } ४५^\circ$$

सिद्धान्तसम्राट्ग्रन्थे सम्राट्जगन्नाथेनापि एतत्सूत्रं प्रतिपादितम् । तद्यथा –

**त्रिज्याकृतेरर्धपदं तु यत्स्यात्तद्बाणवेदप्रमितांशजीवा ॥**[२] इति ।

**त्रिंशदंशानां ज्या –**

त्रिंशदंशानां ज्या त्रिज्यार्धं भवति । एतदेव षष्ट्यंशानां कोटिज्या अपि भवति । यथोक्तं भास्कराचार्येण –

[१] सिद्धान्तशिरोमणिः – गोलाध्यायः – छेद्यकाधिकारः (स्फुटगतिवासना) – श्लोकसङ्ख्या ३

[२] सिद्धान्तसम्राट् – ज्योत्पत्तिः – श्लोकः 10

**"त्रिभज्यकार्धं खगुणांशजीवा, तत्कोटिजीवा खरसांशकानाम्"**[१] इति ।

व्यासः/२ = त्रिज्या

त्रिज्या/२ = ज्या ३०° = कोज्या ६०°

**भुजार्धांशकशिञ्जिनीसाधनम् –**

अभीष्टभुजांशकानाम् अर्धांशकानां शिञ्जिनी (ज्या) एव भुजार्धांशकशिञ्जिनी । तत्साधनस्य प्रकारद्वयं भास्कराचार्येण कथितम् ।

**प्रथमः प्रकारः –**

**"क्रमोत्क्रमज्याकृतियोगमूलाद्दलं तदर्धांशकशिञ्जिनी स्यात् ।"**[२]

क्रमज्या(भुजज्या)-भुजोत्क्रमज्ययोः वर्गयोगमूलार्धं भुजार्धांशकशिञ्जिनी भवति । एतत् समीकरणरूपेण अधोनिर्दिष्टरीत्या व्यक्तीकर्तुं शक्नुमः –

$$\frac{\sqrt{\text{भुजज्या}^2 + \text{भुजोत्क्रमज्या}^2}}{2} = \text{भुजार्धांशकशिञ्जिनी}$$

**द्वितीयः प्रकारः –**

**त्रिज्योत्क्रमज्यानिहतेर्दलस्य मूलं तदर्धांशकशिञ्जिनी वा ।** [३]

त्रिज्या-उत्क्रमज्ययोः घातार्धस्य मूलम् अभीष्टचापांशानामर्धांशकानां शिञ्जिनी भवति । एतत् समीकरणरूपेण अधोनिर्दिष्टरीत्या व्यक्तीकर्तुं शक्नुमः –

$$\frac{\text{त्रिज्या} \times \text{उत्क्रमज्या}}{2} = \text{भुजार्धांशकशिञ्जिनी}$$

**१८, ७२ अंशयोः ज्यासाधनसूत्रम् –**

१८, ७२ अंशयोः ज्यासाधननियमं सम्राट्जगन्नाथः अधोनिर्दिष्टश्लोके निरूपितवान् –

**त्रिज्यार्धवर्गादिषुसङ्गुणाच्च मूलं खरामांशकजीवयोनम् ।**
**तदर्धकं स्याद्धृतिभागजीवा तत्कोटिजीवा द्विनगांशकानाम् ॥**[४]

[१]सिद्धान्तशिरोमणिः – गोलाध्यायः – छेद्यकाधिकारः (स्फुटगतिवासना) – श्लोकसङ्ख्या ४
[२]सिद्धान्तशिरोमणिः – गोलाध्यायः – छेद्यकाधिकारः (स्फुटगतिवासना) – श्लोकसङ्ख्या ४
[३]सिद्धान्तशिरोमणिः – गोलाध्यायः – छेद्यकाधिकारः (स्फुटगतिवासना) – श्लोकसङ्ख्या ५
[४]सिद्धान्तसम्राट् – ज्योत्पत्तिः – श्लोकः 11


ISSN : 2249-538X

त्रिज्यार्धवर्गं पञ्चभिः सङ्गुण्य मूलं कृत्वा ३० अंशानां जीवया ऊनीकृत्य अर्धीक्रियते चेत् १८ अंशानां ज्या लभ्यते । तदेव ७२ अंशानां कोटिज्या भवति ।

$$\text{ज्या } १८^\circ = \frac{\sqrt{\left(\frac{\text{त्रिज्या}}{२}\right)^2 \times ५} - \text{ज्या } ३०^\circ}{२} = \text{कोज्या } ७२^\circ$$

१८ अंशानां कोटिज्या एव ७२ अंशानां ज्या भवति ।

एतमेव नियमं जगन्नाथात् पूर्ववर्तिभिः भास्कराचार्य-मुनीश्वर-कमलाकरभट्टैरपि प्रतिपादितम् ।

**३६, ५४ अंशयोः ज्यासाधनसूत्रम् –**

३६, ५४ अंशयोः ज्यासाधननियमं सम्राट्जगन्नाथः अधोनिर्दिष्टश्लोके निरूपितवान् –

**तस्यास्तदर्धांशकशिञ्जिनी स्यात्कोटिजीवा कृतमार्गणज्या ।**

**पुनस्ततस्तद्दलभागकानां जीवा प्रसाध्या नगदस्रकानाम् ॥**[१]

७२ अंशानाम् अर्धांशकशिञ्जिनी एव ३६ अंशानां ज्या भवति । ३ ? अंशानां कोटिजीवा ५४ अंशकानां ज्या स्यात् । ५४ अंशानाम् अर्धांशकानां जीवा २७ अंशानां जीवा स्यात् ।

$$\text{ज्या}\left(\frac{७२}{२}\right)^\circ = \textit{ज्या } ३६^\circ$$

३६ अंशानां कोटिज्या ५४ अंशानां भुजज्या भवति ।

**ज्ययोः सङ्कलन-व्यवकलनप्रमेयः –**

द्वयोः भिन्नभिन्नचापांशयोः ज्ये ज्ञाते चेत् तयोः चापांशयोः योगतुल्यचापंशानां ज्यायाः तथा अन्तरतुल्यचापांशानां च ज्यायाश्च ज्ञानार्थं भास्कराचार्यः एकं नियमं प्रतिपादितवान् । एषः नियमः एव ज्ययोः सङ्कलनव्यवकलनप्रमेयः (addition and substraction theorems for the sines) इति उच्यते । तद्यथा –

**चापयोरिष्टयोर्दोर्ज्ये मिथः कोटिज्यकाहते ।**

**त्रिज्याभक्ते तयोरैक्यं स्याच्चापैक्यस्य दोर्ज्यका ॥**

**चापान्तरस्य जीवा स्यात् तयोरन्तरसम्मिता ।** [२] इति ।

[१] सिद्धान्तसम्राट् – ज्योत्पत्तिः – श्लोकः 12

[२] सिद्धान्तशिरोमणिः – गोलाध्यायः – ज्योत्पत्तिः – श्लोकसङ्ख्या २१, २११/२

α, β एतद्द्वयं R मिता त्रिज्या यस्य वृत्तस्य भवति तस्य वृत्तस्य चापद्वयं भवति इति कल्पयामश्चेत् अत्र श्लोकोक्तनियमम् अधोनिर्दिष्टरीत्या वयं व्यक्तीकर्तुं शक्नुमः –

$$sin\ (\pm) = [\{(sin.cos)/R\}\pm\{(cos.sin)/R\}$$ इति ।

ज्ययोः सङ्कलनमेव समासभावना इत्युच्यते । ज्ययोः व्यवकलनमेव अन्तरभावना इत्युच्यते ।

**निष्कर्षः –**

ज्योत्पत्तेः व्याप्तिः अत्यन्तं बृहती वर्तते । अतः एकस्मिन्नेव शोधपत्रे ज्योत्पत्तेः सर्वेषामपि सिद्धान्तानां परिचयं दातुं न शक्यते । तथापि ज्योत्पत्तेः सामान्यपरिचयनिमित्तं दिङ्मात्रं ज्योत्पत्तिविषयकानां केषाञ्चन सिद्धान्तानां परिचयः अस्मिन् शोधपत्रे कृतः । इतोऽपि ज्योत्पत्तिविषयकाः सिद्धान्ताः बहवः सन्ति । परन्तु पत्रविस्तरभयात् सर्वेषां ज्योत्पत्तिविषयकसिद्धान्तानां चर्चा अत्र न कृता ।

**सन्दर्भग्रन्थसूची –**

1. **श्रीमद्भास्कराचार्यप्रणीतः सिद्धान्तशिरोमणिः – स्वोपज्ञवासनाभाष्यसंवलितो नृसिंहदैवज्ञकृतवार्त्तिकोपेतश्च ;** सम्पादकः – डॉ. मुरलीधरचतुर्वेदः ; तृतीयं संस्करणम् ; संस्करणवर्षम् – सा.यु.२०१० ; प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
2. **सिद्धान्तसम्राट् ;** ग्रन्थकर्ता – जगन्नाथसम्राट्, प्रथमसंस्करणम्, संस्करणवर्षम् – सा.यु.१९७६, प्रकाशनसंस्था – संस्कृतपरिषद्, सागरविश्वविद्यालयः, सागरम् (मध्यप्रदेशः)
3. **“ज्या-सिद्धान्ताः” Formulas of Sine ;** सम्पादकः – पं. शिवचरणशास्त्री, प्रकाशनवर्षम् – सा.यु.२०१४ ; प्रकाशनसंस्था – राष्ट्रियसंस्कृतसाहित्यकेन्द्रम्, जयपुरम्
4. **सिद्धान्तसार्वभौमः – द्वितीयो भागः ;** ग्रन्थकर्ता – मुनीश्वरः, प्रकाशनवर्षम् – सा.यु.१९३५, प्रकाशनसंस्था – राजकीयसंस्कृतमहाविद्यालयः, वाराणसी
5. **सिद्धान्ततत्त्वविवेकः – प्रथमो भागः ;** ग्रन्थकर्ता – कमलाकरभट्टः, व्याख्याकारः – श्रीगङ्गाधरशर्मा, द्वितीयसंस्करणम्, संस्करणवर्षम् – सा.यु.२०१७, प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
6. **सिद्धान्तशेखरः ;** ग्रन्थकर्ता – श्रीपतिः, व्याख्याकारः – सत्यदेवशर्मा, प्रकाशनसंस्था – चौखम्बा कृष्णदास अकादमी, वाराणसी
7. **सिद्धान्तशिरोमणेर्गोलाध्यायस्योपपत्तिः** – लेखकः – डॉ. प्रेमकुमारशर्मा, संस्करणम् – सा.यु.२००५, प्रकाशनसंस्था – नागप्रकाशनम्, नवदेहली


ISSN : 2249-538X

# 259

8. **अर्वाचीनं ज्योतिर्विज्ञानम्** ; ग्रन्थकर्ता – श्रीरमानाथसहायः, प्रकाशनवर्षम् – सा.यु.१९९६, प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
9. **ज्योतिर्विज्ञानम्** ; ग्रन्थकर्ता – धूलिपाल अर्कसोमयाजी, प्रकाशनवर्षम् – सा.यु.१९६४, प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
10. **म०म०बापूदेवशास्त्रिकृता सरलत्रिकोणमितिः** ; सम्पादकः – पण्डितश्रीगोविन्दपाठकः, प्रकाशनवर्षम् – सा.यु.२००२, प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
11. **म०म० बापूदेवशास्त्रिकृता सरलत्रिकोणमितिः (संस्कृत-हिन्दीव्याख्योपेतम्)** ; व्याख्याकारः – पं.सत्यदेवशर्मा, संस्करणवर्षम् – सा.यु.२०१२, प्रकाशनसंस्था – चौखम्बा सुरभारती प्रकाशनम्, वाराणसी
12. **पं. बलदेवमिश्रकृता सरलत्रिकोणमितिः** ; व्याख्याकारः सम्पादकश्च – डॉ. कमलाकान्तपाण्डेयः, प्रकाशनवर्षम् – सा.यु.२००७, प्रकाशनसंस्था – शारदासंस्कृतसंस्थानम्, वाराणसी
13. **ज्योतिष-सिद्धान्त-मञ्जूषा** ; ग्रन्थकर्ता – डॉ. विनयकुमारपाण्डेयः, संस्करणवर्षम् – सा.यु.२०२० ; प्रकाशनसंस्था – चौखम्बा सुरभारती प्रकाशनम्, वाराणसी
14. **मन्दशीघ्रफलसाधनसमीक्षा** ; ग्रन्थकर्ता – विद्यावाचस्पतिः डॉ. रामजीवनमिश्रः, प्रथमसंस्करणम् – सा.यु.२००५, प्रकाशनसंस्था – ठाकुरप्रकाशनम्
15. **म.म.पं.सुधाकरद्विवेदिविरचितं दीर्घवृत्तलक्षणम्** ; सम्पादको व्याख्याकारश्च – डॉ. चन्द्रमा पाण्डेयः, प्रथमसंस्करणम् – सा.यु.२००६, प्रकाशनसंस्था – शारदासंस्कृतसंस्थानम्, वाराणसी
16. **सुराकान्तसङ्कलितः ज्योतिर्विज्ञानशब्दकोषः** ; लेखनं सम्पादनञ्च – डॉ. सुराकान्तझा, प्रथमं संस्करणम्, संस्करणवर्षम् – सा.यु.२००९, प्रकाशनसंस्था – चौखम्बा कृष्णदास अकादमी, वाराणसी
17. **सूर्यसिद्धान्तः (आर्षग्रन्थः)** ; व्याख्याकारः – श्रीकपिलेश्वरशास्त्री, संस्करणवर्षम् – सा.यु.२०१५, प्रकाशनसंस्था – चौखम्भा संस्कृतभवनम्, वाराणसी
18. **म.म.सुधाकरद्विवेदिप्रणीतया 'सुधावर्षिणी'टीकया संवलितः सूर्यसिद्धान्तः** ; सम्पादकः – विद्यावारिधिः श्री-कृष्णचन्द्रद्विवेदी, द्वितीयं संस्करणम्, संस्करणवर्षम् – सा.यु.२०१६ ; प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
19. **भास्करीयगोलमीमांसा** ; प्रधानसम्पादकः – प्रो. वाचस्पति उपाध्यायः, लेखकः – प्रो. देवीप्रसादत्रिपठी, सम्पादकः – प्रो. रमेशकुमारपाण्डेयः, संस्करणम् – सा.यु.२०१०, प्रकाशनसंस्था – श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली

20. **उपपत्तीन्दुशेखरः** ; महामहोपध्यायश्रीदुर्गाप्रसादद्विवेदेन सङ्कलितः, सम्पादकः – श्रीगिरिजाप्रसादद्विवेदी, संस्करणम् – सा.यु.२००८, प्रकाशनसंस्था – भारतीयबुक् कारपोरेशन् – नवदेहली

21. **नामलिङ्गानुशासनम् (अमरकोषः)** ; ग्रन्थकर्ता – अमरसिंहः, प्रकाशनवर्षम् – सा.यु.१९१३, प्रकाशनसंस्था – लॉ प्रिण्टिङ्ग् प्रेस, पूना

 ISSN : 2249-538X

# अद्वैतवेदान्तशास्त्रदृष्ट्या शङ्कराचार्यकृतस्य आत्मबोधस्य प्रकरणत्वसमीक्षणम्

चन्दनः मुखार्जी*

**शोधसारः –**

अद्वैतवेदान्तशास्त्राध्यनायारम्भः कुतो भवेदिति जिज्ञासा समुत्पद्यते साधारणानां मन्दमतीनाम् अस्मद्दशानां मनसि । तस्मात् प्रकरणग्रन्थानामावश्यकता दृश्यते । अद्वैतवेदान्तसाहित्ये वेदान्तसारः एव प्रकरणग्रन्थत्वेन सर्वैः समाद्रियते । किन्तु भगवच्छङ्कराचार्यप्रणीताः बहवः प्रकरणग्रन्थाः वेदान्तनभसि सूर्यवद्राराजन्ते । ते वेदान्तशात्रीयाः प्रकरणग्रन्थाः सम्प्रति पाठ्यक्रमादिष्वनन्तर्भावान्न तावत् परिचिताः प्रख्याताश्च । तेष्वेकोऽयमात्मबोधः । तस्मादात्मबोधे भगवच्छङ्कराचार्योक्ततत्त्वानां विश्लेषणमत्र करिष्यते । किं तावत् प्रकरणग्रन्थलक्षणम्, आत्मबोधस्य प्रकरणत्वं युज्यते न वा तदप्यत्र युक्त्या परीक्ष्यते ।

**प्रमुखशब्दाः** - अद्वैतवेदान्तः, प्रकरणग्रन्थः, आत्मबोधः, शङ्कराचार्यः, परमात्मा, मुक्तिः, वेदान्तशास्त्रम्, ब्रह्मानन्दः, आत्मबोधदीपिका चेति ।

## १. उपोद्घातः

षड्विधेषु भारतीयदर्शनेषु वेदान्तदर्शनमध्यात्मशास्त्रस्य शिरस्स्थानं प्रथते । वेदान्तमूलं हि उपनिषत् । तथाहि उक्तं - "वेदान्तो नाम उपनिषत्प्रमाणम्"[१] इति । वेदान्तशब्दस्य प्रयोगः सर्वप्रथमम् उपनिषदि एव प्राप्यते - "वेदान्ते परमं गुह्यम्"[२] इति, "वेदान्तविज्ञानसुनिश्चितार्थाः"[३] इति । उपनिषदां रहस्यभूतानां सिद्धान्तानां प्रतिपादनं वेदान्ते एव दृश्यते । उपनिषत्सिद्धान्तान् एकीकृत्य बादरायणः ब्रह्मसूत्रं विरचितवान् । तत् ब्रह्मसूत्रं परं भाष्यटीकावार्तिकवृत्तिभिः सुबृहत् जातम् । तदेव प्रकृतं वेदान्तशास्त्रम् उच्यते । तत्रापि अद्वैतद्वैतविशिष्टाद्वैतादिभिः वेदान्तशास्त्रं सम्प्रदायानुसारं विभक्तं जातम् । किन्तु सम्पूर्णवेदान्ताध्ययनाय तथा अद्वैतवेदान्तशास्त्राध्यनाय आरम्भः कुतो भवेत् इति जिज्ञासा समुत्पद्यते साधारणानां मन्दमतीनाम् अस्मद्दशानां मनसि । तस्मात् प्रकरणग्रन्थानाम् आवश्यकता दृश्यते । अद्वैतवेदान्तसाहित्ये वेदान्तसारः एव प्रकरणग्रन्थत्वेन सर्वैः समाद्रियते । किन्तु भगवच्छङ्कराचार्यप्रणीताः बहवः प्रकरणग्रन्थाः वेदान्तनभसि सूर्यवत् राराजन्ते । ते वेदान्तशात्रीयाः प्रकरणग्रन्थाः सम्प्रति पाठ्यक्रमादिषु अनन्तर्भावात् न तावत् परिचिताः प्रख्याताश्च । तेषु एकः अयम् आत्मबोधः ।

तस्मात् आत्मबोधे भगवच्छङ्कराचार्योक्ततत्त्वानां विश्लेषणम् अत्र करिष्यते । किं तावत् प्रकरणग्रन्थलक्षणम्, आत्मबोधस्य प्रकरणत्वं युज्यते न वा तदपि अत्र युक्त्या परीक्ष्यते ।

## २. ग्रन्थविभागः

संस्कृतवाङ्मयं सूत्रभाष्यवृत्तिवार्तिकप्रकरणादिभिर्ग्रन्थैरत्यन्तं सुबृहत् दृश्यते । वाङ्मयेऽस्मिन् नाना

---

*शोधच्छात्रः, संस्कृतदर्शनविभागः, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्था, वेलुडमठः, पश्चिमबङ्गः

[१] वेदान्तसारः

[२] श्वेताश्वतरोपनिषत् ६.२२

[३] मुण्डकोपनिषत् ३.२.५

ग्रन्थभेदाः श्रूयन्ते । तेषु पञ्च प्रसिद्धाः । यथा - सूत्रग्रन्थः, भाष्यग्रन्थः, वार्तिकग्रन्थः, वृत्तिग्रन्थः, प्रकरणग्रन्थः चेति । परन्तु एतेषां लक्षणं किं, किं तावत् स्वरूपं तदत्र उच्यते ।

a. सूत्रणात् सूत्रम्[१] इति राजशेखरः । सूत्रं नाम - यत् अल्पाक्षरयुतम् सन्देहरहितं सारभूतं वक्तव्यसर्वविषयव्यापि निरर्थकाक्षररहितम् अर्थदोषरहितं तत् सूत्रमिति आचार्याणां सिद्धान्तः[२] । भामत्यामपि वाचस्पतिमिश्रो वदति - यत् लघु सूचितार्थं स्वल्पाक्षरपदं सारभूतं तत् सूत्रमिति मनीषिणः[३] । वररुचिरपि वदति - यत् अल्पाक्षरम् असन्दिग्धं सारवत् गूढनिर्णयं निर्दोषं हेतुमत् तत् सूत्रम्[४] । सूत्रग्रन्थाः तावत् यथा - अष्टाध्यायि, न्यायसूत्रं, पातञ्जलयोगसूत्रं, ब्रह्मसूत्रं चेत्यादीनि ।

b. सूत्रस्य व्याख्यानं भाष्यम् इति वक्तुं शक्यते । "आक्षिप्य भाषणात् भाष्यम्"[५] इति राजशेखरवचनम् । भाष्यं तावत् - यत्र सूत्रार्थः सूत्रानुसारिभिः वाक्यैः वर्ण्यते, स्वपदानि च वर्ण्यन्ते तत् भाष्यम्[६] । यथा - व्याकरणमहाभाष्यम्, पातञ्जलयोगभाष्यम्, शारीरकमीमांसाभाष्यं चेत्यादि । व्याख्यानस्यापि पञ्च लक्षणानि[७] दृश्यन्ते - पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना आक्षेपस्य समाधानं चेत्यादीनि ।

c. भाष्यस्य सम्पूर्णं व्याख्यानं तावत् वार्तिकमिति प्रसिद्धिः । किं नाम वार्तिकमिति चेत् उच्यते - उक्तानाम्, अनुक्तानां, दुरुक्तानां वा यस्मिन् ग्रन्थे विचारः क्रियते सः ग्रन्थः वार्तिकम्[८] इति उच्यते । उक्तानुक्तदुरुक्तचिन्ता वार्तिकम् । यथा अष्टाध्याय्यां पञ्चदशशतसूत्रेषु कात्यायनेन वार्तिकं रचितम् । यथा - बृहदारण्यकभाष्यवार्तिकम्, श्लोकवार्तिकं चेत्यादीनि ।

d. यत्र भाष्यस्य व्याख्यानं लघुतया क्रियते सा वृत्तिरित्युच्यते । लक्ष्यानुसारितया विवरणं वृत्तिः । यथा योगशास्त्रस्य राजमार्तण्डवृत्तिः, न्याये गौतमवृत्तिः चेत्याद्याः ।

---

[१]काव्यमीमासा, प्रथममधिकरणम्, द्वितीयोऽध्यायः

[२]"अल्पाक्षरमसन्दिग्धं सारवत् विश्वतोमुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥" इति - वायुपुराणम् १९.१४२

[३]"लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च ।
सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः ॥" इति - भामती १.१.१

[४]"अल्पाक्षरमसन्दिग्धं सारवत् गूढनिर्णयम् ।
निर्दोषं हेतुमतथ्यं सूत्रमित्युच्यते बुध्यैः ॥" इति - वार्तिकसंग्रहः १.१.१

[५]काव्यमीमासा, प्रथममधिकरणम्, द्वितीयोऽध्यायः

[६]"सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥" इति - पराशरपुराणम्

[७]"पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना ।
आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणम् ॥" इति - पराशरोपपुराणम्

[८]"उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते ।
तं ग्रन्थं वार्तिकं प्राहुः वार्तिकज्ञाः मनीषिणः ॥" इति - पराशरोपपुराणम्


ISSN : 2249-538X

e. अन्ते च प्रकरणग्रन्थः । उच्यते - "शास्त्रैकदेशस्य प्रक्रिया प्रकरणम्"[1] इति । तस्य लक्षणमग्रे वक्ष्यते । यथा वेदान्तसारः, तर्कसंग्रहः, अर्थसंग्रहः चेद्यादयः ।

**३. प्रकरणग्रन्थः**

कस्यापि सुमहच्छास्त्रस्य पठने प्रवृत्तिः अत्यन्तं दुष्करा प्रतीयते दौर्बोध्यत्वात् भाषाकाठिन्यात् शास्त्रप्रतिपाद्यस्याज्ञानत्वात् मन्दबुद्धित्वाच्च । यथा न्यायशास्त्रे वेदान्तशास्त्रे वा साधारणानां प्रवृत्तिः कदाचित् न स्यात् । तस्मात् तेभ्यः मन्दबुद्धिभ्यः प्रकरणग्रन्थस्य अवतरणं क्रियते शास्त्रकारैः ।

शास्त्रस्य कांश्चन निर्दिष्टविषयान् प्रति विशेषविवेचनाय सहायकः, अतिलघुः अयं प्रकरणग्रन्थः । शास्त्राणामध्ययनात् प्राक् प्रकरणग्रन्थानामध्ययनमावश्यकमेव । किं नाम प्रकरणग्रन्थलक्षणमिति चेत् -

**"शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम् ।आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः ॥"**[2] इति

यो ग्रन्थः शास्त्रस्यैकदेशेन सह सम्बन्धितो भवति । तं सम्बन्धयुक्तं विषयमेव विशेषेण विस्तारयति । तं ग्रन्थं विपश्चितो विद्वांसः प्रकरणम् इति वदन्ति । अर्थादत्यन्तप्रौढशास्त्रपठनात् प्राक् तस्य शास्त्रस्य सामान्यं परिचयं प्राप्तुं प्रकरणग्रन्थस्यावश्यकता महती वर्तते । प्रतिदर्शनं प्रकरणग्रन्थाः तु दृश्यन्ते एव । यथा - अद्वैतवेदान्तशास्त्रस्य प्रकरणग्रन्थः सदानन्दयोगीन्द्रप्रणीतो वेदान्तसारः । प्रकरणग्रन्थः प्रसिद्धाप्रसिद्धभेदेन विभक्तुं शक्यः । केचनात्यन्तं प्रसिद्धाः । केचन तद्विपरीताः । तेष्वन्यतमः शङ्कराचार्यविचरितः आत्मबोधः । आत्मबोधस्य प्रकरणं कथं सङ्गच्छते तदत्रालोच्यते ।

**४. आत्मबोधः**

अष्टषष्टिश्लोकात्मकः (६८) अद्वैतवेदान्तस्य अन्यतमः प्रकरणग्रन्थोऽयं शङ्कराचार्येण विरचितः । सूक्ष्मातिसूक्ष्मतत्त्वस्याद्वैतवेदान्तस्योपस्थापनेनायं ग्रन्थो वेदान्तसंसारे महतीं भूमिकां परिपालयति । परं टीकोपटीकाभ्यामयं प्रकरणग्रन्थः प्रसिद्धिं गतः । आत्मनो बोधः आत्मबोधः । किम्वा आत्मैव बोधः आत्मबोधः । सत्त्वशुद्धो बुद्धो मुक्तः सकलमपि मायामात्रमिदं जगत् विसृज्य एतत् चितिमयं प्रथयति । तादृशाय नित्याय समरसघनाय आत्मने नमः इति आत्मबोधदीपिकायां ब्रह्मानन्दः । यदा वैनाशिकानां बौद्धानां महामूढानां कारणात् श्रुतिशिरोगणो लुप्तप्रायः सञ्जातः । तदा शङ्कराचार्यः अद्वैतविज्ञानम् आविश्चकार । अत्र मातेव पुत्रेषु दयालुः भगवान् शङ्कराचार्यः उत्तमप्रज्ञानां शास्त्रपयोनिधिम् अवगाह्य आत्मज्ञानरत्नम् अन्विष्यमाणानां कृते शारीरकभाष्यादिप्रस्थानत्रयं निर्माय तदवलोकने असमर्थानां मन्दमतीनां कृते अमुं ग्रन्थं विरचयामास ।

ब्रह्मानन्दविरचिता आत्मबोधदीपिका अत्यन्तं प्रसिद्धा टीका अस्य ग्रन्थस्य । ग्रन्थे अष्टषष्टिषु कारिकासु

[1]काव्यमीमांसा, प्रथमम् अधिकरणम्, द्वितीयः अध्यायः

[2]पराशर-उपपुराणम् १८.२१-२२



#264

प्रतिपादिताः विषयाः तालिकया प्रस्तूतये -

a. श्लोकाः १-५ - आध्यात्मिकमार्गवर्णनम् b. श्लोकाः ६-१४ - अध्यासः, संसारः चेति ।

c. श्लोकाः १५-३० - जीवात्मा, परमात्मा चेति ।

d. श्लोकाः ३१-४१ - साधनानि (श्रवणम्, मननम्, निदिध्यासनं चेति) e. श्लोकाः ४२-६८ - आत्मज्ञानम्

**५. आत्मबोधस्य प्रकरणत्वसमीक्षणम्**

**५.१. मङ्गलम्**

शिष्टानुशासनं मङ्गलाचरणम् । शिष्टाचारपरिपालने अग्रणीः शङ्कराचार्यः । आत्मबोधस्य आदिमे श्लोके शङ्कराचार्यः अनेन श्लोकेन ग्रन्थस्य अधिकारिणं सूचयति । केभ्योऽयम् ग्रन्थो विधीयते इति चेदुच्यते - तपोभिः क्षीणपापेभ्यः शान्तेभ्यो वीतरागिभ्यो मुमुक्षुभ्यः परमकारुणिकेन शङ्करेण आत्मबोधो विधीयते[1] । नित्यनैमित्तिकोपासनाद्यनुष्ठानरूपतपोभिर्दुरितक्षयेभ्यः प्रशान्तचित्तेभ्यः शान्तेभ्यः अक्षुब्धाशयेभ्यो वीतरागिभ्यः इहामुत्रार्थफलभोगालिप्तेभ्यो मुमुक्षुभ्यः संसारग्रन्थिभेदेन कृताभिलाषेभ्यः अयम् आत्मबोधो ग्रन्थः । शङ्कराचार्यः एव तेभ्यः आत्मबोधम् उत्पाद्य मोक्षं कारयिष्यति इति तात्पर्यम् । अत्र प्रश्नो भवति शङ्कराचार्यः साक्षात् मङ्गलं तु नैव कृतवान् । तेन नास्तिकमतप्रवेशः इति चेत् - नैव । यत्र प्रपञ्चव्यवस्थादिकं प्रतिपिपादयिषितम् अस्ति तत्रैव मङ्गलस्य अपेक्षितत्वात्तेन अस्य मङ्गलरूपत्वात् ।

**५.२. आत्मज्ञानात् मोक्षः**

अधुना प्रश्नः उत्थाप्यते यत् सर्वेषु शास्त्रेषु जपतपःप्रभृतिभिः मोक्षसम्भवोल्लेखः चेत् अत्र केवलात् आत्मज्ञानात् मोक्षस्य सम्भवः कथम् । तदा उच्यते शङ्कराचार्यैः - यथा पाकादिकार्ये जलं ज्वलनसामग्री चेत्येषां व्यवहारः भवति चेदपि वह्निरेव तत्र मुख्यसाधनम्[2] । तं विना पाकादिकार्यं नैव सम्भवेत् । तथैव मोक्षसाधने जपः तपः चेत्यादीनाम् आवश्यकतायां सत्यायामपि आत्मबोधः एव तत्र मुख्यं कारणम् । आत्मबोधात् आत्मज्ञानात् एव मुक्तिः । ज्ञानं विना मोक्षः नैव सिद्ध्यति । श्रुतिरपि - "ज्ञानादेव तु कैवल्यम्" इति, "ऋते ज्ञानान्न मुक्तिः" चेति । स्मृतिरपि वदति - "तपसा कल्मषं हन्ति विद्ययाऽमृतमश्नुते"[3] इति । तपसा केवलम् अन्तःकरणशुद्धिः । ततो विद्यया मुक्तिः ।

जनकादीनां श्रेष्ठेन कर्मणा एव उच्चगतिप्राप्तिरिति तु प्रसिद्धम् । यदि कर्मणा एव आत्मगतिः तर्हि किम् आवश्यकम् आत्मज्ञानस्य इति चेत् । उच्यते - कर्मविद्ययोः मार्गः परस्परं विपरीतः । यदा तेजः तिमिरसङ्घं

[1] "तपोभिः क्षीणपापानां शान्तानां वीतरागिणाम् ।
मुमुक्षूणामपेक्ष्योऽयमात्मबोधो विधीयते ॥" इति - आत्मबोधः १

[2] "बोधोऽन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनम् ।
पाकस्य वह्निवज्ज्ञानं विना मोक्षेन सिद्ध्यति ॥" इति - आत्मबोधः २

[3] मनुस्मृतिः १२.१०४

 ISSN : 2249-538X

#265

निहन्ति, तथैव ज्ञानम् अज्ञानं निवर्तते । कर्म अविरोधितया अविद्यां न विनिवर्तयेत् । विद्या अविद्यां निहन्ति ।[१]

**५.३. आत्मा स्वयंप्रकाशः**

यदा सूर्यमण्डलं मेघमालया आच्छादितं भवति । तदा सूर्यज्योतिः यां दिशं गच्छति, तत्र मेघमालां विच्छिद्य स्वयं प्रकाशितो भवति सूर्यः । एवमेव ज्ञानाभावे अविद्यया जीवाः संसारे अस्मिन् आवर्तिताः भवन्ति[२] । तदा साधने सति ज्ञानेन अज्ञानं निवर्त्यते । तदा मोक्षो लभ्यते ।

**५.४. ब्रह्माद्वैतता**

संसारस्तु साक्षात् दृश्यते, सत्यवत् प्रतीयते । तर्हि द्वैतभानस्य एव प्रतीतिः, न तु अद्वैतस्य । तर्हि ब्रह्मणः अद्वैतता कथं सिध्यति इति चेत् । रागद्वैषादिसंयुतः संसारः स्वप्नवत् तुल्यः । यदा वयं स्वप्नं पश्यामः तदा संसारं सत्यवत् वयं जानीमः । यदा प्रबोधः भवति तदा स्वप्नस्य मिथ्यात्वं प्रसज्यते । यावत् स्वप्नकालः तावत् पर्यन्तमेव स्वप्नस्य सत्यता । प्रबोधे एव तस्य विनाशः । एवमेव अज्ञानेन एव अहमिदं ममेदं चेति द्वैतव्यवहारः । ज्ञाने सति तस्य विनाशः । तदा अद्वैतस्य प्रकाशः । यावत् सर्वाधिष्ठानम् अद्वयं ब्रह्म न ज्ञायते तावत् एव जगत् शुक्तिकारजतवत् सत्यं भाति ।[३]

**५.५. ब्रह्मणि जगत्कल्पनम्**

**"अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ।आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥"** इति

अस्ति भाति प्रियं चेति आत्मनि अत एव नामरूपात्मके जगति अनुस्यूते अनुगते अनुगतत्वात् एव नित्ये त्रिकालाबाध्ये विष्णौ व्यापके ब्रह्मणि सर्वोपादानभूते सर्वाश्चतुरशीतिलक्षयोनिलक्षणा विविधाः अवयवसंख्यानसंस्थया नानाविधाः व्यक्तयः हाटके सुवर्णे कटककुण्डलादिवत् प्रकल्पिताः मिथ्याभूताः[४] ।

तदनन्यत्वम् आरम्भणशब्दादिभ्यः इति न्यायात् । "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्"[५] इति श्रुतिमानमत्र प्रमाणम् । अधुना प्रश्नो भवति यत् प्रपञ्चस्य मिथ्याभूतत्वात्, जीवभेदः सत्यभूतत्वात् च कथं प्रपञ्चाधिष्ठानरूपस्य परमात्मनोऽद्वितीयत्वं सत्यत्वं च कथमुपपद्यते इति चेत् आचार्येण भणितं - यथा विभुः आकाशः घटमठादिरूपनानोपाधिभेदात् भिन्नवत् प्रतीयते । उपाधिनाशे सति आकाशस्य एकत्वम् उपपद्यते । तद्वत्

---

[१]"अविरोधितया कर्म नाविद्यां विनिवर्तयेत् ।
विद्याऽविद्यां निहन्त्येव तेजस्तिमिरसंघवत् ॥" इति - आत्मबोधः ३

[२]"परिच्छिन्न इवाज्ञानात् तन्नाशे सति केवलः ।
स्वयं प्रकाशते ह्यात्मा मेघापायेंऽशुमानिव ॥" इति - आत्मबोधः ४

[३]"संसारः स्वप्नतुल्यो हि रागद्वेषादिसंकुलः ।
स्वकाले सत्यवद्भाति प्रबोधे सत्यवद्भवेत् ॥" इति - आत्मबोधः ६

[४]"सच्चिदात्मन्यनुस्यूते नित्ये विष्णौ प्रकल्पिताः ।
व्यक्तयो विविधाः सर्वा हाटके कटकादिवत् ॥" इति - आत्मबोधः ८

[५]छान्दोग्योपनिषत्

उपाधिवशात् एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलः निर्गुणः एकः सन् बहुधा प्रतीयते । किन्तु उपाधिनाशे सति एकः एव अवतिष्ठते ।[१]

ननु ब्रह्मचारी अहं ब्राह्मणोऽयं चेति जातिवर्णाश्रमादिभिः धर्मैः युक्तस्य आत्मनः कथम् असङ्गत्वम् अद्वितीयत्वं चोपचारः इति चेत् वदति - यथा नानोपाधिवशात् तोयं जलं रसवर्णादिभेदवत् नाना प्रतीयते । वस्तुतस्तु जलं तु एकमेव । उपाधिधर्माः तत्र आरोपिताः । तथैव जातिनामाश्रयत्वादयः नानाविधाः धर्माः आत्मनि आरोप्यन्ते । वस्तुतस्तु ते धर्माः न कदापि आत्मानं प्रभावयन्ति ।[२] आत्मा निरवयवी अधर्मी च ।

**५.६. सृष्टिप्रपञ्चः**

अन्ततो गत्वा दृश्यते यत् समस्तानां सृष्टिवाक्यानाम् अद्वैते एव तात्पर्यम् । समस्तानि सृष्टिवाक्यानि अद्वैते एव पर्यवसितानि । आत्मबोधेऽपि शङ्कराचार्येण स्ववचोभिः युक्त्या सृष्टिप्रपञ्चः आलोचितः । पञ्चीकृतमहाभूतसम्भवं कर्मसञ्चितं, सुखदुःखानां भोगायतनं शरीरम्[३] । पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनं सूक्ष्मशरीरम्[४] । अनाद्यविद्या अनिर्वाच्या कारणोपाधिः उच्यते । उपाधित्रितयात् अन्यः आत्मा । यथा स्फटिकः नीलवस्त्रादियोगेन तत्तन्मयः इव भाति । तथैव शुद्धात्मा पञ्चकोशादियोगेन तत्तन्मयः इव स्थितः । तण्डुलस्य स्वरूपतया प्रतीयमानतुषारादिभिः युक्तं तण्डुलं यथा अवघाततो मुसलावहननेन शुद्धं विविच्यते पृथक्क्रियते । तथा कोशैः अन्नमयादिभिः युक्तं तेषाम् अभ्यन्तरं शुद्धम् आत्मानं विविच्य पृथक्कृत्वा विजानीयात् इत्यर्थः[५] ।

**५.७. आत्मानात्मविवेकः**

आत्मनो ब्रह्मरूपत्वेन सदा सर्वगतत्वात् किमिति स सर्वत्र न भासते इति चेत् समाधानत्वेन आह आचार्यः शङ्करः - सदा सर्वगतः आत्मा सर्वत्र न अवभासते । यथा स्वच्छेषु एव केवलं प्रतिबिम्बो दृश्यते न अस्वच्छेषु । तद्वदेव आत्मा स्वच्छबुद्धौ एव अवभासते, नान्यत्र[६] ।

यथा सभायां स्थितः राजा सर्वेषां साक्षी प्रेरकः सन्नपि तेभ्यः भिन्नः । तथैव देहेन्द्रियमनोबुद्धिविलक्षणः

[१]"यथाकाशे हृषीकेश नानोपाधिगतो विभुः ।
तद्भेदाद्भिन्नवद्भाति तन्नाशे सति केवलः ॥" इति - आत्मबोधः ९

[२]"नानोपाधिवशादेव जातिनामाश्रयादयः ।
आत्मन्यारोपितास्तोये रसवर्णादिभेदवत् ॥" इति - आत्मबोधः १०

[३]आत्मबोधः ११

[४]आत्मबोधः १२

[५]आत्मबोधः १५

[६]"सदा सर्वगतोऽप्यात्मा न सर्वत्रावभासते ।
बुद्धावेवावभासते स्वच्छेषु प्रतिबिम्बवत् ॥" इति - आत्मबोधः १६

 ISSN : 2249-538X

आत्मा तद्वृत्तिसाक्षी[१] । यथा अभ्रेषु धावत्सु सत्सु शशी धावन् इव दृश्यते ।[२] तथा एव अविवेकिनाम् इन्द्रियेषु व्यापृतेषु आत्मा व्यापारी इव दृश्यते । यथा जनाः सूर्यालोकम् आश्रित्य स्वकीयार्थेषु वर्तते । तथा देहेन्द्रियमनोधियः आत्मचैतन्यम् आश्रित्य स्वकीयार्थेषु प्रवर्तन्ते ।[३] देहेन्द्रियगुणान् कर्माणि च अमले सच्चिदात्मनि अविवेकेन गगने नीलिमादिवत् अध्यस्यन्ति मन्दमतयः अविवेकिनः ।[४]

**५.८. परमात्मा जीवात्मा च**

वस्तुतः जीवात्मा परमात्मना अभिन्नः एव । किन्तु अज्ञानात् जीवात्मा परमात्मनो भिन्नः । आत्मबोधे उच्यते शङ्कराचार्येण - परमात्मनः कदाचित् विक्रिया विकारो नास्ति ।[५] "निर्गुणं निष्कलं शान्तं निरवद्यं निरञ्जनम्"[६] इति श्रुतेः । "अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते"[७] इति स्मृतेः । बुद्धेः बोधः नास्ति । बुद्धेः कदाचित् बोधः नास्ति । जीवः सर्वमलं ज्ञात्वा कर्ता द्रष्टा इति मुह्यति । जीवः अन्तःकरणावच्छिन्नचेतनः सर्वजडचेतनात्मकम् अमलम् अत्यन्ताभेदेन ज्ञात्वा कर्ता अहं द्रष्टेति मुह्यति भ्रान्तो भवति न तु विविक्तः आत्मनि स्वल्पः अपि विकारः इत्यर्थः ।

यथा महान्धकारे विकाररहितरज्ज्वादौ सर्पाद्यारोपणं कृत्वा पुमान् भयं प्राप्नोति । एवम् आत्मा अपि आत्मानं जीवं सद्वितीयं परिच्छिन्नं संसारिणं ज्ञात्वा मिथ्यैव निश्चित्य भयं नानाविधसांसारिकपीडानिमित्तं वहेत् प्राप्नुयात् इत्यर्थः ।[८]

एकः आत्मा बुद्ध्यादीन्द्रियाणि अवभासयति । यथा दीपः घटादिकम् अवभासयति । किन्तु यथा घटेन दीपः न अवभास्यते । तथैव तैः जडैः बुद्ध्यादीन्द्रियैः आत्मा कदापि न अवभास्यते ।

"नेति नेति" इति वाक्यतः निखिलोपाधीन् निषिध्य 'अहं ब्रह्मास्मि', 'तत्त्वमसि', 'अयमात्मा ब्रह्म', 'प्रज्ञानं ब्रह्म' चेत्यादिभिः महावाक्यैः जीवात्मपरमात्मनोः ऐक्यं ज्ञातव्यम् । यथा आविद्यकं शरीरादि दृश्यं

---

[१] "देहेन्द्रियमनोबुद्धिप्रकृतिभ्यो विलक्षणम् ।
तद्वृत्तिसाक्षिणं विद्यादात्मानं राजवत्सदा ॥" इति - आत्मबोधः १७

[२] "व्यापृतेष्विन्द्रियेष्वात्मा व्यापारी वाऽविवेकिनाम् ।
दृश्यतेऽभ्रेषु धावत्सु धावन्निव यथा शशी ॥" इति - आत्मबोधः १८

[३] "आत्मचैतन्यमाश्रित्य देहेन्द्रियमनोधियः ।
स्वकीयार्थेषु वर्तन्ते सूर्यालोक यथा जनाः ॥" इति - आत्मबोधः १९

[४] "देहेन्द्रियगुणान् कर्माण्यमले सच्चिदात्मनि ।
अध्यस्यन्त्यविवेकेन गगने नीलिमादिवत् ॥" इति - आत्मबोधः २०

[५] "आत्मनो विक्रिया नास्ति बुद्धेर्बोधे न जात्विति ।
जीवः सर्वमलं ज्ञात्वा द्रष्टेति मुह्यति ॥" इति - आत्मबोधः २५

[६] श्वेताश्वतरोपनिषत् ६.१८

[७] गीता २.२५

[८] "रज्जुसर्पवदात्मानं जीवं ज्ञात्वा भयं वहेत् ।
नाहं जीवः परात्मेति ज्ञातश्चेन्निर्भयो भवेत् ॥" इति - आत्मबोधः २६

बुद्बुदवत् क्षरमस्ति । न तथा ब्रह्म । तद्विलक्षणं च ब्रह्म निर्मलं पारमार्थिकम् अदृश्यम् । 'अप्राणो ह्यमनाः शुभ्रः' इत्यादिश्रुतिशासनात् आत्मनः दुःखरागद्वेषादयो न सन्ति । एतस्मात् ब्रह्मणः एव प्राणः मनः सर्वेन्द्रियाणि आकाशं वायुः अग्निः जलं चेति सर्वं जायते । अनेन ब्रह्मणः तटस्थलक्षणमपि सूचितम् । उच्यते -

**"निर्गुणो निष्क्रियो नित्यो निर्विकल्पो निरञ्जनः ।निर्विकारो निराकरो नित्यमुक्तोऽस्मि निर्मलः ॥"**[१] इति

एवम् आत्मनात्मविवेकः ब्रह्म प्रत्यक्चैतन्यं सृष्टिः मोक्षः मोक्षसाधनानि आत्मा तद्विज्ञानं च सर्वं युक्तिपूर्णवचोभिः शङ्कराचार्येण आत्मबोधे प्रतिपादितम् । तेनैव अस्य वेदान्तप्रकरणग्रन्थस्य माहात्म्यं ध्वनितं भवति ।

यथा वेदान्तसारे ब्रह्म अनुबन्धचतुष्टम् अज्ञानं जगत्सृष्टिः मुक्तिः च यथाक्रमं वर्णिताः । अत्रापि शङ्कराचार्याः यथाक्रमं तान् एव विषयान् अवर्णयत् । अस्य ग्रन्थस्य अद्वैतवेदान्तशास्त्रैकदेशसम्बन्धः अपि वर्तते, किञ्च शास्त्रकार्यन्तरत्वम् अपि सम्यग्रूपेण प्रस्फुटितमत्र । आत्मज्ञानान्मोक्षः, आत्मा स्वयंप्रकाशः, ब्रह्माद्वैतता, जगत्कल्पनम्, सृष्टिः, आत्मानात्मविवेकः, परमात्मा, जीवात्मा, ख्यातिवादः चेत्यादीनां विषयाणां प्रतिपादनात् अयं ग्रन्थः प्रकरणग्रन्थः अद्वैतवैदान्तस्य । तस्मात् अयम् आत्मबोधः ग्रन्थः अद्वैतवेदान्तशास्त्रस्य उच्चतमः प्रकरणग्रन्थः इति तु ध्रुवमेव ।

**६. उपसंहारः**

आत्मबोधं विहायापि नेके प्रकरणग्रन्थाः शङ्कराचार्येण प्रणीताः । यथा - अद्वैतानुभूतिः, आत्मानात्मविवेकः, अपरोक्षानुभूतिः, दशश्लोकी, प्रबोधसुधाकरः, प्रश्नोत्तरमालिका, प्रौढानुभूतिः, ब्रह्मज्ञानावली, ब्रह्मानुचिन्तनम्, मोहमुद्गरः, योगतारावली, शतश्लोकी, विवेकचूडामणिः, उपदेशसाहस्त्री, वेदान्तडिण्डिमः, वाक्यसुधा, तत्त्वबोधः, वाक्यवृत्तिः चेति । अद्वैतवेदान्तस्य मर्म प्रतिपत्तुं प्रकरणग्रन्थानां माहात्म्यं च अवश्यं स्वीकार्यमेव ।

आत्मबोधे अद्वैतवेदान्तस्य सूक्ष्मातिसूक्ष्मतत्त्वानि उपस्थापितानि शङ्कराचार्यैः । आत्मबोधस्य अन्यतमा टीका वर्तते ब्रह्मानन्दविरचिता आत्मबोधदीपिका । आत्मबोधदीपिकायाः समीक्षणे महान् गवेषणावसरो वर्तते ।

*****

**आश्रितग्रन्थसूची -**

१. शङ्कराचार्यः । आत्मबोधः । निर्णयसागर मुद्रणालय । मुम्बईपुरी ।
२. संस्कृत वाङ्मय का बृहद इतिहास (दशमखण्डः वेदान्तः) । 1996 । श्री बलदेव-उपाध्यायः (सम्पादकः) । उत्तर-प्रदेश-संस्कृत-संस्थान ।
३. R Thangaswami, 1980 । अद्वैतवेदान्तसाहित्येतिहासकोशः । University of Madras.
४. श्रीसदानन्दः । 2019 । वेदान्तसारः । आचार्यः बदरीनाथशुक्लः (हिन्दीव्याख्यासहितः) । मोतीलाल-

[१]आत्मबोधः ३४

बनारसीदासः । षष्ठसंस्करण । ISBN : 978-81-208-2393-8 ।

५. श्रीशङ्कराचार्यविरचितग्रन्थसङ्ग्रहः (प्रकरणग्रन्थाः) । 1925 । रा. रा. हरि रघुनाथ भागवत (संशोधकः) । Ashtekar& Co, Poona.

६. शङ्कराचार्यः । 1978 । सर्ववेदान्तसिद्धान्तसारसंग्रहः । पण्डित रामस्वरूपशर्मा (सम्पादकः) । सनातन धर्म यन्त्रालय । मोरादावाद ।

७. शङ्कराचार्यः । आत्मबोधः (ब्रह्मानन्दकृतात्मबोधदीपिकोपेतः) । कश्मीर रिसर्च इनस्टिटिउट ।

८. शङ्कराचार्यः । आत्मबोधः (मिहिरचन्द्रकृतभाषाटीकासमेतः) । 1978 । श्रीकृष्णजदासः (प्रकाशकः) । श्रीवेङ्कटेश्वर मुद्रमालय । मुम्बई ।

९. Shankaracharya. Aatmabodah. Dr. Sudha Tinaikar (Translator). 2020. Shri Chitrapur Math Shirali, Karnataka.

१०. Shankaracharya. Aatmabodah. Swami Nikhilananda (Commentator). 1947. Sri Ramakrishna Math, Mylapore.




# Central Sanskrit University

Established by an Act of Parliament

Accredited with A++ grade by NAAC

## Shri Rajiv Gandhi Campus

Menase, Sringeri - 577139